र॰गं॰ श्रीमहागणपतये नमः॥ स्मृतापि तरुणातपं करुणया हरंती नृणामभंगुरतनुत्विषां वलयिता शतैर्वि
१ द्युतां॥ कलिंदगिरिनंदिनीतटसुरद्रुमालंबिनी मदीयमतिचुंबिनी भवतु कापि कादंबिनी॥१॥ श्रीमज्ज्ञा
नेंद्रभिक्षोरधिगतनिखिलब्रह्मविद्याप्रपंचः काणादीराक्षपादीरपि गहनगिरो यो महेंद्रादवेदीत्॥ दे
वादेवाध्यगीष्टस्मरहरनगरे शासनं जैमिनीयं शेषांकप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः॥२॥
पाषाणादपि पीयूषं स्यंदते यस्य लीलया॥ तं वंदे पेरुभट्टाख्यं लक्ष्मीकांतं महागुरुं॥३॥ निमग्नेन क्लेशैर्म
ननजलधेरंतरुदरं मयोन्नीतो लोके ललितरसगंगाधरमणिः॥ हरन्नंतर्ध्वांतं हृदयमधिरूढो गुणवता १
मलंकारान्सर्वानपि गलितगर्वान्रचयतु॥४॥ परिष्कुर्वंत्वर्थान्सहृदयधुरीणाः कतिपये तथापि क्लेशो

मे कथमपि गतार्थो न भविता॥ तिमींद्राः संक्षोभं विदधतु पयोधेः पुनरिमे किमेतेनायासो भवति विफ
लो मंदरगिरेः॥५॥ निर्माय नूतनमुदाहरणानुरूपं काव्यं मयात्र निहितं न परस्य किंचित्॥ किं सेव्यते
सुमनसां मनसापि गंधः कस्तूरिकाजननशक्तिभृता मृगेण॥६॥ मननतरितीर्णविद्यार्णवो जगन्नाथ
पंडितनरेंद्रः॥ रसगंगाधरनाम्नीं करोति कुतुकेन काव्यमीमांसां॥७॥ रसगंगाधरनामा संदर्भोऽयं चि
चिरंजयतु किंच कुलानि कवीनां निसर्गसभ्यं चिरंजयतु॥ तत्र कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्य
नेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविसहृदययोरावश्यकतया गुणालंकारादिभिर्निरूपणीये तस्मि
न्विशेष्यतावच्छेदकं तदितरभेदबुद्धौ साधनं च तल्लक्षणं तावन्निरूप्यते॥ रमणीयार्थप्रतिपादकः शब्दः

र०गं० काव्यं॥रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता॥लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वा
२ परपर्यायोऽनुभवसाक्षिको जातिविशेषः॥कारणं च तदवच्छिन्ने भावनाविशेषः पुनः पुनरनुसंधाना
त्मा॥पुत्रस्ते जातो धनं ते दास्यामीति वाक्यार्थधीजन्यस्याह्लादस्य न लोकोत्तरत्वमतो न तस्मिन्वाक्ये
काव्यत्वप्रसक्तिः॥इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वं यत्प्रतिपादितार्थविषय
कभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वं स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्ग
ण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति फलितं॥यत्तु प्राञ्चः॥अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्य २
मित्याहुः॥तत्र विचार्यते। शब्दार्थयुगलं न काव्यशब्दवाच्यं मानाभावात्॥काव्यमुच्चैः पठ्यते काव्यादर्थोऽव

गम्यते काव्यं श्रुतमर्थो न ज्ञात इत्यादिविश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थत्व
प्रतिपत्तेश्च॥ व्यवहारः शब्दमात्रे लक्षणयोपपादनीय इति चेत्॥स्यादप्येवं यदि काव्यपदार्थतया
८३ पराभिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यात्॥तदेव तु न पश्यामः
॥विमतं वाक्यं त्वश्रद्धेयमेव॥इत्थं चासति काव्यशब्दस्य शब्दार्थयुगलशक्तिग्राहके प्रमाणे प्रागुक्तव्य
वहारतः शब्दविशेषे सिध्यन्तीं शक्तिं को नाम निवारयितुमीष्टे॥एतेन विनिगमकाभावादुभयत्र शक्ति
रिति प्रत्युक्तं॥तदेवं शब्दविशेषस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तं न तु स्वकल्पितस्य
काव्यपदार्थस्य। एवं च वेदपुराणादिलक्षणेष्वपि गतिः। अन्यथा तत्रापीयं दुरवस्था स्यात्॥यत्त्वास्वादोद्बो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

र०गं०
३ ल-
ध्यान

धकत्वमेवकाव्यत्वप्रयोजकंतच्चशब्देचार्थेचाविशिष्टमित्याहुस्तन्न॥रागस्यापिरसव्यंजकतायाध्वनि
कारादिसकलालंकारिकसंमतत्वेनप्रकृतेलक्षणीयत्वापत्तेः॥किंबहुनानाट्यांगानांसर्वेषामपिप्राय
शस्तथात्वेनतत्त्वापत्तिर्दुर्वारैव॥एतेनरसोद्बोधसमर्थस्यैवात्रलक्षण[illegible]मित्यपिपरास्तं॥अपिचकाव्य
पदप्रवृत्तिनिमित्तंशब्दार्थयोर्व्यासक्तंप्रत्येकपर्याप्तंवानाद्यः॥एकोनद्वावितिव्यवहारस्येवश्लोकवा
क्यंनकाव्यमितिव्यवहारस्यापत्तेः॥नद्वितीयःएकस्मिन्पद्येकाव्यद्वयव्यवहारापत्तेः॥तस्माद्वेदशा
स्त्रपुराणलक्षणस्येवकाव्यलक्षणस्यापिशब्दनिष्ठतैवोचिता॥लक्षणेगुणालंकारादिनिवेशोपिनयु
क्तः॥उदितंमंडलंविधोरितिकाव्येदूत्यभिसारिकाविरहिण्यादिसमुदीरितेअभिसरणविधिनिषेधज्ञा २

वनाभावादिपरेगतोस्तमर्कइत्यादौचाव्याप्त्यापत्तेः॥नचेदमकाव्यमितिशक्यंवदितुं॥काव्यतयापरा
तजा भिमतस्यापिवक्तुंशक्यत्वात्॥काव्यजीवितंचमत्कारित्वंचाविशिष्टमेव॥गुणत्वालंकारत्वादेरनुगमा न
च्च॥दुष्टंकाव्यमितिव्यवहारस्यबाधकंविनालाक्षणिकत्वायोगाच्च॥नचसंयोगाभाववान्वृक्षःसंयो
गीतिवदंशभेदेनदोषरहितंदुष्टमितिव्यवहारेबाधकंनास्तीतिवाच्यंमूलेमहीरुहोविहंगमसंयोगी
गीशाखायामितिप्रतीतेरिवेदंपद्यंपूर्वार्द्धेकाव्यमुत्तरार्द्धेतुनकाव्यमितिस्वरसवाहिनोविश्वजनीना
नुभवस्याविरहादव्याप्यवृत्तितायाश्चापितस्याअयोगात्॥शौर्यादिवदात्मधर्माणांगुणानांहारादिव
दुपस्कारकाणामलंकाराणांचशरीरघटकत्वानुपपत्तेश्च॥यत्तुरसवदेवकाव्यमितिसाहित्यदर्पणे

र॰गं॰ निर्णीतिं।।तन्न।।वस्त्वलंकारप्रधानानांकाव्यानांअकाव्यतापत्तेः।नचेष्टापत्तिःमहाकविसंप्रदायस्याकुली
४ भावप्रसंगात्।।तथाचजलप्रवाहवेगनिपतनोत्पतनभ्रमणानिकविभिर्वर्णितानिकपिबालादिविल
सितानिच।।नचतत्रापियथाकथंचित्परंपरयारसस्पर्शोस्त्येवेतिवाच्यं।।ईदृशरसस्पर्शस्यगौश्चल
तिमृगोधावतीत्यादावतिप्रसक्तत्वेनाप्रयोजकत्वात्।।अर्थमात्रस्यविभावानुभावव्यभिचार्यन्यतम
त्वादितिदिक्।।तस्यचकारणंकेवलाकविगताप्रतिभासाचकाव्यघटनानुकूलशब्दार्थोपस्थितिः।।तद्ग
तंचप्रतिभात्वंकाव्यकारणतावच्छेदकतयासिद्धोजातिविशेषउपाधिस्वरूपमखंडंवा।।तस्याश्चहेतुः ४
क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टं।।क्वचिच्चविलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ।।नतुत्रयमेव।।

बालादेस्तौविनापिकेवलान्महापुरुषप्रसादादपिप्रतिभोत्पत्तेः।।नचतत्रतयोर्जन्मांतरीययोःकल्पनंवा
च्यं।।गौरवान्मानाभावात्कार्यस्यान्यथाप्युपपत्तेश्च।।लोकेहिबलवताप्रमाणेनागमादिनासतिकारण
तानिर्णयेपश्चादुपस्थितस्यव्यभिचारस्यवारणायजन्मांतरीयमन्यथानुपपत्त्याकारणंधर्मादिकल्प्यतेअ
न्यथातुव्यभिचारोपस्थित्यापूर्ववृत्तकारणतानिर्णयेभ्रमत्वप्रतिपत्तिरेवजायते।।नापिकेवलमदृष्टमेवका
रणमित्यपिशक्यंवदितुं।।कियंतंचित्कालंकाव्यंकर्त्तुअशक्नुवतःकथमपिसंजातयोर्व्युत्पत्त्यभ्यासयोःप्रति
भायाःप्रादुर्भावस्यदर्शनात्।।तत्राप्यदृष्टांगीकारेप्रागपिताभ्यांतस्याःप्रसक्तेः।।नचतत्रप्रतिभायाःप्रतिबं
धकमदृष्टांतरंकल्प्यमितिवाच्यं।।तादृशानेकस्थलगतादृष्टद्वयकल्पनापेक्षयाक्लृप्तव्युत्पत्त्यभ्यासयोरेव भ्या॰

रं॰गं॰ प्रतिभाहेतुत्वकल्पनेलाघवादतःप्रागुक्तसरणिरेवज्यायसी॥तादृशादृष्टस्यतादृशव्युत्पत्त्यभ्यासयोश्चप्रति
६ भागतवैलक्षण्यंकार्यतावच्छेदकमतोनव्यभिचारः॥प्रतिभात्वंचकवितायाःकारणतावच्छेदकं॥प्रतिभाग
भो– तवैलक्षण्यमेववाविलक्षणकाव्यप्रतीतिनात्रापिसः॥नचसतोरपिव्युत्पत्त्यभ्यासयोर्यत्रनप्रतिभोत्पत्तिस्त
त्रान्वयव्यभिचारइतिवाच्यं॥तत्रतयोस्तादृशवैलक्षण्यमानाभावेनकारणतावच्छेदकानवच्छिन्नत्वात्॥
पापविशेषस्यतत्रप्रतिबंधकत्वकल्पनाद्वानदोषः॥प्रतिबंधकाभावस्यचकारणतासमुदितशक्त्यादि
त्रयहेतुतावादिनःशक्तिमात्रहेतुतावादिनश्चाविशिष्टा॥प्रतिवादिनामंत्रादिभिःकृतेकतिपयदिवसव्या
पिनिवाक्स्तंभेविहितानेकप्रबंधस्यापिकवेःकाव्यानुदयस्यदर्शनात्॥तच्चोत्तमोत्तमोत्तममध्यमाधम

MEMORIAL

भेदाच्चतुर्धा॥शब्दार्थौयत्रगुणीभावितात्मानौकमप्यर्थमभिव्यंक्तस्तदाद्यं॥कमपीतिचमत्कृतिभूमिंतेना
तिगूढस्फुटव्यंग्ययोर्निरासः॥अपरांगवाच्यसिध्यंगव्यंग्यस्यापिचमत्कारितयातद्धारणायगुणीभावि
तात्मानावितिस्वापेक्षयाव्यंग्यप्राधान्याभिप्रायकं॥उदाहरणं॥शयितासविधेप्यनीश्वरासफलीकर्तु
महोमनोरथान्॥दयितादयिताननांबुजंदरमीलन्नयनानिरीक्षते॥अत्रालंबनस्यनायकस्यसविध
शयनाक्षिप्तस्यरहःस्थानादेरुद्दीपनस्यविभावस्यतादृशनिरीक्षणादेरनुभावस्यत्रपौत्सुक्यादेश्चव्यभि
चारिणःसंयोगाद्रतिरभिव्यज्यते॥आलंबनादीनांस्वरूपंवक्ष्यते॥नचयद्ययंशयानःस्यात्तदातदाननां
बुजंचुंबेयमितिनायिकेच्छायाएवव्यंग्यत्वमत्रेतिवाच्यं॥मनोरथान्सफलीकर्तुमसमर्थेत्यनेनमनोरथाः

र॰गं सर्वस्याहृदितिष्ठंतीतिप्रतीतेः॥स्वशब्देनमनोरथपदेनसामान्याकारेणताहृशेछायाअभिनिवेदनात्॥ पि-
६ नचमनोरथपदेनमनोरथत्वाकारेणसामान्येनेछायाअभिधानेपिचुंबेयमितिविषयविशेषविशिष्टछात्वे
नव्यंग्यत्वेकिंबाधकमितिवाच्यं॥चमत्कारोनस्यादित्यस्यैवबाधकत्वात्॥नहिविशेषाकारेणव्यंग्योपिसामा
न्याकारेणाभिहितोर्थःसहृदयानांचमत्कृतिमुत्पादयितुमीष्टे॥कथमपिवाच्यवृत्त्यनालिंगितस्यैवव्यंग्यचे
स्येमत्कारित्वेनालंकारिकैस्स्वीकारात्॥चुंबनेछायारत्यनुभावतयैवसुंदरत्वेनतदव्यंजनेचुंबामीतिश
ब्दवत्काचुंबनेछावदचमत्कारित्वाच्च॥एवंत्रपायाअपिनप्राधान्येनव्यंग्यत्वं॥अनुभावतावच्छेदकतयाप्रती ६.वाच्य-
तायांतस्यांमुख्यवाक्यार्थत्वायोगात्॥नचदरमीलन्नयनत्वविशिष्टनिरीक्षणंविधेयमितिनानुभावतावच्छे वाच्य-

न२

दकत्वंतस्याहृतिवाच्यं॥एवमपिनयनगतदरमीलनस्यतत्कार्यत्वेपिदरमीलन्नयनत्वविशिष्टनिरीक्षण
स्यरतिमात्रकार्यत्वात्॥त्रपायाएवमुख्यत्वेव्यंग्यत्वेनिरीक्षणोक्तेरनतिप्रयोजनकत्वापत्तेः वाच्यवृत्त्यार
तेरनुभावेनिरीक्षणेत्रपायाअनुभावस्यदरमीलनस्यैवव्यंजनयातस्यांतस्याअपिगुणीभावप्रत्ययौचि
त्यात्॥यथावा॥गुरुमध्यगतामयानतांगीनिहतानीरजकोरकेणमंदं॥दरकुंडलतांडवंनतभ्रूलतिकं
मामवलोक्यघूर्णितासीत्॥अत्रघूर्णितासीदित्यनेनासमीक्ष्यकारिन्किमिदमनुचितंकृतवानसीत्यर्थसं
वलितामर्षश्चर्वणाविश्रांतिधामत्वात्प्राधान्येनव्यज्यते॥तत्रशब्दार्थश्चगुणः॥यथावा॥तल्पगतापिचसुत
नुःश्वासासंगंनयासेहे॥संप्रतिसाहृदयगतंप्रियपाणिंमंदमाक्षिपति॥इदंचपद्यमस्निर्मितप्रतिबंधगत

र०गं त्वेनपूर्वसापेक्षमितिदिङ्मात्रेणव्याख्यायते॥यावन्नेववधूःपर्यंकशायिताश्वासस्यासंगमात्रेणापिसंकुचदं
७ गलतिकामृत्सासंप्रतिप्रस्थानपूर्वरजन्यांप्रवत्स्यत्पतिकाप्रियेणसशंकेनसमर्पितंहृदिपाणिंनववधूजा
तिस्वाभाव्यादाक्षिपतिपरंतुमंदं॥अत्रशनैःस्वस्थानप्रापणात्मनामंदाक्षेपेणरत्याख्यःस्थायीसंलक्ष्यक्र
मतयाव्यज्यते॥उपपादयिष्यतेचरसाद्यादीनामपिसंलक्ष्यक्रमव्यंग्यत्वं॥अमुमेवचप्रभेदंध्वनिमामनंति॥
यत्तुचित्रमीमांसायांअप्पयदीक्षितैर्निःशेषच्युतचंदनमितिपद्यंध्वन्युदाहरणप्रसंगेव्याख्यातं॥उत्तरीय
कर्षणेनचंदनच्युतिरित्यन्यथासिद्धिपरिहारायनिःशेषग्रहणं॥ततश्चंदनच्युतेःस्नानसाधारण्यव्याव ७
र्तनेनसंभोगचिन्होद्घाटनायतटग्रहणं॥स्नानेहिसर्वत्रचंदनच्युतिःस्यात्तवतुस्तनयोस्तटउपरि

भागएवदृश्यतइतीयमाश्लेषकृतैव॥तथानिर्मृष्टरागोधरइत्यत्रतांबूलग्रहणविलंबात्प्राचीनरागस्य
किंचिन्मृष्टतेत्यन्यथासिद्धिपरिहारायनिर्मृष्टरागइतिरागस्यनिःशेषमृष्टतोक्ता॥पुनःस्नानसाधारण्यव्या
वर्तनेनसंभोगचिह्नोद्घाटनायाधरइतिविशिष्यग्रहणं॥उत्तरोष्ठेसरागेधरोष्ठमात्रस्यनिर्मृष्टरागताचुंब
नकृतैवेत्यादिनाइदमपिध्वनेरुदाहरणमित्यंतेनसंदर्भेणतटादिघटितवाक्यार्थाःस्नानव्यावृत्तिद्वारासं
भोगांगानामाश्लेषचुंबनादीनांप्रतिपादनेनप्रधानव्यंग्यव्यंजनेसाहाय्यकमाचरंतीति॥तदेतदलंकारशा
त- स्त्रतत्त्वानवबोधनिबंधनं॥प्राचीनसकलग्रंथविरुद्धत्वादुपपत्तिविरोधाच्च॥तथाहिपंचमोल्लासशेषेनिः
शेषत्यादौगमकतयायानिचंदनच्यवनादीन्युपात्तानितानिकारणांतरतोपिभवंति॥यतश्चात्रैवस्नानका

र॰गं॰ यैस्त्वं नोपात्तानीति नोपभोग एव प्रतिबद्धानीति अनैकांतिकानीति काव्यप्रकाशकृतोक्तं॥ तथाच तत्रैव तेन
८ भमधम्मि अविसद्धं इत्यादौ लिंगजलिंगिज्ञानरूपेणानुमानेन व्यक्तिंगतार्थयतो व्यक्तिविवेककृतो मतंत्र
स्याचक्षाणेन व्यभिचारित्वेनासिद्धत्वेन च संदिग्धमानोऽपि लिंगाव्यंजनमभ्युपगतं॥ इत्थमेव च ध्वनिकृ द-थ-
तापि प्रथमोद्योते॥ एवं च व्यंजकानां साधारण्यं प्रतिपादयतां प्रामाणिकानां ग्रंथैः सहासाधारण्यं प्रतिपा
दयतस्तव ग्रंथस्य विरोधः स्फुटः॥ किंच यदिदं निःशेषेत्याद्यवांतरवाक्यार्थानां वापीस्नानव्यावृत्तिद्वारेण व्यं
ग्यासाधारण्यं संपाद्यते तत्किमर्थमिति पृच्छामः॥ व्यंग्यव्यंजनार्थमिति चेन्न॥ व्यंजकतासाधारण्यस्य ८
व्यंजनानुपायत्वात्॥ औणिंदं दोब्बद्दं चिंता अलसत्तणं सणिस्ससिअं मह मंदभाइणीए केरं सहि तुह वि

परिभव इ इत्यादौ साधारणानामेवौन्निद्र्यादीनां वक्त्रादिवैशिष्ट्यवशादर्थविशेषव्यंजकतायाअभ्युपगतेः
॥ प्रत्युतासाधारण्यस्य व्याप्यपरपर्यायस्यानुमानानुकूलतया व्यक्तिप्रतिकूलत्वाच्च॥ अथ तटादिघटितत्वे
पि न निःशेषेत्यादिवाक्यार्थानामसाधारण्यं॥ सलिलार्द्रवसनकरणकप्रोंछनादिनापि तत्संभवादिति चेत्
॥ तर्हि वापीस्नानव्यावर्त्तनेन कः पुरुषार्थः एकत्रानैकांतिकत्वस्येव बहुघनैकांतिकतायाअपि ज्ञातायाअ
नुमितिप्रतिकूलत्वात्॥ व्यक्त्यप्रतिकूलत्वाच्च॥ अपिच॥ अत्र हि तदंतिकमेव रंतुगतासीति व्यंग्यशरीरे तदं
तिकगमनं रमणरूपफलांशश्चेति द्वयं घटकं॥ तत्र तावत्तदंतिकंगतासीत्यंशस्य त्वन्मते व्यंग्यत्वं दुरुपपादं
त्वदुक्तरीत्या विशेषणवाक्यार्थानां निःशेषेत्यादिप्रतिपाद्यानां वाच्यार्थे वापीस्नाने बाधितत्वाद्वाच्यकेऽवगत क्षा-

र॰गं॰ प्रधानवाक्यार्थीभूतविधिनिषेधप्रतिपादकाभ्यांगतानगतेतिशब्दाभ्यांविरोधि[illegible]लक्षणयानिषे
१ धस्यविधेश्चप्रतीतेरुपपत्तेः॥नहिमुख्यार्थबाधेनोन्मीलितेर्थेव्यक्तिवेद्यतोचितायथा॥अहोपूर्णसरो
यत्रलुठंतःस्नातिमानवाइति॥अत्रकस्य विशेषणानुपूर्त्यधीनोल्लासेपूर्णत्वाभावे॥अथतदंतिकगमनस्य दृ-प-B
लक्षणावेद्यत्वेपिरमणस्यफलांशस्यलक्ष्यशक्तिमूलध्वननवेद्यत्वमव्याहतमेवेतिचेत्तर्हि॥अधमत्वम
पकृष्टत्वंतच्चजात्याकर्मणावाभवतितत्रजात्यापकर्षेणोत्तमनायिकानायकस्यवर्ण्यतेत्यादिनासंदर्भेण
तस्यापिभवनेवार्थापत्तिवेद्यतायास्फुटंवचनात्॥अन्यलभ्यस्यचशब्दार्थतायाअस्वीकृतेः॥अन्यच्च॥ १
यथाकथंचिदंगीकुरुवात्रव्यंजनव्यापारंतथापिनतवेष्टसिद्धिःवाच्यानांनिःशेषच्युतचंदनतटत्वादीना

मधमत्वस्यचत्वदुक्तरीत्याप्रकारांतरेणानुपद्यमानतयादूतीसंभोगमात्रनिष्पाद्यत्वेनगुणीभूतव्यंग्यत्व
प्रसंगात्॥एवंचोपपत्तिविरोधोपिस्फुटतरएव॥तस्माद्वाच्यार्थसाधारण्यमेवोचितमतिविधेर्दनायिका
निरूपितानांविशेषणवाक्यार्थानां॥तथाहि॥अस्याबांधवजनस्याज्ञातपीडागमेस्वार्थपरायणेस्नानकाला
व- तिक्रमभयेर्शननदीसमदीयप्रिययोरंतिकमगत्वैववापींस्नातुमितोममांतिकाद्गतासिनपुनस्तस्यपरवे
दनानभिज्ञतयादुःखदात्वेनाधमस्यांतिकं॥यतोनिःशेषच्युतचंदनंस्तनयोस्तटमेवनोरस्थलं॥वापीग
तवकुलयुवजनत्रपापारवश्यादंसद्वयलग्नामस्वस्तिकीकृतभुजलतायुगलेनतटस्येवोन्नततयामुहुरा
मर्शात्॥एवंत्वयासम्यगक्षालनेनोत्तरोष्ठानिमृष्टरागोधरस्तुतदपेक्षयागंडूषजलरदनशोधनांगुल्या

र०गं० दीनामधिकंसंमर्दनमावहतीतितथा॥ किंचसम्यगक्षालनैनननेत्रेजलमात्रसंसर्गाद्दूरमुपरिभागएवानं
१० जनैश्रीतवशगत्तानवाञ्चतनवतनुःपुलकितेति॥ एवंतस्याविदग्धायागूढतात्पर्यतयैवोक्तिरुचिता॥ अ
न्यथावैदग्ध्यभंगापत्तेः॥ एवंसाधारणधर्मेषुवाक्यार्थेषुमुख्यार्थबाधाभावात्तात्पर्यार्थस्यचझटित्यनाकल
-निम्ने: B नात्कुतोत्रलक्षणावकाशोनंतरंचवाच्यार्थप्रतीतेः॥ वक्तृबोद्धव्यनायकादीनांवैशिष्ट्यस्यप्रतीतौसत्या
मधमपदेनस्वप्रवृत्तिप्रयोजकोदुःखदातृत्वरूपोधर्मःसाधारणात्मावाच्यार्थदशायामपराधांतरनिमित्तक
दुःखदातृत्वरूपेणास्थितोव्यंजनव्यापारेणदूतीसंभोगनिमित्तकदुःखदातृत्वाकारेणपर्यवस्यतीत्यालंका १०
रिकसिद्धांतनिष्कर्षः॥ एतेनाधमत्वमपकृष्टत्वंतच्चजात्याकर्मणावाभवति॥ तत्रजात्यापकर्षेणोत्तम

व- नायिकानायकस्ययुक्तिनापिस्वापराधपर्यवसायिदूतीसंभोगादिहीनकर्मातिरिक्तेनकर्मणा॥ तादृशं
चदूतीसंप्रेषणात्प्राचीनंसोढमेवेतिनोद्घाटनार्हमितिद्वमरव्यावृत्त्यासंभोगरूपमेवपर्यवस्यतीति
यदुक्तंतदपिनिरस्तं॥ विदग्धोत्तमनायिकायाःसखीसमक्षंतदुपभोगरूपस्यस्वनायकापराधस्यस्फुटं
प्रकाशयितुमतितमामनौचित्येनप्राचीनानामेवसोढानामप्यपराधानामसह्यतयादूतींप्रतिप्रतिपिपा
दयिषितत्वादितिदिक्॥ यत्रव्यंग्यमप्रधानमेवसच्चमत्कारकारणंतद्द्वितीयं॥ वाच्यापेक्षयाप्रधानीभूतंव्यंग्यां ल-
ग| सा| तरमादायगुणीभूतंव्यंग्यमादायातिव्याप्तिवारणायावधारणं॥ तेनतस्यध्वनित्वमेव॥ लीनव्यंग्यवाच्यचित्रा
तिप्रसंगवारणायचमत्कारेत्यादि॥ यत्तुअतादृशिगुणीभूतव्यंग्यमित्यादिकाव्यप्रकाशगतलक्षणेचित्रान्यत्वं

टीकाकारैर्दत्तं॥तन्न॥पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येष्वव्याप्त्यापत्तेः॥तेषांगुणीभूतव्यंग्यतायाश्चित्रता-
याश्चसर्वालंकारिकसंमतत्वात्॥उदाराघवविरहज्वालासंतापितसह्यशैलशिखरेषु॥शिशिरंसुखंशयानाः
कपयःकुर्वंतिपवनतनयाय॥अत्रजानकीकुशलावेदनेनराघवःशिशिरीकृतइतिव्यंग्यमाकस्मिककपिकर्तृक-
हनूमद्विषयककोपोपपादकतयागुणीभूतमपिदुर्दैववशतोदास्यमनुभवद्राजकलत्रमिवकामपिकमनी-
यतामावहति॥नन्वेवंप्रागुक्तमाक्षेपगतंमाद्यमपिनैवंधूमप्रकृतिविरोधादनुपपद्यमानंव्यंग्येनैवोपपाद्यतइति-
त्थमुत्तमंगतमतस्तस्यकाव्यस्येतिचेन्न॥यतोहिअनुदिनंसख्युपदेशादिभिरनतिचमत्कारिभिरप्युपपद्यमानंमा-
द्यमिदंप्रथमचित्तचुंबिनींविप्रलंभरतिमप्रकाशयन्नप्रभवति॥स्वातंत्र्येणपरनिर्वृत्तिचर्वणागोचरतामाधातुं॥इत्थ-

DR BHAU DAJI

मेवनिःशेषच्युतचंदनेत्यादिषुपद्येषुअधमत्वादीनिवाच्यानिव्यंग्यातिरिक्तेनार्थेनापाततोनिष्पन्नशरीराणिव्यंजका-
नीतिनतत्रापिगुणीभावःशंकनीयः॥अनयोर्भेदयोरनपह्नवनीयचमत्कारयोरपिप्राधान्याप्राधान्याभ्यामस्तिकश्चि-
त्सहृदयवेद्योविशेषः॥यत्तुचित्रमीमांसाकृतोक्तं॥प्रहरविरतौमध्येवाह्नस्ततोपिपरेणवाकिमुतसकलेयातेवा-
ह्निप्रियत्वमिहैष्यसि॥इतिदिनशतप्राप्यंदेशंप्रियस्ययियासतोहरतिगमनंबालालापैःसबाष्पगलज्जलैरित्य-
त्रनकेवलंमहःपरमावधिस्ततःपरंप्राणान्धारयितुंनशक्नोमीतिव्यंग्यंप्रियगमननिवारणरूपवाच्यसिध्यंगमतोगु-
णीभूतव्यंग्यमिति॥तन्न॥सबाष्पगलज्जलानांप्रहरविरतावित्याद्यालापानामेवप्रियगमननिवारणरूपवाच्यसि-
ध्यंगतयाव्यंग्यस्यगुणीभावाभावात्॥आलापैरितितृतीययाप्रकृत्यर्थस्यआलापस्यहरणक्रियाकरणतायाः

र॰गं॰ स्फुटंप्रतिपत्तेः॥नन्वव्यंग्यस्यापिवाच्यसिध्यंगतात्रसंभवतीतितथोक्तमितिवाच्यं॥निःशेषच्युतचंदनमित्यादा
१२ वध्यधमत्वरूपवाच्यसिध्यंगतायादूतीसंभोगादेरसंभवाद्गुणीभावापत्तेः॥अस्तुवाततःपरंप्राणान्धारयितुं
नशक्नोमीतिव्यंग्यस्यवाच्यसिध्यंगतयागुणीभावस्तथापिनायकादेर्विभावस्यबाष्पादेरनुभावस्यचिंतावेगादे
श्चसंचारिणःसंयोगादभिव्यज्यमानेनविप्रलंभेनध्वनित्वंकोनिवारयेत्॥यत्रव्यंग्यचमत्कारासमानाधिक
रण्येनवाच्यचमत्कारस्तत्तृतीयं॥यथायमुनावर्णनेतनयमैनाकगवेषणलंबीकृतजलधिजठरप्रविष्टहिमगि त|
रिभुजायमानायाभगवत्याःभागीरथ्याःसखीति॥अत्रोत्प्रेक्षावाच्यैवचमत्कृतेर्हेतुः॥शैत्यपातालचुंबित्वादी १२
नांचमत्कारोलेशतःसन्नपितूत्प्रेक्षाचमत्कृतिजठरनिलीनोनागरिकेतरनायिकाकल्पितकाश्मीरद्रवांगराग

ग| निगीर्णोनिजांगौरीरिमेवप्रतीयते॥नतादृशोस्तिकोपिवाच्यार्थोयोमनागनाम्रष्टप्रतीयमानएववस्तुतोर
मणीयतामाधातुंप्रभवति॥अनयोरेवद्वितीयतृतीययोर्भेदयोर्जागरूकाजागरूकगुणीभूतव्यंग्ययोःप्रविष्टं
निखिलमलंकारप्रधानंकाव्यं॥यत्रार्थचमत्कृत्युपस्कृताशब्दचमत्कृतिःप्रधानंतदधमंचतुर्थं॥यथामि-
त्रात्रिपुत्रनेत्रायत्रयीशात्रवशत्रवे॥गोत्रारिगोत्रजत्रायगोत्रात्रेतेनमोनमः॥अत्रार्थचमत्कृतिः
शब्दचमत्कृतौलीना॥यद्यपियत्रार्थचमत्कृतिसामान्यशून्याशब्दचमत्कृतिस्तत्पंचममधमाधममपिका
व्यविधास्संगणयितुमुचितंयथैकाक्षरपद्यार्धावृत्तियमकपद्मबंधादि॥तथापिरमणीयार्थप्रतिपादकश
ब्दतारूपकाव्यसामान्यलक्षणाक्रांततयावस्तुतःकाव्यत्वाभावेनमहाकविभिःप्राचीनपरंप ल|

तत्र र॰गं॰ रामनुरुंधानैस्तत्र काव्येषु निबद्धमपि नास्माभिर्गणितं वस्तुस्थिते रेवानुरोध्यत्वात्॥ केचिदिमानपि चतुरो
१३ भेदानगणयंत उत्तममध्यमाधमभावेन त्रिविधमेव काव्यमाचक्षते॥ तत्रार्थचित्रशब्दचित्रयोरविशे
षेणाधमत्वमयुक्तं वक्तुं तारतम्यस्य स्फुटमुपलब्धेः। को ह्येवं सहृदयः सन्विनिर्गतं मानदमात्ममंदिरात्, श्लो:
सच्छिन्नमूलः क्षतजेन रेणुरित्यादिभिः काव्यैः स्वच्छंदोच्छलदित्यादीनां पामरश्लाघ्यानामविशेषं ब्रूयात्॥
सत्यपि तारतम्ये यद्येकभेदत्वं कस्तर्हि ध्वनिगुणीभूतव्यंग्ययोरीषदंतरयोर्विभिन्नभेदत्वे दुराग्रहः॥ य
त्र च शब्दार्थचमत्कृत्योरेकाधिकरण्यं तत्र तयोर्गुणप्रधानभावं पर्यालोच्य यथालक्षणं व्यवहर्त्तव्यं सम १३
प्राधान्ये तु मध्यमतैव॥ यथा। उल्लासः फुल्लपंकेरुहपटलपतन्मत्तपुष्पंधयानां निस्तारः शोकदावानलविक

लहृदां कोकसीमंतिनीनां॥ उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः संघातः कोपि धाम्नामयमुदय
गिरिप्रांततः प्रादुरास्ते॥ अत्र वृत्त्यनुप्रासप्राचुर्यादोजोगुणप्रकाशकत्वाच्च शब्दस्य प्रसादगुणयोगादनंतरमे
वाधिगतस्य रूपकस्य हेत्वलंकारस्य वाच्यस्य च चमत्कृत्योस्तुल्यस्कंधत्वात्समैव प्राधान्यं॥ तत्र ध्वनेरुत्तमो म-
त्तमस्यासंख्यभेदस्यापि सामान्यतः केपि भेदा निरूप्यंते॥ द्विविधो ध्वनिरभिधामूलो लक्षणामूलश्च॥ तत्राद्यस्त्रि
विधो रसवस्त्वलंकारध्वनिभेदात्॥ रसध्वनिरित्यलक्ष्यक्रमोपलक्षणात् रसभावतदाभासभावशांतिभावो
दयभावसंधिभावशबलत्वानां ग्रहणं॥ द्वितीयश्च द्विविधोर्थांतरसंक्रमितवाच्योत्यंततिरस्कृतवाच्यश्च॥ ए
वं पंचात्मके ध्वनौ परमरमणीयतया रसध्वनेस्तदात्मा रसस्तावदभिधीयते॥ समुचितललितसंनिवेशचारु

र॰गं॰ णाकाव्येनसमर्पितैःसहृदयहृदयंप्रविष्टैस्तदीयसहृदयतासहकृतेनभावनाविशेषमहिम्नाविगलितदु
१४ ष्यंतरमणीत्वादिभिरलौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैःशकुंतलादिभिरालंबनकारणैश्चंद्रि
कादिभिरुद्दीपनकारणैरश्रुपातादिभिःकार्यैश्चिंतादिभिःसहकारिभिश्चसंभूयप्रादुर्भावितेनालौकिकेनव्या
पारेणतत्कालनिवर्तितानंदांशावरणाज्ञानेनातएवप्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेणप्रमात्रास्वप्रकाश
तयावास्तवेननिजस्वरूपानंदेनसहगोचरीक्रियमाणःप्राग्विनिविष्टवासनारूपोरत्यादिरेवरसः॥तथाचाहुः॥व्य
क्तःसतैर्विभावाद्यैःस्थायीभावोरसःस्मृतइति॥व्यक्तोव्यक्तिविषयीकृतः।व्यक्तिश्चभग्नावरणाचित्॥यथाहिशश १४
रावादिनापिहितोदीपस्तन्निवृत्तौसंनिहितान्पदार्थान्प्रकाशयतिस्वयंचप्रकाशतएवमात्मचैतन्यंविभा न्

२- वादिसंवलितान्रत्यादीन्॥अंतःकरणधर्माणांसाक्षिभास्यत्वाभ्युपगतेः॥विभावादीनामपिस्वप्नतुरगादीना म-
मिवरंगारजतादीनामिवसाक्षिभास्यत्वमविरुद्धं॥व्यंजकविभावादिचर्वणायाआवरणभंगस्यवोत्पत्तिविना
शाभ्यामुत्पत्तिविनाशौरसेउपचर्येते॥वर्णनित्यतायामिवव्यंजकताल्वादिव्यापारस्यगकारादौविभावादि
चर्वणावधित्वादावरणभंगस्य॥निवृत्तायांतस्यांप्रकाशस्यावृतत्वाद्विद्यमानोपिस्थायीनप्रकाशते॥यद्वा॥
विभावादिचर्वणामहिम्नासहृदयस्यनिजसहृदयतावशोन्मिषितेनतत्तद्रत्याद्युपहितस्वस्वरूपानंदाकारास
माधाविवयोगिनश्चित्तवृत्तिरुपजायते॥तन्मयीभवनमितियावत्॥आनंदोह्ययंनलौकिकसुखांतरसाधारणो
ऽनंतःकरणवृत्तिरूपत्वात्॥इत्थंचाभिनवगुप्तमम्मटभट्टादिग्रंथस्वारस्येनभग्नावरणाचिद्विशिष्टोरत्यादिः

यो र॰गं॰ स्थायिभावोरसइतिस्थितं॥वस्तुतस्तुवक्ष्यमाणश्रुतिस्वारस्येनरत्याद्यवच्छिन्नाभग्नावरणाचिदेवरसः॥सर्व
१९ थैवचास्यविशिष्टात्मनोविशेषणंविशेष्यंवाचिदंशमादायनित्यत्वंस्वप्रकाशत्वंचसिद्धं॥रत्याद्यंशमादाय
त्वनित्यत्वमितरभास्यत्वंच॥चर्वणाचास्यचिद्गतावरणभंगएवप्रागुक्तातदाकारांतःकरणवृत्तिर्वाइयंच कृ—/
परब्रह्मास्वादात्समाधेर्विलक्षणाविभावादिविषयसंवलितचिदानंदालंबनत्वात्॥भाव्याचकाव्यव्यापार
मात्रात्॥अथास्यांसुखांशभानेकिंमानमितिचेत्समाधावपितद्भानेकिंमानमितिपर्यनुयोगस्यतुल्यत्वा
त्॥स्वरूपमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियमित्यादिशास्त्रमस्तितत्रमानमितिचेत्॥अस्यत्रापिरसोवैसः॥रसं १९
क्ष्वा—| ह्येवायंलब्ध्वानंदीभवतीतिश्रुतिःसकलसहृदयप्रत्यक्षंचेतिप्रमाणद्वयं॥येयंद्वितीयपक्षेतदाकारचित्तवृत्ति

स्मिकारसचर्वणेपन्यस्तासाशब्दव्यापारभाव्यत्वात्अपरोक्षसुखालंबनत्वाच्चापरोक्षात्मिअपरोक्षात्म रात्क्षि|न्ना|
कत्वंवाक्यजबुद्धिवदित्याहुरभिनवगुप्तपादाचार्याः॥भट्टनायकास्तुताटस्थ्येनरसप्रतीतावनास्वाद्यत्वमा
त्मगतत्वेनतुप्रत्ययोदुर्घटः॥शकुंतलादीनांसामाजिकान्प्रत्यविभावत्वात्विनाविभावमनालंबनस्यर
त्यादेरप्रतिपत्तेः॥नचकांतात्वंसाधारणंविभावतावच्छेदकमत्राप्यस्तीतीवाच्यं॥अप्रामाण्यनिश्चयानालिंगि
तागम्यात्वप्रकारकज्ञानविरहस्यविशेषतासंबंधावच्छिन्नप्रतियोगित्ताकस्यविभावतावच्छेदककोटावश्यंनि ष्य—|
वेश्यत्वात्॥अन्यथास्वस्रादेरपिकांतात्वादिनात्वापत्तेः॥एवमशोच्यत्वकापुरुषत्वादिज्ञानाविरहस्यतथावि
धस्यकरुणरसादौतादृशज्ञानानुत्पादस्तुतत्प्रतिबंधकांतरनिर्वचनमंतरेणदुरुपपादः॥स्वात्मनिदुःखंताद्य
विशेष

र॰गं॰ भेदबुद्धिरेव न तथेति चेत्॥ न नायके धराधौरेयधीरत्वादेरात्मनि चाधुनिककापुरुषत्वादेर्वैधर्म्यस्य स्फुटं प्रति ल-|
१६ पत्तेरभेदबोधस्यैव दुर्लभत्वात्॥ किंच केयं प्रतीतिः॥ प्रमाणान्तरानुपस्थानाच्छाब्दीति चेन्न व्यावहारिकशब्दा
न्तरजन्यनायकमिथुनवृत्तान्तवित्तीनामिवास्या अप्यहृद्यत्वापत्तेः॥ नापि मानसी चिंतोपनीतानां तेषामेव
पदार्थानां मानस्याः प्रतीतेरस्या वैलक्षण्योपलंभात्। न च स्मृतिस्तथा प्रागननुभवात्॥ तस्मादभिधयानि
वेदिताः पदार्था भावकत्वव्यापारेणागम्यात्वादिरसविरोधिज्ञानप्रतिबंधद्वाराकांतात्वा[illegible]रसानुकूलध- दि-|
ल-/ र्मपुरस्कारेणात्थाप्यंते॥ एवं धासोरणीकृतेषु दुष्यंतशकुंतलादेशकालवयोवस्थादिषु पंगोपूर्वव्यापार १६
महिमनि तृतीयस्यैवं भोगकृत्वव्यापारस्य महिम्ना निगीर्णयो रजस्तमसोरुद्रिक्तसत्वजनितेन निज[illegible]स्वभा- चि-

न वनिवृत्तिविश्रांतिलक्षणेन साक्षात्कारेण विषयीकृतो भावनोपनीतसाधारणात्मा रत्यादिः स्थायी रसः
तत्र भुज्यमानो रत्यादिः रत्यादिभोगो वैत्युभयमेव रसः सोयं भोगो विषयसंवलनादूषणास्वादनविध
वर्तीत्युच्यते एवं च त्रयोंशाः काव्यस्याभिधाभावनाचैव तद्भोगकृतिरेव चेत्याहुः॥ मतेस्यैतस्य पूर्वस्मा
न्मतात् भावकत्वव्यापारांतरस्वीकार एव विशेषः॥ भोगस्तु व्यक्तिभोक्तृत्वं तु व्यंजनादिविशिष्टमन्यातु से
वसरणिः॥ नव्यास्तु काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यंजनव्यापारेण दुष्यंतादा
शकुंतलादिरतौ गृहीतायामनंतरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पित
दुष्यंतत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखंडः समुत्पद्यमानो निर्वचनीयः सा [illegible]

क्षिभास्यशकुंतलादिविषयरत्यादिरेवरसः॥अयंचकार्योदोषविशेषस्यनाश्यश्चतन्नाशस्यचोत्तरभाविना
लोकोत्तराह्लादेनभेदाग्रहात्सुखपदव्यपदेश्योभवतिस्वपूर्वापरस्थितेनरत्यादिनातदग्रहात्तद्भ्रांतित्वेनैक
त्वाध्यवसानाद्भंगश्चवर्णनीयश्चोच्यते॥अवच्छादकंदुष्यंतत्वमप्यनिर्वचनीयमेव॥अवच्छादकत्वंचरत्यादिवि
विशिष्टबोधेविशेष्यतावच्छेदकत्वं॥एतेनदुष्यंतादिनिष्ठस्यरत्यादेरनास्वाद्यत्वान्नरसत्वं॥स्वनिष्ठस्यतुश
कुंतलादिभिरेतत्संबंधिभिःकथमभिव्यक्तिःस्वस्मिन्दुष्यंताद्यभेदबुद्धिस्तुबाधबुद्धिपराहतेत्यादिकमपास्तं॥
यदपिविभावादीनांसाधारण्यंप्राचीनैरुक्तंतदपिकाव्येनशकुंतलादिशब्दैःशकुंतलात्वादिप्रकारकत्वेंबोधे
जनकैःप्रतिपाद्यमानेषुशकुंतलादिषुदोषविशेषकल्पनंविनादुरुपपादमतोवश्यकल्प्योदोषविशेषस्तेनैव

DR BHAU DAJI

जनकैःप्रतिपाद्यमानेषुशकुंतलादिषुदोषविशेषकल्पनंविनादुरुपपादमतोवश्यकल्प्योदोषविशेषस्तेनैव

स्वात्मनिदुष्यंताद्यभेदबुद्धिरपिसूपपादा॥नन्वेवमपिरतेरस्तुनामदुष्यंतइवसहृदयेपिसुखविशेषजनकता
करुणरसादिषुतूस्थायिनःशोकादेर्दुःखजनकतयाप्रसिद्धस्यकथमिवसहृदयाह्लादहेतुत्वं॥प्रत्युतइवनाय
कइवसहृदयेपिदुःखजननस्यैवौचित्यात्॥नचसत्यशोकादेर्दुःखजनकत्वंकॢप्तंनकल्पितस्येतिनायकानामे
वदुःखंनसहृदयस्येतिवाच्यं॥रज्जुसर्पादेर्भयकंपाद्यनुत्पादकतापत्तेः॥सहृदयेरतेरपिकल्पितत्वेनसु
खजनकतानुपपत्तेश्चेतिचेत्॥सत्यं॥शृंगारप्रधानकाव्येभ्यइवकरुणप्रधानकाव्येभ्योपियदिकेवलाह्लाद
एवसहृदयहृदयप्रमाणकस्तदाकार्यानुरोधेनकारणस्यकल्पनीयत्वाल्लोकोत्तरकाव्यव्यापारस्यैवाह्ला
दप्रयोजकत्वमिवदुःखप्रतिबंधकत्वमपिकल्पनीयं॥अथयद्याह्लादइवदुःखमपिप्रमाणसिद्धंतदाप्रतिबं

र॰ग॰ धकत्वं न कल्पनीयं॥ स्वस्वकारणवशाच्चोभयमपि भविष्यति॥ अथ तत्र कवीनां कर्तुं सहृदयानां च श्रोतुं कथं
१८ प्रवृत्तिरनिष्टसाधनत्वेन निवृत्तेरुचितत्वादिति चेत्॥ इष्टस्याधिक्यादनिष्टस्य च न्यूनत्वाच्चंदनद्रवलेपना
दाविव प्रवृत्तेरुपपत्तेः केवलाल्हादवादिनां तु प्रवृत्तिरप्रत्यूहैव॥ अश्रुपातादयोपि तत्तदानंदानुभवस्वाभा
व्यान्न तु दुःखात्॥ अत एव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यंते॥ नहि तत्र जातु अपि दुःखा
नुभवोस्ति॥ न च करुणारसादौ स्वात्मनि शोकादिमद्दशरथादितादात्म्यारोपे यथाल्हादस्तदा स्वप्नादौ सन्निपा
तादौ वा स्वात्मनि तदारोपेपि स स्यात्॥ आनुभविकं च न त्रत्र केवलं दुःखमितीहापि तदेव युक्तमिति वाच्यं॥ अयं १८
हि लोकोत्तरस्य काव्यव्यापारस्य महिमा यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आल्हादमलौकिकं

जनयंति॥ विलक्षणो हि कमनीयकाव्यव्यापारज आस्वादः प्रमाणांतरजादनुभवात्॥ जन्यत्वं च स्वजन्यभाव
नाजन्यरत्यादिविषयकत्वं॥ तेन रसास्वादस्य काव्यव्यापाराजन्यत्वेपि न क्षतिः शकुंतलादावगम्यात्वज्ञानोत्पा
दस्तु स्वात्मनि दुःष्यंताभेदबुध्या प्रतिबध्यत इत्याहुः॥ परे तु व्यंजनव्यापारस्यानिर्वचनीयख्यातेश्चानभ्युपगमे
पि प्रागुक्तदोषमहिम्ना स्वात्मनि दुष्यंतादितादात्म्यावगाही शकुंतलादिविषयकरत्यादिमदभेदबोधो मानसः
काव्यार्थभावनाजन्मा विलक्षणविषयताशाली रसः स्वाप्नादिस्तु तादृशबोधेन काव्यार्थचिंतनजन्मेति न रसः
तेन न तत्र तादृशाल्हादापत्तिः॥ एवमपि स्वस्मिन्नविद्यमानस्य रत्यादेरनुभवः कथं नाम स्यात्॥ नैवं॥ न ह्ययं लौ
किकसाक्षात्कारो रत्यादेर्येनावश्यं विषयसद्भावोपेक्षणीयः स्यादपि तु भ्रमः॥ आस्वादस्य रसविषयकत्वव्यवहा

र॰गं॰ रस्फुरत्यादिविषयकत्वालंबनइत्यपिवदंति॥एतैश्चस्वात्मनिदुष्यंतत्वादिधर्मितावच्छेदकंशकुंतलादिविषयकं
११ रतिवैशिष्ट्यावगाहीस्वात्मत्वविशिष्टेशकुंतलादिविषयकरतिविशिष्टेदुष्यंततादात्म्यावगाहीस्वात्मत्वविशिष्टेदु
ष्यंतत्वशकुंतलादिविषकरत्योवैशिष्ट्यावगाहीवाद्विविधोपिबोधोरसपदार्थतयाभ्युपेयः॥तत्रैरतेविशेषणीभूता
याःशब्ददप्रतीतत्वाव्द्यंजनायाश्चतत्प्रत्यायिकायाअनभ्युपगमाच्चेष्टादिलिंगकमादौविशेषणज्ञानार्थमनुमा
नमभ्युपेयं॥मुख्यतयादुष्यंतादिगतएवरसोरत्यादिःकमनीयविभावाद्यभिनयप्रदर्शनकोविदेदुष्यंताद्यनु
कर्त्तरिनटेसमारोप्यसाक्षात्क्रियतइत्येके॥मतेस्मिन्साक्षात्कारोदुष्यंतोयंशकुंतलादिविषयकरतिमानि ११
त्यादिशाब्दीदृश्यंशेलौकिकआरोप्यांशेत्वलौकिकःदुष्यंतादिगतोइत्यादिर्नटेपक्षेदुष्यंतत्वेनगृहीतेविभावा

दिभिःकृत्रिमैरप्यकृत्रिमतयागृहीतैर्भिन्नेविषयेनुमितिसामग्र्याबलविषयीभूतत्वादनुमीयमानोरसइत्यपरे।
विभावादयस्त्रयःसमुदितारसइतिकतिपयेत्रिषुयएवचमत्कारीसएवरसोन्यथातुत्रयोपिनेतिबहवः॥भा
व्यमानोविभावएवरसइत्यन्ये॥अनुभावइत्यन्येव्यभिचार्येवतथापरिणमतीतिकेचित्॥तत्रविभावानुभाव
व्यभिचारिसंयोगाद्रसनिष्पत्तिरितिसूत्रं तत्तन्मतपरतयाव्याख्यायतेविभावानुभावव्यभिचारिभिःसंयोगा
द्व्यंजनाद्रसस्यचिदानंदविशिष्टस्थाय्यात्मनःस्थाय्युपहितचिदानंदात्मनोवानिष्पत्तिः॥स्वरूपेणप्रकाशनमि
त्याद्ये॥विभावानुभावव्यभिचारिणांसम्यक्साधारणात्मतयायोगात्भावकत्वव्यापारेणभावनात्ररस्यस्था
य्युपहितसत्वोद्रेकप्रकाशितस्वात्मानंदरूपस्यनिष्पत्तिःभोगाख्येनसाक्षात्कारेणविषयीकृतिरितिद्वितीये॥

र॰गं॰ विभावानुभावव्यभिचारिणांसंयोगाद्भावनाविशेषरूपाद्दोषाद्रसस्यानिर्वचनीयदुष्यंतरत्याद्यात्मनोनिष्पत्तिरु
२० त्पत्तिरितितृतीये॥विभावादीनांसंयोगात्तज्ज्ञानाद्रसस्यज्ञानविशेषात्मनोनिष्पत्तिरुत्पत्तिरितिचतुर्थे॥विभा
दीनांसंबंधात्तद्रसस्यरत्यादेर्निष्पत्तिरारोपइतिपंचमे॥विभावादिभिःकृत्रिमैरपकृत्रिमतयागृहीतैःसंयो
गादनुमानाद्रसस्यरत्यादेर्निष्पत्तिरनुमितिर्नटादौपक्षइतिशेषइतिषष्ठे॥विभावादीनांत्रयाणांसंयोगात्समु
रा— दायाद्रसस्यनिष्पत्तिःरसपदव्यवहारइतिसप्तमे॥विभावादिषुसम्यग्योगाच्चमत्कारादित्यष्टमे॥तदेवंपर्यवसि
तत्स्त्रिषुमतेषुसूत्रविरोधः॥विभावानुभावव्यभिचारिणामेकस्यतुरसांतरसाधारणतयानियतरसव्यंजक २०
तानुपपत्तेः॥सूत्रेमिलितानामुपादानं॥एवंचप्रामाणिकेमिलितानांव्यंजकत्वेयत्रक्वचिदेकस्मादेवा

साधारणाद्रसोद्बोधस्तत्रेतरद्वयमाक्षेप्यमतोनानैकांतिकत्वं॥इत्थंनानाजातीयाभिःशेमुषीभिर्नानारूपतया
वसितोपिमनीषिभिःपरमाह्लादाविनाभावितयाप्रतीयमानःप्रपंचेस्मिन्रसोरमणीयतामावहतीतिनिर्विवा
दं॥सचशृंगारःकरुणःशांतोरौद्रोवीरोद्भुतस्तथाहास्योभयानकश्चैवबीभत्सश्चेतितेनवेत्युक्तेर्नवधा॥मु
निवचनंचात्रमानं॥केचित्तुशांतस्यशमसाध्यत्वान्नटेचतदसंभवात्॥अष्टावेवरसानाट्येनशांतस्तत्रयुज्यत
इत्याहुः॥तच्चापरेनक्षमंते॥तथाहि॥नटेशमाभावादिति॥हेतुरसंगतःनटेरसाभिव्यक्तेरस्वीकारात्॥सामा
जिकानांशमवत्वेनतत्ररसोद्बोधेबाधकाभावात्॥नचनटस्यशमाभावात्तदभिनयप्रकाशकत्वानुपपत्तिरि
तिवाच्यं॥तस्यभयक्रोधादेरप्यभावेनतदभिनयप्रकाशकतयाअप्यसंगत्यापत्तेः॥यदिचनटक्रोधादेरभावे

र०गं० नवास्तवतत्कार्याणांवधबंधादीनांउत्पत्त्यसंभवेपिकृत्रिमतत्कार्याणांशिक्षाभ्यासादितउत्पत्तौनास्तिबाधकमि
२१ तिनिरीक्ष्यते॥तदाप्रकृतेपितुल्यं॥अथनाट्येगीतवाद्यादीनांविरोधिनांसत्वाश्रयामाजिकेष्वपिविषयवैमुख्यात्म
नःशांतस्यकथमुद्रेकइतिचेत्॥नाट्येशांतरसमभ्युपगच्छद्भिःफलबलात्तद्गीतवाद्यादेस्तस्मिन्नविरोधितायाअ
कल्पनात्॥विषयचिंतासामान्यस्यतत्रविरोधित्वस्वीकारेतदीयालंबनस्यसंसारानित्यत्वस्यतदुद्दीपनस्य
पुराणश्रवणसत्संगपुण्यवनतीर्थावलोकनादेरपिविषयत्वेनविरोधित्वापत्तेः॥अतएवचरमाध्यायेसंगीत
रत्नाकरेष्टावेवरसानाट्येष्विति केचिदचूचुदन्॥तदचारु॥यतःकंचिन्नरसंस्वदेततेनटइत्यादिनानाट्येपिशांत २१
रसोस्तीतिव्यवस्थापितं॥यैरपिनाट्येशांतोरसोनास्तीतिअभ्युपगम्यते॥तैरपिबाधकाभावान्महाभारतादिप्र

बंधानांशांतरसप्रधानतायाअखिललोकानुभवसिद्धत्वाच्चकाव्येसोवश्यंस्वीकार्यः॥अतएवाष्टौनाट्येरसाःस्मृ
६१ ताइत्युपक्रम्यशांतोपिनवमोरसइतिसम्मटभट्टाः अभ्युपसमहार्षुः॥अमीषांच॥रतिःशोकश्चनिर्वेदक्रोधो
त्साहाश्चविस्मयः॥हासोभयंजुगुप्साचस्थायिभावाःक्रमादमी॥रसेभ्यःस्थायिभावानांघटादेर्घटाद्यवच्छिन्नाका
शादिवत्प्रथमद्वितीययोर्मतयोःसत्यरजतस्यअनिर्वचनीयरजतादिवत्तृतीये॥विषयस्यरजतादेर्ज्ञानादिव
च्चतुर्थेभेदोबोध्यः॥तत्रआप्रबंधंस्थिरत्वादमीषांभावानांस्थायित्वं॥नचचित्तवृत्तिरूपाणामेषांआशुविनाशि
श- त्वेनस्थिरत्वंदुर्लभंवासनारूपतयास्थिरत्वंतुव्यभिचारिष्वतिप्रसक्तमितिवाच्यं॥वासनारूपाणाममीषांमुहुर्मुहु
रभिव्यक्तेरेवस्थिरपदार्थत्वात्व्यभिचारिणांतुनैवं॥तदभिव्यक्तेर्विद्युदुद्योतप्रायत्वात्॥यदाहुः॥विरुद्धैरविरुद्धैर्वा

र॰गं॰ भावैर्विच्छिद्यतेनेनयः॥आत्मभावंनयत्याशुसस्थायीलवणाकरः॥चिरंचित्तेवतिष्ठतेसंबध्यतेनुबंधिभिः॥रस
२२ त्वंयेप्रपद्यंतेप्रसिद्धाःस्थायिनोत्रते॥चिरमितिव्यभिचारिवारणाय॥अनुबंधिभिर्विभावाद्यैः॥तथा॥सजातीयै
र्विजातीयैरतिरस्कृतमूर्त्तिमान्॥यावद्रसंवर्त्तमानःस्थायीभावउदाहृतइति॥केचित्तुरत्याद्यन्यतमत्वंस्थायि
त्वमाहुः॥तन्न॥रत्यादीनामेकस्मिन्प्ररूढेन्यस्याप्ररूढस्यव्यभिचारित्वोपगमात्॥प्ररूढत्वाप्ररूढत्वेचब
हल्पविभावजत्वे॥तदुक्तंरत्नाकरेरत्यादयःस्थायिभावाःस्युर्भूयिष्ठविभावजाः॥स्तोकैर्विभावैरुत्पन्नास्तएवव्य ए॰
भिचारिणइति॥एवंचवीररसेप्रधानेक्रोधोरौद्रेचोत्साहःशृंगारेहासोव्यभिचारीभवतिनांतरीयकश्च॥यदातु २२
प्रधानपरिपोषार्थंसोपिबहुविभावजःक्रियतेतदातुरसालंकारइत्यादिबोध्यं॥तत्रस्त्रीपुंसयोरन्योन्यालंबनः

प्रेमाख्यश्चित्तवृत्तिविशेषोरतिःस्थायिभावो॥गुरुदेवतापुत्राद्यालंबनस्तुव्यभिचारी॥पुत्रादिवियोगमरणादिजन्मा
वैक्लव्याख्यश्चित्तवृत्तिविशेषःशोकः॥स्त्रीपुंसयोस्तुवियोगेजीवित्वज्ञानदशायांतुवैक्लव्यपोषितायारतेरेवप्राधा
न्याच्छृंगारोविप्रलंभाख्योरसः॥वैक्लव्यंतुसंचारिमात्रं॥मृतत्वज्ञानदशायांतुरतिपोषितस्यवैक्लव्यस्येतिकरुणएव
॥यदातुसत्यपिमृतत्वज्ञानेदेवताप्रसादादिनापुनरुज्जीवनज्ञानंकथंचित्स्यात्तदालंबनस्यात्यंतिकनिराशा
भावाच्चिरप्रवासइवविप्रलंभएवनकरुणः॥यथाचंद्रापीडंप्रतिमहाश्वेतावाक्येषु॥केचित्तुरसांतरमेवात्रकरुण चि-
विप्रलंभाख्यमिच्छंति॥नित्यानित्यवस्तुविचारजन्माविषयविरागाख्योनिर्वेदः॥गृहकलहादिजस्तुव्यभिचा
री॥गुरुबंधुवधादिपरमापराधजन्माप्रज्वलनाख्यःक्रोधः॥अयंचपरविनाशादिहेतुःक्षुद्रापराधजन्मातुपरु

र॰गं॰ षवचनासंभाषणादिहेतुर्यमेवामर्षाख्योव्यभिचारीतिविवेकः॥परपराक्रमदानादिस्मृतिजन्माऔन्नत्याख्य
२३ उत्साहः॥अलौकिकवस्तुदर्शनादिजन्माआश्चर्याख्योविस्मयोवागंगादिविकारदर्शनजन्माविकासाख्योहा
सः॥व्याघ्रदर्शनादिजन्मापरमानर्थविषयकोवैक्लव्याख्यःसभयं॥परमानर्थविषयकत्वाभावेतुसएवत्रा
सोव्यभिचारी॥अपरेतु॥औत्पातिकप्रभवस्त्रासःस्वापराधद्वारोत्थंभयमितिभयत्रासयोर्भेदमाहुः॥कदर्य
वस्तुविलोकनजन्माविचिकित्साख्यश्चित्तवृत्तिविशेषोजुगुप्सा॥एवमेषांस्थायीभावानांलोकेतत्तन्नायकग
तानांयान्यालंबनतयोद्दीपनतयावाकारणत्वेनप्रसिद्धानितान्येषुकाव्यनाट्ययोर्व्यज्यमानेषुविभावशब्देनव्यप
दिश्यंते॥विभावयंतीतिव्युत्पत्तेः॥यानिचकार्यतयातान्यनुभावशब्देनअनुपश्चाद्भावउत्पत्तिर्येषामनुभावयं

BHAU DAJI २३

तीतिवाव्युत्पत्तेः॥यानिसहचरंतितानिव्यभिचारिशब्देन॥तत्रशृंगारस्यस्त्रीपुंसावालंबने॥चंद्रिकावसंतवि
विधोपवनपवनरहःस्थानादयउद्दीपनविभावाः॥तन्मुखावलोकनतद्गुणश्रवणकीर्त्तनादयोन्येसात्विकभा
वाश्चानुभावाः॥स्मृतिचिंतादयोव्यभिचारिणः॥करुणस्यबंधुनाशादयआलंबनानितत्संबंधिगृहतुरगाभरण ह-
दर्शनादयस्तत्कथाश्रवणादयश्चोद्दीपकाःगात्रक्षेपाक्रंदादयोनुभावाःग्लानिश्रममोहविषादचिंतौत्सुक्यदीनता ०धुया-
जडतादयोव्यभिचारिणः॥शांतस्यानित्यत्वेनज्ञातंजगदालंबनंवेदांतश्रवणतपोवनतापसदर्शनाद्युद्दीप
नं॥विषयारुचिशत्रुमित्राद्यौदासिन्यचेष्टाहानिनासाग्रदृष्ट्यादयोनुभावाः॥हर्षोन्मादस्मृतिमत्यादयोव्यभिचा
रिणः॥रौद्रस्यागस्कृत्पुरुषादिरालंबनं॥तत्कृतोपराधादिरुद्दीपकःवधबंधादिफलकोनेत्रारुण्यदंतपीडनपरु

षभाषणशस्त्रधारणादिरनुभावः॥अमर्षावेगौग्र्यचापलादयस्संचारिणः॥एवंयस्याश्चित्तवृत्तेर्योविषयस्सत श्रृ-
स्यआलंबनंनिमित्तानिचोद्दीपकानीत्यादिबोध्यं॥तत्रशृंगारोद्विविधः॥संयोगोविप्रलंभश्च॥रतेःसंयोगकालाव
च्छिन्नत्वेप्रथमःवियोगकालावच्छिन्नत्वेद्वितीयः॥संयोगश्चनदंपत्योःसामानाधिकरण्यं॥एकतल्पशयनेपीर्ष्या
दिसद्भावेविप्रलंभस्यैववर्णनात्॥एवंवियोगोपिनवैय्यधिकरण्यंदोषस्योक्तत्वात्॥तस्माद्द्वाविमौसंयोगवियो
गाख्यावंतःकरणवृत्तिविशेषौयत्संयुक्तोवियुक्तश्चास्मीतिधीः॥तत्राद्योयथा॥शयितासविधेप्यनीश्वरेत्यत्रनिरू
श्र-पितः॥यत्तुचित्रमीमांसायांवागर्थाविवसंपृक्तावित्यत्ररसध्वनिर्निरतिशयप्रेमशालितायांव्यंजनादित्युक्तंतद्ध्वनि २४
मार्गानाकलननिबंधनं॥पार्वतीपरमेश्वरविषयककविरतेःप्राधान्येननिरतिशयप्रेम्णोगुणीभावात्॥नहिगुणी

भूतस्यरत्यादेर्ध्वनिव्यपदेशहेतुत्वंयुक्तं॥भिन्नोरसाद्यलंकारादलंकार्यतयास्थितइतिसिद्धांतात्॥द्वितीयोयथा॥
वाचोमांगलिकीःप्रयाणसमयेजल्पत्यनल्पंजनेकेलीमंदिरमारुतायनमुखेविन्यस्तवक्त्रांबुजा॥निश्वासग्ल
पिताधरापरिपतद्बाष्पार्द्रवक्षोरुहाबालालोलविलोचनाशिवशिवप्राणेशमालोकते॥अत्राप्यालंबनस्यनायकस्य मा३
निश्वासाश्रुपातादेरनुभावस्यविषादचिंतावेगादेश्चव्यभिचारिणःसंयोगाद्रतिरभिव्यज्यमानावियोगकालावच्छि
न्नत्वाद्विप्रलंभरसव्यपदेशहेतुः॥यथावा॥आविर्भूतायदवधिमधुस्यंदिनीनंदसूनोःकांतिःकाचिन्निखिलनय
नाकर्षणेकार्मणज्ञा॥श्वासोदीर्घस्तदवधिमुखेपांडिमागंडयुग्मेशून्यावृत्तिःकुलमृगदृशांचेतसिप्रादुरासीत्॥
यथावा॥नयनांचलावमर्शंयानकदाचित्पुरासेहे॥आलिंगितापिजोषंतस्थौसागंतुकेनदयितेन॥इहापिसहज

र॰गं॰ चांचस्यनिवृत्तिर्जडताचानुभावव्यभिचारिणौ॥इमंचपंचविधंप्रांचःप्रवासादिभिरुपाधिभिरामनंति॥तेचप्रवा
२९ साभिलापविरहेर्ष्याशापविशेषानुपलंभान्नास्माभिःप्रपंचिताः॥करुणोयथा॥अपहायसकलबांधवचिंतामुद्वा
स्यगुरुकुलप्रणयं॥हातनयविनयशालिन्कथमिवपरलोकपथिकोभूः॥अत्रप्रमीतस्तनयआलंबनंतत्कालाव
छिन्नबांधवदर्शनाद्युद्दीपनंरोदनमनुभावःदैन्यादयःसंचारिणः॥शांतोयथा॥मलयानिलकालकूटयोरमणीकुं
तलभोगिभोगयोःश्वपचात्मभुवोर्निरंतराममजातापरमात्मनिस्थितिः॥अत्रप्रपंचःसर्वोप्यालंबनंसर्वत्रसाम्यम
नुभावःमत्यादयःसंचारिणः॥यद्यपिप्रथमार्धेउत्तमाधमयोरुपक्रमात्द्वितीयार्धेअधमोत्तमवचनंक्रमभंगमाव २९
हतितथापिवक्तुर्ब्रह्मात्मकतयाउत्तमाधमभावज्ञानवैकल्यंसंपन्नमितिद्योतनायक्रमभंगोगुणएव॥इदंपुनर्नोदा

हार्यं॥करस्थांतःस्विन्याःपुलिनमधितिष्ठन्नयनयोर्विधायांतर्मुद्रामथसपदिविद्राव्यविषयान्॥विधूतांतर्ध्वांतोम
धुरमधुरायांचितिकदानिमग्नःस्यांकस्यांचननवनभस्यांबुदरुचि॥अत्रापियद्यपिविषयगणालंबनःसुरस्रोतस्वि
नीतटाद्युद्दीपितोनयननिमीलनादिभिःअनुभावितःस्थायीनिर्वेदःप्रतीयते॥तथापिभगवद्भास्करदेवालंबनायांकवि
रतौगुणीभूतत्वान्नशांतरसध्वनिव्यपदेशहेतुः॥इदंचपद्यंमन्निर्मितायांभगवद्भक्तिप्रधानायांकरुणालहर्या
त- मुपनिबद्धमितिप्रधानभावप्राधान्यमेवार्हति॥शांतरसाननुगुणश्चायमोजस्वीगुंफइतिचानुदाहार्यमेवैतत्॥पूर्व
पद्येतुपरमात्मनिस्थितिरित्यनेनतादृप्यावगमाद्रतेरप्रतिपत्तिः॥रौद्रोयथा॥नवोच्छलितयौवनस्फुरदखर्वगर्वज्व
रेमदीयगुरुकार्मुकंगलितसाध्वसंवृश्चति॥अयंपततुनिर्दयंदलितदृप्तभूभृद्गलस्खलद्रुधिरघस्मरोममपरश्वधो द्-

र॰गं॰ भैरवः॥अत्र नदानीं रामत्वेज्ञातो गुरुकार्मुकभंजक आलंबनं।अत एव विशेष्यानुपादानं गुरुद्रुहो नाम ग्रहणा
२६ नौचित्यात्क्रोधाधिक्याद्वा॥ध्वनिविशेषानुमितो निःशंकधनुर्भंगउद्दीपकः परुषोक्तिरनुभावो गर्वोग्रत्वादयः सं
चारिणः॥एषा च धनुर्भंगध्वनिभग्नसमाधेर्भार्गवस्योक्तिः॥वृत्तिरप्यत्र महोद्धता रौद्रस्य परमोजस्वितां परिपुष्णा
ति॥अन्यत्र गुरुवैरस्मरणे सत्यहंभावविगमस्यावश्यकतया प्रकृते चाजहत्स्वार्थलक्षणामूलध्वनिनेन मदीयेत्ये भ्या-
-भ्या- नेन गर्वोत्कर्षस्यैव प्रकाशनात्स्फुटतरं गस्यमानेन विवेकशून्यत्वेन क्रोधस्याधिक्यं गम्यते॥इदं तु नोदाहार्यं॥
धनुर्विदलनध्वनिश्रवणतत्क्षणाविर्भवन्महागुरुवधस्मृतिःश्वसनवेगधूताधरः विलोचनविनिःसरद्वहुलविस्फु २६
लिंगवज्रोरघुप्रवरमाक्षिपन्जयति जामदग्न्यो मुनिः॥अत्राप्यपराधास्पदेन रघुनंदनेनालंबितो धनुर्विदलनध्व

निश्रवणेनोद्दीपितो निःश्वासनेत्रज्वलनादिभिरनुभावितो महागुरुवधस्मृतिगर्वोग्रत्वादिभिश्च संचारितः क्रोधो
यद्यपि व्यंज्यते तथाप्यसौ तत्प्रभाववर्णनबीजभूतायां कविरतौ गुणीभूत इति न रौद्ररसध्वनिव्यपदेशहेतुः॥कथं
काव्यप्रकाशगतरौद्ररसोदाहरणे तु कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकमिति पद्ये रौद्ररसव्यंजनक्षमा नास्ति
वृत्तिरतस्तत्कैवरशक्तिरेव॥वीरश्चतुर्धा॥दानदयायुद्धधर्मैस्तदुपाधेरुत्साहस्य चतुर्विधत्वात्तत्राद्यो यथा॥किय
दिदमधिकं मे यद्द्विजायार्थयित्रे कवचमरमणीयं कुंडले चार्पयामि॥अकरुणमवकृत्य द्राक्कृपाणेन निर्यद्बहु
लरुधिरधारं मौलिमावेदयामि॥एषा द्विजवेषायेंद्राय कवचकुंडलदानोद्यतस्य कर्णस्य तदानविस्मितानां स
भ्या- भ्यानां प्रत्युक्तिः॥अत्र याचमान आलंबनं॥तदुदीरिता स्तुतिरुद्दीपिका॥कवचादिवितरणं तत्र लघुत्वबुध्यादिकं चा

 नुभावः मेई इत्यर्थांतरसंक्रमितवाच्यध्वन्युत्थापितो गर्वः स्वकीयलोकोत्तरपितृजन्यत्वादिस्मृतिश्च संचारिणौ॥ वृ
 त्तिरप्यत्र तत्तदर्थानुरूपोद्गमविरामशालितया सहृदयैकचमत्कारिणी॥ तथाहि॥ उत्साहपोषकं कवचकुंडला
र्पणयोर्लघुत्वनिरूपणं विधातुं पूर्वार्द्धं तदनुकूलशिथिलबंधात्मिका उत्तरार्धे तु मौलितः प्राग्वक्तृगतगर्वोत्साह
परिपोषणायोद्धता॥ ततः परं ब्राह्मणे सविनयत्वं प्रकाशयितुं तन्मूलीभूतं गर्वराहित्यं ध्वनयितुं पुनः शिथिलैव
॥अत एवावेदयामीत्युक्तं न तु ददामि वितरामीति वा॥ इदं तु नोदाहरणीयं॥ यस्योद्दाममदिवानिशार्थिविलस
दानप्रवाहप्रथमाकर्ण्यावनिमंडलागतवियत्तुवंदींद्रवृंदाननात्॥ ईर्ष्यानिर्भरफुल्लरोमनिकरव्याजवलाद्
धःस्रवत्पीयूषप्रकरैः स्फुरद्भिः प्रावृट्पयोदायते॥ अत्रेंद्रसभामध्यगतसकलनिरीक्षकालंबनोऽत्र

वनिमंडलागतवियद्वंदींद्रवदनविनिर्गतराजदानवर्णनोद्दीपित ऊधःप्रस्रवत्पीयूषप्रकरैरनुभावितो
ऽसूयादिभिः संचारिभिः परिपोषितोऽपि कामगवीगत उत्साहो राजस्तुतिगुणीभूत इति न रसव्यपदेशहेतुः॥
॥अत एवेदमपि नोदाहार्यं॥ साध्विद्वीपकुलाचलां वसुमतीमाक्रम्य सप्तांतरां सर्वांद्यामपि सस्मितेन त
द्धरिणा मंदं समालोकितः प्रादुर्भूतपरप्रमोदलहरीरोमांचितस्तत्क्षणव्यानम्रीकृतकंधरो गुरुः करवरो मौलिं पुरोन्यस्तवा पे॰
न्॥ इह च भगवद्धामनालंबनस्तत्कर्तृकमंदनिरीक्षणोद्दीपितो रोमांचादिभिरनुभावितो हर्षादिभिः पोषित उत्सा
हो व्यज्यमानोऽपि गुणः प्रागन्यगतस्येव प्रकृते राजगतस्यापितस्य राजस्तुत्युत्कर्षकत्वात्॥ एतेन त्यागः सप्तसमुद्रमु
द्रितमहीनिर्व्याजदानावधिरिति श्रीवत्सलांछनोक्तमुदाहरणं परास्तं॥ तस्य गुणीभूतव्यंग्यत्वेन रसध्वनिप्रसंगे(

र०गं० नुदाहरणीयत्वात्।नन्वकरुणमवक्तव्येत्यत्रापिप्रतीयमानस्यदानवीरस्यकर्णस्तुत्यंगत्वात्कथंध्वनित्वमितिचे
२९ त्।।सत्यं।।अत्रकवेःकर्णवचनानुवादमात्रतात्पर्यकत्वेनकर्णस्तुतौतात्पर्यानुपपत्तेःस्तुतिरवाक्यार्थएव।।परं
तुवीररसप्रत्ययानंतरंतादृशोत्साहेनलिंगेनस्वाधिकरणेसानुमीयते।।राजवर्णपद्येतुकवेराजस्तुतौतात्प न/
र्याद्वाक्यार्थतैवतस्याः।।द्वितीयोयथा।।नकपोतभवंतमाध्वपिस्पृशतुश्येनसमुद्भवंभयं।।इदमद्यमयातृणीकृ मध्व- B.
तंभवदायुःकुशलेकलेवरं।।अथवैवंविन्यासः।।नकपोतकपोतकंतवस्पृशतुश्येनमनागपिस्पृहा।।इदम
द्यमयासमर्पितंभवतेचारुतरंकलेवरं।।एषाशिबेःकपोतंश्येनंप्रतिवोक्तिः।।अत्रकपोतश्चालंबनंतद्गतंव्या २९
कुलीभवनमुद्दीपनंतस्यकृतेस्वकलेवरार्पणमनुभावः।।नचात्रशरीरदानप्रत्ययाद्दानवीरध्वनित्वापत्तिरिति

वाच्यं।।श्येनकपोतयोर्भक्ष्यभक्षकभावापन्नत्वेनशिबिशरीरस्यार्थिनोऽभावात्तदप्रतिपत्तेःश्येनायशरीरनिवेद
नस्यकपोतशरीरत्राणोपाधिकतयाविनिमयपदवाच्यत्वात्।।तृतीयोयथा।।रणेदीनान्देवान्दशवदनविद्रा
व्यवहसिप्रभावप्रागल्भ्यंत्वयितुममकोयंपरिकरः।ललाटोद्यज्ज्वालाकवलितजगज्जालविभवोभवोमेकोदंडच्युत
विशिखवेगंकलयतु।।एषादशवदनंप्रतिभगवतोरामस्योक्तिः।।इहभवआलंबनंरणदर्शनमुद्दीपनंदशवद
नावज्ञानुभावःगर्वःसंचारीव्यक्तिरत्रदेवानांप्रस्तावेतद्गतकातर्यप्रकाशनद्वारावीररसानालंबनत्वावगतये
ऽनुद्धृतैव।।दशवदनप्रस्तावेतुदेवदर्पदमनेनवीरत्वप्रतिपादनायोद्धृतापितस्यावज्ञयारामगतोत्साहाना
लंबनत्वेनतदालंबनस्यरसस्याप्रत्ययात्प्रकर्षवतीभगवतोभवस्यतुपरमोत्तमालंबनविभावत्वात्तत्प्रस्तावेत

र॰गं॰ दार्लंबनस्योजस्विनोवीररसस्यनिष्पत्तेःप्रकृष्टेहुता॥चतुर्थोयथा॥सपदिविलयमेतुराज्यलक्ष्मीरुपरिपतंत्वथवा
२९ कृपाणधाराः॥अपहरतुनरांशिरःकृतांतोममतुमतिर्नमनागपैतिधर्मात्॥एषाअधर्मेणापिरिपुर्जेतव्यइति
वदंतंप्रतियुधिष्ठिरस्योक्तिः॥अत्रधर्मविषयआलंबनंनजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोरि
त्यादिवाक्यालोचनमुद्दीपनं॥शिरश्छेदाद्यंगीकारोनुभावोधृतिःसंचारिणी॥इत्थंवीररसस्यैसेचातुर्विध्यंप्रपंचितंप्रा
चामनुरोधात्॥वस्तुतस्तुबहवोवीररसस्यशृंगारस्येवप्रकारानिरूपयितुंशक्यंते॥तथाहि॥प्राचीनएवसपदिवि
मति लयमेत्वित्यादिपद्येममतुर्नमिनागपैतिसत्यादितिचरमपादव्यत्यासेनपद्यांतरतांप्रापितेसत्यवीरस्यापिसंभवा २९
त्॥नचसत्यस्यापिधर्मांतर्गततयाधर्मवीररसएवतद्वीररसस्याप्यंतर्भावइतिवाच्यं॥दानदययोरपितदंतर्ग

DR BHAU DAJI

ततयातद्वीरयोरपिधर्मवीरात्पृथग्गणनानौचित्यात्॥एवंपांडित्यवीरोपिप्रतीयते॥यथा॥अपिवक्तिगिरांपतिः
स्वयंयदितासामधिदेवतापिवा॥अयमस्मिपुरोहयाननस्मरणोल्लंघितवाङ्मयांबुधिः॥अत्रबृहस्पत्याद्यालंबनःस
भादिदर्शनोद्दीपितोनिखिलविद्वत्तिरस्कारानुभावितोगर्वेणसंचारिणापोषितउत्साहोवक्तुःप्रतीयते॥ननुचात्र
युद्धवीरत्वंयुद्धत्वस्यवादसाधारणस्यवाच्यत्वादितिचेत्॥क्षमावीरेकिंब्रूयाः॥यथा॥अपिबहुलदहनजालंमूर्ध्नि
रिपुर्मेनिरंतरंधमतु॥पातयतुवासिधारामहमणुमात्रंनकिंचिदाभाषे॥क्षमावतउक्तिरियं॥बलवीरेवाकिंस
माद्ध्याः॥यथा॥परिहरतुधरांफणीप्रवीरःसुखमयतांकमठोपितांविहाय॥अहमिहपुरुहूतपक्षकोणेनिखि
लमिदंजगदंडकंवहामि॥पुरुहूतंप्रत्येषागरुत्मतउक्तिः॥नन्वपिवक्तिपरिहरतुधरामितिपद्यद्वयेगर्वएवनोत्सा

ह्रोमध्यस्थपद्येनुधृतिरेवध्वन्यतइतिभावध्वनयएवैतेनरसध्वनयइतिचेत्तर्हियुद्धवीरादिष्वपिगर्वादिध्वनित्ता
 मेवकिंनब्रूयाः॥रसध्वनिसामान्यमेववाकिंनतद्व्यभिचारिध्वननेनगतार्थयेःस्थायिप्रतीतिर्दुरपन्हवाचेत्तुल्यं
प्रकृतेपि।अनंतरोक्तपद्येतु।नोत्साहःप्रतीयतेदयावीरादिषुप्रतीयतइतितुराज्ञोजोमात्रं॥अद्भुतोयथा॥चरा
चरजगज्जालसदनंवदनंतव॥गलद्गगनगांभीर्यंवीक्ष्यास्मिहृतचेतना॥कदाचित्तभगवतोवासुदेवस्यवदनमा
लोकितवत्यायशोदायाइयमुक्तिः॥अत्रवदनमालंबनंअंतर्गतसचराचरजगज्जालदर्शनमुद्दीपनं॥हृतचेत
नत्वंतेनगम्यंरोमांचनेत्रस्फुरणादिचानुभावःत्रासादयोव्यभिचारिणःनैवात्रविद्यमानापिपुत्रगताप्रीतिःप्रती ३०
यतेव्यंजकाभावात्प्रतीतायांवातस्यांविस्मयस्यगुणत्वंनयुज्यते॥एवंकश्चिन्महापुरुषोयमितिभक्तिरपितस्याः

पुत्रोममायंबालइतिनिश्चयेनप्रतिबंधादुत्पत्तुमेवनेष्टेअतस्तस्यामपिविस्मयस्यगुणीभावोनशंक्यः॥यच्चसहृ
दयशिरोमणिभिःप्राचीनेरुदाहृतं॥चित्रंमहानेषबतावतारःक्वकांतिरेषाभिनवैवभंगिः॥लोकोत्तरंधैर्यम
होप्रभावःकाप्याकृतिर्नूतनएषसर्गइति॥तत्रेदंवक्तव्यं॥प्रतीयतांनामात्रविस्मयःपरंत्वसौकथंकारंध्वनिव्य
पदेशहेतुः॥प्रतिपाद्यमहापुरुषविशेषविषयिण्याःप्रधानीभूतायाःस्तोतृगतभक्तेःप्रकर्षकत्वेनास्यगुणीभूतत्वा
त्।यथामहाभारतेगीतासुविश्वरूपंदृष्टवतःपार्थस्यपश्यामिदेवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान्॥इ
त्यादौवाक्यसंदर्भेइत्थंचास्यरसालंकारत्वमुचितं॥भक्तिर्नैवात्रप्रतीयतइतिचेत्।दरमुकुलितलोचनंविदांकुर्वं
तुसहृदयाः॥हास्योयथा॥श्रीनातपादैर्विहितेनिबंधेनिरूपितानूतनयुक्तिरेषा॥अंगंगवांपूर्वमहोपवित्रंनवा

र॰गं॰ कथंरासभधर्मपत्न्याः॥तार्किकपुत्रोत्रालंबनं॥तदीयानिःशंकोक्तिरुद्दीपिकारदनप्रकाशादिरुद्वेगादयश्चानुभा
३१ त्या- वव्यभिचारिणः॥अत्राहुःआत्मस्थःपरसंस्थश्चेत्यस्यभेदद्वयंमतं॥आत्मस्थोद्रष्टुरुत्पन्नोविभावेक्षणमात्रतः॥हसं
तमपरंदृष्ट्वाविभावाच्चोपजायते॥योसौहास्यरसस्तज्ज्ञैःपरस्थःपरिकीर्त्तितः॥उत्तमानांमध्यमानांनीचानामप्यसौ
भवेत्॥त्र्यवस्थःकथितस्तस्यषड्भेदाःसंतिचापरे॥स्मितंचहसितंप्रोक्तंउत्तमेपुरुषेबुधैः॥भवेद्विहसितंचोपह द्वि-
सितंमध्यमेनरे॥नीचेपहसितंचातिहसितंपरिकीर्त्तितं॥ईषत्फुल्लकपोलाभ्यांकटाक्षैरप्यनुल्बणैः॥अदृश्यदश
नोहासोमधुरःस्मितमुच्यते॥वक्त्रनेत्रकपोलैश्चेदुत्फुल्लैरुपलक्षितः॥किंचिल्लक्षितदंतश्चतदाहसितमिष्यते॥ ३१
सशब्दंमधुरंकालगतंवदनरागवत्॥आकुंचिताक्षिमंद्रंचविदुर्विहसितंबुधाः॥निकुंचितांसशीर्षश्चजिह्मदृ

ष्टिविलोकनः॥उत्फुल्लनासिकोहासोनाम्नोपहसितंमतं॥अस्थानजःसाश्रुदृष्टिराकंपस्कंधमूर्द्धजः॥शार्ङ्गदेवेनग
दितोहासोपहसिताह्वयः॥स्थूलकर्णकटुध्वानोबाष्पपूर्णेक्षणः॥करोपगूढपार्श्वश्चहासोतिहसितंमतमिति॥भया बाष्पपूर-
नकोयथाश्येनमंबरतलादुपागतंभुष्यदाननबिलोविलोकयन्कंपमानतनुराकुलेक्षणःस्पंदितुंनहिशशाक
कलावकः॥अत्रश्येनआलंबनंसवेगापतनमुद्दीपनं॥आननशोषादयोनुभावाःदैन्यादयःसंचारिणः॥बीभत्सो
यथानखैर्विदारितांत्राणांशवानांपूयशोणितं॥आननेष्वनुलिंपंतिहृष्टावेतालयोषितः॥शवइत्यालंबनं॥आं
त्रविदारणाद्युद्दीपनं॥आक्षिप्तारोमांचनेत्रनिमीलनादयोऽनुभावाः॥आवेगादयःसंचारिणः॥ननुरतिक्रोधोत्सा
हभयशोककविस्मयनिर्वेदेषुप्रागुदाहृतेषुयथालंबनाश्रययोःसंप्रत्ययोनतथाहासेजुगुप्सायांचतत्रालंबनस्ये

र०गं० वप्रतीतेः॥पद्यश्रोतुश्चरसास्वादाधिकरणत्वेनलौकिकहासजुगुप्साश्रयत्वानुपपत्तेरितिचेत्॥सत्यं॥तदाश्रयस्य
३२ दुष्टपुरुषविशेषस्यतत्राक्षेप्यत्वात्तदनाक्षेपेतुश्रोतुःस्वीयकांतावर्णनपद्यादिवत्रसोद्बोधेबाधकाभावात्॥
एवंचसंक्षेपेणनिरूपिताःरसाः॥एषांप्राधान्येध्वनिव्यपदेशःअन्येतुत्वंगुणीभावेतुरसालंकारत्वं॥केचित्तु॥प्राधा
न्यएवैषांरसत्वं॥अन्यथात्वलंकारत्वमेवरसालंकारव्यपदेशस्तुअलंकारध्वनिव्यपदेशवद्ब्राह्मणश्रमणन्यायात्
॥एवमसंलक्ष्यक्रमतायामेवान्यथातुवस्तुतामात्रमित्याहुः॥एतेचासंलक्ष्यक्रमव्यंग्याःसहृदयेनरसव्यक्तौद्रुटिति
जायमानायांविभावानुभावव्यभिचारिविमर्शक्रमस्यसतोपिसूचिंतपत्रपत्रशतवेधक्रमस्येवालक्षणात्नत्वक्र ३२
मव्यंग्याःव्यंस्तहुतनांचहेतुहेतुमद्भावासंगत्यापत्तेः॥अथकथमेतएवरसाःभगवदालंबनस्यरोमांचाश्रुपातादि

भिरनुभावितस्यहर्षादिभिःपरिपोषितस्यभागवतादिपुराणश्रवणसमयेभगवद्भक्तैरनुभूयमानस्यभक्तिरस
स्यदुरपह्नवत्वात्॥भगवदनुरागरूपाभक्तिश्चात्रस्थायिभावः॥नचासौशांतरसेंऽतर्भावमर्हति॥अनुरागस्यवैराग्य
विरुद्धत्वादुच्यते॥भक्तेरतित्वेनभावांतर्गततयारसत्वानुपपत्तेः॥रतिर्देवादिविषयाव्यभिचारीतथांजितःभा
वःप्रोक्तस्तदाभासह्यनौचित्यप्रवर्तितात्इतिहिप्राचांसिद्धांतात्॥नचतर्हिकामिनीविषयायाअपिरतेर्भावत्वम
स्तुरतित्वाविशेषात्॥अस्तुवाभगवद्भक्तेरेवस्थायित्वं॥कामिन्यादिरतीनांचभावत्वंविनिगमकाभावादितिवा
च्यं॥भरतादिमुनिवचनानामेवात्ररसभावत्वादिव्यवस्थापकत्वेनस्वातंत्र्यायोगात्॥अन्यथापुत्रादिविषयायाअ
पिरतेःस्थायिभावत्वंकुतोनस्यात्नस्याद्वाकुतःशुद्धभावत्वंजुगुप्साशोकादीनामित्यखिलंदर्शनमाकुलीस्यात्॥

र॰गं॰ रसानांनवत्वगणनाचमुनिवचननियंत्रिताभज्यतेनेतियथाशास्त्रमेवज्यायः॥एतेषांपरस्परंकैरपिसहाविरोधःकै
३३ रपिविरोधः॥तत्रवीरश्रृंगारयोःश्रृंगारहास्ययोःवीररौद्रयोःश्रृंगाराद्भुतयोश्चाविरोधःश्रृंगारबीभत्सयोःश्रृंगा
रकरुणयोःवीरभयानकयोःशांतरौद्रयोःशांतश्रृंगारयोश्चविरोधः॥तत्रकविनाप्रकृतरसंपरिपोष्टुकामेन
तदभिव्यंजककाव्येनद्विरुद्धरसांगानांनिबंधनंनकार्यं॥तथाहिसतितदभिव्यक्तोविरुद्धःप्रकृतंबाधेत॥सुं
दोपसुंदन्यायेनचोभयोरुपहतिःस्यात्॥यदितुविरुद्धयोरपिरसयोरेकत्रसमावेशइष्यते॥तदाविरोधंपरिहृ
त्यविधेयः॥तथाहि॥विरोधस्तावद्द्विविधःस्थितिविरोधोज्ञानविरोधश्च॥आद्यस्तदधिकरणावृत्तितारूपः ३३
द्वितीयस्तज्ज्ञानप्रतिबद्धज्ञानकत्वलक्षणःतत्राधिकरणांतरेविरोधिनःस्थापनेप्रथमोनिवर्त्तते॥यथानायकग

तत्वेनवीररसेवर्णनीयेप्रतिनायकेभयानकस्य॥रसपदेनात्रप्रकरणेतदुपाधिःस्थायीभावोगृह्यते॥रसस्यसा
माजिकवृत्तित्वेननायकाद्यवृत्तित्वात्‌अद्वितीयानंदमयत्वेनविरोधासंभवाच्च॥उदा॥कुंडलीकृतकोदंडदोर्दं
डस्यपुरस्तव॥मृगारातेरिवमृगाःपरेनैवावस्थिरे॥रसांतरस्याविरोधिनःसंधिकर्त्तुरिवांतरालेवस्थापनेद्वि
तीयोपिनिवर्त्तते॥यथा॥मन्निर्मितायामाख्यायिकायांकण्वाश्रमगतस्यश्वेतकेतोर्महर्षेःशांतिरसप्रधानेवर्ण
नेप्रस्तुतेकिमिदमनाकलितपूर्वरूपंकोयंमनिर्वाच्योवचनरचनायामधुरिमेत्यद्भुतस्यांतरवस्थापनेनवरवर्णि
नींप्रतिअनुरागवर्णने॥यथावा॥सुरांगनाभिराश्लिष्टाव्योम्निवीराविमानगाःविलोकंतेनिजान्देहान्फेरुना
रीभिरावृतान्॥अत्रसुरांगनामृतशरीरालंबनयोःश्रृंगारबीभत्सयोरंतःस्वर्गलाभाक्षिप्तोवीररसोनिवेशितः॥

र॰गं॰ अंतर्निवेशश्चतदुभयचर्वणाकालांतरवर्त्तिकालगतचर्वणात्वं॥तच्चप्रकृतपद्येप्रथमार्धएवशृंगारचर्वणोत्तरं
३४ वीरस्यचर्वणादनंतरंचद्वितीयार्द्धेबीभत्सस्येतिस्फुटमेव॥भूरेणुदिग्धानित्यादिकाव्यप्रकाशगतपद्यकदंबेषुतु
प्रथमश्रुतबीभत्ससामग्रीवशाद्बीभत्सचर्वणोत्तरंतत्सामग्र्याक्षिप्तनिःशंकप्राणत्यागादिरूपसामग्रीकस्य
वीररस्यचर्वणेशृंगारचर्वणेतिविवेकः॥इत्थंचउदासीनचर्वणेनप्रतिबंधकज्ञाननिवृत्तौनिष्प्रत्यूहःप्रति
बंध्यचर्वणोदयइतिकलितार्थः॥अंगांगिनोरंगिन्यन्यस्मिन्नंगयोर्वानविरोधः॥अंगत्वानुपपत्तिप्रसंगात्॥
यथाप्रत्युद्गतासविनयंसहसासखीभिःस्मेरैःस्मरस्यसचिवैस्सौरसावलोकैः॥मामद्यमंजुरचनैर्वचनैश्चबा ३४
लेहालेशतोपिनकथंवदसत्करोषि॥इयंचपुरोनिपतितांप्रमीतांनायिकांप्रतिनायकस्योक्तिः॥इहनायिका

लंबनाअश्रुपातादिभिरनुभावैरावेगविषादादिभिःसंचारिभिश्चव्यज्यमानानायकगतारतिस्तुल्यसामग्र्याभिव्यक्तेप्रकृत ना- ग्र्या
त्वात् प्रधानीभूतेनतद्गत एवशोकेप्रकर्षकत्वादंगं॥यदितुनायकगतारतिर्नात्रप्रतीयतेकिंतुनिरुक्तसामग्र्याशोक
एवप्रकृतत्वादित्याग्रह्यते॥तदानायकालंबनाप्रत्युद्गमाद्यनुभाविताहर्षादिभिःपोषितानायिकाश्रयारतिरेवतत्रां
गमस्तु॥नायिकागतरतेर्नायकशोकप्रकर्षहेतुतायाःसर्वसंमतत्वात्॥नचनायिकायानाशात्तद्गतायारतेरसं
निधानात्कथमंगतेतिवाच्यं॥संनिधानस्यांगतायामतंत्रत्वेनस्मर्यमाणायास्तस्याअंगत्वोपपत्तेः॥अंगयोर्यथा
॥उत्क्षिप्ताःकबरीभरंविवलिताःपार्श्वद्वयंन्यक्कृताःपादांभोजयुगंरुषापरिहृतादूरेणचेलांचलंगृह्णंतित्वरयाभ
वत्प्रतिभटक्ष्मापालवामभ्रुवांयांतीनांगहनेषुकंटकचिताःकेकेनभूमीरुहाः॥अत्रसमासोक्त्यवयवाभ्यांतरु

र॰गं॰ कामिकर्तृकरिपुकामिनीकबर्यादिग्रहणरूपाभ्यांप्रकृताप्रकृतव्यवहाराभ्यांव्यक्तयोःकरुणशृंगारयोराजविष
३९ यकरतिभावांगत्वं॥किंचप्रकृतरसपरिपुष्टिमिच्छताविरोधिनोपिरसस्यबाध्यत्वेननिबंधनंकार्यमेव॥तथाहिस
तिवैरिजयकृतावर्ण्यस्यकापिशोभासंपद्यते॥बाध्यत्वंचरसस्यप्रबलैर्विरोधिनोरसस्यांगैर्विद्यमानेष्वपिस्वांगे
षुनिष्पत्तेःप्रतिबंधःव्यभिचारिणोबाध्यत्वंतुतदीयरसनिष्पत्तिप्रतिबंधमात्रात्नत्वनभिव्यक्त्या॥अभिव्यक्तौबा
धकाभावात्॥नचविरोध्यंगाभिव्यक्त्याप्रतिबंधान्नाभिव्यक्तिरितिवाच्यं॥तद्व्यंजकशब्दार्थज्ञानसमयेविरोध्यंगा
भिव्यंजकशब्दार्थज्ञानस्यासंनिधानात्॥प्रतिबध्यप्रतिबंधकभावकल्पनेमानाभावात्भावशबलतायाउच्छेदा
पत्तेश्च॥रसनिष्पत्तेःप्रतिबंधस्त्वनुभवसिद्धइतितांप्रत्येवविरोध्यंगानांबलवतामभिव्यक्तेःप्रतिबंधकत्वंन्याय्यं॥

DR. BHAU DAJI

अपिच॥यत्रसाधारणविशेषणमहिम्नाविरुद्धयोरसयोरभिव्यक्तिस्तत्रापिविरोधोनिवर्तते॥यथानितांतयौवनोन्म
त्तागाढरक्तामहाहवे॥वसुंधरांसमालिंग्यशेरतेवीरतेरयः॥इत्थमविरोधसंपादनेनापिनिबध्यमानोरसोरसश
ब्देनशृंगारादिशब्दैर्वानाभिधातुमुचितोस्वाद्यतापत्तेः॥तदास्वादश्चव्यंजनामात्रनिष्पाद्यइत्युक्तत्वात्॥यत्रविभावा
दिभिरभिव्यक्तस्यरसस्यस्वशब्देनाभिधानंतत्रकोदोषइतिचेत्॥व्यंग्यस्यवाच्यीकरणेसामान्यतोवमनाख्य
दोषस्यवक्ष्यमाणत्वात्॥आस्वाद्यतावच्छेदकरूपेणप्रत्ययाजनकतयारसस्थलेवाच्यवृत्तेःकापेयकत्वेनवि
शेषदोषत्वाच्च॥एवंस्थायिव्यभिचारिणामपिशब्दवाच्यत्वंदोषः॥एवंविभावानुभावयोरसम्यक्प्रत्ययेविलंबेन
प्रत्ययेवानरसास्वादइतितयोर्दोषत्वं॥समबलप्रतिकूलरसांगानांनिबंधनंतुप्रकृतरसपोषप्रातिपिकमिति

र०गं० दोषः॥प्रबंधेप्रकृतस्यरसस्यप्रसंगांतरेणविछिन्नस्यपुनर्दीपनेसामाजिकानांनसामग्र्येणरसास्वादइति
३६ विछिन्नदीपनंदोषः॥तथातत्रतत्ररसप्रस्तावनानर्हेवसरेप्रस्तावोविछेदानर्हेचविछेदोयथासंध्यावंदनदेवय
जनादिधर्मवर्णनेप्रसक्तेकयापिकामिन्यासहकस्यचित्कामुकस्यानुरागवर्णनेयथावासमुपस्थितेषुमहा
हवदुर्मदेषुप्रतिभटेषुमर्मभिंदिवचनान्युद्गिरत्सुनायकस्यसंध्यावंदनादिवर्णनेचेत्युभयमनुचितं॥एवम
प्रधानस्यप्रतिनायकादेर्नानाविधानांचरितानामनेकविधायाश्चसंपदोनायकसंबंधिभ्यस्तेभ्योनातिशयेनव
र्णनीयस्तथासतिवर्णयितुमिष्टोनायकस्योत्कर्षोनसिध्येत्तत्प्रयुक्तोरसपोषश्चनस्यात्॥नचप्रतिनायकोत्कर्षस्य ३६
तदभिभावकनायकोत्कर्षांगत्वात्कथमवर्णनीयत्वमितिवाच्यं॥यादृशस्यप्रतिनायकोत्कर्षवर्णनस्यतदभिभा

वकनायकोत्कर्षांगतासंपादकत्वंतादृशास्येष्टत्वात्॥तद्विरोधिनएवनिषेध्यत्वात्॥नचप्रतिपक्षस्यप्रकृतापेक्ष
यावर्ण्यमानोप्युत्कर्षःस्वाश्रयदंततामात्रादेवप्रकृतगतमुत्कर्षमतिशाययेदतोनदोषावहइतिवाच्यं॥एवंहि
सतिमहाराजकमपिप्रतिविपक्षशरक्षेपमात्रेणव्यापादितवतोवराकस्यशबरस्येवप्रकृतस्यनायकस्यनको
प्युत्कर्षःस्यादिति॥तथारसालंबनाश्रययोरनुसंधानमंतरांतरानचेद्दोषः॥तदनुसंधानाधीनाहिरसप्रतिपत्तिधा
रातदननुसंधानेविरतास्यात्॥एवंप्रकृतरसानुपकारकस्यवस्तुनोवर्णनमपिप्रकृतरसविरामहेतुत्वाद्दोष
एव॥अनौचित्यंतुरसभंगहेतुत्वात्परिहरणीयं॥भंगश्चपानकादिरसादोसिकतादिनिपातजनितेवारुंतुदता
॥तच्चजातिदेशकालवर्णाश्रमवयोवस्थाप्रकृतिव्यवहारादेःप्रपंचजातस्ययस्ययल्लोकशास्त्रसिद्धमुचितंद्र

र॰गं॰ व्यगुणक्रियादिनद्भेदः॥जात्यादेरनुचितंयथा॥गवादेस्तेजोबलकार्याणिपराक्रमादीनिसिंहादेश्चसाधुभावा
३७ दीनि॥स्वर्गेजराव्याध्याादीनिभूलोकेसुधासेवनादिशिशिरेजलविहारादिर्ग्रीष्मेवह्निसेवाब्राह्मणस्यमृग
यावाहुजस्यप्रतिग्रहःशूद्रस्यनिगमाध्ययनंब्रह्मचारिणोयतेश्चतांबूलचर्वणंदाराप्रसंग्रहोबालवृद्धयोः
स्त्रीसेवनंपुनश्चविरागोदरिद्राणामाढ्याचरणमाढ्यानांचदरिद्राचारः प्रकृतयोदिव्यादिव्यादिव्याश्च॥धीरो अदित्य
दात्तधीरोद्धतधीरललितधीरशांताउत्साहक्रोधकामिनीरतिनिर्वेदप्रधानाउत्तममध्यमाधमाश्च॥तत्ररत्यादी
नांभयातिरिक्तस्थायिभावानांसर्वत्रसमत्वेपिरतेःसंभोगरूपायामनुष्येष्विवोत्तमदेवतासुस्फुटीकृतसकला ३७
नुभाववर्णनमनुचितं॥क्रोधस्यचलोकभस्मीकरणपटोर्दिनरात्रिव्यत्ययाद्यनेकाश्चर्यकारिणोदिव्येष्विवा

ती
दिव्येषु॥आलंबनगताराध्यत्वस्यअनुभावगतमिथ्यात्वस्यचप्रतीत्यारसस्यानुद्बोधापत्तेः॥नचसाधारणी
करणादाराध्यत्वज्ञानानुत्पत्तिरितिवाच्यं॥यत्रसहृदयानांरसोद्बोधःप्रमाणसिद्धस्तत्रैवसाधारणीकरणस्य
कल्पनात्॥अन्यथास्वमातृविषयकस्वपितृरतिवर्णनेपिसहृदयस्यरसोद्बोधापत्तेः॥जयदेवप्रभृतिभिस्तुगी
तगोविंदादिप्रबंधेषुसकलसहृदयसंमतोयंसमयोमदोन्मत्तमतंगजैरिवभिन्नइतिनतन्निदर्शनेनेदानींत
नेनतथावर्णयितुंसंगतं॥तथाविद्यावयोवर्णाश्रमतपोभिरुत्कृष्टैःस्वतोपकृष्टेषुनसबहुमानेनवचसाव्य
वहर्त्तव्यंव्यवहर्त्तव्यंचापकृष्टैरुत्कृष्टेषु॥तत्रापितत्रभवन्भगवन्नित्यादिभिःसंबोधनैर्मुनिगुरुदेवताप्र
भृतयएवनराजादयोज्ञात्योत्तमैर्द्विजैरेवनाधमैःशूद्राभिःपरमेश्वरेत्यादिसंबोधनैश्चचक्रवर्त्तिनएवनमु दि

र॰गं॰ निप्रभृतयःसंबोध्याः॥तथाचाहुः॥अनौचित्यादृतेनान्यद्रसभंगस्यकारणंप्रसिद्धौचित्यबंधस्तुरसस्यो
३९ पनिषत्पराइति॥यावतात्वनौचित्येनरसस्यपुष्टिस्तावत्तुनवार्यते॥रसप्रतिकूलस्यैवतस्यनिषेध्यत्वात्॥अत
एवब्रह्मन्नध्ययनस्यनैषसमयस्तूष्णींबहिःस्थीयतांस्वल्पंजल्पबृहस्पतेजडमतेनैषासभावज्रिणः॥वीणांसं
र- हरनारदस्तुतिकथालापैरलंतुंबरोसीताराल्लकभल्लभग्नहृदयःस्वस्थोनलंकेश्वरइति॥कस्यचिन्नाटकस्य
पद्येविप्रलंभशृंगारांगीभूतवीररसाक्षेपकपरमैश्वर्यपरिपोषकतयास्थितदौवारिकवचनस्यब्रह्माद्यधि
क्षेपपरस्यानौचित्यंनदोषः॥एवमेवअलेलेसदःसमुप्पादिअहरियकुशग्गंथिमयच्छमालापइतिविस्संभिय ३९
बालविहवंदक्कअणाब्रह्मणाइत्यादिविदूषकवचनेरेशब्दादिप्रयोगस्यनतथा॥हास्यानुगुणत्वात्॥एषाहिदिगु

पदर्शिता॥अनयासुधीभिरन्यदूह्यं॥रसेषुचैतेषुनिगदितेषुमाधुर्यौजःप्रसादाख्यांस्त्रीन्गुणानाहुः॥तत्रशृं
गारेसंयोगाख्येयन्माधुर्यंततोतिशयितंकरुणेताभ्यांविप्रलंभेतेभ्योपिशांतेउत्तरोत्तरमतिशयितायाश्चित्तदी
प्तेर्जननात्॥इतिकेचित्॥संयोगशृंगारात्करुणशांतयोस्ताभ्यामपिविप्रलंभइत्यपरे॥संयोगशृंगारात्करुण
विप्रलंभशांतेष्वतिशयितमेवनपुनस्तत्रापितारतम्यमित्यन्ये॥तत्रप्रथमचरमयोर्मतयोःकरुणेविप्रलंभेत
शां- शांतेचातिशयान्वितमितिप्राचांसूत्रमनुकूलं॥तस्योत्तरसूत्रगतस्यक्रमेणेतिपदस्यापकर्षानपकर्षाभ्यांव्याख्या
द्वयस्यसंभवात्॥मध्यस्थेतुमतेकरुणशांताभ्यांविप्रलंभस्यमाधुर्यातिशयेयदिसहृदयानामनुभवोस्तिसा
क्षीतदासंप्रमाणं॥वीरबीभत्सरौद्रेष्वोजसोयथोत्तरमतिशयउत्तरोत्तरमतिशयितायाश्चित्तदीप्तेर्जननात्॥

र॰गं॰ अद्भुतहास्यभयानकानांगुणद्वययोगित्वंकेचिदिच्छंति॥अपरेतुप्रसादमात्रंप्रसादस्तुसर्वेषुरसेषुसर्वा
३९ रूपश्च॥नासाधारणगुणानांचैषांद्रुतिदीप्तिविकासाख्यास्तिस्रश्चित्तवृत्तयःक्रमेणप्रयोज्याःतत्तद्गुण
विशिष्टरसचर्वणाजन्याइतियावत्॥एवमेतेषुगुणेषुरसमात्रधर्मेणव्यवसितेषुमधुरारचनौजस्वीबंधइत्या व-
दयोव्यवहारा आकारोस्यशूरइत्यादिव्यवहारवदौपचारिकाइतिमम्मटभट्टादयः॥येमीमाधुर्यौजःप्र म्म-
सादारसमात्रधर्मतयोक्तास्तेषांरसधर्मत्वेकिंमानं॥प्रत्यक्षमेवेतिचेन्न॥दाहादेःकार्यादनलगतस्यो
ष्ण स्पर्शस्ययथाभिन्नतयानुभवस्तथाद्रुत्यादिचित्तवृत्तिभ्योरसकार्येभ्योन्येषांरसगतगुणानामननुभवात्॥ ३९
नादृशगुणविशिष्टरसानांद्रुत्यादिकारणत्वात्कारणतावच्छेदकतयागुणानामनुमानमितिचेन्न॥ ~~प्रा~~

प्रातिस्विकरूपेणैवरसानांकारणतोपपत्तौगुणकल्पनेगौरवात्॥शृंगारकरुणशांतानांमाधुर्यकत्वेनद्रुति
कारणत्वंप्रातिस्विकरूपेणकारणत्वकल्पनापेक्षयालघुभूतमितितुनवाच्यं॥परेणमधुरतरतरादिगुणा
नांपृथक्द्रुततरत्वादिकार्यतारतम्यप्रयोजकतयाभ्युपगमनेनमाधुर्यकत्वेनकारणतायागुरुभूतत्वा
त्॥इत्थंचप्रातिस्विकरूपेणैवकारणत्वेलाघवं॥किंचात्मनोनिर्गुणतयात्मरूपरसगुणत्वंमाधुर्यादी
प- नामनुपपन्नं॥एवंतदुपाधिरत्यादिगुणत्वमपिमानाभावात्पररीत्यागुणेगुणान्तरस्यानौचित्याच्च॥अथशृंगारोम
धुरइत्यादिव्यवहारःकथमितिचेत्॥एवंतर्हिद्रुत्यादिचित्तवृत्तिप्रयोजकतासंबंधेनद्रुत्यादिकमेवमाधुर्यादिकमैं [illegible]
स्तु॥व्यवहारस्तुवाजिगंधोस्यतिव्यवहारवदक्षतः॥प्रयोजकत्वंचादृष्टादिविलक्षणंशब्दार्थरसरचनागतमेवमा

 त्वमतोनव्यवहारातिप्रसक्तिः॥तथाचशब्दार्थयोरपिमाधुर्यादेरीदृशस्यसत्वादुपचारोनैवकल्प्यइतितुमादृ
शाः॥जरत्तरास्तु॥श्लेषःप्रसादःसमतामाधुर्यंसुकुमारता॥अर्थव्यक्तिरुदारत्वमोजःकांतिसमाधयइतिदशशब्द
गुणान्दशैवचार्थगुणानामनंति॥नामानिपुनस्तान्येवलक्षणंतुभिन्नं॥तथाहिशब्दानांभिन्नानामप्येकत्वप्रति
भानप्रयोजकः॥संहितयैकजातीयवर्णविन्यासविशेषोगाढत्वापरपर्यायःश्लेषः॥यदाहुः॥श्लिष्टमस्पृष्टशैथि
ल्यमितियथा॥अनवरतविद्वद्द्रुमद्रोहिदारिद्र्यमाद्यद्द्विपोद्दाममदयौघविद्रावप्रौढपंचाननइति॥गाढत्वशै द्-ण
थिल्याभ्यांव्युत्क्रमेणमिश्रणंबंधस्यप्रसादः॥यथा॥किंब्रूमस्तववीरतांवयममीयस्मिन्धराखंडलक्रीडाकुं
डलितभ्रुशोणनयनेदोर्मंडलंपश्यतिमाणिक्यावलिकांतिदंतुरतरैर्भूषासहस्रोत्करैर्विंध्यारण्यगुहागृहाव

निरुहास्तत्कालमुद्भासिताः॥अत्रयस्मिन्नित्यंतंशैथिल्यंभ्रुशब्दांतंगाढत्वंपुनर्नयनेत्यंतंप्रथमेमित्यादिबोध्यं
॥उपक्रमादासमाप्तेरीत्यभेदःसमता॥यथावक्ष्यमाणमाधुर्योदाहरणे॥तत्रह्युपनागरिकयैवोपक्रमोपसंहा
रौ॥संयोगपरह्रस्वातिरिक्तवर्णघटितत्वेसतिपृथक्पदत्वंमाधुर्यं॥यथा॥नितरांपरुषासरोजमालानमृणाला
निविचारपेशलानि॥यदिकोमलतातवांगकानामथकानामकथापिपल्लवानां॥अपरुषवर्णघटितत्वंसुकुमार
ता॥यथा॥स्वेदांबुसांद्रकणशालिकपोलपालिदोलायितश्रवणकुंडलवंदनीया॥आनंदमंकुरयतिस्मरणेनका
पिरम्यादशामनसिमेमदिरेक्षणायाः॥अत्रपूर्वार्द्धे॥उत्तरार्द्धेतुमाधुर्यमपि॥झटितिप्रतीयमानार्थान्वयकत्वम झटि२
र्थव्यक्तिः॥यथानितरामित्यादौ॥कठिनवर्णघटनारूपविकटत्वलक्षणोदारता॥यथा॥प्रमोदभरतुंदिलप्रमथदत्त

तालावलीविनोदिनिविनायकेडमरुडिंडमध्वानिनि॥ललाटतटविस्फुटभवकूपीटयोनिछटोहटोद्धतजटा
द्भटोगतपटोनटोनृत्यति॥पदानांनृत्यत्प्रायत्वंविकटत्वमितिकाव्यप्रकाशटीकाकाराव्याचक्षते॥उदाहरंति॥
स्वचरणविनिविष्टैर्नूपुरैर्नर्त्तकीनांमणितरणितमासीदित्यादितत्रतेषामेतादृशंविकटत्वलक्षणामुदारता
मोजस्यंतर्भावयन्काव्यप्रकाशकारःकथमनुकूलइतितएवजानंति॥नह्यत्रौजसोवैपुल्येनप्रतिभानंमस्ति॥
विनिविष्टैर्नूपुरैर्नर्त्तकीत्यत्रसभ्यौजसोलवोनचमत्कारी॥नापितत्रनृत्यत्प्रायत्वंवर्णानामनुभवंतिसहृदयाः॥
अंशांतरेतुमाधुर्यमेव॥संयोगपरस्वप्राचुर्यरूपंगाढत्वमोजः॥यथा॥साहंकारसुरासुरावलिकराकृष्टभ्रमन्
मंदरक्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वंकषाः॥तृष्णानाम्यदमंदतापसकुलैःसानंदमालोकिताभूमिभृ

DR BHAU DAJI

-पणभूषयंतिभुवनाभोगंभवत्कीर्त्तयः॥यथावा॥अयंपततुनिर्दयमित्यादिप्रागुदाहृतं॥अविदग्धवैदिकादिप्रयो
गयोग्यानांपदानांपरिहारेणप्रयुज्यमानेषुपदेषुलोकोत्तरशोभारूपमौज्वल्यंकांतिः॥यथानितरामित्यादिप्रागुदा
हृतं॥बंधगाढत्वशिथिलत्वयोःक्रमेणावस्थानंसमाधिः॥अनयोरेवप्राचीनैरारोहावरोहव्यपदेशःकृतः॥क्रमएनाहा
वेष्टितयोःप्रसादादस्यभेदकः॥तत्रहितयोर्व्युत्क्रमेणवर्त्तते॥यथा॥स्वर्गनिर्गतनिरर्गलगंगातुंगभंगुरतरंगस
खानांकेवलामृतमुचांवचनानांयस्यलास्यगृहमास्यसरोजं॥अत्रारोहःप्रथमेर्धे॥तृतीयचरणेत्ववरोहः॥गंगे
त्यादौमाधुर्यस्यव्यंजकेषुवर्णेषुसत्स्वपिदीर्घसमासांतःपातितयानतस्यप्ररोहःउत्तरार्धेतुसोपि॥एतेदशश
ब्दगुणाः॥एवंक्रियापरंपरायांविदग्धचेष्टितस्यानदस्फुटत्वस्यतदुपपादकयुक्तेश्चसामानाधिकरण्यरूपसंसर्गः

र॰गं॰ श्लेषः।यावदर्थकपदत्वरूपमर्थनैर्मल्यंप्रसादः।यथाकमलानुकारिवदनंकिलतस्याइत्यादि॥अस्युदाहरणंतुक
४२ मलकात्यनुकारिवक्त्रमित्यादि॥प्रक्रमभंगेनार्थघटनात्मकमवैषम्यंसमता॥यथा॥हरिःपिताहरिर्माताहरिर्भ्रा
ताहरिःसुहृत्नहरिंसर्वत्रपश्यामिहरेरन्यन्नभातिमे॥अत्रविष्णुर्भ्रातेत्यादिनिर्माणेप्रक्रमभंगात्मकंवैषम्यं॥एक
स्याएवोक्तेर्भंग्यंतरेणपुनःपुनःकथनात्मकमुक्तिवैचित्र्यंमाधुर्यं॥यथा॥विधत्तांनिःशंकंनिरवधिसमाधिंविधि
रहोसुखंशेषेशेतांहरिरविरतंनृत्यतुहरः॥कृतंप्रायश्चित्तैरलमथतपोदानयजनैःसवित्रीकामानांयदिजगतिजा
गर्तिभवती॥अत्रविध्यादिभिर्नास्तिकिमपिप्रयोजनमित्येषोर्थःसमाधिविधानादिप्रेरणारूपेणोक्तिवैचित्र्येणाभि ४२
हितः॥अन्यथाअनवीकृतत्वापत्तेः॥अकांडशोकदायित्वाभावरूपमपारुष्यंसुकुमारतायथा॥त्वरयायान्तिपांथो

यंप्रियाविरहकातरः॥प्रियामरणकातरइत्यत्रतुशोकदायिनोमरणशब्दस्यसत्वात्पारुष्यं॥इदंचाश्लीलतादो
पव्याप्यं॥वस्तुनोवर्णनीयस्यासाधारणक्रियारूपपदार्थवर्णनमर्थव्यक्तिः॥यथा॥गुरुमध्येकमलाक्षीकमलाक्षेण
प्रहर्तुकामंमां॥रदयंत्रितरसनाग्रंतरलितनयनंनिवारयांचक्रे॥अयमेवेदानींतनैःस्वभावोक्त्यलंकारइतिव्य
पदिश्यते॥चुंबनंदेहिमेभार्येकामचांडालतृप्तये॥इत्यादिग्राम्यार्थपरिहारउदारता॥एकस्यपदार्थस्यबहुभिःप
दैरभिधानंबहूनांचैकेनतथैकस्यवाक्यार्थस्यबहुभिर्वाक्यैर्बहूनांवाक्यार्थस्यैकवाक्येनाभिधानंविशेषणानांसा
भिप्रायत्वंचेतिपंचविधमोजः॥यदाहुः॥पदार्थेवाक्यरचनावाक्यार्थेचपदाभिधा॥प्रौढिर्व्याससमासौचसाभि
प्रायत्वमस्यचेति॥पूर्वार्द्धप्रतिपाद्यंद्वयंव्याससमासौचेतिचतुःप्रकाराप्रौढिःसाभिप्रायत्वंचेतिपंचप्रकारमोज

र॰गं॰ इत्यर्थः॥प्रौढिः॥प्रतिपादनवैचित्र्यंयथा॥सरसिजवनबंधुश्रीसमारंभकालेरजनिरमणराज्येनाम्नामाभुन्नयाति॥
४३ परमपुरुषवक्त्रादुद्गतानांनराणांमधुमधुरगिरांचप्रादुरासीद्विसंवादः॥अत्रोपसीत्येकपदार्थस्याभिधा
नायप्रथमचरणइत्याद्यग्रेपिबोध्यं॥खंडितानेत्रकंजालिमंजुरंजनपंडिताः॥मंडिताखिलदिक्प्रांताश्चंडांशोर्भांति
भानवः॥अत्रयस्याःपरांगनासंभोगोत्पत्तिःप्राप्तगृहेचेइतिकाव्यार्थेखंडितापदाभिधानं॥अयाचितःसुखंदत्तेया ॰॰याचिता
चितश्चनयच्छति॥सर्वस्वंचापिहरतेविधिरुच्छृंखलोनृणां॥अत्रदैवाधीनंसर्वमित्येकस्मिन्वाक्यार्थेनानावाक्य त्र।
रचनात्मकोव्यासपदवाच्योविस्तारः॥तपस्यतोमुनेर्वक्त्राद्वेदार्थमधिगत्यसःवासुदेवनिविष्टात्माविवेशपरमं ४३
मंपदं॥अत्रमुनिस्तपस्यतिद्वैतवक्त्रात्सवेदार्थमधिगतवांस्तदनंतरंवासुदेवपरब्रह्मणिमनःप्रावेशयत्ततश्च

ॐ मुक्तोभूदितिवाक्यार्थकलापःशतृत्वकावक्त्रादिभिस्तिभिस्तेनचानुवाद्यविधेयभावेनैकवाक्यार्थीकृतः॥साभि
प्रायत्वंचप्रकृतार्थपोषकतायथा॥गणिकाजामिलमुख्यानवताभवताबताहमपिसीदन्भवमरुगर्त्तेकरुणा
मूर्त्तेनसर्वथोपेक्ष्यः॥अत्रोपेक्षाभावकरुणामूर्त्तित्वंपोषकं॥पापिष्ठत्वात्करुणायाअभावेप्रसक्तेतस्याःसंपा
दनायगणिकेत्यादिसीदन्नितिच॥दीप्तरसत्वंकांतिः॥तच्चस्फुटप्रतीयमानरसत्वमुदाहरणंचवर्णितम
वरसप्रकरणेवर्णयिष्यतेच॥अवर्णितपूर्वोयमर्थःपूर्ववर्णितस्त्रायोवेतिकवेरालोचनंसमाधिः॥ज्ञानस्य
विषयतासंबंधेनार्थनिष्ठत्वादर्थगुणता॥आद्योयथा॥तनयमैनाकगवेषणेत्यादौ॥द्वितीयस्तुप्रायशःस
र्वत्रैवेत्याहुः॥अपरेत्वेषुगुणेषुकतिपयाःप्रागुक्तैस्त्रिभिर्गुणैर्वक्ष्यमाणदोषाभावालंकारैश्चगतार्थयंतः कां रू

कांश्चि

र॰गं॰ श्चिद्वैचित्र्यमात्ररूपतया क्वचिद्दोषतया च मन्यमानान तावतः स्वीकुर्वंति ॥ तथाहि श्लेषोदारता प्रसादसमा-
४३ धीनामोजोव्यंजकघटनायामंतर्भावः ॥ न च श्लेषोदारतयोः सर्वांशे गाढबंधात्मनोरोजोव्यंजकघटनांतर्भा
वोस्तु नाम प्रसादसमाध्योस्तु गाढशिथिलात्मनोरंशेनोजोव्यंजकांतर्भावेप्यंशांतरेण कुत्रांतर्भाव इति वा
च्यं ॥ माधुर्याभिव्यंजके प्रसादाभिव्यंजके वेति सुवचत्वात् ॥ माधुर्यं तु परेषामस्मदभ्युपगत माधुर्यव्यंजक
उद्दत्वा- मेव ॥ एवं च सर्वत्र व्यंजके व्यंग्यशब्दप्रयोगो भाक्तः ॥ समता तु सर्वत्रानुचितैव ॥ प्रतिपाद्योद्दत्वाभ्यामेकस्मि ४४
न्नेव पद्ये मार्गभेदस्येष्टत्वात् ॥ यथा ॥ निर्माणे यदि मार्मिकोसि नितरामत्यंतपाकद्रवन्मृद्वीका मधुमाधुरीमद ४३
सरो! परीहारोद्धुराणां गिरां काव्यं तर्हि सुखेन कथय त्वं संमुखे मादृशां ॥ नो चेद्दुष्कृतमात्मना कृतमिव स्वांताद्बहि

र्मा कृथाः ॥ अत्र पूर्वार्द्धे तृतीयचरणे च श्लोकोत्तरनिर्माणप्रतिपादके यो मार्गो न स चतुर्थचरणे कदर्यकाव्य
प्रतिपादक इति वैषम्यमेव गुणः ॥ ग्राम्यत्वकष्टत्वयोस्त्यागात् कांतिसौकुमार्ययोर्गतार्थता प्रसादेन चार्थ
व्यक्तेरिति ॥ अर्थगुणेष्वपि श्लेषः ॥ ओजस आद्याश्चत्वारो भेदाश्च वैचित्र्यमात्ररूपा न गुणांतर्भावमर्हंति ॥ अन्य
था प्रतिश्लोकमर्थवैचित्र्यवैलक्षण्याद्गुणभेदापत्तेः ॥ अनधिकपदत्वात्मा प्रसाद उक्तिवैचित्र्यवपुर्माधुर्यमपा
रुष्यशरीरं सौकुमार्यमग्राम्यत्वरूपोदारता वैषम्याभावलक्षणा समता साभिप्रायत्वात्मकः पंचम ओजसः प्र
कारः स्वभावस्फुटत्वात्मिकार्थव्यक्तिः स्फुटरसत्वरूपा कांतिश्चाधिकपदत्वानवीकृतत्वामंगलरूपाश्लीलग्राम्य
भग्नप्रक्रमापुष्टार्थतारूपाणां दोषाणां निराकरणेन स्वभावोक्त्यलंकारस्य रसध्वनिरसवदलंकारयोश्च स्वी

र॰गं॰ करणेन गतार्थानि॥ समाधिस्तु कविगतः काव्यस्य कारणं न तु गुणः प्रतिभाया अपि काव्यगुणत्वापत्तेरतस्त्रय
४६ एव गुणा इति मम्मटभट्टादयः॥ तत्र टवर्गवर्ज्जितानां वर्गाणां प्रथमतृतीयैः शर्भिरंतसैश्च घटितानि कद्येन प्र स्थै
युक्तैरनुस्वारपरसवर्णैः शुद्धानुनासिकैश्च शोभितावक्ष्यमाणैः सामान्यतो विशेषतश्च निषिद्धैः संयोगाद्यैर
चुबिता अवृत्ति मृदुवृत्तिर्वा रचनानुपूर्व्याश्च त्मिका माधुर्यस्य व्यंजिका॥ द्वितीयचतुर्थास्तु वर्गा गुणस्यास्य ना
नुकूला नापि प्रतिकूला दूरतया संन्निवेशिताश्चेत्नैकद्येन तु प्रतिकूला अपि भवंति॥ यदि तदायत्तो नानुप्रासः॥ ४६
अन्ये तु वर्गस्थानां पंचानामप्यविशेषेण माधुर्यव्यंजकतामाहुः॥ उदाहरणं नांतमालतरुकांतिलंघिनीं किंक ४७
रीकृतनवांबुदत्विषं॥ स्वांतमे कलयशांतये चिरं नैचिकीनयनचुंबितांश्रियं॥ यथावा॥ स्मृतापि तरुणातपंक

नी॰
रुणया हरंती नृणामभंगुरतनुत्विषां वलयिता शतैर्विद्युतां कलिंदगिरिनंदिनीतटसुरद्रुमालंबिनी मदीयम
ति चुंबिनी भवतु कापि कादंबिनी॥ यथावा॥ स्वेदांबुसांद्रकणशालिकपोलपालितैरस्मितालसविलोकनैः
वंदनीया॥ आनंदमंकुरयति स्मरणेन कापि रम्या दशा मनसि मे मदिरेक्षणायाः प्रथमे पद्ये तिशयोक्त्यलंकृत
स्य भगवत्ध्यानोत्सुकस्य भगवद्विषयकरतेर्वा ध्वन्यमानायाः शांत एव पर्यवसानीत्तद्रुतस्य माधुर्यस्याभिव्यं
ष/ल्ला- जिकारचनेयं॥ द्वितीये तु स्मृत्युपलब्धश्रृंगारगतस्यानेकश्चेन द्वितीयचतुर्थवर्गवर्णटवर्गद्वयजिह्वामूली व्ये-/ड्रा-
द्ग्र॰ .५ योपध्मानीयैर्विसर्गसकारबहुलैर्वर्णैर्घटितो द्वचुरेफान्यतरघटितसंयोगपरह्रस्वैश्चानेकश्चेन प्रयुक्तैरालिं
गितो दीर्घवृत्यात्मा गुंफ ओजसः॥ अस्मिन्पतिताः प्रथमतृतीया वर्ग्या गुणस्यास्य नानुकूला नापि प्रतिकूलाः ण

र॰गं॰ संयोगाद्यघटकाश्चेत्तद्दृ टकास्त्वनुकूला एवमनुस्वार परसवर्णाअपियथा॥अयंपतत्तुनिर्दयंदलितद्रुतेत्यादौ
४६ प्रागुदाहृते॥श्रुतमात्रोवाक्यार्थकरतलबदरमिवनिवेदयंतीघटना प्रसादस्य॥अयंचसर्वसाधारणोगुणः॥
उदाहरणान्यत्रप्रायशोमदीयानिसर्वाण्येवपद्यानितथापियथा॥चिंतामीलितमानसोमनसिजःसख्योवि
हीनप्रभाःप्राणेशःप्रणयाकुलःपुनरसावास्तांसमस्ताकथा॥एतत्त्वांप्रतिवेदयामिममचेदुक्तिंहितांमन्यसेमु
ग्धेमाकुरुमानमाननमिदंराकापतिर्जेष्यति॥अत्रसर्वावच्छेदेनप्रसादाभिव्यंजकत्वमंशभेदेनतुमाधुर्योजो
ऽभिव्यंजकत्वमपिमनसिजात्तस्यमाकुर्वादेश्चमाधुर्याभिव्यक्तिहेतुत्वात्सख्योइत्यादेरोजोगमकत्वात्॥नन्वत्र ४६
शृंगाराश्रयस्यमाधुर्यस्याभिव्यक्तयेतदनुकूलास्तुनामरचनाओजसस्तुकःप्रसंगोयदर्थंतदनुकूलवर्णविन्या

सइतिचेत्॥नायिकामानोपशांतयेकृतानेकयत्नायास्तदीयंहितमुपदिशंत्याःसख्याःसक्रोधत्वस्यव्यंजनीयत
या तथाविन्यासस्यसाफल्यात्किंबहुनारसस्योजस्विनोमर्षादेर्भावस्यचाविवक्षायामपिवक्तृरिक्रुद्धतयाप्रसिद्धे
वाच्येवाक्रूरनरेआख्यायिकादौप्रबंधेवापरुषवर्णघटनेष्यते॥यथावा॥वाचानिर्मलयासुधामधुरयायांनाथशि
शिक्षामादोस्तांस्वप्नेपिनसंस्पृशाम्यहमहंभावावृतोनिस्त्रपः॥इत्यागःशतशालिनंपुनरपिस्वीयेषुमांबिभ्रतस्त्व
त्तोनास्तिदयानिधिर्यदुपतेमत्तोनमत्तोपरः॥अत्रगुणांतरासमानाधिकरणःप्रसादः॥इदानींतत्तद्गुणव्यंज
नक्षमायानिर्मितेःपरिचयायसामान्यतोविशेषतश्चवर्जनीयंकिंचिन्निरूप्यतेवर्णानांस्थानंतर्यसकृदेकपदग
तत्वेकिंचिदश्राव्यं॥यथाककुभसुरभिःवितनोगात्रःपटलमिवाभातिइत्यादौ॥असकृच्चेदधिकं॥यथावितनस्त

र॰गं॰ रुरेषाभातिभ्रमो॥ एवंभिन्नपदगतत्वेपि॥ यथाशुककरोषिकथंविज्ञनेरुचिमित्यादौ असकृद्भिन्नपदगतत्वेनतो
४७ ष्यधिकं॥ यथापिककर्कशभोमुखरीकुरुष्वकामं॥ एवंस्वसमानवर्ग्यानंतर्यंसकृदेकपदगतत्वेकिंचिदश्राव्यं॥ यथा
वितथस्तेमनोरथाः असकृच्चेदधिकं॥ यथावितथतरंवचनंतवप्रतीमः॥ एवंभिन्नपदगतत्वे॥ यथाअथतस्य
वचःश्रुत्वेत्यादौ असकृद्भिन्नपदगतत्वेतुततोप्यधिकंयथा अथतथाकुरुयेनसुखंलभे॥ एतच्चवर्गाणांप्रथम
द्वितीययोस्तृतीयचतुर्थयोरानंतर्यं॥ प्रथमतृतीययोर्द्वितीयतृतीययोर्वानंतर्येतुतथानाश्राव्यंकिंत्वीषत्॥ निर्माण
मार्मिकैकवेद्यं॥ एतदप्यसकृच्चेत्ततोधिकत्वात्साधारणैरपिवेद्यं॥ खगकलानिधिरेषविजृंभतेइतिवदंतिदिवा
निशंधन्याःपंचमानांमधुरत्वेनस्ववर्ग्यानंतर्येनतथा। यथातमुतेतनुतांतनौ॥ स्वानंतर्येत्वश्रव्यमेव॥ यथामम

DR. BHAU DAJI

महतीमनसिव्यथाविरासीत्॥ एतानिचाश्राव्यत्वानिगुरुव्यवायेनापोह्यंते॥ संजायतांकथंकारंकाकेकेकाकल
स्वनः॥ यथावा॥ यथायथामामरसायतेक्षणामयासरागंनितरांनिषेविता॥ तथातथातत्त्वकथेवसर्वतोविकृष्य
मामेकरसंचकारसा॥ इदंतुदीर्घव्यवायेसंयोगपरव्यवायेतुसदाजयानुषंगानामंगानांसंगरस्थले॥ रंगांग
णमिवाभातिनृत्यत्तुरगतांडवैः॥ इदंतुबोध्यं॥ गुरुर्ययोर्व्यवधायकस्तयोरेववर्णयोरानंतर्यकृतमश्रव्यत्वम
पवदंतितेनात्रथकारतकारानंतर्यकृतदोषापवादेपिनकारथकारानंतर्यकृतमश्रव्यत्वमनपोदितमेव॥
एवंस्त्रयादीनांसंयोगेपिप्रायेणाश्रव्यः॥ राष्ट्रेनवोष्ट्रःपरितश्चरंतिइत्येवमादयःश्रुतिकाटवभेदाअन्येप्यनुभवानु
सारेणबोध्याः॥ अर्दौथर्यानंतर्येसंयोगस्यभिन्नपदगतस्यसकृदप्यश्रव्यमसकृत्तुसुतरां॥ हरिणीप्रेक्षणायत्र

र॰गं॰ गद्दिणीनविलोक्यते ॥ सेवितंसर्वसंपद्भिरपितद्ध्यनंवनं ॥ एकपदगतस्यतुनथानाश्रव्यं ॥ यथाजामतांविजितःपं
४८ थाःशास्त्रवीणांवथोद्यमाः ॥ परसवर्णकृतस्यतुसंयोगस्यसर्वथादीर्घाद्भिन्नपदगतत्वाभावान्मधुरत्वाद्यानंतर्यं
न मगंमनोप्यश्रव्यं ॥ यथातांतमालतरुकांतीत्यादिपद्ये अत्रतामित्यत्रचपरसवर्णस्यपूर्वपदभक्ततयानसं
योगोभिन्नपदगतः प्रत्येकंसंयोगसंज्ञेतिपक्षेपिभिन्नपदगतःसंयोगोनदीर्घादव्यवहितपरः नवांबुदेत्यत्र
त्वेकदेशस्यपदद्वयभक्ततयादीर्घाद्भिन्नपदगतत्वेसत्यव्यवहितोत्तरत्वंयद्यपिपरसवर्णकृतसंयोगस्यसंभ
वति तथाप्यत्रभिन्नपदगतत्वमेकपदगतभिन्नत्वंविवक्षितमित्यदोषः ॥ असकृत्तुसुतरांयथा ॥ एषाप्रियामे ४८
कगताप्रपाकुलाइदंचाश्रव्यत्वंकाव्यस्यपंगुत्वमिवप्रतीयते ॥ अथस्वेच्छयासंध्यकरणंसकृदप्यश्रव्यं ॥ यथा

रम्याणिइंदुमुखितेकिलकिंचितानि ॥ प्रगत्भ्यताप्रयुक्तंत्वसकृदेव ॥ अहोअमीइंदुमुखीविलासाः ॥ एवमेवचय
वलोपप्रयुक्तं ॥ अपरइषवएतेकामिनीनांदृगंताः ॥ कथंतर्हिभुजगादितप्ररुतयोगारुढोमंत्राइवायनीरमण
नाराइवतुरगाइवसुखलीनामंत्रिणोभवतइतिभवदीयंकाव्यमितिचेदकृत्वेवयलोपंपाठान्नदोषः ॥ एवंरोरुत्व
स्यहलिलोपस्ययणवृद्धिसवर्णदीर्घपूर्वरूपादीनांनेकधान्नबाहुल्यमश्रव्यताहेतुः ॥ एवमिमेसर्वेप्यश्रव्यभेदाः टये
काव्यसामान्येवर्ज्जनीयाः ॥ अथविशेषतोवर्ज्जनीयाः तत्रमधुररसेषुयेविशेषतोवर्जनीयाअनुपदंवक्ष्यंतेनतएवौ
जस्विषनुकूलायेचानुकूलतयोक्तास्तेप्रतिकूलाइतिसामान्यतोनिर्णयः ॥ मधुररसेषुतुदीर्घसमासश्चयघटितसं
योगपरह्रस्वस्यविसर्ज्जनीयादेशसकारजिह्वामूलीयोपध्मानीयानांटवर्गझयांरेफहकारान्यतरघटितसंयो

र॰गं॰ गस्यहलाहलमनभिज्ञानांस्वात्मसंयोगस्यझयद्वयघटितसंयोगस्यचासकृत्प्रयोगंनैकध्येनवर्जयेत्॥सवर्णझ स्य-
४९ ञ्हयघटितसंयोगस्यशभिन्नमहाप्राणघटितसंयोगस्यसकृदपीनिसंक्षेपः॥दीर्घसमासोयथा॥लोलाल
कावलिचलन्नयनारविंदलीलावशंवदितलोकविलोचनायाः॥सायाहनिप्रणयिनोभवनंव्रजंत्याश्चेतोन
कस्यहरतेगतिरंगनायाः॥ङ्गन्नघटितसंयोगपरन्ढस्वानांप्राचुर्यंनैकध्येनयथा॥हीरस्फुरद्रदनशुभ्रिमशोभि रो-
किंचसांद्रामृतंवदनमेणविलोचनायाः॥वेधाविधायपुनरुक्तमिवेंदुबिंबंदूरीकरोतिनकथंविदुषांवरेण्यः॥
अत्रभिन्नशाद्वपर्यंतंशृंगारानुगुणंशिष्टंतुरमणीयं॥उत्तरार्धेककारनकाररूपज्ञन्नद्वयसंयोगस्यसत्वेपि ४९ ग्र
प्राचुर्याभावान्नदोषः॥यदितुदंतांशुकांतमरविंदरसापहारिसांद्रामृतमित्यादिक्रियतेतदासर्वमेवरमणी

यं॥विसर्गसकारप्राचुर्यंयथा॥सानुरागास्सानुकंपाश्चतुराःशीलशीतलाः हरंतिहृदयंहंतकांतायाःस्वांतवृत्त
यः॥अत्रशकारद्वयसंयोगांतंपूर्वार्द्धंमाधुर्याननुगुणं॥जिह्वामूलीयप्राचुर्यंयथा॥कलितकुलिशघाताःकेपि
खेलंतिवाताःकुशलमिहकथंवाजायतांजीवितेमे॥अयमपिवतगुंजन्नालिमाकंदमौलौचुलकयतिमदीयां
५८ चेतनांचंचरीकः॥अत्रद्वितीयजिह्वामूलीयपर्यंतमननुगुणंमाधुर्यस्ययदिचकथयकथमिवाशाजायतांजीविते
मेमलयभुजगवांतावांतिवाताःकृतांताइतिविधीयतेतदानींनायंदोषः॥उपध्मानीयप्राचुर्यंयथा॥अलकाः
फणिशावतुल्यशीलानयनांताःपरिचुंबितेपुलीलाःचपलोपमितारवलुस्वयंयावन्नलोकेसुखसाधनंकथंसा॥
ग्र- ॐ अत्रद्वावुपध्मानीयावेवनशांतानुगुणौ॥टवर्गभूयांप्राचुर्यंयथा॥वचनेतववयत्रमाधुरीसाहृदिपूर्णाकरुणा

र॰गं॰ चकोमरलेभ्रत्॥अधुनाहरिणाक्षिहाकथंयाकदुनातत्रकाठोरताविरासीत्॥धुंबुनासखींतत्रहार्कं वागतिर श्रं-।
६० न्यैवविलोक्यतेगुणानामितित्वनुगुणं॥रेफघटितसंयोगस्यासकृत्प्रयोगोयथा॥तुलामनालोक्यनिजामखर्वे
र्वं गौरांगिगर्वेनकदापिकुर्याः॥सन्ततिनानाफलभारवत्योलताःकियंत्योगहनांतरेषु॥यदितुलामनालोक्यम
हीनलोकस्मिन्भितिनिर्मीयतेनतदासाधु॥हलांलमनन्भिन्नानांस्वात्मनासंयोगस्यासकृत्प्रयोगोयथा॥विगणय्य
मेनिकार्यंक्ततामनुयातोसिनैवतन्याय्यं॥लमनानांस्वात्मनोसंयोगस्तुननथापारुष्यमावहति॥यथाइक्ष्मुह्य च-।
सितामुखस्यशोभापरिफुल्लनयनांबुजंहृदयंनेजलदालिमयंजगाद्दितन्वन्कलितःक्वापिकिमालिनीलमेघः॥ ६०
झञद्वयघटितसंयोगस्ययथाआसायंसलिलभरेसवितारमुपास्यसादरंतपसा॥अधुनाब्जेनमनाक्तवमा

निनितुलनामुखस्याप्ता॥अत्रद्वितीयार्द्धमरम्यं॥रंसंसिजकुलेनसंप्रतिभामिनितेमुखतुलाधिगतेतिनु
साधुसवर्णझञद्वयघटितसंयोगस्यसकृत्प्रयोगोयथा॥अपिमंदस्मितमधुरंवदनंतन्वंगियदिकुरुषे॥अ मनाक्।
रा धुनैकवेलयशमितंकारमणस्यहंतसाम्राज्यंनन्वत्रककारद्वयसंयोगस्यहलघटितस्वात्मसंयोगित्वेनैवनि
षेधात् ~~क्षस्वसंयोगस्यहलघटितस्वात्मसंयोगत्वेनैवनिषेधात~~ करवसंयोगस्यमहाप्राणसंयोगनिषेधवि
षयत्वात्तृतीयसंयोगस्यचासंभवात्सवर्णझञद्वयसंयोगनिषेधोनिरवकाशइतिचेत्॥सकृत्प्रयोगवि
षयत्वेनास्यपार्थक्यात्॥अन्यथामनाक्कुरुषइतिनिर्दोषंस्यात्॥महाप्राणघटितसंयोगोयथा॥अपिमृगम
दबिंदुंचेन्दालेबालेसमातनुषे॥उत्तरार्धंप्राचीनमेव॥एवंत्वंप्रत्ययंयडंतानियङ्लुगंतान्यन्यानिशाब्दिक

र.गं. चकोमलेभूत्॥अधुनाहरिणाक्षिहाकथंवाकटुनातत्रकाठोरताविरासीत्॥धुंभेनासखीतत्रहार्कबागतिर ग्रं-।
६० न्यैवविलोक्यतेगुणानामितित्वनुगुणं॥रेफघटितसंयोगस्यासकृत्प्रयोगोयथा॥तुलामनालोक्यनिजामख
र्वंगोरांगिगर्वेनकदापिकुर्याः॥संततिनानाफलभारवत्योलताःकियंत्योगहनांतरेषु॥यदितुलामनालोक्यम
हीनलोस्मिभितिनिर्मीयतेतदासाधु॥हलांलमनभिन्नानांस्वात्मनासंयोगस्यासकृत्प्रयोगोयथा॥विगणय्य
मेनिकांर्यकत्तामनुयातोसिनैवतन्याय्यं॥लमनानांस्वात्मनोसंयोगस्तुनतथापारुष्यमावहति॥यथाइकुमुद्व य-।
सितामुखस्यशोभापरिफुल्लंनयनांबुजंद्वयंते॥जलदालिमयंजगद्भितन्वन्कलितःकापिकिमालिनीलमेघः॥ ६०
झञद्वयघटितसंयोगस्ययथा॥आसायंसलिलभरेसवितारमुपास्यसादरंतपसा॥अधुनाब्जेनमनाक्तवमा

निनितुलनामुखस्याप्ता॥अत्रद्वितीयार्द्धमरम्यं॥२ रसिजकुलेनसंप्रतिभामिनितेमुखतुलाधिगतेतितु
साधुसवर्णझञद्वयघटितसंयोगस्यसकृत्प्रयोगोयथा॥अपिमंदस्मितमधुरंवदनंतन्वंगियदिकुरुपे॥अ मनाक्।
रा धुनैकेवेलयश्मितंकारमणस्यहंतसाम्राज्यंनन्वत्रककारद्वयसंयोगस्यहलद्वयघटितस्वात्मसंयोगित्वेनैवनि
पेधात् ~~खखसंयोगस्यहलद्वयघटितस्वात्मसंयोगत्वेनैवनिषेधात्~~ करवसंयोगस्यमहाप्राणसंयोगनिषेधवि
षयत्वात्तृतीयसंयोगस्यचासंभवात्सवर्णझञद्वयसंयोगनिषेधोनिरवकाशइतिचेत्॥सकृत्प्रयोगवि
षयत्वेनास्यपार्थक्यात्॥अन्यथामनाक्कुरुषइतिनिर्दोषंस्यात्॥महाप्राणघटितसंयोगोयथा॥अपिमृगम
दबिंदुंचेन्द्रालेबालेसमातनुषे॥उत्तरार्थप्राचीनमेव॥एवंत्वप्रत्ययंयडंतानियङ्लुगंतान्यन्यानिशाब्दिक

र॰गं॰ प्रियाण्यपिमधुररसेन प्रयुंजीत॥ एवं व्यंग्यचर्वणातिरिक्तप्रयोजनविशेषापेक्षानापाततोधिकचमत्कारि
५१ णोनुप्रासनिचयान्यमकादींश्चसंभवतोपिकविर्ननिबध्नीयात्॥ यतोहितैरसचर्वणायामनंतर्भवंतःसहृ
दयहृदयंस्वाभिमुखंविदधारसपराङ्मुखंविदधीरन्॥ विप्रलंभेतुसुतरां यतोमधुरतमत्वेनास्यनिर्मलसुना
सितानिर्मितपानकरसस्येवतनीयानपिस्वातंत्र्यमावहन्पदार्थः सहृदयहृदयारुंतुदतयानसर्वथैवसा
मर्थ्यनोकरण्यमर्हति॥ यदाहुः॥ ध्वन्यात्मभूतेशृंगारेयमकादिनिबंधनंशक्तावपिप्रमादित्वंविप्रलंभे
विशेषतः॥ येतुपुनरक्लिष्टतयानुभूतस्कंधतयाचनपृथग्भावनामपेक्षंतेकिंतुरसचर्वणायामेव ५१
सुखंगोचरीकर्तुंशक्यानतेषामनुप्रासादीनांत्यागोयुक्तः॥ यथा॥ कस्तूरिकातिलकमालिविधाय सायम्

स्मेराननासपदिशीलयसौधमौलिं॥ प्रौढिंभजंतुकुमुदानिमुदामुदारामुल्लासयंतुपरितोहरितोमु
खानि॥ इत्थमेतेप्रसंगतोमधुररसाभिव्यंजिकायांरचनायांसंक्षेपेणनिरूपितादोषाः॥ एभिर्विशेष
विषयैःसामान्यैरपिचदूषणैरहिता माधुर्यभारभंगुरसुंदरपदवर्णविन्यासाव्युत्पत्तिमुद्गिरंतीनि
र्मातुर्याप्रसादयुताता विबुधावैदर्भींविदंतिरीतिंगृहीतपरिपाकां॥ अस्यामुदाहृतान्येवकियंत्यपि
पद्यानि॥ यथावा॥ आयातेवनिशानिशापतिकरैःकीर्णंदिशामंतरंभामिन्योभवनेषुभूषणगणैरु
ल्लासयंतिश्रियं॥ वामेमानमपाकरोषिनमनागद्यापिरोषेणतेहाहाबालमृणालतोप्यतितमांतन्वी
त्वं ननुताम्यसि॥ अस्याश्चरीतेर्निर्माणेकविनानितरामवहितेनभाव्यमन्यथातुपरिपाकभंगःस्यात्॥

रगं° अथअमरुककविपद्ये॥शून्यंवासगृहंविलोक्यशयनादुत्थायकिंचिच्छनैर्निद्राव्याजमुपागतस्यसुचिरंनि
५२ र्वर्ण्यपत्युर्मुखं॥विस्रब्धंपरिचुंब्यजातपुलकामालोक्यगंडस्थलींलज्जानम्रमुखीप्रियेणहसताबाला
चिरंचुंबिता॥अत्रोत्थायकिंचिच्छनैरित्यत्रसवर्णझकारद्वयसंयोगस्यापि कसत्रयोस्तत्रापिनैकट्ये
नेतिसुतरामश्रव्यं॥एवंझकारघटितसंयोगपरह्रस्वस्यापितथाशनैर्निद्रेत्यत्रनिर्वर्ण्यपत्युर्मुखमित्य
त्रचरेफघटितसंयोगस्यझयघटितसंयोगपरह्रस्वस्यचप्राचुर्यंविस्रब्धमित्यत्रमहाप्राणघटितस्य
लज्जेत्यत्रस्वात्मसवर्णझकारद्वयघटितस्य मुखीप्रियेणेत्यत्रभिन्नपदगतदीर्घानंतरस्यसंयोग ५१
स्यतथाक्त्वाप्रत्ययस्यपंचकृत्वोलोकतेश्चधातोर्द्विःप्रयोगःकवेर्निर्माणसामग्रीदारिद्र्यंप्रकाशय

तीत्यलं परकीयकाव्यविमर्शनेन॥इतिसंक्षेपेणनिरूपितारसाः॥अथभावध्वनिर्निरूप्यते॥अथकिंभावत्वंविभावा
नुभावभिन्नत्वेसतिरसव्यंजकत्वमितिचेत्॥रसकाव्यवाक्येतिव्याप्त्यापत्तेः॥अर्थद्वाराशब्दस्यापिव्यंजकत्वात्॥द्वा
रांतरनिरपेक्षत्वेनव्यंजकत्वेविशेषितेत्वसंभवःप्रसज्येतभावस्यापिभावनाद्वारैवव्यंजकत्वात्भावनायामतिव्या
प्त्यापत्तेश्च॥अतएवविभावानुभावभिन्नत्वस्येवशब्दभिन्नत्वस्यापिनद्विशेषणत्वेननिस्तारः॥प्रधानध्वन्यमान
भावेरसव्यंजकत्वाभावव्याप्त्यापत्तेश्च॥नचतत्रापिभ्रांतेरसोभिव्यज्यतएवेतिवाच्यं॥भावध्वनिविलोपप्रसंगा
त्भावचमत्कारप्रकर्षाद्भावध्वनित्वंरसस्तु तत्रव्यज्यमानोप्यचमत्कारित्वान्नध्वनिव्यपदेशहेतुरित्यपिनशक्यं
वदितुंचमत्काररहितरसव्यक्तौमानाभावात्॥रसेहिधर्मिग्राहकमानेनानंदांशाविनाभावस्यप्रागेवावेदना

र०गं० त्‌॥अतएवप्राधान्येनध्वन्यमानस्यापिभावस्यप्रांतेरसाभिव्यंजकत्वंतथापिदेशकालवयोवस्थादिनानापदा
९३ र्थघटितेयद्यवाक्यार्थेतथाप्यतिव्याप्तिः॥तस्यविभावानुभावभिन्नत्वेसतिरसाभिव्यंजकत्वात्‌॥नापिरसाभि
व्यंजकंचर्वणाविषयचित्तवृत्तित्वंतत्त्वं॥भावादिचर्वणायामतिप्रसंगवारणायचर्वणाविषयेतिचित्तवृत्तिवि
शेषणमितिवाच्यं॥कालागरुद्रवंसाहालाहललब्धिज्ञानतीनितरांअपिनीलोत्पलमालांबालाव्यालावलिंकि
लामनुतइत्यत्रहालाहलसदृशत्वप्रकारकज्ञानेअतिव्याप्तेः॥तस्यविप्रलंभानुभावत्वेनरसाभिव्यंजकच
र्वणाविषयत्वाच्चित्तवृत्तित्वाच्च॥नापरखंडतत्त्वेमानाभावात्‌॥अत्रोच्यते॥विभावादिव्यज्यमानहर्षाद्यन्यत
मत्वंतत्त्वं॥यदाहुः॥व्यभिचार्यंजितोभावइति॥हर्षादीनांचसामाजिकगतानामेवस्थायिभावन्यायेनाभिव्यक्तिः

सापिरसन्यायेनेतिकेचित्‌॥व्यंग्यांतरन्यायेनेत्यपरेमन्यंते॥विभावानुभावौचात्रव्यंजकौ॥नत्वेकस्मिन्व्य
भिचारिणिध्वन्यमानेव्यभिचार्यंतरंव्यंजनयावश्यमपेक्ष्यते॥तस्यैवप्राधान्यापत्तेः॥वस्तुतस्तुप्रकरणादिवशात्‌
प्राधान्यमनुभवतिकस्मिंश्चिद्भावेतदीयसामग्रीव्यंग्यत्वेननांतरीयकतयातनिमानभावहतोव्यभिचार्यंतर
स्यांगत्वेपिनक्षतिः॥यथागर्वादावमर्षस्यामर्षादौवागर्वस्यनचैवंसतिगुणीभूतव्यंग्यत्वापत्तिःपृथग्विभावानुभा
वाभिव्यक्तस्यान्तरवानांतरीयकस्यभावांतरगुणीभूतस्यैवगुणीभूतव्यंग्यव्यपदेशहेतुत्वात्‌विभावस्तत्रव्यभि
चारिणोनिमित्तकारणसामान्यं॥ननुरसस्येवसर्वथैवालंबनोद्दीपनेअपेक्षितेयदितुक्वचित्संभवतस्तदानवार्य
ते॥हर्षादयस्तुहर्षस्मृतिव्रीडामोहधृतिशंकाग्लानिदैन्यचिंतामदश्रमगर्वनिद्रामतिव्याधित्राससुप्तविबोधामर्षा

र॰गं॰ बहिःस्थोग्रतोन्मादमरणवितर्कविषादौत्सुक्यावेगजडतालस्यासूयापस्मारचपलताप्रतिपक्षत्वात्तधिकारादिज
९४ न्मानिर्वेदश्चेतित्रयस्त्रिंशद्व्यभिचारिणोगुरुदेवनृपपुत्रादिविषयारतिश्चेतिचतुस्त्रिंशत्।।एतेनवात्सल्याख्यपुत्रा
द्यालंबनंरसांतरमितिपरास्तं।।उच्छृंखलतायामुनिवचनपराहतत्वात्।।तत्रेष्टप्राप्त्यादिजन्मासुखविशेषोहर्षः
।।तदुक्तं।।देवभर्तृगुरुस्वामिप्रसादःप्रियसंगमः।।मनोरथाप्तिरप्राप्यमनोहरधनागमः।।तथोत्पत्तिश्चपुत्रादेर्वि
भावोयत्रजायते।।नेत्रवक्त्रप्रसादश्चप्रियोक्तिःपुलकोद्गमः।।अश्रुस्वेदादयश्चानुभावाहर्षंतमादिशेदिति।।
उदाहरणं।।अवधौदिवसांतकालेभवनद्वारिविलोचनेदधाना।।अवलोक्यसमागतंतदामामथरामाविकस
न्मुखीबभूव।।अत्रावधिकालेप्रियागमनंविभावःमुखविकासोनुभावःसंस्कारजन्यंज्ञानंस्मृतिः।।यथा।।त

न्मंजुमंदहसितंश्वसितानितानिसाचैवकलंकविधुरामधुराननश्रीः।।अद्यापिमेहृदयमुन्मदयंतिहंतसायंतनां
बुजसहोदरलोचनायाः।।चिंताविशेषोत्रविभावःभ्रूभ्रंतिगात्रनिश्चलत्वादयआक्षेपगम्याअनुभावाः।।यद्यप्य
त्रास्याएवस्मृतेः।।संचारिण्याःनायिकारूपस्यविभावस्यहंतपदगम्यस्यहृदयवैकल्यरूपानुभावस्यसंयोगाद्वि
प्रलंभरसाभिव्यक्तेरसध्वनित्वंशक्यतेवक्तुंतथापिस्मृतेरेवात्रपुरःस्फुर्तिकत्वाच्चमत्कारित्वाच्चतत्ध्वनित्वमुक्तं।।त
दादेर्बुद्धिरूढप्रकारावच्छिन्नेशक्तिरितिनयेबुद्धेःशक्यतावच्छेदकानुगमकतयानवाच्यतासंस्पर्शःबुद्धिरूढत्वंश
क्यतावच्छेदकानुगमकतयानवाच्यतासंस्पर्शःबुद्धिरूढत्वंशक्यतावच्छेदकमितिनयेपिस्मृतित्वेनस्मृतेर्व्यक्तिवै
द्ग्ध्येनैवतस्माश्चात्रवाक्यवेद्यत्वेपिपदस्यैवकुर्वद्रूपत्वात्पदध्वनिविषयत्वं।।एतेनभावानांपदव्यंग्यत्वेनवैचित्र्य

र॰गं॰ मितिपरास्तं॥सायंतनांबुजोपमानेननयनयोरुत्तरोत्तराधिकनिमीलनोन्मुखत्वध्वननद्वारातस्याआनंदम
९९ ग्नताप्रकाशः॥दरानमत्कंधरबंधमीषन्निमीलितस्निग्धविलोचनाब्जंअनल्पनिश्वासभरालसांगंस्मरामिसंगंचि
रमंगनायाइत्यत्रस्मृतिर्नभावःस्वशब्देननिवेदनादव्यंग्यत्वात्॥नापिस्मरणालंकारःसादृश्यामूलकत्वात्॥सा
दृश्यमूलकत्वात्॥सदृशमूलकस्येवस्मरणस्यालंकारत्वमन्यस्यतुव्यंजितस्यभावत्वमितिसिद्धांतात्॥किंतुविभा
वएवसुंदरत्वात्कथंचिद्रसपर्यावसायी॥स्त्रीणांपुरुषमुखावलोकनादेःपुंसांचप्रतिज्ञाभंगपराभवादेरुत्प
न्नोवैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषोव्रीडा॥यथाकुचकलशयुगांतर्मामकीनंनखांकंसपु ९९
लकतनुमंदंमंदमालोकमाना॥विनिहितवदनंमांवीक्ष्यबालागवाक्षेचकितनतनुतांगीसद्मसद्योविवेश॥

अत्रप्रियदर्शनंतेननायिकाकर्तृकतत्कुचांतर्वर्तिप्रियनखक्षतावलोकनजन्यहर्षावेदकतत्पुलकादेर्दर्शनं
चविभावःसद्यःसदनप्रवेशोनुभावः॥यथावानिरुध्ययांतींतरसाकपोतींकूजत्कपोतस्यपुरोददाने॥मयिस्मिता ६॥
र्द्रवदनारविंदंसानम्रमयांबभूव॥पूर्वत्रत्रासइवात्रापिहर्षलेशतयासन्नपिव्रीडायाअनुगुणएव॥प्रियकर्तृकंकपो
तस्याग्रेकपोत्याःसमर्पणंविभावः॥वदननमनमनुभावः॥भयवियोगादिप्रयोज्यावस्तुतत्वानवधारिणीचित्त
वृत्तिर्मोहः॥अंतरांतराशून्यतास्व्यचित्तावस्थांतरशबलितासातथेतिनुनव्याः॥उदाहरणं॥विरहेणाधिकलहृद
याविलपंतीदयितदयितेति॥आगतमपितंसविधेपरिचयहीनेववीक्षतेबाला॥अत्रकांतवियोगोविभावःइं
द्रियवैकल्यंलज्जाद्यभावश्चानुभावः॥यथावा॥शुंडादंडंकुंडलीकृत्यकूलेकल्लोलिन्याःकिंचिदाकुंचिताक्षः॥नैवा

र॰गं॰ कर्षत्यंबुनैवांबुजालिंकांतायैतंतः कृत्यमन्योगजेंद्रः॥लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतश्चित्त
९६ वृत्तिविशेषोधृतिः॥उदाहरणं॥संतापयामिहृदयंधावंधावंधरातलेकिमहं॥अस्तिममशिरसिसततंनंदकु
मारःप्रभुःपरमः॥अत्रविवेकश्रुतसंपत्यादिर्विभावःचापलाद्युपशमोनुभावः॥ननुचोत्तरार्द्धेचिंतानास्तीतिव
स्तुनोभिव्यक्तेः॥कथमस्यधृतिर्भावध्वनित्वमितिचेत्॥तस्यधृत्युपयोगितयैवाभिव्यक्तेः॥किमनिष्टंममभविष्य
त्याकारश्चित्तवृत्तिविशेषःशंका॥उदाहरणं॥विधिवंचितयामयानयातंसखिसंकेतनिकेतनंप्रियस्य॥अधुना
बतकिंविधातुकामोमयिकामोनृपतिःपुनर्नजाने॥अत्रराजापराधोविभावः॥मुखवैवर्ण्यादयआक्षेप्याअनु ९६
भावः॥इयंतुभयाद्युपादनेनकोपादिकारिणीनतुचिंता॥आधिव्याधिजन्यबलहानिप्रभवोवैवर्ण्यशिथिलां

गत्वहग्भ्रमणादिहेतुर्दुःखविशेषोग्लानिः॥यथा॥शायिताशैवलंशयनेसुषमाशेषानवेंदुलेखेवप्रियमा
गतमपिसविधेसत्कुरुतेमधुरवीक्षणैरेव॥अत्रप्रियविरहोविभावः॥मधुरवीक्षणैरेवेत्येवकारेणबोध्यमा
नाप्रत्युद्गमचरणनिपतनाश्लेषादीनांनिवृत्तिरनुभावः॥नचात्रश्रमःशंक्यः॥कारणाभावात्॥केचित्तुव्याध्या
दिप्रभवंबलनाशंग्लानिमाहुः॥तेषामतेचित्तवृत्यात्मकेषुभावेषुनाशरूपायाग्लानेः॥कथंसमावेशइतिध्येयं
॥यद्यपिबलस्यापचयोग्लानिराधिव्याधिसमुद्भवइतिलक्षणवाक्यादपचयशब्देननाशएवप्रतीयते॥तथापि
प्रागुक्तानुपपत्त्याबलनाशजन्यंदुःखमेवबलापचयशब्देनविवक्षितं॥दुःखदारिद्र्यापराधादिजनितस्वापक
र्षभापणादिहेतुश्चित्तवृत्तिविशेषोदैन्यं॥उदाहरणं॥हतकेनमयावनांतरेवनजाक्षीसहसाविवासिता॥

र०गं० कर्षत्यंबुनैवांबुजालिं कांताथैं ततः कुत्यश्चान्यो गजेंद्रः॥ लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतश्चित्त
९६ वृत्तिविशेषो धृतिः॥ उदाहरणं॥ संतापयामि हृदयं धावं धावं धरातले किमहं॥ अस्ति मम शिरसि सततं नंदकु
मारः प्रभुः परमः॥ अत्र विवेकश्रुतसंपत्त्यादिर्विभावः चापलाद्युपशमोनुभावः॥ ननु चोत्तरार्द्धे चिंता नास्तीति व
स्तुतोभिव्यक्तेः॥ कथमस्य धृतिर्भावध्वनित्वमिति चेत्। तस्य धृत्युपयोगितयैवाभिव्यक्तेः॥ किमनिष्टं मम भविष्य
त्याकारश्चित्तवृत्तिविशेषः शंका॥ उदाहरणं॥ विधिवंचितया मयानयातं सखि संकेतनिकेतनं प्रियस्य॥ अधुना
बत किं विधातुकामो मयि कामो नृपतिः पुनर्न जाने॥ अत्र राजापराधो विभावः॥ मुखवैवर्ण्यादय आक्षेप्या अनु ९६
भावः॥ इयं तु भयाद्युपादनेन कोपादिकारिणी न तु चिंता॥ आधिव्याधिजन्यबलहानिप्रभवो वैवर्ण्यशिथिलां

गत्वदृग्भ्रमणादिहेतुर्दुःखविशेषो ग्लानिः॥ यथा॥ शायिता शैवलशयने सुषमाशेषा नवेंदुलेखेव प्रियमा
गतमपि सविधे सत्कुरुते मधुरवीक्षणैरेव॥ अत्र प्रियविरहो विभावः॥ मधुरवीक्षणैरेवेत्येवकारेण बोध्यमा
नाभ्युत्थानचरणनिपतनाश्लेषादीनां निवृत्तिरनुभावः॥ न चात्र श्रमः शंक्यः॥ कारणाभावात्॥ केचित्तु व्याध्या
दिप्रभवं बलनाशं ग्लानिमाहुः॥ तेषां मते चित्तवृत्त्यात्मकेषु भावेषु नाशरूपाया ग्लानेः कथं समावेश इति ध्येयं
॥ यद्यपि बलस्यापचयो ग्लानिराधिव्याधिसमुद्भव इति लक्षणवाक्यादपचयशब्देन नाश एव प्रतीयते॥ तथापि
प्रागुक्तानुपपत्त्या बलनाशजन्यं दुःखमेव बलापचयशब्देन विवक्षितं॥ दुःखदारिद्र्यापराधादिजनितस्वापक
र्षभाषणादिहेतुश्चित्तवृत्तिविशेषो दैन्यं॥ उदाहरणं॥ हतकेन मया वनांतरे वनजाक्षी सहसा विवासिता॥

र॰गं॰ अधुनाममकुत्रसासतीपतितरेयेववरासरस्वती॥सीतांपरित्यक्तवतोभगवतःश्रीरामभद्रस्येयमुक्तिः॥अत्र
५७ सीतापरित्यागरूपोपराधस्तज्जन्यंदुःखंवाविभावः॥पतितसाम्यरूपस्वापकर्षभाषणमनुभावः॥यदाहुः॥चित्तौ
त्सुक्यान्मनस्तापाद्दौर्गत्याच्चविभावतः॥अनुभावास्तुशिरसोप्यावनतेर्गात्रगौरवात्॥देहोपस्करणत्यागात्दैन्यं
भावंविभावयेत्॥दौर्गत्यादेरनौजस्यंदैन्यंमलिनतादिकृदितिच॥अत्रहतकेनमयाविवासितानतुविधि
नेत्येतस्यार्थस्यपतितोपमयैवपरिपोषोनतुशूद्राद्युपमया॥यतःशूद्रस्यजात्यैवश्रुतिदौर्लभ्यंविधिनाकृतं॥
पतितस्यतुब्राह्मणादेर्विधिनाश्रुतिसुलभत्वेस्वभावेनकृतेपितेनैवतथाविधंपापमाचरतास्वतःश्रुतिर्दूरीकृते ५७
तिस्वस्यपतितेनसाम्यंतस्याश्चश्रुत्येत्युपमालंकारोदैन्यमेवालंकुरुतेनतथामयेतिसेतिचोपादानलक्षणामूल

ध्वनिभ्यांकृतघ्नत्वकृतज्ञत्वनिर्दयत्वदयावत्त्वाद्यनेकधर्मप्रकाशनद्वारातदेवपरिपोष्यतेसेतिस्मृत्याचलेश
नःप्रतीयमानया॥इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनिताध्यानापरपर्यायावैवर्ण्यभूलेखनाधोमुखत्वादिहेतुश्चित्तवृत्ति
विशेषश्चिंता॥यदाहुः॥विभावायत्रदारिद्र्यमैश्वर्यभ्रंशनंतथा॥इष्टार्थापहृतिश्चाथश्वासोच्छ्वासावधोमुखं॥
संतापःस्मरणंचैवकार्श्यंदेहानुपस्कृतिः॥अधृतिश्चानुभावाःस्युःसाचिंतापरिकीर्त्तिता॥वितर्कोस्याःक्षणेपूर्वा
पाश्चात्त्येचोपजायते॥इति॥दूंनिध्यानंचिंताहिताप्राप्तेःसंतापादिकरीमतेतिच॥उदाहरणं॥अधरद्युतिरस्त
पल्लवामुखशोभाशशिकांतिलंघिनी॥अकृतमंमाननुकृताविधिनाकस्यकृतेमृगीदृशः॥अत्रनदप्राप्तिर्वि
भावःअनुतापादयआक्षेप्याअनुभावाः॥नचात्रोत्सुक्यध्वनिरितिवाच्यं॥कस्यकृतेत्यनिर्द्धारितधर्म्यालं

र॰ गं॰ बनायाश्चिंतायाएवप्रतीयमानतयासतोप्यौत्सुक्यस्यैतद्वाक्येनप्राधान्येनाबोधनात्॥ मद्याद्युपभोगजन्मा
१९ उल्लासाख्यःशयनहसितादिहेतुश्चित्तवृत्तिविशेषोमदः॥ यदाहुः॥ संमोहानंदसंदोहोमदोमद्योपभोगज
इति॥ तत्रोत्तमेपुरुषेस्वापोनुभावोमध्यमेहसितगानेनीचेतुरोदनपरुषोक्त्यादि॥ अयंचमदस्त्रिविधःत
रुणमध्यमाधमभेदात्॥ अव्यक्तासंगतवाक्यैःसुकुमारस्खलद्गत्याचयोभिनीयतेसआद्यः॥ भुजाक्षेपस्ख
लितघूर्णितादिभिर्मध्यमः॥ गतिभंगस्मृतिनाशहिक्काछर्द्यादिभिरधमः॥ उदाहरणं॥ मधुरतरंस्मयमानः
स्वस्मिन्नेवालपन्शनैः॥ किमपि॥ कोकनदयंस्त्रिलोकीमालंबनशून्यमीक्षतेक्षीबः॥ अत्रमादकद्रव्यसेवनं १९
विभावः॥ अव्यक्तालापाद्यनुभावः॥ अत्रमत्तस्वभाववर्णनस्यतन्निष्ठमदव्यंजनार्थत्वान्मदभावएवप्रधानमि

तिनस्वभावोक्त्यलंकारस्यप्राधान्यमपितुतंध्वन्युपस्कारकत्वमेव॥ इदंवापुनरुदाहरणं॥ मधुरसान्मधुरंहि
तवाधरंतरुणिमद्वदनेविनिवेशय॥ ममगृहाणकरेणकरांबुजंपपथतामिहहाभभभूतले॥ अत्रापिसए
वविभावः॥ अधिकवर्णोच्चारणादिरनुभावः॥ पूर्वार्धगताग्राम्योक्तिरुत्तरार्द्धेचतरुणीकरेबुजोपमेयतयानि
रूपणीयेस्वकरस्यतदुपमेयतयानिरूपणंचमदमेवपोषयतः॥ बहुतरशारीरव्यापारजन्मानिश्वासांगसं
मर्द्दनिद्रादिकारणीभूतःखेदविशेषःश्रमः॥ यदाहुः॥ अध्वव्यायामसेवाद्यैर्विभावैरनुभावकैः गात्रसंवाहनैने
रास्यसंकोचैरंगमोटनैः॥ निश्वासैर्जृंभितैर्मंदैःपादोत्कंपैःश्रमोमतः॥ श्रमः॥ खेदोध्वगत्यादेर्निद्राश्वासादि
कृन्मतइतिच॥ अयंचसत्यपिबलेजायतेशारीरव्यापारादेवजायतेनतुग्लानिरतोग्लानेःश्रमस्यभेदः॥ उदाहरणं॥

र॰गं॰ विधायसामद्वदनानुकूलंकपोलमूलंहृदयेशयाना।।चिरायचित्रेलिखितेवतन्वीनस्पंदितुंमंदमपिक्षमा
६१ सीत्।।अत्रविपरीतसुरतरूपःशारीरव्यापारोविभावःस्पंदराहित्यशयानादयोनुभावाः।।नचात्रनिद्राभाव
ध्वननेनगतार्थतेतिशंक्यं।।सुषुप्तौहिज्ञानराहित्येनैवयत्नराहित्यान्मंदमपिस्पंदितुंनक्षमासीदित्यस्यानु
तिप्रयोजनकत्वापत्तेः।।व्रीडाभिहितत्वात्तस्याव्यंग्यत्वानुपपत्तेश्च।श्रमेत्वानुगुण्यमुचितं।।रूपधनविद्या
दिप्रयुक्तात्मोत्कर्षज्ञानाधीनंपरावहेलनंगर्वः।।उदाहरणं।।आमूलाद्रत्नसानोर्मलयवलयितादाच
कूलात्पयोधेर्यावंतःसंतिकाव्यप्रणयनपटवस्तेविशंकंवदंतु।।मृद्वीकामध्यनिर्यन्मसृणरसझ
रीमाधुरीभाग्यभाजां।।वाचामाचार्यतायाःपदमनुभवितुंकोस्तिधन्योमदन्यः।।अत्रस्वकीयकविता

BHAU DAJI

यांअनन्यसाधारणताज्ञानंविभावःपराधिक्षेपपरैतादृशवाक्यप्रयोगोनुभावः।।इमंचासूयापिलेश
तःपुष्णाति।।उत्साहप्रधानोगूढगर्वोहिवीररसध्वनिरयंतुगर्वप्रधानइतितस्मादस्यविशेषः।।तथाहि।।
वीररसेरप्रसंगेप्रागुदाहृतेयदिवक्तीत्यादिपद्येगीष्पतिनागिरामधिदेवतयापिसाकमहंवदिष्यामीति
वचनेनाभिव्यक्तस्योत्साहस्यपरिपोषकतयास्थितःसर्वेभ्यःपंडितेभ्योहमधिकइतिगर्वोनतुप्रकृतपद्य
इवनास्त्येवमहीतलेमदन्यइतिस्फुटोदितेनसोल्लुंठवचनेनानुभावेनप्राधान्येनप्रतीयमानः।।श्रमादि
प्रयोज्यंचित्तस्यमीलनंनिद्रा।।नेत्रनीमिलनगात्रनिष्क्रियत्वादयोऽस्यानुभावाः।।उदाहरणं।।सामदाग
मनबृंहिततोषाजागरेणगमिताखिलदोषा।।बोधितापिबुबुधेमधुपैनप्रातराननजसौरभलुब्धैः।।रात्रि

जागरणश्रमोत्रविभावः॥मधुपैर्बोधनेपिबोधाभावोनुभावः॥शास्त्रादिविचारजन्यमर्थनिर्धारणंध्यतिः
॥अत्रनिःशंकतदर्थानुष्ठानसंशयोच्छेदादयोनुभावाः॥उदा॰॥निखिलंजगदेवनश्वरंपुनरस्मिन्नितरां क
लेवरं॥अथतस्यकृतेकियानयंक्रियतेहंतमयापरिश्रमः॥शरीरमेतज्जलबुद्बुदोपममित्यादिशास्त्र
पर्यालोचनमत्रविभावः॥हंतपदगम्यास्वनिंदाराजसेवादिविरतिर्वितृष्णताचानुभावः॥झटितिमतेरे
वचमत्कारात्ध्वनिव्यपदेशहेतुतानशंतस्यविलंबेनप्रतीतेः॥रोगविरहादिप्रभवोमनस्तापोव्याधिः॥
गात्रशैथिल्यश्वासादयोत्रानुभावः॥यदाहुः॥एकैकशोद्वंद्वशोवात्रयाणांवाप्रकोपतः॥वातपित्तकफानां
स्युर्व्याधयोयेज्वरादयः॥इहतत्प्रभवोभावोव्याधिरित्यभिधीयते॥उदाहरणं॥हृदयेकृतशैवलानुषं

गामुहुरंगानियतस्ततःक्षिपंती॥तदुदंतपरेमुखेसखीनामतिदीनामियमादधातिदृष्टिं॥विरहोत्रविभा
वः॥अंगक्षेपादिरनुभावः॥भीरोर्घोरसत्वदर्शनश्रवणादिजन्माचित्तवृत्तिविशेषस्त्रासः॥अनुभावाश्चा
स्यरोमांचकंपस्तंभभ्रमादयः॥यदाहुः॥औत्पादिकैर्मनःक्षेपस्त्रासःकंपादिकारकः॥उदा॰॥आलीषुके
लीरभसेनबालाबालामुहुर्ममालापमुपालपंती॥आरादुपाकर्ण्यगिरंमदीयांसौदामिनीयांसुसमामयासीत्॥अत्रपत्यास्ववचनाकर्णनंविभावः॥नचात्रलज्जायाध्यंग्यत्वमाशंकनीयं॥शैशवेनैवतस्यानिरा
सात्॥इदंवाविविक्तमुदाहरणं॥माकुरुकशांकराजेकरुणावतिकंपनेममस्वांतं॥खेलन्नजातुगोपीपरं
बविलंबंकरिष्यामि॥एषाभगवतोलीलागोपकिशोरस्योक्तिः॥निद्राविभावोत्छज्ञानंसुप्तंस्वप्नइतियावत्॥

र॰गा॰ अस्यानुभावः॥प्रलापादिःनेत्रनिमीलनादयस्तुनिद्राया एवानुभावानत्वस्यानिद्राजन्यत्वात्॥यत्तुप्राचीनै
६१ रस्यानुभावानिभृतगात्रनेत्रनिमीलनमित्याद्युक्तंतदन्यथासिद्धानामपितेषांएतद्भावव्यापकत्वादितिध्ये
यं॥उदा॰॥अकरुणमृषाभाषासिंधोविमुंचममांचलंतवपरिचितःस्नेहःसम्यङ्मयेत्यनुभाषिणीं॥अवि
रलगलद्बाष्पांतन्वींनिरस्तविभूषणांकइहभवतींभद्रेनिद्रेविनाविनिवेदयेत्॥एषात्रवासगतस्यस्वप्नेप्रि
यामेवंभाषिणींदृष्टवतोनिद्रांप्रतिकस्यचिदुक्तिः॥यद्यप्येवंभूतायाःप्रियतमावस्थायानिवेदनेननिद्रेमम
भवत्यामहानुपकारः॥कृतइतिवस्तुविप्रलंभशृंगारश्चात्रप्रतीतिपथमवतरतितथापिपुरःस्फूर्तिकत ६१
यास्वप्नध्वननमत्रोदाहृतंनप्रांतेनतयोर्ध्वननंनिरोद्धुमीष्टे॥निद्रानाशोत्तरंजायमानोबोधोविबोधः॥

निद्रानाशश्चतत्पूर्तिस्वप्नांतबलवच्छब्दस्पर्शादिभिर्जायतइतितएवात्रविभावाः॥अक्षिमर्दनगात्रमर्दनाद
योनुभावाः तत्रसंक्षेपेणोदाहरणं॥नितरांहितयाद्यनिद्रयामेवतयामेचरमेनिवेदितायाः॥सुदृशोवच
नंश्रृणोमियावन्मयितावत्प्रचुकोपवारिवाहः॥अत्रगर्जितश्रवणंविभावः॥प्रियवचनश्रवणोल्लासनाशो
नुभावस्तूह्येयः॥केचिदविद्याध्वंसजन्यमप्यमुमामनंति॥तेषांमतेनष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत
॥स्थितोस्मिगतसंदेहःकरिष्येवचनंतवेतिगीतापद्यमुदाहार्यं॥ननुवारिवाहविषयायाअसूयायाएवात्र
वाक्यार्थत्वेनिशंक्यं॥विबोधप्रतीतौहिसत्यांतस्मिन्नौचित्यावगमेसत्यनुचितविबोधजनकत्वेनवारिवाह
सूयायाविलंबेनैनप्रतीतिः॥परमुखनिरीक्षकत्वात्स्यादपितस्याअपिप्राधान्यंयदिवारिवाहेनिःकरुणत्वो

र॰गं॰ दिबोधकंकिंचिदपिस्यात्॥नापिस्वप्नस्यवारिवादनादेनतन्नाशस्यैवप्रतिपत्तेः॥अस्तुवास्वप्नभावप्रशमे
६२ नासूययावासहास्यसंकरः॥इदंतुनोदाहार्यं॥गाढमालिंग्यसकलांयामिनींसहतरुणीं॥निद्रांविहायस
प्रातरालिलिंगार्थंचेतनां॥विबोधस्यचेतनापदवाच्यत्वात्॥यथाकश्चित्सत्यप्रतिज्ञोद्वाभ्यांनायिकाभ्यांद्वौ
कालावुपभोगार्थंदत्वायथोचितेकालएकामुपभुज्यकालांतरेप्रवृत्तेतांविहायापरांभुंक्ते॥तथैवायंरात्रौ
निद्रांप्रातश्चेतनामितिसमासोक्तेरेवेहप्रकाशनात्॥परकृतावज्ञादिनानापराधजन्योमौनवाक्पारुष्या
दिकारणीभूतश्चित्तवृत्तिविशेषोमर्षः॥प्राग्वत्कारणानांकार्याणांचक्रमेणविभावानुभावत्वं॥उदाहरणं॥ ६२
वक्षोजाग्रंपाणिनामृश्यदूरेयातस्यद्रागाननाब्जंप्रियस्य॥शोणाग्राभ्यांभामिनीलोचनाभ्यांजोषंजोषंजोषमे

वावतस्थौ॥इहत्वास्तांनौकस्मिकस्तनाग्रस्पर्शोनुभावः॥नयनारुण्यनिर्निमेषनिरीक्षणेअनुभावौ॥ननुक्रो
यो॰ धामर्षयोःस्थायिसंचारिणोर्भावयोः किंभेदकमितिचेत्॥विषयतावैलक्षण्यमेवेतिगृहाण॥तत्रानुगम
कंझटितिपरविनाशादौप्रवृत्तिर्वचनवैमुख्यादिकंचेतिकार्यवैलक्षण्यं॥व्रीडादिभिर्निमित्तैर्हर्षाद्यनुभावानां
गोपनायजनितोभावविशेषोवहित्थं॥तदुक्तं॥अनुभावपिधानार्थोवहित्थंभावउच्यते॥तद्विभाव्यंभयव्री
डाधार्ष्ट्यकौटिल्यगौरवैः॥यथा॥प्रसंगेगोपानांगुरुषुमहिमानंयदुपतेरुपाकर्ण्यस्विद्यत्पुलकितकपोला
कुलवधूः॥विषज्वालाजालंझटितिवमतःपन्नगपतेःफणायांसाश्चर्यंकथयतितरांतांडवविधिं॥अत्रव्रीडावि
भावःतादृशकालीयकथाप्रसंगोनुभावः॥एवंभयादिप्रयोज्यमप्युदाहार्यं॥अधिक्षेपाद्यमानादिप्रभवाकिम

र॰गं॰ स्यकरोमीत्याद्याकाराचित्तवृत्तिरुग्रता।।यदाहुः।।नृपापराधोसद्दोषकीर्त्तनंचोरधारणं।।विभावास्युरथोवं
६३ धोवधस्ताडनभर्त्सने।।एतेयत्रानुभावास्तदौग्र्यंनिर्दयतात्मकमिति।।यथा।।अवाप्यभंगंखलुसंगरांगणे
नितांतमंगाधिपतेरमंगलं।।परप्रभावंममगांडिवंधनुर्विनिंदतस्तेहृदयंनकंपते।।एषाकर्णेनपराभूतं
गांडिवंनिंदंतंप्रतिधनंजयस्योक्तिः।।युधिष्ठिरकर्तृकागांडिवनिंदात्रविभावः।।वधेच्छानुभावः।।नचामर्षो
ग्रतयोर्नास्तिभेदइतिवाच्यं।।प्रागुदाहृतेमर्षध्वनावुग्रतायाअप्रतीतेः।।नाप्रसंगोक्रोधःतस्यस्थायित्वेनास्याः
संचारिण्याश्चैवंनैभेदात्।।विप्रलंभमहापत्तिपरमानंदादिजन्मान्यस्मिन्नन्यावभासउन्मादः।।शुक्तिरजता ६३
दिज्ञानव्यावृत्तयेजन्मांतं।।उदा॰।।अकरुणहृदयप्रियतममुंचामित्वामितःपरंनाहं।।इत्यालपतिकरांबु

जमादायालीजनस्यविकलासा।।एषाप्रवासगतंस्वनायिकावृत्तांतंपृच्छंतंनायिकंप्रतिकस्याश्चित्संदेहांशे
रिण्याउक्तिः।।प्रियविरहोत्रविभावः।।असंबद्धोक्तिरनुभावः।।उन्मादस्यव्याधावंतर्भावेसंभवत्यपिपृथगुपा
दानं।।व्याध्यंतरापेक्षयावैचित्र्यविशेषस्फोरणाय।।रोगादिजन्यामूर्छारूपामरणप्रागवस्थामरणंनचात्रप्रा
णवियोगात्मकंमुख्यमरणमुचितंग्रहीतुंचित्तवृत्त्यात्मकेषुभावेषुतस्याप्रसक्तेः।।भावेषुचसर्वेषुकार्यस
हवर्त्तितयाशरीरप्राणसंयोगस्यहेतुत्वात्।।उदा॰।।दयितस्यगुणाननुस्मरंतीशयनेसंप्रतीयाविलोकिता
सीत्।।अधुनाखलुहंतसाकृशांगीगिरमंगीकुरुतेनभाषितापि।।प्रियविरहोत्रविभावः।।वचनविरामोनुभावः
।।हंतपदस्यात्रात्यंतमुपकारकत्वाद्वाक्यव्यंग्याप्ययंभावपदव्यंग्यतामावहति।।एतेनभावस्यपदव्यंग्यतायां

र॰गं॰ नात्यंतंवैचित्र्यमिति परास्तं॥दयितस्यगुणाननुस्मरंतीत्यनेनव्यज्यमानंचरमावस्थाया॥मपिनस्यादयित
६४ गुणविस्मरणंनाभूदितिवस्तुविप्रलंभस्यशोकस्यवाचरममभिव्यक्तस्यपोषकं॥अयंचभावःस्वव्यंजकवा
क्योत्तरवर्त्तिनावाक्यांतरेणसंदर्भघटकेननायिकादेःप्रत्युज्जीवनवर्णनेविप्रलंभस्यान्यथातुकरुणस्य
पोषकइति विवेकः॥कवयःपुनरमुंप्राधान्येननवर्णयंत्यमंगलप्रायत्वात्॥संदेहाद्यनंतरंजायमानऊ
हावितर्कः॥सचनिश्चयछायानुकूलः॥यदिसामिथिलेंद्रनंदिनीनितरामेवनविद्यतेभुवि॥अथमेकथम
स्तिर्जीवितंनविनालंबनमाश्रितस्थितिः॥स्वात्मनिभगवतोरामस्यैषोक्तिः॥भुविसीतास्तिनवेतिसंदेहोत्र ६४
विभावःभ्रुक्षेपशिरोंगुलिनर्त्तनमाक्षिप्तमनुभावः॥नचासौचिंतेतिशक्यंवदितुं॥चिंतायानियमेननिश्चयं

न्त्यप्रयोजकत्वात्॥किंभविष्यतिकथंभविष्यतीत्याद्याकाराश्चिंतायाइदमित्थंभवितुमर्हतिप्रायशइत्याका
रस्यवितर्कस्यविपर्ययवैलक्षण्यापलंभाच्च॥नविनेत्यादिनोक्तोर्थांतरन्यासोप्यस्मिन्नेवानुकूलः॥इष्टासिद्धि
राजगुर्वाद्यपराधादिजन्योनुतापोविषादः॥उदाहरणं॥भास्करसूनावस्तंयातेजातेचपांडवोत्कर्षे॥दुर्यो
धनस्यजीवितकथमिवनाद्यापिनिर्यासि॥अत्रस्वापकर्षपरोत्कर्षयोर्दर्शनंविभावः॥इतिवितनिर्याणाशं
सातदाक्षिप्तंवदननमनादिचानुभावः॥अत्रास्मिन्नेवचविषादध्वनौदुर्योधनस्येत्यत्रार्थांतरंसंक्रमित
वाच्यध्वनिरनुग्राहकः॥नचात्रत्रासभावध्वनित्वंशंक्यं॥परवीरस्यदुर्योधनस्यत्रासलेशस्याप्ययोगात्
॥नापिचिंताध्वनित्वं॥युध्वामरिष्यामीतिनिस्यव्यवसायात्॥नापिदैन्यध्वनित्वंसकलसैन्यक्षयेपिविपदसेना

र॰गं॰ गणनात्॥नचावीररसध्वनित्वं॥मरणस्यशरणीकरणेपरापकर्षजीवितस्योत्साहस्याभावात्॥इदंपुनरत्र
६९ नोदाहार्यं॥अपिपवनरयाणांनिर्दयानांहयानांश्लथयगतिमहंनोसंगरंद्रष्टुमीहे॥श्रुतिविवरसमीपेदा
रयंतिप्रकुप्यद्भुजगनिभभुजानांबाहुजानांनिनादाः॥अत्रत्रासस्यैवप्रतीयमानत्वेनविषादस्याप्रतीतेः॥ले
शतयाप्रतीतौवात्रासएवानुगुण्यौचित्येनध्वनिव्यपदेशयोग्यत्वात्॥अधुनैवास्यलाभोममास्त्वितीच्छा
औत्सुक्यं॥इष्टविरहादिरत्रविभावः॥त्वराचिंतादयोनुभावाः॥यदाहुः॥संजातमिष्टविरहादुद्दीप्तंप्रियस्य
स्मृतेः॥निद्रयातंद्रयागात्रगौरवेणचचिंतया॥अनुभावितमाख्यातमौत्सुक्यंभावकोविदैरिति॥उदा॰॥निस
तद्बाष्पसंरोधंमुक्तचांचल्यमतारकं॥कदानयननीलाब्जमालोकेयंमृगीदृशः॥अनर्थातिशयजनिताचित्तसं

DR BHAU DAJI

संभ्रमाख्यावृत्तिरावेगः॥उदा॰॥लीलयाहिविततसिंधुबंधनःसोयमेतिरघुवंशनंदनः॥दर्पदुर्विलसितेनोदशा
ननः॥कुत्रयामिनिकटेकुलक्षयः॥एषास्वात्मनिमंदोदर्याउक्तिः॥रघुनंदनागमनमत्रविभावः॥कुत्रयामी
त्यनेनव्यंग्यस्थैर्याभावोनुभावः॥नचात्रचिंताप्राधान्येनव्यज्यतइतिशक्यतेवक्तुंकुत्रयामीतिस्फुटंप्रतीतेनस्थै
र्याभावेनोद्वेगस्यैवचिंतायाअप्रत्यायनात्॥परंत्वावेगचर्वणायांतत्परिपोषकतयागुणत्वेनचिंतापिविषयीभ
वति॥चिंतोत्कर्षभयविरहेष्टानिष्टदर्शनश्रवणादिजन्यावश्यकर्तव्यतार्थप्रतिसंधानविकलाचित्तवृत्तिर्जडताइ
यंचमोहात्पूर्वतःपरतश्चजायते॥यदाहुः॥कार्याविवेकोजडतापश्यतःशृण्वतोपिवा॥तद्विभावाःप्रियानिष्टद
र्शनश्रवणेरुजा॥अनुभावास्तमौनतूष्णींभावविस्मरणादयः॥सापूर्वंपरतोवास्यान्मोहादितिविदांमतं॥उदाहरणं॥

र॰गं॰ यदवधिदयितोविलोचनाभ्यांसहचरिदैववशेनदूरतोभूत्॥तदवधिशिथिलीकृतोमदीयैरथकरणैःप्रणयोनि
६६ जक्रियासु॥प्रियविरहोत्रविभावः॥करणैश्चक्षुःश्रवणादिभिःक्रियासुतत्तत्प्रमितिषुप्रणयस्यशिथिलीकरणम
नुभावः॥मोहेचक्षुरादिभिश्चाक्षुषादेरजननमिहतुप्रकारविशेषवैशिष्ट्येनबाहुल्येनाजननमितितस्माद
स्यविशेषः॥अतएवोदाहरणेशिथिलीकृतइत्युक्तंनतुत्यक्तइति॥अतितृप्तिगर्भव्याधिश्रमादिजन्माचेतसःक्रि
यानुन्मुखतालस्यं॥अत्रचेतसासामर्थ्येनापिकार्याकार्यविवेकशून्यत्वं॥तेनकार्याकरणरूपस्यानुभावस्यतुल्यत्वेपि
र॰ ग्लानेजडतायाश्चास्यभेदः॥उदाहरणं॥निखिलांजनींप्रियेणदूरादुपयातेनविबोधिताकथाभिः॥अधिकंनहिपा ६६
रयामिवक्तुंसखिमाजल्पतवायसीरसज्ञा॥एषाहिप्रियागमनद्वितीयदिवसेमुहुर्निशावृत्तांतंपृच्छंतींसखींप्रति

रजनीजागरणजनितालस्यायाःकस्याश्चिदुक्तिः॥अत्रत्वरजनीजागरणंविभावः॥अधिकसंभाषणाभावोनुभावः॥
जडतायांमोहात्पूर्वंवृत्तित्वमुत्तरवर्त्तित्वंवानियतंनत्वत्रेत्यपरोविशेषः॥गोपनीयविषयत्वाद्यदिकथाभिरित्यविव
क्षितवाच्यंनदाश्रमोस्तुपरिपोषकः॥श्रमजन्येत्वालस्येश्रमस्यपोषकतायाअवार्यत्वात्॥अतितृप्त्यादिजनितेत्वा
लस्येश्रमाद्विविक्तविषयत्वंबोध्यं॥परोत्कर्षदर्शनादिजन्यःपरनिंदादिकारणीभूतश्चित्तवृत्तिविशेषोसूया॥इमा
मेवासहनादिशब्दैर्व्यवहरंति॥यथाक्वशैवंधनुरिदंक्वचायंप्राकृतःशिशुः॥भंगस्तसर्वसंदर्भाकालेनैवविनि
मितः॥एषाभवहरकार्मुकस्यभगवतोरामस्यपराक्रममसहमानानांतत्रत्यानांराज्ञामुक्तिः॥अत्रचश्रीमद्दाश
रथिबलस्यसर्वोत्कृष्टतायादर्शनंविभावः॥प्राकृतशिशुपदगम्यानिंदानुभावः॥तृष्णालोलविलोचनेकलयति

 प्राचींचकोरव्रजेमौनंमुंतिंचेकिंचकैरवकुलेकामेधनुधुन्वति॥ मानेमानवतीजनस्यसपदिप्रस्थातुकामेधुना
 धातःकिंनुवियोविधातुमुचितोधाराधराडंबरः॥ अत्रापियद्यपितदीयोछंखलत्तादिदर्शनजन्याअनुचितका
रित्वरूपनिंदाप्रकाशानुभावितापकविगतविधात्रालंबनासूयाव्यज्यतइतिशक्यतेवक्तुं॥ तथापिकार्यकारणयो
स्तुल्यत्वादभिव्यक्तेनामर्षणशबलितैवासौनविविक्ततयाप्रतीयते॥ नहिविधातुरपराधइवभगवतोरामस्या
पराधोस्तियेनकवेरिववीराणामप्यमर्षोभिव्यज्येतस्वभावोहिमहोन्नतक्रियानिष्पादनंवीराणां॥ अत्राप्रस्तुतवृ
त्तांतेनप्रस्तुतराजकुमारादिवृत्तांतस्यध्वननाभ्यासूयाध्वनित्वमितितुनवाच्यं॥ एकध्वनेर्ध्वन्यंतराविरो
धित्वात्॥ अन्यथामहावाक्यध्वनेरवांतरवाक्यध्वनिभिस्तेषांचपदध्वनिभिःसहसामानाधिकरण्यंकुत्रापिनस्या

त्॥ वियोगशोकभयजुगुप्सादीनामतिशयाद्ग्रहावेशादेश्चोत्पन्नोव्याधिविशेषोपस्मारः॥ व्याधित्वेनास्यकथने
पिविशेषाकारेणपुनःकथनंबीभत्सभयानकयोरस्यैवव्याधेरंगत्वंनान्यस्येतिस्फोरणाय॥ विप्रलंभेतुव्याध्यंतरस्या
पिच॥ उदा॰॥ हरिमागतमाकर्ण्यमथुरामंतकांतकं॥ कंपमानःश्वसन्कंसोनिपपातमहीतले॥ अत्रभयंविभा
वः॥ कंपनिश्वासपतनादयोनुभावाः॥ अमर्षादिजन्यावाक्पारुष्यादिकारणीभूताचित्तवृत्तिश्चपलता॥ यदाहुः
॥ अमर्षप्रातिकूल्येर्ष्यारागद्वेषश्चमत्सरः॥ इतियत्रविभावास्युरनुभावस्तुभर्त्सनं॥ वाक्पारुष्यंप्रहारश्चताडनंव
धबंधने॥ तत्रचापलमनालोच्यकार्यकारित्वमिष्यतेइति॥ उदा॰॥ अहितव्रतपापात्मन्मैवमेदर्शयाननं॥ आत्मा
नंहंतुमिच्छामियेनत्वमसिभावितः॥ एषाभगवदनुरक्तिविघटनोपायमपश्यतः॥ प्रह्लादंप्रतिहिरण्यकशिपोरु

र.गं. क्तिः॥भगवद्द्वेष्योत्थापितःपुत्रद्वेषोऽत्रविभावः॥आत्मवधेच्छापरुषवचनंचानुभावः॥नचामर्ष एवात्रव्यज्यतइति
६९ वाच्यं॥सदैवभगवदनुरागिणिप्रल्हादेहिरण्यकशिपोरमर्षस्यचिरकालसंभृतत्वेनात्मवधेच्छायाइदंप्रथमता
नुपपत्तेः॥इदंप्रथमकार्यस्यचेदंप्रथमकारणप्रयोज्यतयाप्राचीनचित्तवृत्तिविलक्षणायाएवचपलताख्यचि
त्तवृत्तेःसिद्धेः॥नचामर्षप्रकर्षएवात्मवधेच्छादिकारणमभिव्यज्यतामितिवाच्यं॥प्रकर्षस्यापिस्वाभाविकविलक्ष
णतायाआवश्यकत्वेनयातस्यैवचपलतापदार्थत्वात्॥नीचपुरुषैराक्रोशनाधिक्षेपव्याधिताडनदारिद्र्येष्टविरहप
रसंपद्दर्शनादिभिरुत्तमेषुत्ववज्ञादिभिर्जनिताविषयद्वेषाख्यारोदनदीर्घश्वासदीनमुखतादिकारणीभूता ६९
चित्तवृत्तिर्निर्वेदः॥उदा०॥यदिलक्ष्मणसामृगेक्षणानमदीक्षासरणींसमेष्यति॥अमुनाजडजीवितेनमेजगता

वाविफलेनकिंफलं॥नित्यानित्यवस्तुविवेकजन्यत्वाभावान्नासौरसव्यपदेशहेतुः॥देवादिविषयारतिर्यथा॥
भवद्द्वारिक्रुध्यज्जयविजयदंडाहतिदलत्किरीटास्तत्रकीटाइवविधिमहेंद्रप्रभृतयः॥वितिष्ठंतेयुष्मन्नयनपरिपा
तोत्कलिकयावराकाःकेतत्रक्षपितमुरनाकाधिपतयः॥अत्रापमानंभगवद्द्वारनिषवणभगवत्कटाक्षपाताभि
लाषादिभिर्ब्रह्मादिगताभगवदालंबनारतिर्नाभिव्यज्यतेपितुभगवदैश्वर्यमवाङ्मनसगोचरमितिचेत्तथा
पितादृशभगवदैश्वर्यवर्णनानुभावितत्वयाकविगतभगवदालंबनरत्याध्वनित्वमक्षतमेवद्वितीयोदाहरणं॥
नधनंनचराज्यराज्यसंपदंनहिविद्यामिदमेकमर्थये॥मयिधेहिमनागपिप्रभोकरुणाभंगितरंगितांदृशं॥
अत्रधनाद्यपेक्षाशून्यस्यभगवद्गतयाताभिलाषोहिभगवत्यनुरक्तिंव्यनक्ति॥एवंसंक्षेपेणनिरूपिताभावाः॥

र॰गं॰ अथकथंसंख्यानियमोमात्सर्योद्वेगदंभेर्ष्याविवेकनिर्णयक्लैव्यक्षमाकुतुकोत्कंठाविनयसंशयधार्ष्ट्यादीनां
६१ मपितत्रतत्रलक्ष्येषुदर्शनादितिचेत्।।न।।उक्तेष्वेवैषामंतर्भावेणसंख्यांतरानुपपत्तेः।।असूयातोमात्सर्यस्यत्रा
सादुद्वेगस्यावहित्थाख्याद्भावाद्दंभस्यामर्षादीर्ष्यायामतेर्विवेकनिर्णययोर्दैन्यात्क्लैव्यस्यधृतेःक्षमायाऔत्सुक्या
त्कुतुकोत्कंठयोःलज्जायाविनयस्यतर्कात्संशयस्यचापलाद्धार्ष्ट्यस्यचवस्तुतःसूक्ष्मभेदेपिनांतरीयकतयात
दनतिरिक्तत्वस्यैवाध्यवसायात्।।मुनिवचनानुपालनस्यसंभवत्वेउच्छृंखलतायाअनौचित्यात्।।एषुसंचारि
भावेषुमध्येकेचनकेषांचनविभावाअनुभावाश्चभवंति।।तथाहि।।ईर्ष्यायानिर्वेदंप्रतिविभावत्वमसूयांप्रति ६१
चानुभावत्वं।।चिंतायानिद्रांप्रतिविभावत्वमौत्सुक्यंप्रतिचानुभावतेत्यादिस्वयमूह्यं।।अथरसाभासः।।तत्रानुचि

तविभावालंबनत्वंरसाभासत्वं।।विभावादावनौचित्यंपुनर्लोकानांव्यवहारतोज्ञेयं।।यत्रतेषामयुक्तमितिधीरि
तिकेचिदाहुः।।तदपरेनक्षमंते।।मुनिपत्न्यादिविषयकरत्यादेःसंग्रहेपिबहुनायकविषयायाअनुभयनिष्ठा
याश्चरतेरसंग्रहात्।।तत्रविभावगतस्यानौचित्यस्याभावात्।।तस्मादनौचित्येनरत्यादिर्विशेषणीयः।।इत्थंचा
नुचितविभावालंबनायाबहुनायकविषयायाअनुभयनिष्ठायाश्चसंग्रहइति।।अनौचित्यंचप्राग्वदेव।।तत्ररसा
द्याभासत्वंरसत्वादिनानसमानाधिकरणं।।निर्मलस्यैवरसादित्वाद्दुष्टत्वाभासत्वमिवहेतुत्वेन्नेत्येके।।नह्यनुचित
त्वेनात्महानिरपितुसदोषत्वादाभासव्यवहारोश्वाभासादिव्यवहारवदित्यपरे।।उदाहरणं।।शतेनोपायानांक
थमपिगतःसौधशिखरेसुधाफेनस्वच्छेरहसिशयितांपुष्पशयने।।विबोध्यक्षामांगींचकितनयनांस्मेरवद

र॰गं॰ नांसनिश्वासंश्लिष्यत्यहहसुकृतीराजरमणी॥ अत्रालंबनमनुचितप्रणयाराजरमणी॥ अत्रालंबनमनुचितप्र
४१॰ णयाराजरमणी॥ रहोरजन्याद्युद्दीपनं॥ सहसेनराजांतःपुरेगमनंप्राणेषूपेक्षानिःश्वासाश्लेषादयश्चानुभा
वाः॥ शंकादयःसंचारिणः॥ निषिद्धालंबनकत्वाच्चास्यारतेराभासत्वंरसस्य॥ नचात्रचकितनयनामित्यनेन
परपुरुषस्पर्शत्रासाभिव्यक्तयारतेरनुभयनिष्ठत्वेत्याभासताहेतुर्वाच्यः॥ अस्याश्चचिरायतस्मिन्नासक्तायाअंतः
पुरेपरपुरुषागमनस्यात्यन्तमसंभवनयाकरुपमंबोधयतीत्यादावुचितएवत्रासोनंतरंचपरिचयाभिव्यक्तत्रासो
यंममत्रियोदमर्थंप्राणानपितृणीकृत्यागतइतिज्ञानादुत्पन्नंहर्षमभिव्यंजयत्स्मेरवदनामितिविशेषणंरतिंतदी ७१
यामपिव्यनक्ति॥ परंतुप्राधान्यंनायकनिष्ठायाएवरतेःसकलवाक्यार्थत्वात्॥ यथावा॥ भवनंकरुणावतीविशंती

गमनाज्ञालवलाभलालसेषु॥ तरुणेषुविलोचनाब्जमालामथबालापथिपातयांबभूव॥ अत्रकुतश्चिदागछंत्याप
थितदीयरूपयौवनगृहीतमानसैर्युवभिरनुगम्यमानायाः कस्याश्चिद्भवनप्रवेशसमयेनिजसेवासार्थक्यवि
ज्ञानायगमनाज्ञापनरूपलाभलालसेषुतेषुपरमपरिश्रमस्मरणसंजातकरुणागमनाज्ञादाननिवेदकस्यवि
लोचनांबुजमालापरिक्षेपस्यानुभावस्यवर्णनादभिव्यज्यमानारतिर्बहुवचनेनबहुविषयागम्यतइतिभवत्ययं
मपिरसाभासः॥ यथावाभुजपंजरेगृहीतानवपरिणीतावरेणवधूः॥ तत्कालजालपतिताबालकुरंगीववेपतेनि
तरां॥ अत्ररतेर्नववध्वामनागप्यस्पर्शादनुभयनिष्ठत्वेनाभासत्वं॥ तथाचोक्तं॥ उपनायकसंस्थायांमुनिगुरुपत्नी
गतायांच॥ बहुनायकविषयायांरतौतथानुभयनिष्ठायामिति॥ अत्रमुनिगुरुशब्दयोरुपलक्षणपरतयाराजादि

र॰गं॰ रपिग्रहणं॥अथात्रकिंव्यंग्यं॥व्यानम्राश्चलिताश्चैवस्फारिताःपरमाकुलाः॥पांडुपुत्रेषुपांचाल्याःपतंतिप्रथमा
७१ दृशः॥अत्रव्यानम्रतयाधर्मात्मताप्रयोज्यंयुधिष्ठिरेसभक्तित्वंचलिततयारुक्षूलकारताप्रयोज्यंभीमसेनेसत्रास
त्वं॥स्फारिततयाअलौकिकशौर्यश्रवणप्रयोज्यमर्जुनेसहर्षसत्वं॥परमाकुलतयापरमसौंदर्यप्रयोज्यंनकुल
सहदेवयोरौत्सुक्यंचव्यंजयंतीभिर्दृग्भिःपांचाल्याबहुविषयायारतेरभिव्यंजनाद्रसाभासएवेतिनव्याः॥प्रांच
स्त्वपरिणीतबहुनायकविषयत्वेरतेरसाभासतेत्याहुः॥तत्रशृंगाररसइवशृंगाराभासोद्विविधः॥संयोगविप्रलं
भभेदात्॥संयोगाभासस्त्वनुपदमेवोदाहृतः॥विप्रलंभाभासोयथा॥व्यत्यस्तंलपतिक्षणंक्षणमथोमौनंसमा
लंबतेसर्वस्मिन्विदधातिकिंचविषयेदृष्टिंनिरालंबनां॥श्वासंदीर्घमुरीकरोतिनमनागंगेषुधत्तेधृतिंवैदेहीकम

Dr BHAU DAJI MEMORIAL

नीयताकवलितोहाहंतलंकेश्वरः॥अत्रसीतालंबनेयंलंकेशगताविप्रलंभरतिरनुभयनिष्ठतयाजगद्गुरुपत्नीविषय
कतयाचाभासतांगताव्यत्यस्तंलपतीत्यादिभिर्व्यज्यमानैरुन्मादश्रममोहचिंताव्याधिभिस्तथैवाभासतांगतैः॥
प्राधान्येनपरिपोष्यमाणाध्वनिव्यपदेशहेतुः॥एवंकलहशीलकुपुत्राद्यालंबनतयावीतरागादिनिष्ठतयाचवर्ण्य
मानःशोकः॥ब्रह्मविद्यानधिकारिचांडालादिगतत्वेननिर्वेदःकदर्यकातरादिगतत्वेनपित्राद्यालंबनत्वेनवा
क्रोधोत्साहौ॥ऐंद्रजालिकाद्यालंबनत्वेनविस्मयः॥गुर्वाद्यालंबनतयाचहासोमहावीरगतत्वेनभयंयज्ञीय
पशुवसासृङ्मांसादिनिष्ठतयावर्ण्यमानाजुगुप्साचरसाभासाः॥विस्तृतिभयाच्चामीनेहोदाहृताःसुधीभिरूह्य
याः॥एवमेवानुचितविषयाभावाभासाः॥यथासर्वेपिविस्मृतिपथंविषयाःप्रयाताविद्यापिखेदकलिविमुखी ता

बभूव॥ साकेवलंहरिणशावकलोचनामेनैवापयातिहृदयादधिदेवतेव॥ गुरुकुलेविद्याभ्याससमयेतदीयक
न्यालावण्यगृहीतमानसस्यान्यस्य वाक्यस्यचिदतिप्रतिषिद्धगमनास्मरतोदेशांतरगतस्येयमुक्तिः॥ अत्रचस्वा
त्मत्यागात्यागाभ्यांस्रक्चंदनादिषुविषयेषुचिरसेवितायांविद्यायांचकृतघ्नत्वमस्यांचलोकोत्तरत्वमभिव्यज्य
मानंव्यतिरेकवपुःस्मृतिमेवपुष्णातीतिसैवप्रधानं॥ एवंत्यागाभावगतंसार्वदिकत्वंव्यंजयंत्यधिदेवतोपमापि॥
एषाचानुचितविषयकत्वादनुभयनिष्ठत्वाच्चभावाभासः॥ यदिपुनरियंतत्परिणेतुरेवोक्तिस्तदाभावध्वनिरेव॥ अथभा
वशांतिः॥ भावस्यप्रागुक्तस्वरूपस्यशांतिर्नाशः सचोत्पत्त्यवच्छिन्न एवग्राह्यस्तस्यैवसहृदयचमत्कारित्वात्॥ उदा ७२
हरणं॥ मुंचसिनाद्यापिरुषंमानिनिमुदिरालिरुदियायइतितन्व्याःपतिवचनैरपायिनयनाब्जकोणशोणरुचिः॥

इत्थंतादृशप्रियवचनश्रवणंविभावः॥ नयनकोणगतशोणरुचेर्नाशस्तदभिव्यक्तः॥ प्रसादोवानुभावः॥ उत्प
त्तिकालावच्छिन्नोरोषनाशोव्यंग्यः॥ तथाभावोदयोभावस्योत्पत्तिः॥ उदा०॥ वीक्ष्यवक्षसिविपक्षकामिनीहारलक्ष्म
२ दयितस्यभामिनी॥ अंसदेशवलयीकृतांक्षणादाचकर्षनिजबाहुवल्लरीं॥ अत्रापिदयितवक्षोगतविपक्षकामि
नीहारलक्ष्मदर्शनंविभावः॥ प्रियांसदेशवलयीकृतनिजबाहुलताकर्षणमनुभावः॥ रोषोदयोव्यंग्यः॥ यद्यपि
भावशांतौभावांतरोदयस्यभावोदयेचपूर्वभावशांतेरावश्यकत्वान्नानयोर्विविक्तोव्यवहारस्यविषयस्तथापिद्वयो
रेकत्रचमत्कारविरहाच्चमत्काराधीनत्वाच्चव्यवहारस्यास्तिविभागः॥ एवंभावसंधिरन्योन्याभिभावनयोग्ययोःसा
मानाधिकरण्यं॥ उदा०॥ यौवनोद्गमनितांतशंकिताःशीलशौर्यबलकांतिलोभिताः॥ संकुचंतिविकसंतिराघवेजा

र॰गं॰ नकीनयननीरजश्रियः॥ अत्रभगवद्दाशरथिगतस्यलोकोत्तरस्ययौवनोद्गमस्यतादृशस्यैवशीलशौर्यादेश्चदर्शनं
७३ विभावः नयनगतसंकोचविकासावनुभावः॥ व्रीडौत्सुक्ययोःसंधिर्व्यंग्यः॥ तथाभावशबलत्वंभावानांबाध्यबाध
कभावमापन्नानामुदासीनानांवाच्यामिश्रणमेकचमत्कृतिजनकज्ञानगोचरत्वमितियावत्॥ उदा॰॥ पापंहृत
मयाहतंनविहितंसीतापियद्यापितासामामिंदुमुखीविनाबनवनेकिंजीवितंधास्यति॥ आलोकेयकथंमुखानि
कृतीनांकिंतेवदिष्यंतिमांराज्यंयातुरसातलंपुनरिदंनप्राणितंकामये॥ अत्रमत्यसूयाविषादस्मृतिचितर्क
व्रीडाशंकानिर्वेदानांप्रागुक्तस्वस्वविभावजन्मनांशबलता॥ यत्तुकाव्यप्रकाशटीकाकारैरुत्तरोत्तरेणभा ७३
वेनपूर्वपूर्वभावोपमर्दःशबलतेत्यभ्यधीयत॥ तन्न॥ पश्येत्कश्चिच्चलचपलरेकात्वराहंकुमारीहस्तालंबं

वितरह्लहहाव्युत्क्रमः क्वासियासीत्यत्रशंकासूयास्मृतिधृतिश्रमदैन्यमत्यौत्सुक्यानामुपमर्दलेशशून्यत्वेपि
शबलतायाराजस्तुतिगुणत्वेनपंचमोल्लासेमूलकृतैवनिरूपणात्स्वोत्तरविशेषगुणेनजायमानस्तुनाशेन
व्यंग्योनचोपमर्दपदवाच्योनापिचमत्कारी॥ तस्मान्नारिकेलजलक्षीरसिताकदलमिश्रणे॥ विलक्षणोयथा
स्वादोभावानांसंहतौतथा॥ अत्रेदंबोध्यं॥ यद्यपितेभावशांत्युदयसंधिशबलताध्वनयउदाहृतास्तेपिभावध्वन
यएव॥ विद्यमानतयाचर्व्यमाणेष्विवोत्पत्त्यवच्छिन्नत्वविनश्यदवस्थत्वसंधीयमानत्वपरस्परसमानाधिकरण
त्वप्रकारैश्चर्व्यमाणेषुभावेष्वेवप्राधान्यस्यौचित्यात्चमत्कृतेस्तत्रैवविश्रांतेः॥ यद्यप्युत्पत्तिविनाशसंधिशब
लतानांतत्संबंधिनांभावानांचसमानायांचर्वणाविषयतायांनप्राधान्यंविनिगंतुंशक्यतेतथापिस्थितोभावेषु

र॰गं॰ प्रधानतायाःक्लृप्तत्वाद्भावशांत्यादिष्वेवशांतिप्रतियोगित्वादिभिर्व्यज्यमानेषुतस्याःकल्पयितुमौचित्यात्॥किं
७४ च॥यदिभावशांत्यादौभावोनप्रधानंकिंतुतदुपसर्जनकशांत्यादिरेवेत्यभ्युपेयतेतदाव्यज्यमानभावेषु
अभिहिततत्प्रशमादिषुकाव्येषुभावप्रशमादिध्वनित्वंनस्यात्॥तथाहि॥उषसिप्रतिपक्षनायिकासदनादंति
कमंचतिप्रियेरुदृशोनयनाब्जकोणयोरुदियायत्वरयारुणद्युतिः॥अत्रोत्पूर्वकेणेतिनाभावोदयस्यवाच्य
तयेवप्रत्यायनात्॥उदयस्यवाच्यत्वेपिभावस्यावाच्यत्वाद्ध्वनित्वंसुस्थमितिचेत्॥प्रधानस्यव्यपदेशानोप
यिकत्वेप्रधानकृतव्यपदेशानुपपत्तेः॥अस्मन्मतेतुउत्पत्तेर्वाच्यत्वेपिउत्पत्त्यवछिन्नस्यामर्षस्यप्रधानस्यावा ७४
च्यत्वाद्युक्तएवभावोदयध्वनिव्यपदेशः॥एवंव्यज्यमानभावप्रतियोगिकस्यप्रशमस्यवाच्यत्वेभावशांति

ध्वनित्वंस्यात्॥यथा॥क्षमापणैकपदयोःपदयोःपततिप्रिये॥शेमुःसरोजनयनानयनारुणकांतयः॥न
नुशब्दवाच्यानांप्रशमादीनामरुणकांत्यैर्वान्वयादरुणकांतिप्रशमादेरेववाच्यत्वंपर्यवसितंनतुतादृश
प्रशमादिव्यंग्यस्यरोषप्रशमादेः॥व्यंग्यव्यंजकभेदस्यावश्यकत्वात्॥नचारुण्यव्यंग्यस्यरोषस्यैववाच्यीभूत
शमाद्यन्वयइतिवाच्यं॥वाच्यव्यंग्ययोःप्रतीत्योरानुपूर्व्येणसिद्धतयावाच्यान्वयबोधवेलायांवाच्यैःसहव्यंग्या
न्वयानुपपत्तेः॥अन्यथारुदृशोनयनाब्जकोणयोरित्यस्यान्वयोनस्यात्॥मैवं॥एवमपिनिर्वासयंतीधृतिमं
गनानांशोभांहरेरेणदृशोधयंत्याः॥चिरापराधस्मृतिमांसलोपिरोषःक्षणप्राघुणिकोबभूवेत्यादावपिभाव
प्रशमध्वनित्वापत्तेः॥भावस्यवाच्यत्वेपिप्रधानस्यतत्प्रशमस्यव्यंग्यत्वात्॥उभयोरप्यवाच्यत्वमपेक्षितमिति

दा॰

र॰गं॰ चेत्प्रागुक्तपद्यद्वये शमत्वोदयत्वाभ्यां शमोदययोर्वाच्यत्वादनुहारणत्वापत्तेः॥ इष्टापत्तिस्तु सहृदयानामनु

७६ चितैव॥ तस्माद्भावप्रशमादिष्वपि प्राधान्येन भावानामेव चमत्कारित्वं प्रशमादेस्तूपसर्ज्जनत्वमतो न तस्य वाच्य

नादोषः॥ इदं पुनर्भावध्वनिभ्यो भावशांत्यादिध्वनीनां चमत्कारवैलक्षण्ये निदानं यदेकत्र चर्वणायां भावेषु

स्थित्यवच्छिन्नामर्षादित्वममर्षादित्वमेव वा प्रकारोन्यत्र तु प्रशमावस्थत्वादिरपीति॥ रसस्य तु स्थायिमूलक

त्वात्प्रशमादेरसंभवः संभवे वा न चमत्कार इति न स विचार्यते॥ सोयं निगदितः सर्वोपि इत्यादिलक्षणो व्यं

ग्यप्रपंचः॥ स्फुटे प्रकरणे झटिति प्रतीतेषु विभावानुभावव्यभिचारिषु सहृदयतमेन प्रमात्रा सूक्ष्मेणैव सम ७६

येन प्रतीयत इति हेतुहेतुमतोः पौर्वापर्यक्रमस्यालक्षणादलक्ष्यक्रमोप्यदिश्यते॥ यत्र तु विचारवेद्यं प्रकरण प

मुन्नेया वा विभावादयस्तत्र सामग्रीविलंबाधीनं चमत्कृतेर्मांथर्यमिति संलक्ष्यक्रमोप्येष भवति॥ यथा न त्व

गतापि च सुतनुरिति प्रागुदाहृते पद्ये संप्रतीत्ये तदर्थावगतिविलंबेन॥ न खलु वर्मिग्राहकतमानसिद्धं

रत्यादिध्वनेरलक्ष्यक्रमव्यंग्यत्वं॥ अत एवालक्ष्यक्रमप्रसंगे॥ एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी॥ ली

लाकमलपत्राणि गणयामास पार्वतीत्यत्र कुमारीस्वाभाव्यादप्यधोमुखत्वविशिष्टस्य लीलाकमलपत्र

गणनस्योपपत्त्यामनाग्विलंबेन नारदकृतविवाहादिप्रसंगविज्ञानोत्तरं व्रीडायाश्चमत्कारणाल्लक्ष्यक्रमो

यं ध्वनिरिति प्राहुरानंदवर्धनाचार्याः रसभावादिरर्थो ध्वन्यमान एव न वाच्यस्तथापि न सर्वोलक्ष्यक्रम

स्य विषय इति चाभिनवगुप्तपादाचार्याः॥ स्यादेतत्॥ यद्ययं रसादिः संलक्ष्यक्रमस्य विषयः स्यादनुरण

र॰गं॰ नभेदगणनप्रस्तावेर्थशक्तिमूलस्यद्वादशभेदाइत्यभिनवगुप्तोक्तिस्तेनायंद्वादशात्मकइतिमम्मटभट्टोक्तिश्च
७९ नसंगच्छेत॥वस्त्वलंकारात्मनाद्विविधेनवाच्येनस्वतःसंभवित्वकविप्रौढोक्तिनिष्पन्नत्वकविनिबद्धवक्तृप्रौढोक्ति
निष्पन्नत्वैस्त्रिभिरुपाधिभिस्त्रैविध्यमापन्नेनषडात्मनावस्त्वलंकारयोर्द्विरसादेरप्यभिव्यंजनादष्टादशत्वप्रसं
गात्॥अत्रोच्यते॥प्रकटैर्विभावानुभावव्यभिचारिभिरलक्ष्यक्रमतयैवव्यज्यमानोरत्यादिःस्थायीभावोरसी
भवति॥नसंलक्ष्यक्रमतया॥रसीभावोहिनामझटितिजायमानालौकिकचमत्कारविषयस्थायित्वं॥संलक्ष्य
क्रमतयाव्यज्यमानस्यरत्यादेस्तुवस्तुमात्रत्वेनैवनरसादित्वमितितेषामाशयस्यचवर्णनेननतदुक्तीनांविरोधः॥ ७६
उपपत्तिस्त्वर्थेन्नविचारणीया॥रसभावादिरर्थइत्यत्ररसादिशब्दोरत्यादिपरः॥तदित्थंनिरूपितस्यास्यरसादि

ध्वनिप्रपंचस्यपदवर्णरचनावाक्यप्रबंधैःपदैकदेशैर्वर्णात्मकैरागादिभिश्चाभिव्यक्तिमामनंति॥तत्रवाक्यग
तानांपदानांसर्वेषामपिस्वार्थोपस्थितिद्वारावाक्यार्थज्ञानोपायत्वेसमानेपिकुर्वद्रूपतयाचमत्कारायोगव्यवच्छि
न्नत्वेनकस्यचिदेवध्वनिव्यपदेशहेतुत्वंयथामंदमाक्षिपतीत्यत्रमंदमित्यस्यरचनावर्णानांतुपदवाक्यांतर्गतत्वे
नव्यंजकतावच्छेदककोटिप्रविष्टत्वमेवनतुव्यंजकत्वमितियद्यपिस्फुटंतथापिपदवाक्यविशिष्टरचनात्वेनरचना
विशिष्टपदवाक्यत्वेनवाव्यंजकत्वमितिविनिगमनाविरहेणघटंप्रतिदंडचक्रादेःकारणत्वस्येवप्रत्येकमेवव्यंज
कतायाःसिद्धिरितिप्राचः॥वर्णरचनाविशेषाणांमाधुर्यादिगुणाभिव्यंजकत्वमेवनरसाभिव्यंजकत्वं॥गौरवा
न्मानाभावाच्चनहिगुण्यभिव्यंजनंविनागुणाभिव्यंजकत्वंनास्तीत्यस्तिनियमइंद्रियत्रयेव्यभिचारात्॥इत्थंचस्व

व्यंजकोपनीतानांगुणिनांगुणानामुदासीनानांचयथापरस्परोपश्लेषेणोदासीन्येनवातत्तत्प्रमितिगोचरतात
थारसानांतद्गुणानांचाभिव्यक्तिविषयतेतितुनव्याः॥उदाहरणंतुनीतमालेत्यादिप्रागुक्तमेव॥वाक्यस्यव्यंजक
तायामप्याविर्भूतायदवधीत्यादिच॥प्रबंधस्यतुयोगवासिष्ठरामायणेशांतकरुणयोःरत्नावल्यादीनिचशृं
गारस्यव्यंजकत्वाभिदर्शनानिप्रसिद्धानि॥मत्तिमिताश्चपंचलहर्योभावस्ययदेकदेशस्यचनिखिलमिदंजगदं
डकंवहामीतिकरूपतद्धितोवीररस्यप्रागेवोदाहृतः॥एवंरागादिभिरपिव्यंग्यत्वेसहृदयहृदयमेवप्रमाणं॥एव
मेषांरसादीनांप्राधान्येननिरूपितान्युदाहरणानिगुणिभावेतुवक्ष्यंते॥नामानिचतत्रप्राधान्यएवैषांरसादित्व
मन्यथारत्यादित्वमेवनामनिरसपदंतुरत्यादिपरमित्येके॥अस्त्येवरसादित्वंकिंतुनध्वनिव्यपदेशहेतुत्वमित्य
परे॥

इतिश्रीजगन्नाथविरचितेरसगंगाधरेरसनिरूपणंप्रथममाननंसमाप्तं॥ ॥अथसंलक्ष्यक्रमध्वनिर्निरूप्यते॥
सचतावद्द्विविधः॥शब्दशक्तिमूलोर्थशक्तिमूलश्च॥तत्रआद्योद्विविधः॥व्यंग्यस्यवस्तुत्वालंकारत्वाभ्यांद्वैविध्यात्
द्वितीयोपिवस्त्वलंकारात्मनालोकसिद्धेनतथाभूतेनैवप्रतिभासमात्रनिर्वर्तितेनचव्यंजकेनार्थेनचतुर्विधेन
वस्त्वलंकारात्मनोद्विविधस्यव्यंग्यस्यप्रत्येकंव्यंजनाद्दृष्टमूर्त्तिःप्रतिभानिर्वर्त्तितत्वाविशेषाच्चकविनिगुंफितवक्तृप्रौ
ढोक्तिनिष्पन्नयोरर्थयोर्नपृथग्भावेनगणनोचिता॥गुंफितत्वादेरपिभेदांतरप्रयोजकतापत्तेः॥नचतस्यापिक
विगुंफितत्वानपायात्तत्प्रयोज्यभेदांतर्गतत्वमेवेतिवाच्यं॥प्रथमोदितस्यापिलोकोत्तरवर्णनानिपुणकवित्वानपा
यात्पृथग्भेदप्रयोजकतानुपपत्तेः॥एवंसाकल्येनदशभेदोयं॥तत्रकेचिदाहुः॥नानार्थस्यशब्दस्यसर्वेष्वर्थेषुसं

र॰गं॰ केतगन्हस्यतुल्यत्वाच्छ्रुतमात्र एवतस्मिन् सकलानामर्थानामुपस्थितौशब्दस्यास्यकस्मिन्नर्थेतात्पर्यमितिसंदेहेवस
७८ तिप्रकरणादिकंतात्पर्यनिर्णयायपर्यालोचयतः पुरुषस्यसतितन्निर्णयेतदात्मकपदज्ञानजाया एकार्थमात्रविष
यायाः पुनः पदार्थोपस्थितेरनंतरं अन्वयबोधइतिनयेद्वितीयायाः पदार्थोपस्थितेः प्राथमिक्याइवनकुतोनाना
र्थगोचरतेतिप्रकरणादिज्ञानस्यतदधीनतात्पर्यनिर्णयस्यवापदार्थोपस्थितौप्रतिबंधकत्वंवाच्यमन्यथाशा
ब्दबुद्धेरपिनानार्थविषयत्वापत्तिरतएवोक्तमनवच्छेदेविशेषस्मृतिर्हेतवइति॥अनवच्छेदेतात्पर्यसंदेहे॥विशेष
स्मृतिरेकार्थमात्रविषयास्मृतिः॥इत्थंचसुरभिमांसंभक्षयतीत्यादेर्वाक्याज्जायमानाद्वितीयाप्रतीतिर्गवाद्युप ७८
स्थितेरभावात्कथंस्यादितितदुपस्थित्यर्थंव्यंजनव्यापारोऽभ्युपेयः॥अथैकयाशक्त्या प्राकरणिकार्थोपस्थितेरनं

तरंद्वितीययाशक्त्याद्वितीयार्थोपस्थितिस्तथापिस्यादितिचेत्॥नस्यादेवप्रकरणादिज्ञानस्यप्रतिबंधकस्या
नुपरमात्॥अन्यथाप्राकरणिकार्थोपस्थितावेवा[illegible]प्राकरणीकस्याप्यर्थस्यविषयत्वंस्यात्॥नप्रकरणा
दिज्ञानस्यतादृशपदजन्यार्थोपस्थितिसामान्य एवप्रतिबंधकत्वाच्छक्त्यापिकथमर्थांतरोपस्थितिरितिशंक्यं॥ध
र्मिग्राहकमानेनाप्राकरणीकोपस्थापकतयैवतादृशव्यक्तेरुल्लासात्तदजन्योपस्थितिंप्रत्येवप्रकरणादिज्ञान
स्यप्रतिबंधकत्वकल्पनाद्व्यक्तिज्ञानस्योत्तेजकत्वकल्पनाद्वा॥एतदेवसर्वमभिसंधायोक्तमनेकार्थस्यशब्दस्यवा
चकत्वेनियंत्रितेसंयोगाद्यैर्वाच्यार्थधीकृद्व्यापृतिरंजनमिति॥नियंत्रणमपरार्थोपस्थापनप्रतिबंधइति॥अप
रेत्वाहुः॥नानार्थशब्दजशाब्दबुद्धौतात्पर्यनिर्णयहेतुतायाअवश्यकल्प्यत्वात्प्रथमंनानार्थशब्दादनेकार्थोपस्थाने

र॰गं॰ पिप्रकरणादिभिस्तात्पर्यनिर्णयहेतुभिरुत्पादितेतस्मिन्यत्रतात्पर्यनिर्णयस्तस्यैवार्थस्यान्वयबुद्धिर्जायतेनान्य
७९ स्येतिसरणावाश्रीयमाणायांनैकमात्रगोचरस्मृत्यपेक्षानाप्यपरार्थोपस्थानप्रतिबंधकत्वंकल्पनं॥एवंचप्रा
गुपदर्शितनानार्थस्थलेप्रकरणादिज्ञानाधीनात्तात्पर्यनिर्णयात्प्राकरणिकार्थशाब्दबुद्धौजातायामतात्पर्या
र्थविषयापिशाब्दबुद्धिस्तस्मादेवशब्दाज्जायमानाकस्यव्यापारस्यसाध्यतामालंबतामतेव्यंजनात्॥नचश
क्तिसाध्यासेतिवाच्यं॥तदधीनबोधंप्रतितात्पर्यनिर्णयस्यहेतुत्वात्॥व्यक्त्यधीनबोधस्तुनावश्यंतात्पर्यज्ञान
मपेक्षते॥नन्वेकमात्रगोचरस्मृतेस्तच्छाब्दबुद्धावनपेक्षितत्वेविशेषस्मृतिहेतवइतिप्राचांग्रंथःकथंसंगच्छते ७९
॥कथंवाप्रकरणादिज्ञानस्यापरार्थोपस्थापनप्रतिबंधकत्वविरहेसंयोगाद्यैरनेकार्थस्यशब्दस्यवाचकताया

DR BHAU DAJI

---

८० नियंत्रणेव्यक्तिश्चेतिचेत्॥इत्थंस्मृतिशब्दस्यनिश्चयपरतयाविशेषस्मृतिशब्देनविशेषविषयस्तात्पर्यनिर्णयोगृ
ह्यतेसंयोगाद्यैर्वाचकतायानियंत्रणंचैकार्थमात्रविषयकतात्पर्यनिर्णयजननद्वाराशाब्दबुध्यनुकूलत्वं॥अवा
च्यार्थोतात्पर्यार्थः॥एवंचनग्रंथासंगतिरित्यपिवदंति॥अथवाप्राकरणिकार्थबोधानंतरंनादृशपदज्ञानस्योपस्था
त्कथंव्यक्त्यादिनाप्यर्थांतरधीःसूपपादेतिचेन्नैवं॥प्रथमार्थप्रतीतिव्यापारस्यसत्वाददोषइत्येके॥अर्थप्रतीतौशक्य
तावच्छेदकस्यैवपदस्यापिविशेषणतयाभानात्सार्थमिकशक्यार्थबोधस्यैवपदज्ञानत्वादित्यपरे॥आवृत्त्यापदज्ञा
नंसुलभमित्यपिकश्चित्॥तदित्थंनानार्थस्थलेनुरणनरूपंव्यंजनंशब्दशक्तिमूलंशब्दंपरित्यज्यसहिष्णुत्वादितिध्व
निकारानुयायिनोवर्णयंति॥अन्येत्वत्रनत्यवतिष्ठंते॥यत्तावदुक्तमेकार्थमात्रविषयापदार्थोपस्थितिस्तदन्वय

र०गं० बोधेपेक्षुत इति॥ तदासारं॥ नानार्थादर्थद्वयोपस्थितावपिप्रकरणादिज्ञानाधीनतात्पर्यज्ञानमहिम्नेवविवक्षि न-
८० तार्थशाब्दबोधोपपत्तेरेकार्थमात्रोपस्थित्यपेक्षायांमानाभावात्॥ अपरार्थोपस्थापकसामग्र्याःपदज्ञानस्यसत्वे
तदुपस्थितेरप्यौचित्याच्च॥ नचप्रकरणादिज्ञानंतदधीनतात्पर्यज्ञानंवापरार्थोपस्थापनेप्रतिबंधकमितिशक्यं प-
वक्तुं॥ संस्कारतदुद्बोधकयोःसत्वेस्मृतेःप्रतिबंधस्यक्वाप्यदृष्टत्वात्॥ अत्रैवस्मृतावयंप्रतिबध्यप्रतिबंधकभा
वःकल्प्यतेनस्मृत्यंतरइत्यप्यहृदयंगमं॥ तादृशकल्पनायानिष्फलत्वात् अनुभवविरुद्धत्वाच्च॥ तथाहि॥ नाना
र्थशक्तिविषयकदृढसंस्कारशालिनांप्रकरणज्ञानवतामपिपयोरमणीयमित्यादेर्वाक्यात्प्रथममर्थद्वयोप ८०
स्थितिरनुभवसिद्धा अतएवपयोरमणीयमित्यादिवाक्यमकस्मात्कस्मादप्याकर्णितवद्भिःप्रकरणाद्यभिज्ञैरप्र

करणज्ञाःपांसुलपादावक्तुस्तात्पर्यंबोध्यंतेनूनमस्यदुग्धेतात्पर्यंशब्दस्यनतुजलइति॥ यदिचप्रकरणादि
ज्ञानंनानार्थशब्दाज्जायमानाप्राकरणिकार्थोपस्थितिंप्रतिबध्नीयात्तत्कथमेतेतदानीमनुपस्थितजलाःप्रक
रणज्ञाजलतात्पर्यंनिषेधेयुरित्यहृदयंगमएवायमर्थःअप्राकरणिकार्थोपस्थापनप्रतिबंधकभावःप्रकरणादिज्ञा
नस्य॥ यदप्युच्यते प्रकरणादिज्ञानात्प्राकरणिकेर्थेतात्पर्यविषयतयानिर्णीतेतदीयशाब्दबोधानंतरमता
त्पर्यविषयीभूतार्थबोधोजायमानोव्यंजनव्यापारसाध्यइति॥ तत्रकिमयंनानार्थस्थलेसर्वत्रैवव्यंजनोल्लास
आहोस्वित्क्वचिदेवेतिसंमतं नाद्यःप्राकरणिकाप्राकरणिकयोरर्थयोःशाब्दबुद्ध्योःसर्वत्राभ्युपगम्यमानायांता
त्पर्यज्ञानकारणतायाःकल्पनस्यनैरर्थक्यापत्तेः॥ नचशक्तिजबोधेसाकल्प्यतेव्यक्तिजबोधस्तुतात्पर्यज्ञानंवि

र॰गं॰ नापिभवतीतितत्स्थानेशक्तिजबोधवारणायतत्कल्पनमितिवाच्यं॥अतात्पर्यार्थबोधस्यसार्वत्रिकत्वेनतस्यशक्ति
८१ जतायामपिबाधकाभावात्॥अथनानार्थशब्दादर्थद्वयोपस्थितौसत्यांप्रकरणादिनासत्येकस्मिन्नर्थेतात्पर्य
निर्णयेतस्यैवार्थस्यप्रथमंशाब्दबुद्धिर्जायतेनापरस्यार्थस्येतिनियमरक्षणायशक्तिजतदर्थशाब्दबुद्धौतदर्थता
त्पर्यज्ञानंहेतुरिष्यते॥अन्यथातात्पर्यविषयतयानिर्णीतस्यार्थस्यैवातथाभूतस्यापरस्याप्यर्थस्यप्रथमंशा
ब्दधीःस्यात्॥अनंतरंतुतात्पर्यविषयार्थबोधाद्वतात्पर्यविषयार्थविषयापिशाब्दधीरिष्यतइतितज्जन्यतावच्छे
दककोटौशक्तिजत्वंनिवेश्यतइतिचेत्॥मैवं॥सोध्यादिष्टभुजंगहारवलयस्त्वांसर्वदोमाधवइत्यादौश्लेषका ८१
व्यइवप्रकृतेपिप्रकृताप्रकृतयोरर्थयोर्बोधस्यस्वीकारेबाधकाभावात्॥नचदृष्टांतेअर्थद्वयेपिप्रकरणसाम्या

३- तात्पर्यज्ञानमस्तीतियुगपद्द्वयोर्बोधउपपद्येतदार्ष्टांतिकेत्वेकत्रैवप्रकरणादिवशात्तदितितयुगपदर्थद्वयबो
२२— धोपपत्तिरितिवाच्यं॥तात्पर्यज्ञानकारणतायाएवासिद्धत्वेनयुगपदर्थद्वयबोधानुपपत्तिवाचोयुक्तिरर
मणीयत्वात्॥तादृशज्ञानहेतुतासिद्धौतुशक्यतापीत्थंवक्तुं॥तर्हितात्पर्यज्ञानस्यकुत्रोपयोगइतिचेत्॥अस्मि
न्नर्थेयंशब्दःप्रमाणमयमर्थःप्रमाणवेद्यइत्यादिनिर्णयेप्रवृत्त्याद्युपयोगिनीतिगृहाण॥इत्थंचनानार्थस्थ
लेपितात्पर्यधियःकारणतायांशिथिलीभवंत्यामतात्पर्यार्थविषयशाब्दबुद्धिसंपादनायव्यक्तिस्वीकारोनुचित
एव॥शक्त्यैवबोधद्वयोपपत्तेः॥नापिद्वितीयः॥हेतोरभावात्॥व्यंग्यार्थविषयककवितात्पर्यज्ञानंतथेतिचेत्॥
न॥व्यक्तिजबोधेतात्पर्यज्ञानकारणतायास्त्वयैवानभ्युपगमात्॥यत्राश्लीलदोषस्तत्राप्राकरणिकेर्थेसकला

र॰गं॰ नुभवसिद्धैकविनात्पर्यस्यविरहात्तत्ज्ञानस्यतादृशबुद्धिहेतुतायाव्यभिचारदूषितत्वाच्च॥अथश्रोतुःशक्तिवि
८३ शेषाव्यक्तेरुल्लासेहेतुःसचफलबलाच्चमत्कारिण्येवार्थेव्यक्तिमुल्लासयन्नाचमत्कारिणीतिसिद्धंव्यंजनोल्लास ति
स्यचाचित्कत्वमितिचेन्नहंतैवंसतिनियंत्रितशक्तेरेवोल्लासकोस्त्वितिकृतंनानार्थस्थलेव्यक्तिकल्पनया॥किंच॥
उल्लासस्यकालकरवालमलांबुवाहमित्यादिनानार्थव्यंजकस्थलेगृहीतद्वितीयार्थशक्तिकस्यप्रदीनविस्मृतद्विती
यार्थशक्तिकस्यवापुंसःसर्वथैवव्यंजनयाद्वितीयार्थबोधानुदयात्तत्रतयातदापत्तिस्तवदुर्वारा॥नन्वयेनश
ब्देनयोर्थोव्यज्यतेतस्यशब्दस्यतदर्थगतशक्तिज्ञानंतदर्थव्यक्त्युल्लासेहेतुरितिवाच्यंनिःशेषच्युतेत्यादौरमण
व्यक्त्यनापत्तेः॥नह्यधमपदस्यकस्यचिद्रमणेशक्तिग्रहोस्ति॥सतिवानस्मिंस्तेनैवोपपत्तौव्यक्तिकल्पनवैयर्थ्या

पत्तेश्च॥नचनानार्थव्यंजनस्थलएवैवंजातीयकःकार्यकारणभावःकल्प्यते॥तत्रचशक्तेर्नियंत्रितत्वेनतद्ग्रह
स्याप्रयोजकतयाव्यक्तिकल्पनौचित्यादितिवाच्यं॥नवीनकार्यकारणभावकल्पनेगौरवप्रसंगात्॥नियंत्रण
स्यपूर्वमेवदूषितत्वेनतद्धेतोरेवेतिन्यायावताराच्च॥अथास्त्वप्राकरणिकोप्यर्थःशक्तिवेद्यएवान्वयधीगोचरः
परंतुयत्रनबाधितःस्यात्।यत्रतुबाधितस्तत्रजैमिनीयमलंधत्ते॥रसनायामयंद्विजइत्यादौजुगुप्सितोर्थोवह्नि
नासिंचतीत्यादौवह्निकरणकसेकइवबाधोपहतएवस्यात्॥बाधनिश्चयस्यतद्वत्ताज्ञानंप्रतिप्रतिबंधकतायाः
सर्वजनसिद्धत्वात्॥व्यक्तेस्तुबाधितार्थबोधकत्वंधर्मिग्राहकमानसिद्धमितिव्यक्तिवादिनामदोषइतिमेवं॥गा
मवतीर्णासत्यंसरस्वतीयंपतंजलिव्याजात्॥सौधानांनगरस्यास्यमिलत्यर्केणमौलयइत्यादौवाच्यार्थान्वय

र॰गं॰ बोधोपपादनायानुसरणीयेन यत्नेन नानार्थरूढलेपि बाधितार्थबोधस्योपपत्तिः स्यात्॥ अन्यथा प्रायशः सर्वे
९३ घ्वर्थलंकारेषु वाच्यार्थबोधोपपत्तये व्यंजनांगीकरणीया स्यात्॥ तस्मान्नानाप्राकरणिकेर्थे व्यंजनेति प्राच्यांसि
द्धांतः शिथिल एव प्राकरणिकाप्राकरणिकयोरुपमायां तु सा कदाचित् स्यादपीति॥ अत्रास्माकं प्रतिभाति॥ ए
वमपि योगरूढिरूढले रूढिज्ञानेन योगापहरणस्य सकलतंत्रसिद्धतया रूढ्यनधिकरणस्य योगार्थालिंगि
तस्यार्थांतरस्य व्यक्तिं विना प्रतीतिर्दुरुपपादा॥ यथा अबलानां श्रियं हृत्वा वारिवाहैः सहानिशं॥ तिष्ठंति चपला
यत्र स कालः समुपस्थितः॥ अत्राशक्तानां द्रव्यमपहृत्य जलवाहकैः पुरुषैः सह पुंश्चल्योरमंत इत्यर्थांतरं नता ९३
वदबलावारिवाहचपलाशब्दैर्योगरूढ्या शक्यते बोधयितुं मेघत्वविद्युत्वाद्यघटितस्यैव तस्यार्थस्य प्रतीतेः॥

अन्यथा चमत्कारो न स्यात्॥ अत एव न योगशक्त्यापि केवलया रूढ्यर्थासंवलितार्थबोधकत्वस्य तस्या रूढिसमा
नाधिकरणाया असंगतेः पुंश्चलित्वादेः सर्वथैव तद्विषयत्वाच्च॥ एवं योगिकरूढलेपि बोध्यं॥ यथा वा॥ चांचल्य
योगिनयनं तव जलजानां श्रियं हरतु॥ विपिनेति चंचलानामपि च मृगाणां कथं नु तां हरति॥ अत्र नैवाश्चर्यका
रि चांचल्यगुणरहितानां कमलानां चांचल्यगुणाधिकेन तव लोचनेन शोभायास्तिरस्कार आश्चर्यकृत्तु हरिणा
नां तद्गुणयुक्तानां तस्याः स इति वाच्यार्थे पर्यवसन्नेपि रूढिनिर्मुक्तकेवलयोगमर्यादया मूर्खपुत्राणामत एव
प्रमत्तानां नेत्रभिश्चौराद्यैः श्रियो धनस्य हरणं सुशकं न तु गवेषकाणामत एवाप्रमत्तानामिति जलजनय
नमृगशब्देभ्यः प्रतीयमानोर्थः कथं नाम व्यंजनव्यापारं विनोपपादयितुं शक्यते॥ अत एव पंकजादिपदेभ्यः पं

र॰गं॰ कजनिकर्तृत्वेनकुमुदाद्युपस्थितिर्लक्षणयैवेतिनैयायिकामन्यंते॥अत एवचेशानोभूतभव्यस्यसएवाद्यस
८४ उश्वइतिवेदांतवाक्येकिमैश्वर्यविशिष्टः कश्चिज्जीवोत्रप्रतिपाद्यउतेश्वरइतिसंशयेजीवएवेतिपूर्वपक्षेच
शब्दादेवप्रमितइतिसूत्रितमुत्तरमीमांसाकारैर्बादरायणचरणैः तस्मादर्थांतरमिह न शक्तिवेद्यमपितुव्य
क्तिवेद्यमेव।यथाश्रुतार्थस्यैवोपपत्तेर्बाधाभावेनलक्ष्यमित्यपिनशक्यंवक्तुं॥तात्पर्यार्थबाधस्तुतदर्थबोधोत्त
रंबोध्यःसएवतुकथंस्यादित्युपायोयंविचिंत्यते॥नह्यपहर्तृव्यवहारोवक्त्राविवक्षितइतिश्रोतुर्बोधेकश्चि
दुपायोस्तिऋतेसहृदयहृदयोन्मिषितादस्माद्व्यापारात्॥एवमन्यत्राप्यूह्यं॥तादृशार्थप्रतिपत्तिरेवनास्तीतितु ८४
गाढतरशब्दार्थव्युत्पत्तिमसृणीकृतांतःकरणैर्नशक्यतेवक्तुं॥तथाचेत्थंसंग्रहः॥योगरूढस्यशब्दस्ययोगे

रूढ्यानियंत्रिते॥धियंयोगस्पृशोर्थस्ययारूढेर्व्यंजनैवसा॥एवंस्थितेनानार्थरूढेप्युपमायाःप्राकरणिका
प्राकरणिकार्थगतायाःप्रतिपत्तयेवश्यंवाच्ययाव्यंजनयैवाप्राकरणिकस्याप्यर्थस्यप्रतिपत्तावलंक्लिष्टकल्प
नयेत्याशयेनप्राचीनैरुक्तंनानार्थव्यंजकत्वमपिनदुष्यति॥तत्रनानार्थशक्तिनियमनायतैःसंयोगादयोनि
रूपिताः॥संयोगोविप्रयोगश्चसाहचर्यंविरोधिता॥अर्थःप्रकरणंलिंगंशब्दस्यान्यस्यसंनिधिः॥सामर्थ्य
मौचितीदेशःकालोव्यक्तिःस्वरादयः॥शब्दार्थस्यानवच्छेदेविशेषस्मृतिहेतवइति॥तत्रयोसंगेःनानार्थशब्द
शक्यांतरव्यक्तितयाअप्रसिद्धत्वेसतिनच्छक्यवृत्तयाप्रसिद्धःसंबंधः॥यथासशंखचक्रोहरिरित्यत्रशंखचक्र
योःसंयोगोभगवन्मात्रनिष्ठतयाप्रसिद्धोभगवतिहरिशब्दस्याभिधायानियमेनावस्थापकःनत्वायुधत्वे

र॰गं॰ नायुधसामान्यसंयोगात्पाशांकुशादिसंयोगोवादलद्वयाभावात्॥नचासौलिंगांतर्गतइतिमंतव्यं॥श
८८ क्यांतरेनियमेनावृत्तेरेवप्रकृतेलिंगत्वात्॥शंखचक्रयोस्त्विंद्रादिनापिकदाचिद्धारणसंभवात्॥विप्रयो
गोविश्लेषः यथाअशंखचक्रोहरिरित्यत्रतयोरेवविश्लेषस्तथा॥अत्रहिविश्लेषनियतपूर्ववर्त्तिनःसंश्लेषस्य
प्रागुक्तदलद्वयाक्रांतत्वमपेक्ष्यते॥तेनायुधसामान्यविभागः॥पाशांकुशादिविभागोवानतथा॥यद्यप्यत्र
गुणतयावर्त्तमानस्तादृशसंयोगएवाभिधानियंतायालं॥तथापिगुणप्रधानयोःसंनिपातेप्रधानानुरोध
एवन्याय्यइत्याशयेनविप्रयोगस्यनियामकत्वमुक्तं॥यद्वा॥संयोगस्येवकेवलेनविश्लेषगुणीभूतत्वेनचवैद
विध्यप्रदर्शनायतथोक्तं॥साहचर्यमेकस्मिन्कार्येपरस्परापेक्षित्वं॥यथारामलक्ष्मणावित्यत्ररामेलक्ष्मण

साहचर्यंरामस्य॥अथकिमिदंपरस्परापेक्षित्वंयत्किंचित्कार्येसर्वेषुकार्येषुवा॥नाद्यः॥घटाद्यव्यावर्त्तनात्घ
टसाहचर्यस्यापिरामपदशक्तिनियामकतापत्तेः॥नद्वितीयः॥लक्ष्मणसाहचर्यस्यापिनिवारणापत्तेःपक्षद्व
येपिरामायोध्येरघुरामावित्यत्रानियमापत्तेश्च॥नचनानार्थपदसमभिव्याहृतपदांतरार्थस्यप्रसिद्धःसं
बंधस्तत्॥सचैकजनकजन्यत्वदांपत्यजन्यजनकभावस्वामिभृत्यभावस्वस्वामिभावादिरनेकविधः
तेनरामलक्ष्मणौसीतारामौरामदशरथौरामहनुमंतौरामायोध्येइत्यादौसाहचर्यंनियामकमितिवाच्यं॥
लक्ष्मणादिसंबंधापेक्षयाचक्रादिसंबंधस्याविशिष्टतयासशंखचक्रइत्यत्रापिसाहचर्यस्यैवनियामकता
पत्तेः नचसशंखचक्रइत्यादौयत्रसंबंधःसंयोगरूपस्तत्राद्यस्ययत्रचसंबंधांतरंतत्रतृतीयस्यावकाशइति

श॰गं॰ वाच्यं॥संयोगस्येव पृथक्कारे बीजाभावात्॥नच यत्र संयोगः शब्दोपात्तस्तत्र स एव नियामको यत्र तु संबंधिमा ए-
८६ त्रं न तु संबंधिस्तत्र साहचर्यमत एव सशंखचक्र इति संयोगस्य रामलक्ष्मणाविति च साहचर्यस्योदाहरण
मिति वाच्यं॥सलक्ष्मणो रामो विलक्ष्मणो राम इत्यत्र संयोगविभागयोर्गुणयोरप्रतीत्या साहचर्योदाहरण
तायां प्रसक्तायां सशंखचक्र इत्यादेरपि तदुदाहरणतायां एवौचित्यादिति चेन्न उच्यते॥संयोगशब्दस्य सं
बंधसामान्यपरतया यत्र शब्दोपात्तं प्रसिद्धं संबंधसामान्यं शक्तिनियामकं तदाद्यस्य यत्र तु द्वंद्वादिगतः
संबंध्येव केवलस्तथा न तत्साहचर्यस्योदाहरणमिति प्राचामाशयात्॥इत्थं च सगांडिवोर्ज्जुनः॥इति संयोग ८६
स्य गांडिवार्ज्जुनाविति साहचर्यस्योदाहरणं॥विरोधिता प्रसिद्धं वैरं सहानवस्थानं च॥तत्राद्यस्य रामार्ज्जुना

वित्युदाहरणं प्राचो वदंति॥यत्त्वप्यदीक्षितो वृत्तिवार्त्तिके प्राचामुदाहरणं निराकुर्वन्नाह॥रामार्जुनपदयो
र्व्यवधानकभावविरोधाद्भार्गवकार्तवीर्ययोरभिधानियम्यत इत्ययुक्तं रामपदस्याभिधानियमने सति त
द्विरोधप्रतिसंधानेनार्ज्जुनपदस्य कार्तवीर्येभिधानियमनं तस्मिंश्च सति तद्विरोधप्रतिसंधानेन रामपदस्येत्य त-
न्योन्याश्रयापत्तेः॥तस्मादन्यतरपदस्य व्यवस्थितार्थत्वे एवस्मृततद्विरोधप्रतिसंधानान्यार्थपदस्याभिधानियम
नमिति रामरावणयोरित्युदाहरणं भवितुमर्हतीति॥तत्र तावद्रामरावणयोरिति व्यवस्थितार्थान्यतरपदक रि-
मुदाहरणं विरोधितायां नियामकत्वस्य न युक्तं रामलक्ष्मणयोरित्यत्रेवात्रापि साहचर्यस्यैव नियामकत्वात्॥
नच लक्ष्मणसाहचर्ये रामस्य प्रसिद्धं न तु रावणसाहचर्यमिति वाच्यं॥प्रसिद्धतरसंबंधकत्वस्यैव तत्साहच

र॰गं॰ र्यपदार्थत्वात्॥पितृभ्रातृजायापत्यभृत्यनगरीणांसंबंधस्यैवरिपोःसंबंधस्यापिलोकप्रसिद्धत्वात्॥एवंस्थि
८७ तेपिविरोधितायाःपृथग्गणनेमित्रत्वादेरपितथागणनापत्तेः॥तस्मात्प्राचीनोदाहरणमिवत्वदुक्तमुदाहर
णमप्यशुद्धमेव॥अन्यतरपदस्यव्यवस्थितार्थत्वएवेत्याद्यप्रसंगतत्वंतमेव॥हरिनागस्येत्यादावुभयोरव्यवस्थि
तार्थत्वेप्येकवद्भावाभिव्यक्तेनविरोधेनधर्मिविशेषाविशेषितो॥नापियुगपद्धर्मिविशेषद्वयेभिधायानियंतुंश
क्यत्वात्॥यदपिरामार्जुनगतिस्तयोरितिशब्दांतरसंनिधेरुदाहरणमितिसएवाह॥तदप्यसत्॥त्वयानिरूपि
तेशब्दांतरसंनिधेरुदाहरणेनिषधंपश्यभूभृतंनागोदानेनराजतइत्यत्रचाभिधायानियतविषयतांविनान्वय ८७
स्यैवानुपपत्याप्रकृतेचरामार्ज्जुनगतिस्तयोरित्यर्थांतरविषयत्वेप्यन्वयानुपपत्तेरभावान्महतिवैलक्षण्येशब्दांत-

---

रसन्निध्युदाहरणत्वायोगात्॥एवमपिकाव्यप्रकाशगतस्यरामार्ज्जुनगतिस्तयोरितिविरोधितोदाहरणस्यासंग
तिःस्थितैवेतिचेन्न॥तयोःकयोश्चित्प्रसिद्धविरोधयोरामार्जुनगतिःरामार्जुनसदृशीगतिराचरणमितितदर्थ
वर्णनेविरोधेनप्रकरणवशात्प्रतीतेनयुगपद्भार्गवकार्तवीर्ययोरामार्ज्जुनशब्दाभिधायानियमनस्योपपत्तेः।
नचप्रकरणादविशेषः विरोधस्यप्रक्रांतत्वेपिभार्गवकार्तवीर्ययोःशक्तिनियमाधिकरणयोरप्रक्रांतत्वात्॥सहा
नवस्थानलक्षणाविरोधितातुछायातपावित्यादौबोध्या॥अर्थःप्रयोजनंचतुर्थ्याद्यभिधेयं॥यथास्थाणुंभजभवच्छि
३ दे इत्यादौभवच्छेदनादिस्थाणुपदस्यभवे॥नन्वर्थस्यलिंगात्कोभेदः नचलिंगमनन्यसाधारणस्तद्धर्मोर्थस्तुतद्भजना
देःकार्यंनतुतद्गतोधर्मइतिस्फुटएवभेदइतिवाच्यं॥भवच्छेदजनकभजनकर्मत्वस्यकाष्ठ्यांत्तिभवधर्मत्वादिति श्रा-

र.गं. चेत्॥ अत्राहुः॥ उक्तस्य विशिष्टधर्मस्य शाब्दबोधोत्तरभाविमानसबोधोत्तरभाविमानसबोधविषयत्वेन प्रकृत
९९ शाब्दबोधाविषयत्वाल्लिंगतो वैलक्षण्योपपत्तिरिति॥ लिंगं त्वेकपदार्थः कोपादिरनन्वित एव यः पदार्थांतरेणाप्र
कृतशक्यधर्मतां शक्यांतरव्यावृत्तिं नावभजते उक्तधर्मस्तु न तथेत्यपि केचित्॥ प्रकरणं वक्तृश्रोतृबुद्धिस्था॥ य
था राजानं संबोध्य केनचिद्भृत्येनोक्ते सर्वं जानाति देव इति वाक्ये देवपदस्य युष्मदर्थे॥ लिंगं नानार्थपदशक्यांतरा
वृत्तिरेकशक्यगतः साक्षाच्छब्दवेद्यो धर्मः॥ यथा कुपितो मकरध्वज इत्यत्र कोपो मकरध्वजपदस्य कामे॥ शब्दस्या
न्यस्य संनिधिः नानार्थपदैकार्थमात्रसंसर्ग्यर्थांतरवाचकपदसमभिव्याहारः॥ यथा करेण राजते नाग इत्यत्र क ९९
रपदस्य नागपदमादाय नागपदस्य च करपदमादाय शुंडायां गजे च॥ न चात्रैकशब्दशक्तिनियमनमपरशब्दश

शक्तिनियमोपेक्षत इति येनान्योन्याश्रयः स्यात्॥ किंतु करनागशब्दयोरर्थांतरग्रहणेन्वयानुपपत्त्या युगपदेव शक्ति
नियम्यते॥ देवस्य पुरारातेरिति प्राचामुदाहरणे सुरत्वभूपत्वाभ्यां देवपदान्नगरारित्वासुरविशेषारित्वाभ्यां पुरारा
तिपदाच्चोपस्थितेरुभयोरपि नानार्थत्वादर्थांतरस्वीकारेप्यन्वयोपपत्तेश्च कथं शक्तेर्नियमः स्यात्॥ न च पुराराति
पदं योगरूढं तथा च रूढेर्योगापहारितया शिवत्वेनैव तस्य बोधकत्वाद्देवपदशक्तिनियामकतेति वाच्यं॥ पुरारा
तिपदस्य रूढौ मानाभावात्॥ अथ देवस्य त्रिपुराराते रिति पाठस्तथापि पाठांतरोपस्थापितस्य त्रिपुरासुरवैरित्वस्य
लिंगतया लिंगोदाहरणत्वमेवास्य स्यान्न तु शब्दांतरसंनिध्युदाहरणत्वमिति वदंति॥ तत्रैकपदार्थः कोपादिः पदा
र्थांतरेणानन्वित एव यः प्रकृतशक्यधर्मतां शक्यांतरव्यावृत्तिं नावभजते स लिंगपदेनाभिप्रेत इति प्राचामाशयेन तु

र॰ गं॰ नोक्तदोषः॥ यत्तुशब्दस्याव्यभिचारितस्यसंनिधिःसमानाधिकरण्यमितिकाव्यप्रकाशटीकाकारैरुक्तंतत्तुकरेणराजते
८९ नागइत्यादावव्यापनात्तत्रनियामकांतरस्यगवेषणेगोरखाकुपितोमकरध्वजइतितन्मूलोक्तेलिंगोदाहरणेति
व्यापनाच्चोपेक्ष्यं॥ सामर्थ्यंकारणतायथामधुनामत्तःकोकिलइत्यत्रकोकिलमदजनकेनामधुशब्दस्यवसं
तेऽत्रकोकिलमादनेमधोरेवशक्तिर्नतुमधुनःमादकत्वंमधुन्यस्तीतिनलिंगमितिवदंति॥ तत्रसामर्थ्येलिं
गांतर्गतमेवकुतोनस्यादितिशंकायाःकथमेदुंतेत्तरंसंगच्छते॥ नचमादनसामर्थ्यस्यसुरावृत्तितयानासाधा
रणधर्मतारूपंलिंगत्वमितिवाच्यं॥ मादनसामर्थ्यस्यसुरावृत्तित्वेपिकोकिलमादनसामर्थ्यस्यवसंतासाधा ८९
रणतयालिंगत्वस्यदुर्वारत्वात्॥ नचप्राणिमात्रमादनसमर्थस्यमधुनःकोकिलमादनसामर्थ्यमप्यस्तीतिवाच्यं॥

एवंसतिसामर्थ्यस्यवाचकतानियामकत्वमसंगतंस्यात्॥ ननुमधुनइतिस्वोक्तिरौविधश्चभवेत्प्रसिध्याश्रयेपु
नर्लिंगत्वमत्रच्युतं॥ शब्दत्वाशाब्दत्वाभ्यामेकानेकपदार्थत्वाभ्यांवाविशेषस्तुस्यात्॥ औचितीयोग्यता॥ यथापातु ९०
वोदयितामुखमित्यत्रदयितामुखकर्तृकरक्षणकर्मत्वाक्षिप्तकामार्त्तानांसंबोध्यपुरुषाणांत्राणंहितस्याःसांमु
ख्येनैवभवति॥ ननुमुखमात्रेण॥ वैमुख्येतेनत्राणायोगात्॥ अतस्त्राणार्हत्वंवदनसांमुख्याभयप्रत्यायकस्यमु
खशब्दस्यसांमुख्ये॥ देशोनगरादिर्यथाभात्यत्रपरमेश्वरइत्यादौपरमेश्वरादिशब्दस्यराजादौ॥ तस्यनगरादि
संबंधतदभावयोःसंभवेनाभावव्यावृत्त्यर्थमधिकरणकीर्त्तनस्यसार्थक्यात्॥ परमात्मनस्तुसर्वगतस्यव्यावृत्त्य
भावात्तदुक्तिवैयर्थ्यापत्तेः॥ एवंवैकुंठेहरिर्वसतीत्यत्रापिबोध्यं॥ एकत्रार्थांतरोपगमेऽधिकरणोक्तिवैयर्थ्यमप

र॰गं॰ रत्रतुतदर्थीकरणकत्वात्प्रसिद्धिरितिविशेषः॥कालोदिवसादिः॥चित्रभानुर्दिनेभातीत्यादौचित्रभान्वादिपदानांसू
९० र्यादिषु॥एवंचातुर्मास्येहरिःशेते॥व्यक्तिःस्त्रीपुंनपुंसकलिंगानि॥यथामित्रोभातिमित्रंभातिइत्यत्रमित्रशब्दःन
पुंसकेसुहृत्सूर्ययोः॥एवंनभोभातिनभाभातीत्यत्रापि॥स्वरउदात्तादिः॥यथेंद्रशत्रुरित्यत्रसमासांतोदात्तत्वमिं
द्रशत्रुशब्दस्येंद्रस्यशत्रौपूर्वपदप्रकृतिस्वरप्राप्तमाद्युदात्तत्वंचेंद्रशत्रुके॥आदिनाभिनयादिपरिग्रहोयथाएद्दह
मेत्तत्थणिपत्यादौ॥इहार्थसामर्थ्यौचितीनामुदाहरणेषुचतुर्थ्याद्यैरर्थसामर्थ्येनचबोध्यमानकार्यकारणभाव
एवनियामकोनतुवस्त्वंतरं॥बोधकवैचित्र्याच्चनियामकस्यवैचित्र्येणोक्तिःप्राचां॥वस्तुतस्तुसंयोगादीनामर्था ९०
तरसाधारणत्वेनानार्थशब्दस्यार्थविशेषशक्तेःसंकोचएवनसंभवति॥नियामकानामसंकुचितत्वात्॥अथप्र

सिद्धत्वादीनांतेषामसाधारणताबुद्धिर्यथाकथंचिदुपपाद्यतेतदाप्रायशोलिंगभेदाएवैतेनतुसर्वथैवततःस्व
तंत्राइतिबोध्यं॥तत्रशब्दशक्तिमूलालंकारस्यध्वनिर्यथा॥करतलनिर्गलदविरलदानजलोल्लासितावनीवलयः
धनदाग्रमहितमूर्त्तिर्जयतितरांसार्वभौमोयं॥अत्रराजप्रकरणेनकरदानधनदसार्वभौमशब्दानांशक्तौसंको
चितायामपितन्मूलकेनध्वननेनप्रतीयमानस्यार्थांतरस्याप्रस्तुतस्याभिधानंमाभूदितिप्रकृताप्रकृतयोरुपमा
नोपमेयभावःप्रधानवाक्यार्थतयाकल्प्यतेइत्युपमालंकारध्वनिः॥अथश्लिष्टविशेषणायांसमासोक्तौव्यंग्यस्या
प्यप्रकृतव्यवहारस्यप्रकृतधर्मिण्यारोप्यमाणस्यप्रकृतोपस्कारतयायथागुणीभूतव्यंग्यत्वमेवमिहाप्युचितं॥न
चोपमाप्रकृतार्थोपस्कारिकानभवतीतिशक्यंवदितुं॥उल्लासस्यकालकरवालमहांबुवाहंभद्रात्मनोदुरधिरोहतनो

र.गं. रित्यादौ प्राचीनानां पद्ये करतले इत्यादि प्रागुदाहृतपद्ये च व्यंग्योपमया प्रकृतस्य राज्ञः प्रकर्षस्य सकलानुभवसिद्ध
९१ त्वात्॥ अनुभवापलापे तु समासोक्तावप्यप्रकृतव्यवहारस्य प्रकृतोपस्कारकत्वेनेति सुवचत्वात्॥ ननु समासो
क्तावस्त्वस्ति विशेषो यत्तत्र व्यवहारिणो नानार्थशब्दानुपस्थाप्यत्वमिह तु तदुपस्थाप्यत्वमिति चेत्॥ किं चातो नहि
व्यवहारिणो नानार्थशब्दोपस्थाप्यतामात्रेण प्रकृतधर्मिनिरूपितायाउपमायाः प्रकृतधर्म्युपस्कारकत्वं वार्यते येन
न गुणीभूतव्यंग्यत्वं न स्यात्॥ न चात्रोपमादीनामलंकाराणां स्वभावतः सुंदरत्वात् काव्यप्रवृत्युद्देश्यतया च वस्तुमा
त्रे गुणीभावो न संभवति यथा वस्तुमात्रेणाभिव्यक्तानामलंकाराणां॥ तुल्यन्यायत्वात्॥ अप्रकृतव्यवहारस्य तु स
मासोक्त्यवयवस्यानलंकारतया वस्तुन्युपस्कारकत्वं समासोक्तावविरुद्धमिति वाच्यं॥ एवमपि बाधे दृढेन्यस्यान्

DR BHAU DAJI MEMORIAL

साम्यात् किं दृढेन्यदपि बाध्यतामिति न्यायेनोक्तयुक्तेः शिथिलत्वात्॥ अपरांगतायादुरपन्हवत्वात्॥ अथोच्येत॥
उपमानमुपमेयं साधारणो धर्म इति ह्युपमाशरीरघटकं न तु ततः पृथग्भूतं तैर्विना तस्या अनिष्पत्तेः॥ इत्थं चोपमे
यस्य सादृश्यांशेनोपस्कारेप्युपमाया नापरांगत्वमुपमेयस्यापरत्वाभावात्॥ यथा समासोक्तावप्रकृतव्यवहारे
णप्रकृतस्योपस्करणेपि न समासोक्तेरपरांगत्वं प्रकृताप्रकृतघटितत्वादेवमिहापि स्यादिति॥ तथापि समासोक्तेरि
वास्यापि प्रभेदस्य गुणीभूतव्यंग्यत्वापत्तेरस्यैवा समासोक्तेरपि ध्वनिव्यपदेश्यत्वापत्तेः॥ अन्यच्च श्लेषे हि श्लेषभित्ति
कमभेदाध्यवसानं द्वयोरर्थयोरिति सकलालंकारिकनिबद्धमनुभवसिद्धं च तत्र मूलान्वेषणे विधीयमान एकपदो
पात्तत्वान्न शक्यते मूलमन्यन्निर्वक्तुं॥ एकपदोपात्तो ह्यनेकोप्यर्थोभिन्नतयैवभासते॥ इत्थं चोद्धास्य कालकरवाले

र॰गं॰ त्यादावप्येकपदोपात्ततयाद्वयोरर्थयोरभेदाध्यवसानस्ययुक्तत्वेनाभेदस्यैवव्यंग्यत्वमुचितंमोपमायाः॥श्लेषेद्व
१२ योरर्थयोर्वाच्यत्वमेककालत्वंत्वेहत्वेकस्यवाच्यत्वमपरस्यव्यंग्यत्वंभिन्नकालत्वंचेत्येतावन्मात्रेणैवैकपदोपात्त
त्वप्रयुक्तमभेदाध्यवसानंनशक्यंत्यक्तुंव्यंग्यतायाभिन्नकालत्वस्यचाभेदप्रतिपत्तावबाधकत्वात्॥एतेनरूपक
स्योपमाज्ञानाधीनज्ञानत्वेनप्रथमोपस्थिततयातस्याएवसंबध्धत्वंकस्यमितिवाक्यप्रकाशटीकाकारैरुक्तंनाती द—
वश्रद्धेयमितिप्रकृतमनुसरामः॥एवमलंकारांतरमपिशब्दशक्तिमूलानुरणनस्यविषयः॥यथायमुनावर्णनेरवि
वि कुलप्रीतिमावहंतीनरकुलप्रीतिमावहंतीअवारितप्रवाहासुवारितप्रवाहाइहनराणांवीनांचकुलस्यप्रीतिमा १२
मंमा वहंतीतिप्रकृतेर्थेसिद्धेरविकुलप्रीतिमावहंतीतिद्वितीयःप्रकृतोर्थोविरोधश्च॥एवमन्यत्रापियदितुरविकुलप्रीति

मावहंत्यपिरविकुलप्रीतिमावहंतीअवारितप्रवाहापिसुवारितप्रवाहेत्यपिरंतर्भाव्यतेतदाविरोधांशस्यापिनोक्त
त्वात्द्वितीयार्थस्यचतदाक्षिप्तत्वान्नध्वनित्वं॥निपातानांद्योतकतानयेपिस्फुटद्योतितस्यतदाक्षिप्तस्यचवाच्य
कल्पत्वान्नतथात्वं॥ननुमृणालवलयादिदवदहनराशिरित्यत्रविरोधाभासस्यकथंवाच्यालंकारत्वंविरोधांशस्य
वाच्यताविरहेणव्यंग्यतायाएवाभ्युपगंतव्यत्वात्॥नचविरोधविशिष्टाभेदस्यसंसर्गत्वाद्वाच्यार्थबोधविषयत
याविरोधस्यवाच्यत्वमितिवाच्यं॥विरोधाभेदयोःपरस्परविरुद्धत्वेनैककालावच्छेदेनैकसंसर्गत्वस्यानुपप
त्तेःनामार्थयोरभेदस्यैवसंसर्गतयाविरोधस्यापिसंसर्गत्वेमानाभावाच्च॥पर्यंतेदवदहनराशिपदस्यसद
शलाक्षणिकतयाविरोधांशस्यतिरोधानाच्च॥मेवं॥उक्तपद्यस्यविरोधोदाहरणतामात्रेतात्पर्यात्॥व्यंग्य

र॰गं॰ त्वेपितथात्वस्यानपायात् ॥वाच्यविरोधोदाहरणतायांत्वपिरंतभाव्यः॥केचित्तुविरोधांशस्यव्यंग्यत्वेपिविरो
१३ धांशस्यव्यंग्यत्वेपिविरोधिद्वयस्यवाच्यतामात्रेणविरोधाभासस्यवाच्यालंकारव्यपदेशोपपत्तिः॥इत्थमेववाच्यां
शांतरस्यव्यंग्यत्वेपि एकांशमादायसमासोक्त्यादीनामपिवाच्यालंकारव्यपदेशइत्याहुः॥यथावा॥कृष्णप
क्षाधिकरुचिःसदासंपूर्णमंडलः॥भूयोयंनिःकलंकात्मामोदतेवसुधानले॥भगवत्पक्षाधिकप्रीत्यादिलक्षणेप्र
कृतभूयोपयोगित्वात्प्रकृतेर्थेशक्त्याप्रतीतिपथमवतीर्णेद्वितीयोर्थोप्रकृतोवैधर्म्यात्मातत्रयुक्तोव्यतिरेक
ग- श्च॥नचात्रव्यतिरेकस्यकविगतराजविषयकरतिभावोत्कर्षकतयागुणीभूतस्यकथंध्वनिव्यपदेशहेतुत्वंप्र १३
धानस्येवध्वनिव्यपदेशहेतुत्वादितिवाच्यं॥उदासीनेकर्तरित्वार्थकथनपरस्यास्यपद्यस्यवक्तृगतरतिव्यं

जकत्वासंगतेः॥गुणीभूतस्यार्थस्यवाच्यार्थापेक्षयाप्रधानतयाध्वनिव्यपदेशहेतुतायाःस्वीकाराच्च॥अ
श्रा- न्यथानिरुपादानसंभारमभित्तावेवतन्वते॥जगच्चित्रंनमस्तस्मैकलाश्लाघ्यायशूलिने इत्यत्रव्यतिरेकध्व
नित्वंनैरुक्तमसंगतंस्यात्॥व्यतिरेकस्यभगवद्विषयकरतिभावांगतायाअनुभवसिद्धत्वात्॥शब्दशक्ति
मूलवस्तुध्वनिर्यथा॥राज्ञोमत्प्रतिकूलान्मेमहद्भयमुपस्थितं॥बालेवारयपांथस्यवासदानविधानतः॥अ
त्रोपभोगंदेहीतिवस्तुराजपदशक्तिमूलानुरणनविषयः॥राजपदाच्चंद्रोपस्थितावेवचंद्रजनितभयवार
णकरणत्वेनोपभोगस्याभिव्यक्तेः॥नचात्रनृपचंद्रयोरुपमानोपमेयभावोभेदारोपरूपंरूपकंतथास्त्वि या-
न- तिवाच्यं॥इहनृपरूपस्यार्थस्यचंद्ररूपार्थगोपमात्रार्थमुपात्तत्वेनयुगपदुल्लसितोपमानोपमेयकयोरू रु-

र॰गं॰ पमारूपकयोस्तात्पर्यविषयतायाअयोगात्।।नचासंसृष्टार्थद्वयबोधनेवाक्यभेदइतिवाच्यं।।तुल्यकक्षत
१४ याद्वयोरसंसृष्टयोरर्थयोःप्रतिपिपादयिषितत्वएवतस्याभ्युपगमात्।।इहत्वाछादकप्रतीतिसमयआछाद्या
प्रतीतिराछाद्यप्रतीतौचाछादकन्यग्भावएवेतिनास्तितुल्यकक्षताकाव्यप्रकाशेत्तुशनिरशनिश्चतमुच्चैरि
त्यादिकमुदाहृत्यात्रविरुद्धौद्वावपित्वद्नुवर्त्तनार्थमेकंकार्यंकुरुतइतिध्वन्यतइत्युक्तं।।तच्चद्वौशन्यशनी
उदारानुदारौचैककार्यंहननंभानंचेतिव्याख्यातृभिर्व्याख्यातं।।तन्न।।शन्यशन्योर्हननक्रियाकर्त्तत्वान्वये
प्युदारानुदारयोर्भनिकर्त्तृतत्पदार्थविशेषणयोस्तत्प्रकारविशेषणयोःसाक्षाद्भानकर्त्तृत्वान्वयाभावात्क १४
थमेककार्यकारित्वंसंगतंस्याद्तोविरुद्धौद्वावित्यादिप्रथमार्धविषयंद्वितीयार्द्धंतुविरोधाभासएव।।

कर्त्तृयभिदेनान्वयमात्रेण"कुरुत"इत्यस्योपपत्तिश्चेदस्तुद्वितीयार्द्धे"तु"पिविरुद्धौद्वावित्यादिवस्तुव्यंग्यंपरंत्वर्थ
द्वयेपिविरोधाभासालंकारशबलितमेव।।शत्रुविरुद्धस्यशत्रुत्वासंभवादेकस्यशन्यशनिकर्त्तृकहननकर्म
त्वायोगेनाद्यार्धेउदारत्वानुदारत्वयोरेकाधिकरणवृत्तित्वायोगात्द्वितीयार्द्धेचविरोधस्यस्फुटत्वात्।।अर्थ
शक्तिमूलानुरणनंयथा।।गुंजंतिमंजुपरितोगत्वाधावंतिसंमुखं।।आवर्त्ततेविवर्त्ततेसरसीषुमधुव्रताः
।।अत्रमधुव्रतकर्त्तृकमंजुगुंजनाद्यैर्वस्तुभिःकविकल्पितत्वविरहेणस्वतःसंभविभिरासन्नसरसिजोत्पत्तिध्व
ननद्वाराशरदागममनेकव्यरूपंवस्तुव्यज्यते,काव्यप्रकाशेत्वलसशिरोमणिधुत्ताणंअणिमइत्याद्युदा
हृत्यममैवोपभोग्यइतिवस्तुनावस्तुव्यज्यतइत्युक्तं।।तत्रकेनवस्तुनेदंवस्तुव्यज्यतेनतावदलसशिरोम

र०गं० णित्वादिकांतविशेषणैः तेषांधात्र्यादिवद्दूत्यांनिरूपितत्वेनमयैवोपभोग्यइत्यादिरूपेणैवव्यंग्यस्यवक्तव्यतापत्तेः
१९ ॥विशेषणानांकामिनीनिरूपितत्वेतुममैवेत्यादिर्व्यंग्याकारःस्यात्नापिपरिफुल्लविलोचनत्वेन॥तस्यहर्षभावा
नुभावत्वेनहर्षव्यंजकतायाएवक्लृप्तत्वात्मदुपभोग्यत्वंहिहर्षभावस्यविभावःनह्यनुभावैर्भावोव्यज्यत
इतिनहिभावव्यंजनंशक्यंवक्तुं॥केवलस्यपरिफुल्लविलोचनत्वस्यममैवेत्यादिव्यंग्यव्यंजनेसामर्थ्याभा
वात्पुत्रागमनधनप्राप्त्यादिविभावकेपिहर्षभावेपरिफुल्ललोचनतायाअनैकांतिकत्वादितिसत्यंइति
भणियमित्याद्यर्थवशात्रापितालसशिरोमणित्वादि[illegible]विशेषणश्रवणविशिष्टफुल्लविलोचनत्वेनमदु १९
पभोग्यत्वलक्षणविभावाभिव्यक्तिद्वाराहर्षभावोभिव्यज्यते॥तत्रद्वारीभूतविभावाभिव्यक्तिमादायका

व्यप्रकाशग्रंथसंगतिःनचभावध्वनेःसंलक्ष्यक्रमत्वापत्तिर्द्वारस्यसंलक्ष्यक्रमत्वादितिवाच्यंइष्टापत्तेःनचा
पिसिद्धांतःतस्यप्रागेवोद्धारात्॥मृद्वीकारसितासितासमशितास्फीतंनिपीतंपयःस्वर्यातेनसुधाप्यधायि
कतिधारंभाधरःखंडितःसत्यंब्रूहिमदीयजीवभवताभूयोभवेभ्राम्यताकृष्णेत्यक्षरयोरयंमधुरिमोद्गारः
क्वचिल्लक्षितः॥अत्रनिरुक्तजीवसंबोध्यकपरिदृश्यमानस्थूलदेहेंद्रियादिचेतनाचेतनसंघातात्मकास्मत्प
दबोध्यकर्तृकप्रश्नविषयेणार्थेनवस्तुनातथाभूतेनभगवन्नाम्नोनेकजन्मवृत्तांताध्यक्षीकरणकारणयोग
सिद्धिविशेषतादात्म्याध्यवसायरूपातिशयोक्तिर्व्यज्यते॥अथप्रश्नविषयस्यात्रनानाजन्मगतवृत्तांतरूपतया
तज्ज्ञंप्रत्येवप्रष्टुमौचित्येनानभिज्ञंस्वजीवंप्रतिप्रष्टुमयोग्यत्वात्प्रश्नान्यथानुपपत्त्याक्षिप्तावाच्यसिद्ध्यंगत्वेन

र०गं० गुणीभूतव्यंग्यरूपावा प्रागुक्तातिशयोक्तिरिह कथं ध्वनिव्यपदेशहेतुःस्यात्॥ इत्थमेवचतदप्राप्तिमहादुःखे
१६ त्यत्राप्यतिशयोक्तेरर्थापत्तिविषयत्वंगुणीभूतव्यंग्यत्वंवायुक्तं अनेकजन्मोपभोग्यदुःखसुखराशिभ्यांतदप्रा
प्तिमहादुःखतच्चिंताविपुलाल्हादयोरनिगरणे अशेषपापपुण्यपुंजनाशकतायाअनुपपत्तेः॥ नन्ततदुःख
सुखानांस्वस्वफलोपहितपापपुण्यनाशकतायाएवान्यत्रकॢप्तत्वात्॥ निगरणेतुनयोस्तन्नाशकताबुध्युपप
त्तिः॥ नचवस्तुमात्राभिव्यक्तस्यालंकारस्यनगुणीभूतव्यंग्यत्वं॥ व्यज्यंतेवस्तुमात्रेणयदालंकृतयस्तदाध्रुवं
ध्वन्यंगतातासांकाव्यवृत्तेस्तदाश्रयात् इतिसिद्धांतादितिवाच्यं॥ बाधकेदृढेसिद्धांतमात्रेणात्रध्वनित्वस्य १६
स्थापयितुमशक्यत्वादितिचेत्सत्यं याद्दशव्यंग्यप्रतीतिंविनायत्रवाच्यस्यसर्वथाप्यनुपपत्तिस्तत्रतद्वाच्य

सिध्यंगं॥ यत्रचप्रकारांतरेणापितस्योपपत्तिःशक्याकर्तुंनतत्रनत्तथा अन्यथाहिनिःशेषच्युतचंदनंस्तनतट
मित्यत्राधमत्वसिध्यंगत्वात्दूतिरमणस्यवाच्यसिध्यंगगुणीभूतव्यंग्यत्वापत्तेः॥ प्रकृतेचभगवन्नाम्नियो
गसिद्धितादात्म्याध्यवसायरूपामतिशयोक्तिंविनापिभगवन्नामोच्चारणमहात्म्यप्रभवसार्वज्ञबुध्यापिप्रभो ग-
पपत्तेर्नगुणीभूतव्यंग्यत्वं॥ एतेनासंबंधेसंबंधरूपातिशयोक्तिर्नामोच्चारणमाहात्म्यप्रभवसार्वज्ञाध्यवसा
येपिस्थितेतिसदोषस्तवेंदेरूढ इतिपरास्तंभगवनामोच्चारणस्याचिंत्यमाहात्म्यतायाःपुराणप्रसिद्धत्वात्॥ अ
थवामास्तुप्रागुक्तमुदाहरणंवस्तुनोलंकारव्यंजकतायाइदंतुभविष्यतिनमनागपिरोषशंकानकलंकानुग राहु-
मानपांडुभावः॥ उपचीयतएवकापिशोभापरितोभामिनितेमुखस्यनित्यं॥ अत्रराहुरोषशंकाभावादिभि

र॰गं॰ निरपेक्षैर्वस्तुभिर्व्यतिरेकालंकारो व्यज्यते॥ नदंति मददंतिनः परिलसंति वाजिव्रजाः पठंति विरुदावलीमहि
९७ तमंदिरे बंदिनः॥ इदं तदवधि प्रभो यदवधि प्रवृद्धानते युगांतदहनोपमानयनकोणशोणद्युतिः॥ अत्र युगांतदहनोपमयायं देव तव कोपोदयस्तदेव रिपूणां संपदो भस्मसाद्भविष्यतीति वस्तु व्यज्यमानं राजविषय
८ करतिभावांगमपि वाच्यापेक्षयासुंदरत्वात् ध्वनिव्यपदेशहेतुः॥ नच भस्मीकरणपटुत्वरूपस्य साधारणधर्मस्योपमानिष्पादकत्वाद्व्यंग्यस्य वाच्यसिध्यंगत्वं शंक्यं॥ उपात्तशोणत्वरूपसाधारणधर्मेणापि तन्निष्पत्तेः
संभवात्॥ उपमेयीभूतशोणद्युतिगतस्य भस्मीकरणपटुत्वरूपसाधारणधर्मस्योपमानिष्पादकत्वेप्युपमेय
व्यंग्यकोपगतभस्मीकरणपटुत्वस्यातथात्वाच्च॥ यथा वा॥ निर्भिद्य क्ष्मारुहाणामतिघनमुदरं येषु गोत्रांगनेषु

OF BHAU DAJI

द्राघिष्ठस्वर्णदंडभ्रमभ्रतमनसो हंत धित्संति पादान्॥ ये संभिन्नेदलाग्रप्रचलहिमकणे दाडिमीबीजबुध्या
चंचूं चांचल्यमंचंति च शुकशिशवस्तेंऽशवः पांतु भानोः॥ अत्र भ्रांतिभृतांतिरश्चामप्येवमानंदं जनयतीति जगदानंद
दहेतुर्भगवानिति व्यज्यते एवंरूपाया भ्रांतेर्लोकेऽसंभवात्स्वतःसंभवित्वं॥ उदितं मंडलमिंदोरुदितं सद्यो वियो
गिवर्गेण मुदितं च सकलललनाचूडामणिशासनेन मदनेन॥ अत्र समुच्चयेन क्रियायौगपद्यात्मना कार्यका
रणपौर्वापर्यविपर्ययात्मिकातिशयोक्तिः॥ एष स्वतः संभवी व्यंजकः॥ तदवधि कुशली पुराणशास्त्रस्मृतिश
तचारुविचारजो विवेकः॥ यदवधि न पदं दधाति चित्ते हरिणकिशोरदृशो दृशोर्विलासः॥ अत्र कामिनीदृग्वि
लासे चेतसि पदमर्पितवति विवेकस्य नास्ति कुशलमिति वस्तुना दृग्विलासकर्तृकपदार्पणस्य लोकेऽसिद्धत्वाभा

रूगं॰त्कविप्रौढोक्तिनिष्पन्नत्वेनसुनिष्पन्नेनतस्मिन्काकुशलचर्चाविवेकस्येतिवस्तुव्यज्यते।।कस्मैहंतफलायसज्ज
१९ नगुणग्रामार्जनेसज्जसिस्वात्मोपस्काररणायचेन्ममवचःपथ्यंतमाकर्णय।।येभावाहृदयंहरंतिनितरांशो
भाभरैःसंभृतास्तैरेवास्यकलेःकलेवरपु[illegible]षोदैनंदिनंवर्त्तनं।।इहयद्यपिरमणीयाःपदार्थाःकलेर्नित्यमदनी
याइतिवस्तुनाप्रौढोक्तिसिद्धेनमंतुंकामयसेचेद्गुणप्राप्तोयतस्वेतिवस्तुव्यज्यतेतथापितस्यपर्यायोक्तात्मनो
वाच्यापेक्षयारुंदरताविरहाद्गुणीभूतत्वमेव।।अलंकाराहिवाच्यसौंदर्यसाराःप्रायशःस्वांतगतिंप्रतीयमा
नंपृष्ठतः[illegible]कुर्वंति।।देवाःकेपूर्वदेवाःसमितिममनरःसंतिकेवापुरस्तादेवंजल्पंतिनीतावत्प्रतिभटभूतनावर्त्तिनः १९
क्षत्रवीराः।।यावन्नायातिराजन्नयनविषयतामंतकप्रासिमूर्त्तेर्मुधारिप्राणदुग्धाशनमसृणरुचिस्त्वत्कृपाणो

२०-| भुजंगः।।अत्रकविप्रौढोक्तिसिद्धेन[illegible]पकेणत्वय्युद्यतकरवालेसतिकापरेषांजीवनस्याशेतिवस्तुव्यज्यते।।साहं
कारसुरासुरावलिकराकृष्टभ्रमन्मंदरक्षुभ्यत्क्षीराब्धिवल्गुवीचिवलयश्रीगर्वसर्वंकषास्तृष्णातान्यदमंदताप
सकुलैःसानंदमालोकिताभूमीभूषणीकृषयंतिभुवनाभोगंभवत्कीर्त्तयः।।अत्रकीर्त्तेःसानंदालोकनेनवस्तुना
कविकल्पितेनदुग्धभ्रांतिस्तापसगताव्यज्यते।।नचसानंदालोकनस्यैववाच्यभ्रांतिरूपतयाव्यंग्यव्यंजकयोरविवे चाक्षुष-
कोव्यंग्यत्वानुपपत्तिश्चेतिवाच्यंवस्तुतःएकत्वेपिकौतिरूपविशेष्यावृत्तिदुग्धत्वप्रकारकत्वात्मकभ्रांतित्वेनसानंदा दः|ततः
वलोकनत्वेनचव्यंग्यव्यंजकविवेकस्यव्यंग्यतावच्छेदकरूपेणवाच्यतायाअभावाद्व्यंग्यत्वस्यचोपपत्तेः।।तथाचा
हुः।।यदेवोच्यतेतदेवव्यंग्यंयथानुव्यंग्यंनतथोच्यतइति।।दयितेरदनत्विषांमिषादयितेमौक्तिकसंततिकेरतराः।।अपि २०-|

यु॰॥

र॰गं॰ चालकवेषधारिणोमकरंदस्पृहयालवोलयः॥अत्रपूर्वोत्तरार्द्धवर्तिनीभ्यामपन्हुतिभ्यांनत्वंनारीकिंतुनलिनी
९९ तितृतीयापन्हुतिर्व्यज्यते॥एषप्रौढोक्तिनिष्पन्नोव्यंजकः।यद्यपिशब्दशक्तिमूलकत्वमर्थशक्तिमूलकत्वंचेत्युभ
यमपिसकलव्यंग्यसाधारणंशब्दार्थयोरनुसंधानंविनाव्यंग्यस्यैवानुल्लासात्तथापिपरिवृत्त्यसहिष्णूनांशब्दा
नांप्राचुर्येनतत्प्रयुक्तात्प्राधान्यात्सत्याअप्यर्थशक्तेरप्राधान्याद्व्यंग्यस्यशब्दशक्तिमूलकत्वेनैवव्यपदेशः।परिवृ
त्तिसहिष्णूनांतुप्राचुर्येर्थशक्तेरेवप्राधान्यात्सत्याअपिशब्दशक्तेःप्रधानानुगुण्यार्थंतयामल्लनामादिवत्प्रथा
नेनैवव्यपदेशः॥यत्रतुकाव्येपरिवृत्तिंसहमानानामसहमानानांचशब्दानांनैकजातीयप्राचुर्यमपितुसाम्य ९९
मेवतत्रशब्दार्थोभयशक्तिमूलकस्यव्यंग्यस्यस्थितिरितियुक्तोध्वनिः॥नचायंशब्दशक्तिमूलकनयेवार्थशक्ति

मूलकनयेववाव्यपदेष्टुंशक्यः।विनिगमकाभावात्॥नापिशब्दशक्तिमूलकार्थशक्तिमूलकयोःसंकरेणगतार्थयि
तुं॥व्यंग्यभेदएवसंकरस्येष्टेः॥इहतुव्यंग्यस्यैकस्यैवतस्यानुत्थानात्॥उदाहरणं॥रम्यहासारसोल्लासरसिका
लिनिषेविता॥सर्वांगशोभासंभारापद्मिनीकस्यनप्रिया॥अयंचवाक्यमात्रेपदसमूहश्चवाक्यंतेनास्यनानार्था
नानार्थघटितसमासविषयत्वेपिनविरोधः॥नतुशुद्धैकपदेतस्मिन्नानार्थानानार्थयोरसमावेशात्॥अन्येतु
अर्थशक्तिमूलकत्वव्यपदेशेनानार्थघटितसमासेप्रकाशकशब्दशक्त्युल्लासस्यत्वसामान्यशून्यत्वंतत्रविषयप्राचु
र्यात्तच्छब्दशक्तिमूलकत्वव्यपदेशेन्तुनार्थशक्त्युल्लासस्यत्वसामान्यशून्यत्वंतथाविषयदौर्लभ्यापत्तेः॥नहिनानार्थश
ब्दमात्रघटितंपद्यंप्रचुरविषयमतःशब्दशक्तिमूलकत्वेनैवायंशक्यव्यपदेशोध्वनिरित्यप्याहुः॥इत्थमभिधामू

र॰गं॰ लक्ष्यविधोपिसंक्षेपेणनिरूपितोध्वनिर्निरूपयिष्यते वांशतोयथावसरं॥लक्षणामूलस्तुनिरूप्यते॥तत्रव
१०० क्ष्यमाणलक्षणायांप्रयोजनवत्याःषड्विधायाःसारोपसाध्यवसानाभ्यांगौणीशुद्धाभ्यांचविभक्तानांभेदानां प-|
त-| चतुर्णामलंकारात्मनापरिणतत्वात् द्वौभेदौध्वन्याश्रयतयास्थितौजहत्स्वार्थाऽजहत्स्वार्थाचेतितन्मूलोपिद्वौ
ध्वनेःप्रभेदौ॥तयोर्जहत्स्वार्थमूलोयथा॥कृतंत्वयोन्नतंकृत्यमर्जितंचामलंयशः॥यावज्जीवंसखेतुभ्यंदास्या
मोविपुलाशिषः॥इयंकस्यचिदपकारिणंप्रत्युक्तिः॥त्वयाकृतेप्यपकारेपरमखेदहेतौमधुरमेवाभाषणेनप
रुषं तस्मिन्नेवंजातीयकेमपिपापमाचरतस्तवपापिष्ठत्वंकथंशक्यतेवक्तुमितिव्यंग्यं॥अपरमूलोयथा॥बधा १००
नद्रागेवद्रढिमरमणीयंपरिकरंकिरीटेबालेंदुंनियमयपुनःपन्नगगणैः॥नकुर्यास्त्वंहेलामितरजनसाधार

णधियाजगन्नाथस्यायंसुरधुनिसमुद्धारसमयः॥अत्रगन्नाथस्येत्येतेनशक्यएवानेकपापविशिष्टत्वेनलक्ष्यते ज-|
पापानांपदांतरेणानिर्वाच्यत्वंव्यंग्यं(कुंताःप्रविशंतीत्यादौनुवाच्यगतत्वेलक्षणादिलक्ष्ये)।तदेवमेतेप्रागुक्ता
ह्युत्थारिंशक्ताःसर्वेपिध्वनयएकस्मिन्वाक्येयद्येकपदमात्रगतास्तदापदध्वनितयाव्यपदिश्यंते॥नानापदग
ततायांतुवाक्यध्वनितयेति॥अथकेयमभिधानामयन्मूलःप्रथमंनिरूपितोयंध्वनिप्रपंचः॥उच्यते॥शक्या
ख्योर्थस्यशब्दगतःशब्दस्यार्थगतोवासंबंधविशेषोभिधा॥साचपदार्थांतरमितिकेचित्॥अस्माच्छब्दादयमर्थोऽ
वगंतव्यइत्याकारेश्वरेच्छैवाभिधा।तस्याश्चविषयतयासर्वत्रसत्वात्पटादीनामपिघटादिपदवाच्यतास्यादतो
व्यक्तिविशेषोपधानेनघटादिपदाभिधात्वंवाच्यमित्यपरे॥एवमपीश्वरज्ञानादिनाविनिगमनाविरहःस्यादतः

र.गं. प्रथममतमेवज्यायइत्यपिवदंति॥यत्तुवृत्तिवार्तिकेशक्त्याप्रतिपादकत्वमभिधेत्यपिदीक्षितैरुक्तं॥तत्तुच्छं॥
१०१ गुपपत्तिविरोधात्॥तथाहि॥इहशब्दाज्जायमानायामर्थोपस्थितौकारणीभूतंयदीयज्ञानंसाशब्दवृत्तिरभि
क- धाख्यालक्ष्यतयाचप्रस्तुता॥प्रतिपादकत्वस्यचप्रतिपत्तिहेतुत्वरूपस्यशब्दगतस्यनज्ञानंप्रतिपत्तौकारणम
तःकथंनामप्रतिपादकत्वमभिधोच्यते॥अथप्रतिपादकत्वंप्रतिपत्त्यनुकूलव्यापाररूपंज्ञातंसदेवोप
कत्वाद्य- युज्यतेप्रतिपत्ताविरयुच्यतेनेवमपिशक्त्येत्यनेनशब्दगतार्थगतावायाकाचिच्छक्तिःप्रतिपत्तिहेतुतयावि
वक्षितासैवाभिधेत्यभिधयाप्रतिपादकत्वमभिधेतिलक्षणंपर्यवसन्नं॥तथाचस्फुटैवासंगतिरात्माश्रयश्च १०१
॥नचाभिधातःशक्तिरतिरिक्ताशब्दजन्यप्रतिपत्तिप्रयोजिकाकाचिदस्तीत्यत्रप्रमाणमस्ति॥सेयमभिधात्रिवि- म-

---

व धा॥केवलसमुदायशक्तिःकेवलावयवशक्तिः॥समुदायावयवशक्तिसंकरश्चेति॥आद्यायाडित्थादिरुदाहर
णं॥तत्रावयवशक्तेरभावात्‌द्वितीयायास्तुपाचकपाठकादिःतत्रधातुप्रत्ययशक्तिबोध्ययोरर्थयोरन्वये
नाककर्तृरूपादर्थादर्थान्तरस्यानवभासेनसमुदायशक्तेरभावात्तृतीयायाःपंकजादिःइह ते।
धातूपपदप्रत्ययरूपावयवशक्तिवेद्यानांपंकजननकर्तृणामाकांक्षादिवशादन्वयेप्रकाशमानात्पंकजनि
कर्तृरूपादर्थादतिरिक्तस्यपद्मत्वविशिष्टस्यप्रत्ययेनतदर्थसमुदायशक्तेरपिकल्पनादुभयोःसंकरः॥एता
एवविधारूढियोगयोगरूढिशब्दैर्व्यपदिश्यंते॥यत्त्वखंडशक्तिमात्रेणैकार्थप्रतिपादकत्वंरूढिः॥अवयवशक्ति क-
मात्रसापेक्षंपदस्यैकार्थप्रतिपादकत्वंयोगः॥उभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वंयोगरूढिरितिवृत्ति

र॰ग॰ वार्त्तिकेप्यदीक्षितैरुक्तं॥तन्न॥अभिधालक्षणोक्तदूषणानामिहापिदुर्वारत्वात्॥अथाश्वगंधाश्वकर्णमंडपनि
१०२ श्र-| शांतकुवलयादिशब्देषुकाशक्तिरिति| अत्र केचित्॥अश्वगंधारसंपिबेत्यादिषुविषयविशेषेकेवलसमुदाय
शक्तिः॥अश्वगंधावाजिशालेत्यादिषुतुकेवलयोगशक्तिःसमुदायावयवशक्त्योरुभयोरेकशब्दाश्रयत्वेक
थंकेवलत्वविशेषितयोराद्यद्वितीयतीभेदयोःप्रसक्तिरितितुनशक्यंसमुदायावयवशक्तिवेद्ययोरर्थयोरन्वये
नतादृशशक्त्योःकेवलस्य साम्राज्यात्॥इदमेवहिकेवलत्वमिहविवक्षितंयदन्वयायोग्यार्थबोधकत्वं॥
संकरस्त्वन्वययोग्यार्थबोधकयोरेवेतिनतंस्यात्रप्रसक्तिरित्याहुः॥अन्येतुअश्वकर्णादिशब्देषुनाभिधा १०२
याःप्रथमद्वितीययोर्विधयोःप्रसक्तिःकेवलस्याविरहात्॥परंतुसंकरस्यद्वौभेदौ॥योगरूढियौगिकरूढिश्चे

ति॥तत्राद्यस्योदाहरणं॥पंकजादिशब्दः द्वितीयस्यत्वश्वकर्णादयइत्याहुः॥चतुर्थएवायमभिधायाभेदइ
त्यप्यन्ये॥अखंडाएवहिशब्दास्तत्रसमासेषुपदानांकृत्तद्धिततिङंतेषुचप्रकृतिप्रत्ययानांचविभागःका
ल्पनिकएवेतिकुत्रास्तियोगशक्तिःविशिष्टस्यविशिष्टार्थेरूढेरेवाभ्युपगमादित्यपिवदंति॥अथ|गिष्पतिरत्र ष्पां-|
गतो-| गिरसोगुणादितुंते गुणगणान्सकलैन॥इंद्रःसहस्रनयनोप्यद्भुतरूपंपरिच्छेत्तुमित्यादौरूढ्यर्थमात्रपुनरु|दा-|
क्त्यापत्तिश्चैवंविधपदद्वयसमभिव्याहारस्थलेयोगरूढपदस्यावयवार्थमात्रबोधकत्वंतावन्मात्रस्यैवप्र
कृतोपयोग्यतिशयविशेषसमर्पकत्वादितिवाच्यं॥एवमपियोगरूढपदस्यरूढिशक्तेरनियंत्रणेनयोगार्थमा
त्रप्रतिपादकतायाअनुपपादनादुक्तदोषस्यानुवृत्तेः॥एकेनैवपदेनयोगार्थरूढ्यर्थयोरुभयोरप्यावश्य

र॰गं॰ कयोरर्थयोरुपस्थितेः संभवेन द्वितीयपदप्रयोगस्यानैरर्थक्यापत्तेश्चेति चेत्॥ अत्राहुः॥ एकपदोपात्तत्वाव

१०३ द्य- नंतरं गाकांक्षावशेन प्रथमं योगार्थरूढ्यर्थयोरन्वये सति समुल्लसितस्य विशिष्टार्थस्यैव पदांतरार्थेनान्व

B. थ॰ योन तु तयोरेव विशकलितयोरिति॥ यद्यपि न्यायसिद्धोयं तथापि शक्त्यार्थस्य प्रतिपादने स्यादेवं लक्षणया

नु योगरूढेन योगार्थमात्रप्रतिपादनेन किंचिद्बाधकमस्ति॥ नापि द्वितीयपदप्रयोगस्यानैरर्थक्यं॥ तथाहि

तिरूढ्यर्थबोधनेन गतार्थेन योगरूढशब्देन प्रतिपाद्यमानस्य योगार्थस्य पंकजाक्षीत्यादाविव नांतरीयकत्व

प- शंकया कुर्वद्रूपतायाअहतो प्रकृतोपयोग्यतिशयविशेषव्यंजनस्य पाक्षिकत्वापत्तेः द्वितीयपदप्रयोगे तु तै १०

नैव रूढ्यर्थप्रतिपादने सिद्धे योगरूढपदप्रतिपाद्यस्य योगार्थस्य नांतरीयकत्वशंकाया अयोगात् कुर्वद्रूपत्वेन व्यं

DR. BHAU DAJI

ग्यविशेषव्यंजकत्वं नियमेन सिध्यति॥ एषा पदद्वयोपादानस्थले गतिरुक्ता यत्र तु पुष्पधन्वा विजयते जगत्करु

णावद्दिशोत्यादौ विवेकेनैव पदेन रूढ्यर्थोपस्थितिर्योगार्थद्वारा निःसारत्वाद्यवगमश्च भवति तत्र कविकृतम

न्मथरूढपदांतरानुपादानपूर्वकपुष्पधन्वपदोपादानप्रतिसंधानेन तदीययोगार्थे कुर्वद्रूपताधानं बोध्यं

॥ तदित्थं द्वितीयपदस्योपादानेनुपादाने वा न क्षतिः॥ एवं जात्यंतरविशिष्टवाचकपदसमभिव्याहारेपि दि

शि दिशि जलजानि संति कुमुदानीत्यत्रापि जलजादिपदानां लक्षणया योगार्थमात्रबोधकत्वं योगशक्त्या न्यु३

सितस्य तु तादृशार्थस्य रूढ्यर्थोपश्लिष्टत्वेन स्वातंत्र्येण कुमुदादावन्वयायोगात्॥ इत्थमभिधानिरूपिता

॥ अनपायः शब्दो यमर्थं बोधयति स तस्य वाचकः॥ इयं च यस्य शब्दस्य यस्मिन्नर्थेस्ति तस्य सोर्थोभि

धेयः॥सचजातिगुणक्रियायादृछि[?]त्मकः॥तत्राजातिर्गोत्वादिःसंस्थानविशेषाभिव्यंग्यप्रत्यक्षसिद्धागवा व्या
१०४ दिपदानामभिधेया॥अनुमानसिद्धाचघ्राणरसनत्वादिर्घ्राणरसनादिपदानां॥आनंत्याद्व्यभिचाराच्चव्यक्तीना
मभिधेयतायाअकल्पनात्नचज्ञातगोत्वादिरूपायागोत्वादिज्ञानरूपयाप्रत्यासत्त्याप्रत्यक्षेणपरिकल्पि वा
तारुसकलतदीयव्यक्तिषभिधायीःकल्पनेनास्तिदोषइतिवाच्यं।सामान्यप्रत्यासत्तेर्निराकरणात्गौरवदो
षस्यानुद्धाराच्च॥एतेनशक्तिग्रहपदार्थोपस्थितिशाब्दबोधानांसमानप्रकारकतयैवहेतुहेतुमद्भावादगृही
तसंकेतानामपिव्यक्तिविशेषाणामन्वयबोधविषयतायाउपपादनेपिननिस्तारः॥व्यक्तीनांप्रत्ययस्याक्षेपा १०४
द्वक्षणयावेत्यन्यदेतत्॥अयंचजातिरूपःशाब्दार्थःप्राणप्रदइत्युच्यते॥प्राणंव्यवहारयोग्यतांददातिसंपा

दयतीतिव्युत्पत्तेः॥तदुक्तंगोःस्वरूपेणनगौर्नाप्यगौर्गोत्वाभिसंबंधाद्गौरिति॥अस्यार्थः॥गौःसास्नादिमान् स्ना-
? धर्मस्वरूपेणअज्ञातगोत्वकेनधर्मिस्वरूपमात्रेणनगौःनगोव्यवहारनिर्वाहकःनाप्यगौःनापिगोभिन्नइति
व्यवहारस्यनिर्वाहकःतथासतिदूरादनभिव्यक्तसंस्थाननयागोत्वाग्रहदशायांगौर्वागौरितिगोभिन्नइतिव्यव
हारःस्यात्स्वरूपस्याविशेषात्घटेगौरितिगव्यगौरितिवाव्यवहारःस्यादितिभावः॥गोत्वाभिसंबंधात्गोत्ववत्त
याज्ञानात्॥गौःगौशब्दव्यवहार्यइति॥गुणःशुक्लादिःशुक्लादिपदानामभिधेयः॥क्रियाचलनादिश्चलादिश
ब्दानां॥शुक्लादीनांचलनादीनांचप्रतिव्यक्तिभेददर्शनादानंत्यव्यभिचाराभ्यांव्यक्तिशक्तिवाददोषाभ्यामिहा
पिकलुषीकरणमविशिष्टमितिचेन्नतेषांलाघवात्प्रत्यभिज्ञाबलाच्चैकतायाअभ्युपगमात्॥तदुक्तंगुणक्रिया

र॰गं॰ यदृच्छानांवस्तुनएकरूपाणामाश्रयभेदात्भेदइवलक्ष्यतइति॥तथाचभेदप्रतीतिर्भ्रमएवेतिभावः॥इदमु
१०५ब पलक्षणं॥उत्पत्तिविनाशप्रतीतिरपिनथैवर्णनित्यतावादेगकाराद्युत्पत्तिविनाशप्रतीतेर्भ्रमत्वस्यस्वीकारा
न्॥याद्दृच्छिकस्तुवक्त्रास्वेच्छयाडित्थादिशब्दानांप्रवृत्तिनिमित्तत्वेनसंनिवेशितोधर्मः सचपरंपरयाव्यक्तिगतश्च
रमवर्णाभिव्यंग्योऽखंडःस्फोटइत्येकेआनुपूर्व्यवच्छिन्नोवर्णसमुदायइत्यपरे॥केवलाव्यक्तिरेवेतीतरे॥तत्रा
द्यमतद्वयेविशेषणज्ञानाद्विशिष्टप्रत्ययस्तृतीयमतेत्वनिर्विकल्पकात्मकप्रत्ययइति॥तदित्थंचतुष्टयीशब्दा
नांप्रवृत्तिरितिदर्शनंव्यवस्थितं॥सर्वेषांशब्दानांजातिरेवार्थः॥गुणक्रियाशब्दानांगुणक्रियागततायायदृच्छाश १०५
ब्दानांचबालवृद्धशुकाद्युदीरिततत्तच्छब्दव्यक्तेस्तत्तत्समयभेदभिन्नार्थव्यक्तेर्वाजातेरेवाभिधेयतासंभवादिति

जातिशक्तिदर्शनं॥अथकेयंलक्षणा॥यन्मूलश्चरमंनिरूपितोध्वनिः॥उच्यते॥शक्यसंबंधोलक्षणातस्याश्चा
र्थोपस्थापकत्वेमुख्यार्थतावच्छेदकेतात्पर्यविषयान्वयितावच्छेदकतायाअभावेननतंत्रंशक्यतावच्छेदकरूपेण
लक्ष्यभानस्यस्वीकारात्॥किंतुतात्पर्यविषयान्वयेमुख्यार्थतावच्छेदरूपेणमुख्यार्थप्रतियोगिकतायाअभावोरू ५।
ढिप्रयोजनयोरन्यतरच्चतंत्रं॥मुख्यार्थान्वयानुपपत्तेस्तंत्रत्वेतुकाकेभ्योदधिरक्ष्यतामित्यत्रलक्षणोत्थानंनस्यात्॥
गंगायांघोषइत्यत्रसामीप्यंमुखंचंद्रइत्यादौसादृश्यंव्यतिरेकलक्षणायांविरोधआयुर्घृतमित्यादौकारणत्वाद त-
द्। यश्चसंबंधायथायोगंलक्षणाशरीराणि।इयंनावृद्विविधानिरूढाप्रयोजनवतीचतत्रापिद्वितीयाद्विविधागौ
णीशुद्धाच॥तत्राद्यासारोपासाध्यवसानाचेतिद्विविधाअंत्याचतुर्विधाजहत्स्वार्थाजहत्स्वार्थासारोपासाध्यव

र॰गं॰ सानाचेतिप्रयोजनवती षड्विधा संपद्यते ॥ तत्र निरूढलक्षणाया अनुकूलप्रतिकूलानुलोमप्रतिलोमलावण्यादय

१०६ उदाहरणं ॥ नीलादयश्च धर्मस्यायमनुकूल इत्यादौ मुख्यार्थस्य कूलानुगत्वादेर्बाधादनादिप्रयोगप्रवाहवशा त-|

देकवस्तुप्रवणत्वात्मनाकूलानुगतादिरूपशक्यस्य सादृश्येन संबंधेनानुकूलादिशब्दैरनुगुणादयो लक्ष्यंते ॥ ए

वं नीलादिपदानां लाघवाद्गुणगतजातेरेव शक्यतावच्छेदकतया गुणद्रव्ययोर्नीलो घट इत्यादौ सामानाधिक

रण्येनान्वयस्यानुपपत्तेः समवायात्मना गुणरूपशक्यस्य संबंधेन नीलादिशब्दैर्गुणिनो लक्ष्यंते ॥ तत्राद्यवर्गे सा

न दृश्यसंबंधे द्वितीयवर्गे च तदितरसंबंधेन लक्षणायाः प्रवृत्तेर्निरूढायामपि गौणीत्वशुद्धात्वाभ्यां द्वैविध्यमाम १०६ न्या

नंति ॥ विषयविषयिणोः पृथग्निर्दिष्टयोरभेद आरोपः अपृथग्निर्दिष्टे विषये विषय्यभेदोऽध्यवसानं ॥ तत्राद्येन स

हिता सारोपा द्वितीयेन तु साध्यवसाना ॥ उदाहरणानि मुखं चंद्र इत्यादीनि गौण्याः सारोपायाः पुरेस्मिन् सौध

शिखरे चंद्रराजिर्विराजते इत्यादीनि च तस्याः साध्यवसानायाः ॥ अत्राद्यायां विषयिप्रतिपादकैश्चंद्रादिशब्दैर्ल

क्षणयोपस्थापितानां चंद्रादिसदृशानामभेदसंसर्गेण मुखादिशब्दोपस्थापिते मुखत्वादिविशिष्टे मुखादिभि

रन्वयः साहश्यरूपधर्मलक्षणायां तु तेन सह मुखादीनामन्वयो न स्यात् ॥ नामार्थयोरभेदातिरिक्तसंसर्गेण

प-| विशेष्यविशेषणभावस्यानुपपत्तेः ॥ नन्वेवं सति बोधावैलक्षण्याच्चंद्रसदृशं मुखमित्युपमातो मुखं चंद्र इति रूपक

स्य कथं भेदः ॥ न च सदृशविशेषणचंद्रसंबंधिसंबंधाभ्यामिति वाच्यं बोधस्य वैलक्षण्यमात्रेण पृथगलंकारताया अ क्ष-|

सिद्धेः ॥ अन्यथा मुखं चंद्र इवेत्यत्र चंद्रसदृशमित्येतद्भ्यां पृथगलंकारतापत्तिरिति चेत् ॥ अत्र केचित् रूपकस्योप

र॰गं॰ मानःस्वरूपसंवेद[illegible]नांशमादायावैलक्षण्येपिलक्षणाफलीभूततादूप्यसंवेदनमादायवैलक्षण्यंनिर्बाधंता
१०८गु द्रूप्यसंवेदनंचविषये[illegible]खादौविषयितावछेदकस्यचंद्रत्वादेःसंप्रत्ययः॥ननुलक्षणाप्रयोज्यादपितत्सदृशबोधा
द्रू१ त्कथंनाम[illegible]ताद्रूप्य[illegible]प्रत्ययःस्यात्॥उपायस्याभावा[illegible]दज्ञानेनप्रतिबंधाच्च॥अन्यथाचंद्रसदृशंमुखमित्यत्रापिता
श्लो-| द्रूप्यप्रत्ययप्रसंगइतिचेन्नैवं॥[illegible]षस्थलइवात्राप्येकशब्दोपादानोत्थस्यव्यंजनस्योपायत्वाद्व्यंजनिकबोधस्य
बाधबुध्यप्रतिबध्यत्वाच्च॥अथचंद्रतत्सदृशयोरेवैकपदोपात्तत्वाच्चंद्रसदृशेचंद्रताद्रूप्यस्यप्रत्ययोयथाकथंचि
दस्तुनतुमुखत्वविशिष्टेमुखे॥अनुभवसिद्धश्चसर्वेषांवक्त्रेचंद्रमसिस्थितेकिमपरःशीतांशुरुज्जृंभइत्यादौविषते॥१०७
येविषयितौद्रूप्यस्यप्रत्ययइति॥सत्यं[illegible]वताद्रूप्यवदभेदबुध्यास्वताद्रूप्यस्यसुबोधतयातास्मिन्नपितस्यसिद्धेरित्या

हुः॥अन्येतुचंद्रादिपदेभ्योलक्षणयाचंद्रसदृशेनापिरूपेणोपस्थितानांमुखादीनांचंद्रत्वेनरूपेणैवमुखादिप
दोपस्थापितैःसहाभेदान्वयबोधोजायतेनतत्पदलक्षणाज्ञानस्यतत्तपदशक्यतावछेदकप्रकारकलक्ष्यान्वय
बोधकत्वावछिन्नंप्रतिहेतुतायाःपदार्थोपस्थितिशाब्दबोधयोःसमानाकारस्यात्वेनुभ[illegible]वसाक्षिकवैलक्षण्यक
लाक्षणिकैबोधातिरिक्तविषयतायाश्चकल्पनादतएवगंगायांघोषइत्यत्रतटत्वेना[illegible]पस्थितस्यतटस्यगंगात्वे प्यु-|
नान्वयबोधस्तत्प्रयोज्यःशैत्यपावनत्वादिप्रत्ययश्चसंगछते॥प्रकृतेतुविषयिचंद्रादिनिष्ठासाधारणगुणवत्प्रत्य
यःफलं॥नहिचंद्रत्वप्रतीतिंविनामुखेचंद्रत्वनियतगुणवत्वधीःशक्योपपादयितुं॥ताद्रूप्यपदेनतदसाधारणगु
णवत्वमेवप्राचीनैरुक्तं॥इत्थंचस्वरूपसंवित्तिकृतःफलीभूतसंवित्तिकृतश्चोपमातोरूपकस्यभेदःस्फुटएवेतिव

र०गं० दंति॥अपरेतुभेदकरंबितंसादृश्यमुपमाजीवातुभूतंभेदाकरंबितंचगौणसारोपलक्षणायाइतिस्फुटेभेदेव्यक्त
१०९ तंफलवृत्तवैलक्षण्यपर्यंतानुधावनेन॥पक्षेस्मिन्भेदगर्भसादृश्यप्रतिपत्तेस्ताद्रूप्यप्रतीतिःकथंनामफलंभवितु
मीष्टइत्येतदनुपपत्तिंपरिहर्तुमायासोनापततीत्यपरमनुकूलमित्यप्याहुः॥तदित्थंप्राचामाशयोमतभेदेनवर्णितः॥
नव्यास्तुमुखंचंद्रोवाहीकोगौरित्यादौचंद्रादीनांमुखादिभिःसहसंभवतिलक्षणांविनैवाभेदसंसर्गेणबोधः॥बा
धनिश्चयप्रतिबध्यतावच्छेदककोटावनाहार्यत्वस्यैवशाब्दान्यत्वस्यापिनिवेश्यत्वादतएवात्यंतासत्यपिह्यर्थेज्ञानं
शब्दःकरोतिहीतिप्राचांप्रवादोपिसंगच्छते॥नचवह्निनासिंचतीत्यतोवाक्यादपिशाब्दबोधापत्तिः॥योग्यताज्ञान १०९
विरहात्मुखंचंद्रोगौर्वाहीकइत्यादौविशिष्टचमत्कारप्रयोजकताज्ञानाधीनायाइच्छायासत्वादाहार्ययोग्यताज्ञा

नसाम्राज्यं॥अतएवशाब्दबोधेयोग्यताज्ञानस्यकारणत्वोक्तिःप्राचांसंगच्छते॥आहार्यएवचाभेदान्वयबोधोस्तु
मास्तुबाधबुद्धिप्रतिबध्यतावच्छेदककोटौशाब्दान्यत्वंमावास्तुशाब्दबुद्धौयोग्यताज्ञानस्यकारणत्वमाहार्यप्रात्य
क्षिकमेवेतिनियमश्च॥अवश्यंमुखंचंद्रइत्यादौपराभिमतसारोपलक्षणोदाहरणेवाच्यार्थयोरेवाभेदान्व
योभ्युपगंतव्योनतुवाच्यलक्ष्ययोरन्यथाराजनारायणंलक्ष्मीस्त्वामालिंगतिनिर्भरंपादांबुजंभवतुवोविजया
यमंजुमंजीरसिंजितमनोहरमंबिकायाइत्यादौक्रमेणोपमारूपकयोरुपमितविशेषणसमासाधीनयोःस्वी
कारेलक्ष्मीकर्तृकालिंगनमंजुमंजीरसिंजितमनोहरत्वयोरनुपपत्तिर्निर्णायिकारूपकोपमयोःप्राचीनैस्तत्रत
त्रोपनिबद्धाविरुद्धास्यात्॥आद्यपद्येउपमायाइवरूपकस्यापिस्वीकारेबाधकस्यतुल्यतयातन्निर्णायकताया

र॰गं॰ असंगतेः द्वितीयपद्ये रूपकस्यापि स्वीकारे बाधकाभावेन तन्निवर्त्तकतायाअयोगात्॥ नच मुखचंद्रादौ सम
१०१ से क्वचिदस्तु नाम प्रागुक्तरीत्या लक्षणां विनापि बोधोपपत्तिर्व्यासे तु लक्षणायां नास्ति बाधकमिति वाच्यं॥ कु
पयारूधया सिंचद्धरे मां तापमूर्छितमित्यादौ व्यासेप्यनुपपत्तेः नच सिंचतेरपि विषयीकरणे लक्षणायां नानुप
पत्तिः॥ उत्प्रेक्षाव्यतिरिक्तातिशयोक्त्यपन्हवादिष्विवाहार्यज्ञानेनोपपत्तौ लक्षणायां बीजाभावात्॥ अनुभववि
रोधाच्च॥ अपिच उपमानवाचकस्य चंद्रादिपदस्य रूपके उपमानसदृशे लक्षणेति हि प्राचां समयस्तत्र च लक्ष्यता
२८ वच्छेदकं सादृश्यं॥ तच्च समानधर्मरूपं सल्लक्ष्यांशे सुंदरत्वादिना विशेषरूपेण प्रतीयते॥ उताहो सामान्यरूपे
ण॥ नाद्यः सुंदरं मुखं चंद्र इत्यादौ पौनरुक्त्यापत्तेः॥ न चैवमादावुपात्तधर्मके रूपके तद्धर्मातिरिक्तो धर्म एव लक्ष्य-

DR. BHAU DAJI

तावच्छेदकीभूत साहश्यरूप इति वाच्यं॥ अनुभवविरोधात्॥ अंकितान्यक्षसंघानैः सरोगाणि सदैव हि॥ शरीरि
णां शरीराणि कमलानि न संशय इत्यादौ श्लेषभित्तिकाभेदाध्यवसितधर्मं विना धर्मांतरस्य सर्वथैवास्फूर्त्तेर्मा
श्चांत्यः सादृश्यशब्दोपात्तत्वेनोपमात्वापत्तेः॥ नच सादृश्यस्य वाच्यतायामेवोपदेशः नलिनी प्रतिपक्षमान माव्यप-
नमित्यादौ तदभावापत्तेः॥ किंचिद्विद्वन्मानसहंसेत्यादौ श्लिष्टपरंपरित रूपके श्लेषनिष्पत्तौ श्लेषभित्तिकाभे
दाध्यवसानेन मानसवासित्वरूपे भूपहंसयोः सादृश्ये सिद्धे सादृश्यलक्षणामूलस्य भूपे हंसरूपकस्य सि शा-
द्धिः तस्यां च सत्यां सरोमनोरूपार्थद्वयाभिधानलक्षणस्य श्लेषस्य निष्पत्तिरिति परस्पराश्रयः न हि रूपकास्फू
र्त्तौ सरोरूपेर्थे मानसशब्दस्य तात्पर्यं वेदयितुं किंचित्प्रमाणमवतरति॥ स्फुरिते तु रूपके तद्घटकसादृश्यान्य

र०गं० थानुपपत्तिरूपेणप्रमाणेनार्थद्वयाभेदबोधकं(फलं)स्यतदुभयप्रति[illegible]नात्मनःश्लेषस्यनिष्पत्तिरतोनामार्थयोर पाद-।
११० भेदान्वयसरणिरेवरूपकस्थलेरमणीयासदृशलक्षणायाःफलंरूपकेतादूप्यप्रत्ययइत्यपिनहृदयंगमं॥तत्स
दृशइतिशब्दात्सादृश्यप्रत्ययेसत्यपितादूप्यप्रत्ययापत्तेरित्याहुः॥अत्रेदंविचार्यते॥यत्तावदुच्यतेनामार्थयोर
भेदान्वयबोधेनैवोपपत्तौरूपकेनास्तिलक्षणेति॥तत्रचमत्कारिसाधारणधर्मानुपस्थितिदशायामुपमाल
कारस्येवरूपकालंकारस्यापिनास्तिनिष्पत्तिश्चमत्कारोवेतिसकलसहृदयसिद्धं।कथमन्यथाभारतंनाकमंडलं
विधुमंडल[illegible]। नगरं[illegible]इत्यादिवाक्यश्रवणानंतरमनुन्मिषत्यारूपकप्रतिपत्तेःरूपर्यालंकृतसकलकलादिशब्दश्रवणो ११०
त्तरमेवसमुन्मेषःसर्वेषां।इत्थमेवचमुखंचंद्रइत्यादिप्रसिद्धोदाहरणेपि।इयांस्तुविशेषोयदेकत्रसाधारणो

धर्मःप्रसिद्धतयानियमतःस्वबोधकश्रुतिंनापेक्षते॥इतरत्रत्वप्रसिद्धतयानतथा॥एवंस्थितेसाधारणधर्मकत्व
रूपंसादृश्यंयदिरूपकमध्यंनप्रविशेत्तदाकथमपि[illegible]धर्मविशेषानुपस्थितिदशायांरूपकेनपर्यस्येच्चमत्का तं-।
रंवानजनयेत्।उपमानोपमेययोराहार्याभेदबुद्धेरनन्यापेक्षपर्यवसानायाःसाम्राज्यात्।नन्वाहार्यपदार्थ
द्वयाभेदबुद्धौनचमत्कारेवासाधारणधर्मविशेषज्ञानंप्रयोजकमितिशक्यंवदितुं॥यद्यनुष्णोभवेद्वह्निर्य
द्यशीतंभवेज्जलं॥मन्येद्दढव्रतोरामस्तदास्यादप्यसत्यवागित्यादौसाधारणधर्मस्याप्रत्ययेपिवह्न्यनुष्णादी नु-।
नामभेदप्रत्ययोपगतेः॥नचोपमानोपमेयस्थलएवायंनवीनोविशेषइतिवाच्यं॥ईदृशविशेषकल्पनेमानाभा
खं-। वात्॥साधारणधर्मानुपस्थितिदशायामपिमु[illegible]पदिचंद्रःस्यात्तदाभूम्यवस्थितंनस्यादित्यादौनादृशप्रतीत्युप

र॰गं॰ गमाच्च॥ननुरूपकप्रतीतेरुपमानाभेदविषयत्वविरहे सिंहेनसदृशोनायंकिंतुसिंहोनराधिपत्यादौनिषेध्यविधे इ-।
१११ ययोरसंगतिरितिचेन्न॥अनुपदमेवचप्राचीनमतद्वयेपिरूपकेताद्रूप्यप्रतिपत्तेःस्वीकारस्यप्रतिपादनात्॥अथ
विधेयकोटौप्राचांमतेसादृश्यस्यापिप्रविष्टतयातन्निषेधानुपपत्तिस्तथापिस्थितेनैवेतिचेत्तद्भेदघटितसादृश्यरूपा
याउपमायाएवनिषेध्यत्वात्तिरोभूतभेदसादृश्यलक्षणस्यरूपकस्यविधेयत्वाच्चनानुपपत्तिः॥यदप्युक्तंरू
जन- पकेलक्षणास्वीकारेराजनारायणमित्यत्रपादांबुजमित्यत्रचोपमारूपकयोर्बाधकतयारूपकोपम
योर्निर्णायकतयाचलक्ष्मीकर्तृकालिंगनेमंजुमंजीरसिंजितत्वयोरनुपपत्तिःप्राचीनैरुक्ताविरुद्धास्यादितित १११
दपिनरूपकेउपमानतावच्छेदकरूपेणनसदृशप्रत्ययस्योपपादितत्वेनराजनारायणमित्यादौविशेषणस

खत- मासाश्रयरूपकस्यस्वीकारेप्रधानीभूतोत्तरपदार्थस्यनारायणसदृशस्यापिनारायणत्वेनैवप्रतीतेर्लक्ष्मी
कर्तृकालिंगनकर्मतायाअनुपपत्तेरभावात्॥उपमायाउपमितसमासाश्रयायाःस्वीकारेतुप्रधानीभूतपूर्वप खत- B.
दार्थस्यराज्ञोराजत्वेनैवप्रत्ययात्तादृशकर्मतायाअनुपपत्तेः।पादांबुजमित्यादावपिरूपकस्यस्वीकारेप्रधानी
दा भूतोत्तरपदार्थस्यांबुजसदृशस्यांबुजत्वेनैवप्रतीतेर्मंजुमंजीरसिंजितमनोहरतायाअनुपपत्तेः॥उपमितस
मासाश्रयोपमायांतुप्रधानस्यपादस्यपादत्वेनैवप्रतीतस्यनास्तितस्यानुपपत्तिरितिनकोपिदोषः।नचोपमित
समासेपूर्वपदार्थस्योपमेयतावच्छेदकतयैवप्रतीतिरितिनयुक्तं॥वक्त्रेचंद्रमसीतिप्रागुक्तरूपकइवोपमा
नताद्रूप्यवदभेदबुध्यानत्ताद्रूप्यस्यात्रापिप्रतिपत्तुंशक्यत्वात्॥लक्षणायास्तुलभ्यत्वादितिवाच्यं॥उपमितसमा

र॰गं॰ सेभेदघटितसादृश्यस्यलक्षणकोटिप्रविष्टतयावैलक्षण्यस्यवक्ष्यमाणत्वात्।यदप्युक्तं॥सादृश्यस्यशब्देनो क्ष-
११२ पादानादुपमात्वापत्तिरितितदपिनभेदाकरंबितसादृश्यविशिष्टस्यरूपकेलक्ष्यत्वादुपमाव्यपदेशस्याप्र
ता- सक्तेः॥सादृश्यमुपमाभेदइतिनतत्सिद्धांतं॥ननुचयत्रभेदघटितसादृश्यवतिवर्त्तलक्षणयामुखंचंद्र
आ- इतिप्रयुक्तंतत्रतत्रोपमालंकाराव्याप्तिःस्थितैवेतिचेन्न॥भेदघटितसादृश्यप्रतिपिपादयिषाकालेलक्षणया
नहिशिष्टप्रयोगस्यविरुद्धत्वात्लक्षणायास्ताद्रूप्यप्रतिपिपादयिषाधीनत्वात्॥नहिप्रयोजनमनुद्दिश्यसदि
व्यतिरिक्तयालक्षणयार्थंप्रतिपादयंत्यार्याभेदताद्रूप्ययोःविप्रतिषिद्धत्वेनयुगपत्प्रतिपत्तिबुद्ध्युपारोहासं ११२
भवाच्च॥अथोपमितसमासेपुरुषव्याघ्रइत्यादावुत्तरपदस्यार्थसदृशेलक्षणैवोपगंतव्या॥अन्यथा स्वा-

बोधकाभावेनसमासेसादृश्यप्रत्ययोनस्यात्॥नचव्याघ्रइवेतीवशब्दस्तद्बोधकइतिवाच्यं॥तस्यसमासेसं
बंधाभावात्सतिचसंबंधेतन्निवृत्तेरयोगात्निवर्तकशास्त्रस्याभावात्विग्रहवाक्यगतस्त्विवशब्दःस्वघटित
वाक्यस्योपमाप्रतिपादकत्वंसंपादयितुमीष्टेनवाक्यांतरस्य॥तस्यविशेषणत्वानुपपत्तेश्चनहिविवरणीयवा
क्यगतशब्दाप्रतिपाद्यस्यार्थस्यविवरणंयुज्यतइत्थंचलक्षणयाएवाभ्युपगम्यतयास्त्यांचतत्रयोजिनीभूत
ताद्रूप्यप्रतिपत्तौकथमुपमाद्विलुप्तानत्रप्राचीनैरुक्तेतिचेत्॥अत्रोच्यते॥उपमितसमासस्यभेदघटितोपमा
नसादृश्यविशिष्टोपमेयेशक्तेस्तद्घटकीभूतोपमानशब्दस्यभेदघटितसादृश्यविशिष्टोपमेयेशक्तेनिरूढल
क्षणायावास्वीकाराददोषः॥इयमेवनियातानामिवादीनांद्योतकतानयेमुखंचंद्रइवेत्यादौवाचकलुप्ता

र॰गं॰ यामुपमायांचगतिरनुसरणीया।।वाचकलोपःरूपमानाद्यकरंबितसादृश्यतद्विशिष्टान्यतरप्रतिपादकशब्द
११३ शून्यत्वादुपपादनीयः।।यच्चविद्यमानसेत्यत्रदूषणमभिहितंतद्रूपकप्रकरणेपरिहरिष्यते।।यदप्युक्तंरूपकेस
दृशलक्षणायाःफलंताद्रूप्यप्रत्ययोनयुज्यते।।ततसदृशइतिशब्दबोधानंतरमपितथाप्रत्ययापत्तेरिति।।तन्न।।
तत्सदृशइत्यत्रलक्षणायाअभावेनताद्रूप्यप्रत्ययस्योपादानायोगात्।।ताद्रूप्यप्रत्ययोलक्षणायाःफलमिति
हिप्राचांसमयः।।महाभाष्यादिग्रंथानामस्मिन्नेवानुकूलत्वाच्च।।नव्यनयेतुतेषामाकुलीभावःप्रास्यादिति
दिक्।।साध्यवसानायांचचंद्रराजीविराजतइत्यादौचंद्रादिशब्दैर्लक्षणयामुखत्वेनोपस्थापितस्यापिमुखादेः ११३
शाब्दबोधश्चंद्रत्वादिनाभवतिलक्षणाज्ञानस्यैवमाहात्म्यादित्येके।लक्षणयामुखत्वेनमुखादेःशाब्दबोधेवृत्ते

व्यंजनयैकशब्दोपात्तत्वप्रादुर्भूतयाचंद्रत्वेनबोधइत्यपरे।।मतद्वयेप्यस्मिन्मुखादौचंद्रत्वभानसामग्र्यांमुख
त्वादेःस्वधर्मस्यभानंननिवार्यते।।इत्थंचैकस्मिन्धर्मिणिचंद्रत्वादीनांमुखत्वादीनांचसाक्षाद्भानमेवसारोपा
तोऽस्याविच्छेदकं।।अपरेतुनिवार्यतएवविरुद्धभानसामग्र्यास्वधर्मस्यभानंरजतत्वभानसामग्र्याशुक्तित्वस्याभा
नादितिवदंति।।मतेस्मिन्विषयतावच्छेदकास्फूर्त्तिस्तथा।।वस्तुतस्तुसाध्यवसानायांविषयतावच्छेदकधर्मभा
द्वा-| नंयदिसहृदयप्रमाणकंतदातद्वारणायकल्पनोनुचितैवशुक्तिरजतभानस्थलेतुशुक्तित्वेनभानेपुरोवर्त्तिनिर
जतत्वभानस्यसर्वथैवविरुद्धत्वाद्रजतत्वभानसमयेशुक्तित्वभाननिवारणमावश्यकं।।नचेहापितथाऽनुभववि नि |
रुद्धत्वात्।।यदितुतत्रप्रामाणिकंतदासोचितैव।।अथास्यप्रागभिहितलक्षणस्यकाव्यात्मनोव्यंग्यस्यरमणीय

र॰ग॰ नाप्रयोजका॰अलंकारानिरूप्यंते॥तत्रविपुलालंकारांतर्वर्त्तिनीमुपमातावद्विचार्यते॥सादृश्यंसुंदरंवाक्यार्थो
११४ पस्कारकमुपमालंकृतिः॥सौंदर्यंचचमत्कृत्याधायकत्वं॥चमत्कृतिरानंदविशेषःसहृदयहृदयप्रमाणकः॥अ
नन्वयेचगगनंगगनाकारमित्यादौसादृश्यस्यद्वितीयसब्रह्मचारिनिवर्त्तनमात्रार्थमुपात्तत्वेनस्वयमप्रतिष्ठा
नेनादचमत्कारित्वैव॥अतएवतस्यान्वयाभावादनन्वयंतमाहुः॥व्यतिरेकेतवाननस्यतुलनांदधातुजलजं
कथमित्यादौचमत्कारिणोनिषेधस्यनिरूपणायप्रतियोगितयासादृश्यस्यनिरूपणंचमत्कारकमेवं॥एवमभेदप्रधा म-
नेष्वपिरूपकापन्हुतिपरिणामभ्रांतिमदुल्लेखादिषुभेदप्रधानेषुदृष्टांतप्रतिवस्तूपमादीपकतुल्ययोगितादिषु ११४
चमत्कारिषुनभिष्पादकतयावस्थितस्यापिसादृश्यस्यचमत्कारितावरहेणनास्त्युपमालंकृतित्वं॥मुखमिवचंद्र

इतिप्रतीपेचंद्रइवमुखंमुखमिवचंद्रइत्युपमेयोपमायांचसादृश्यस्यचमत्कारित्वाभातिप्रसंगःशंकनीयः॥त
योःसंग्राह्यत्वात्॥ननुत्वयिकोपोयमाभातिसुधांशाविवपावकः॥इत्यादावुपमानस्यात्यंतमसंभावितत्वात्सा
दृश्यमेवनतावत्प्रतिपत्तुंशक्यंचमत्कारस्तुपुनःकेनस्यादितिचेत्नकविनाहिखंडशःपदार्थोपस्थितिमतास्वेच्छया
संभावितत्वेनाकारेणचंद्राधिकरणकमनलंप्रकल्प्यंतेनसहसाम्यस्यापिकल्पनेबाधकाभावात्कल्पितमत्सादृ
श्यंकथंचमत्कारजनकमितितुनवाच्यं॥परमसुकुमारीभवत्कनकनिर्मितांग्यामणिमयदशनकांतिनिर्वासि
तध्वांतायाःकांतायाभावनयापुरोवस्थापितायाआलिंगनस्याल्हादजनकत्वदर्शनात्उपमानोपमेययोःसत्यत्व
भ्राति स्यलक्षणेप्रवेशाभावात्तत्रनदोषलेशोपि॥अतएवस्तनाभोगेपतन्भाति कपोलात्कुटिलोलकःशशांकबिंबतोमेरो

र॰गं॰ लंबमानइवोरगइत्यादावपिनानुपपत्तिःपरेतुअस्याःकल्पितोपमायाउपमानांतराभावफलकत्वेनालंकारां
११५ तरतामाहुः॥तन्न॥सादृश्यस्यचमत्कारितयोपमांतर्भावस्यैवौचित्यात्सन्निरूपितत्वस्यलक्षणेप्रवेशाभावात्
उपमानांतराभावफलकत्वंह्युपमाविशेषत्वेसाधकंनतूपमाबहिर्भावे॥अथविलसत्याननंतस्यानासाग्रस्थितं
मौक्तिकं॥आलक्षितबुधाश्लेषंराकेंदोरिवमंडलं॥मित्यादौसाधारणधर्मस्याभावात्कथमुपमानिष्पत्तिःबुधमौ
क्तिकयोरेकैकमात्रवृत्तित्वात्नचात्रयदिनासाग्रस्थितंमौक्तिकंतस्याआननंआलक्षितबुधाश्लेषंराकेंदोर्मंडल
मिवविलसतीतितादृशराकेंदुमंडलनिरूपितसादृश्यप्रयोजकविलासाश्रयस्तादृशमाननमितितात्पर्यंतदा
विपूर्वकलसत्यर्थःशोभाविशेषएवसमानोधर्मोयदिवातादृशमिंदुमंडलमिवयत्तादृशमाननंहितेलस

D: BHAU DAJI
MEMORIAL
१४

तीतितादृशसादृश्यावच्छिन्नमाननमुद्दिश्यविलासाश्रयत्वंविधेयंतयाविवक्षितेनतदास्याद्लुप्तोपमात्वात्पद्म स्य
मिवमुखमित्यादाविवआल्हादकत्वादिधर्मउन्नेयइतिवाच्यं॥उपमानोपमेययोरुभयोरपिवस्तुनोरसाधार
णत्वात्कोमलातपशोणाभ्रसंध्याकालसहोदरः॥काषायवसनोयातिकुंकुमालेपनोयतिरित्यादौकोमला
तपादीनामसाधारणत्वाद्धर्मांतरस्याप्रतिभानात्कंदरत्वाच्च कथमुपमेतिचेदाहुः॥उपमेयगतानामुपमा द
नगतानांचासाधारणानामपिधर्माणांसादृश्यमूलेनाभेदाध्यवसायेनसाधारणत्वकल्पनादुपमासिद्धिः॥
नौ नचभ्रमात्मकेनाहार्याभेदबोधेनकथंनामकुंकुमावलेपकोमलातपादीनांवस्तुनोभिन्नानांसाधारणत्वसिद्धये ल
त्यंतमसंभेदःसेद्धुंशक्यादिक्रमेणार्थसिद्धेरभावादितिवाच्यं॥प्रागुक्तेत्वयिकोपोयमाभातिरुधौशाविव

पावकइत्यादावुपमानोपमेययोरत्यंतासत्त्वेपिकल्पनामात्रतोयथानिष्पत्तिस्तथैवप्रकृतेसाधारणधर्म
स्यापीतिव्याकृतमुपपादयिष्यामः॥अयमेवचबिंबप्रतिबिंबभावइतिप्राचीनैरभिधीयते॥एवंभुजोभगवतो
चंचन् भातिचंचन्चाणूरचूर्णने॥जगन्मंडलसंहारेवेगवानिवधूर्जटिः॥अत्रधूर्जटिभगवद्भुजयोराकारेणसा
केनलभानस्य दृश्याभावात्प्रकारनिर्मुक्तस्यचाप्रयोजकतयाचाणूरचूर्णनिमित्तकचांचल्यवत्त्वजगन्मंडलसंहारनिमि
त्तकवेगवत्त्वयोर्भानप्रकारयोरभेदाध्यवसानेनाभिन्नधर्मप्रकारकभानविशेषत्वस्यसाधारणधर्मस्यसि
द्धेरुपमासिद्धिः॥तत्रचाणूरजगन्मंडलयोर्वस्तुतोभिन्नयोर्महाकायत्वादिनासादृश्याद्बिंबप्रतिबिंबभावःचू ११६
र्णनसंहारयोश्चांचल्यवेगवत्त्वयोस्त्वाश्रयभेदाद्भिन्नयोरपिवस्तुतएकरूपत्वेनेतिवस्तुप्रतिवस्तुभावः॥इत्येवं

गा-

निरूपितमुपमायालक्षणमथैयमुदाह्रियते॥गुरुजनभयमद्विलोकनांतःसमुदयदाकुलभावमावहंत्याःद
रदलदरविंदसुंदरंहाहरिणदृशोनयनंनविस्मरामि॥अत्रदलदरविंदशब्दस्योपमानवाचकस्यसुंद
रशब्देनसामान्यवचनेनसमासेप्रतीयमानोपमासकलवाक्यार्थस्यविप्रलंभशृंगारस्यस्मृत्युपस्करणद्वारो
पस्कारकतयालंकारः।नचात्रस्मृतिःप्रधानतयाध्वन्यतइतिवक्तुंशक्यं॥नविस्मरामीतिस्मृत्यभावनिषेधमुखे
नस्फुटमावेदनात्॥नापिपूर्वार्धगतत्रासौत्सुक्ययोःपरस्पराभिभवकामयोःसंधिःप्रधानं॥तस्यनायिकागत नायि-
त्वेनानुवाद्यत्वात्॥उत्तरार्धगतस्मृत्यंगत्वाच्चतस्माद्भावसंध्युपमालंकाराभ्यामुपस्कृता।स्मृतिर्हापदगम्यः
संतापोनुभावश्चविप्रलंभमेवोपस्कुरुतइतितस्यैवात्रप्राधान्यं॥अप्पदीक्षिताःपुनःचित्रमीमांसायामु

 पमितिक्रियानिष्पत्तिमत्सादृश्यवर्णनमदुष्टमव्यंग्यमुपमालंकारः॥स्वनिषेधापर्यवसायिसादृश्यवर्णनं
 वा न तथाभूतं तथेति लक्षणद्वयमाहुस्तच्चिंत्यं॥वर्णनस्य विलक्षणशब्दात्मकस्य विलक्षणज्ञानात्मकस्य वाश
ब्दवाच्यत्वविरहेणार्थालंकारतायाबाधात्॥तस्य सर्वथैवाव्यंग्यत्वादव्यंग्यत्वविशेषणवैयर्थ्याच्च॥अथयदि
वर्णनभूतंतादृश्यं सादृश्यमुपमेत्युच्यते॥तदा यथा गोस्तथा गवय इत्यत्रोपमालंकारापत्तेः॥एवं कालोप
सर्ज्जने च तुल्यमित्यादावपि॥अशिष्यत्वादिना प्रधानप्रत्ययार्थवचनसादृश्यस्यात्रापि प्रतिपादनात्॥नचात्रव
चनभेदस्य दोषस्य सत्वाददुष्टत्वविशेषणेन वारणं भविष्यतीति वाच्यं॥एतद्वाक्याद्वाक्यांतरप्रतिपादिते
कोपमेयकसादृश्ये तथाप्यतिप्रसंगात्॥नचात्रोपमितिक्रियानिष्पत्तावपि न सादृश्यवर्णनं विषयस्याच

मत्कारित्वाच्चमत्कारिविषयककविव्यापारस्यैव वर्णनपदार्थत्वादिति वाच्यं॥एवं हि चमत्कारित्वस्य लक्षणे
वश्यनिवेश्यत्वेनोपमितिक्रियानिष्पत्तिविशेषणवैयर्थ्यात्॥नह्यनिष्पन्नमापाततः प्रतीयमानं सादृश्यं चम
त्कृतिमाधत्ते॥एवं द्वितीयलक्षणेपि निषेधापर्यवसायित्वं निरर्थकं व्यतिरेकेकमलादिसादृश्यनिषेधस्या सा-
नन्वये च सर्वथा सादृश्यनिषेधस्य चमत्कारितयातदर्थं सादृश्यस्य निरूपणमिति प्रागेवाभिधानात्॥किं
च॥स्तनाभोगे पतन्भातिकपोलात्कुटिलोलकः॥शशांकबिंबतो मेरौ लंबमान इवोरग इत्यादौ मुख्यवा
क्यार्थत्वेनानलंकारभूतायामुपमायामतिव्याप्तिः उपमितिक्रियानिष्पत्तिमत्सादृश्यवर्णनस्यादुष्टाव्यंग्यत्व
स्य चात्रापि सत्वात्॥नचेयमप्युपमालक्ष्येति वाच्यं॥ध्वन्यमानोपमानिवारणप्रयासस्य वैयर्थ्यापत्तेः॥नह्य

र॰गं आभेदप्रधानोत्प्रेक्षाशक्यावक्तुं कल्पितोपमाया निर्विषयत्वप्रसंगात् व्यापार उपमानाख्यो भवेद्यदि विवक्षितः॥
११८ क्रियानिष्पत्तिपर्यंतमुपमालंकृतिस्तस्येति स्वकृतसूत्रे अलंकारभूतोपमाया एव लक्ष्यत्वेनाभिधानात्॥ अलंका
रभूतोपमालक्षणत्वेन दैवादुष्टाव्यंग्यत्वविशेषितमिति तत्रैव पुनरभिधानाच्च॥ नह्यत्रोपमानोपमेयसादृश्या
दुपमास्वरूपादस्ति कश्चिदतिरिक्तो वाक्यार्थो येनोपमा तमलंकुर्यात्॥ अपि च लक्षणे सादृश्यविशेषणं नि
रर्थकं॥ उपमितिक्रियानिष्पत्तिमद्वर्णनमुपमेत्येतावतैव स्वाभीष्टार्थलाभात्॥ एवं स्वतःसिद्धेन भिन्नेन सं
मतेन च धर्मतः साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमेति विद्यानाथेनोक्तं लक्षणमपास्तं॥ व्यतिरेके निषे ११८
धप्रतियोगिनि सादृश्ये तिव्याप्तेः॥ एवमुपमानोपमेयत्वयोग्ययोरर्थयोर्द्वयोः॥ हृद्यं साधर्म्यमुपमेत्युच्यते का

व्यवेदिभिरिति प्राचामपि लक्षणं प्रत्युक्तं॥ हृद्यतामात्रेण निर्वाहे विशेषणांतरवैयर्थ्यात्॥ एवं काव्यप्रका
शोक्तमपि साधर्म्यमुपमा भेदे इति लक्षणं नातीव रमणीयं॥ व्यतिरेके निषेधप्रतियोगिनि सादृश्ये तिव्या ति-
पनात्॥ न च पर्यवसितत्वेन साधर्म्यं विशेषणीयमिति वाच्यं॥ अनन्वयस्य सादृश्यस्यापर्यवसायित्वेनैव वारणे
भेदविशेषणवैयर्थ्यापत्तेः काव्यालंकारप्रस्तावे लौकिकालौकिकप्रधानवाच्यव्यंग्योपमासामान्यलक्षणकर
णानौचित्याच्च॥ अत एव भेदाभेदतुल्यत्वे साधर्म्यमुपमेत्यलंकारसर्वस्वोक्तं लक्षणं न थैव॥ एवं प्रसिद्धगुणेनोप
मानेनाप्रसिद्धगुणस्योपमेयस्य सादृश्यमुपमेत्यलंकाररत्नाकरोक्तमपि न भव्यं॥ श्लेषमूलकोपमायां तादृश
शब्दात्मकस्य धर्मस्य कविनैव कल्पनात्तेन रूपेणोपमानस्याप्रसिद्धेश्चेत्यलं परकीयदूषणगवेषणया प्रकृत

र॰गं॰ मनुसरामः॥अस्याश्चोपमायाः प्राचामनुसारेण केचिद्भेदा उदाह्रियन्ते॥तथाहि॥उपमा द्विविधा पूर्णा लुप्ता

११९ च पूर्णा तत्र श्रौत्यार्थी चेति द्विविधा भवन्ती वाक्यसमासतद्धितगामितया षोढा॥लुप्ता च उपमानलुप्ता ध

र्मलुप्ता वाचकलुप्ता धर्मोपमानलुप्ता वाचकधर्मलुप्ता वाचकोपमेयलुप्ता धर्मोपमानवाचकलुप्तेति ता

वत्सप्तविधा॥तत्र उपमानलुप्ता वाक्यगा समासगा चेति द्विविधा धर्मलुप्ता समासगता श्रौत्यार्थी वाक्यग

ता श्रौत्यार्थी तद्धितगता चार्थ्येवं श्रौतीति पंचविधा॥वाचकलुप्ता समासगता कर्मक्यज्गता आधारक्य

ज्गता क्यङ्गता कर्मणमुल्गता कर्तृणमुल्गता चेति षड्विधा॥धर्मोपमानलुप्ता वाक्यगता समासगता चेति द्वे ११९

धा॥वाचकधर्मलुप्तापि क्विप्गता समासगता चेति द्विविधैव वाचकोपमेयलुप्ता क्यच्येकविधा॥धर्मोपमा

नवाचकलुप्ता सा तु समासगतैकविधैवं साकल्येनैकोनविंशतिर्लुप्ताया भेदाः पूर्णाभेदैः सह पंचविंशतिः॥

क्रमेणोदाह्रियन्ते॥तत्र पूर्णा श्रौती वाक्यगता॥यथा॥ग्रीष्मचंडकरमंडलभीष्मज्वालसंसरणतापितमूर्तेः॥

प्रावृषेण्य इव वारिधरो मे वेदनां हरतु वृष्णिवरेण्यः॥अत्र प्रावृषेण्य इत्यनेन वारिधरविशेषणेन नैराकांक्ष्या

दिवेन समास इत्येव पावाग्नित्यत्वाभावाद्वारिधरेणापि नैवस्य समासः॥एषा चोपमानोपमेययोर्वारिधर

भगवतोर्वेदनाहरणकर्तृत्वस्य साधारणधर्मस्य सादृश्यबोधकस्येवशब्दस्य चाभिधानात्पूर्णसादृश्यस्य

श्रुत्या बोधनाच्छ्रौती॥पूर्णा आर्थी वाक्यगता यथा॥प्राणापहरणेनासि तुल्यो हालाहलेन मे॥शशांककेन मु

ग्धेन सुधांशुरिति भाषितः॥पूर्णा श्रौती समासगा यथा॥हरिचरणकमलनखगणकिरणश्रेणीव निर्मलानि

र॰गं॰ मेरुस्थानितरांशिशिरतुं ये लोचनं मे देवव्रतपुत्रिणी देवी॥ अत्रैवेन समासेः पूर्णार्थीसमासगा यथा॥ आनंदने
१२॰ न लोकानामातापहारणेन च॥ कलाधरतया चापि राजन्निंदूपमो भवान्॥ पूर्णाश्रौत्यार्थी च तद्धितगा यथा
॥ निखिलजगन्महनीयाय स्याभानवपयोधरवत्॥ अंबुजवत्विपुलतरेनयने नत्र्यस्त संश्रये सगुणं॥ अ द्र-
त्र पूर्वार्द्धे वतेस्तत्र नस्येवेति सादृश्यविधानाच्छ्रौती॥ उत्तरार्धे तु तेन तुल्यमिति विधानात्सादृश्यवदर्थकतया
र्थी॥ उपमानलुप्ता वाक्यगा यथा॥ यस्य तुलामधिरोहसि लोकोत्तरवर्णपरिमलोद्गारैः॥ कुसुमकुलतिलक
चंपक न वयं तं जातु जानीमः॥ यत्तुलनामधिरोहसीत्याद्यचरणनिर्माणे इयमेव समासगा॥ उपमानाभावे १२॰भा-
सादृश्याभावस्य पर्यवसानात्सादृश्यपर्यवसानस्य चोपमाजीवितत्वादलंकारांतरमेवात्र नोपमानलुप्ते

तिनाशंकनीयं॥ यस्य तुलामारोहसि न तं वयं जानीम इत्युक्त्या अस्माकमसर्वज्ञत्वादस्मदगोचरः कोपि तवो
पमानं भविष्यतीति सादृश्यस्य पर्यवसानमस्तीत्युपमानलुप्तैवेयमुपमालंकारांतरं। एतेन कुतो हिम ना-
द३ री हसि कंटककलिआ ढुंढुलायमानो मरिष्यसि कंटककलितानि केतकीवनानि॥ मालती कुसुमसदृशं
भ्रमभ्रमास्य सिंकेअ द्रवणाद्र मालइ कुसुमसरिथं भमर भमंतो न प्पावहसि॥ यत्रासमालंकारो यमुपमातिरि
क्त इति वदंतो लंकाररत्नाकरादयः परास्ताः॥ धर्मलुप्ता श्रौती वाक्यगता यथा॥ कलाधरस्येव कलाविशिष्टा
विरूनमूलालवलीलतेव॥ अशोकमूलं परिपूर्णशोका सारामयोषाचिरमध्युवास॥ ग्रीष्मचंडकरमंडलेति
प्रागुदाहृते पूर्णाया उदाहरणे प्रावृषेण्यो वारिधर इव योधृष्णि वरेण्यः समे वेदनां हरत्विति धृष्णि वरेण्यमात्र

र॰गं॰ गतत्वेन वेदनाहरणकर्तृत्वंविवक्षितंवारिधरसादृश्यंचश्यामत्वादिनायदितदातत्राप्येषाबोध्या॥इयांस्तु
१२१ विशेषोयत्पूर्णायांवृष्णिवरेण्यमात्रमुद्दिश्य प्रावृषेण्यवारिधरसादृश्यप्रयोजकं तादृशवारिधरसादृश्यादि
मंवावेदनाहरणकर्तृकत्वंविधेयमित्युपमाविधेयिकाधीः धर्मलुप्तायांतुवारिधरसादृश्यावच्छिन्नवृष्णि
वरेण्यमुद्दिश्यवेदनाहरणकर्तृत्वमात्रंविधेयमित्युपमोद्देश्यतावच्छेदिकाधर्मलुप्ताआर्थीवाक्यगता
यथा॥कोपेपिवदनंतन्वितुल्यंकोकनदेननते॥उत्तमानांविकारेपिनापैतिरमणीयता॥धर्मलुप्तासमासगा
श्रौत्यार्थीतद्धितगार्थीचयथा॥सुधेववाणीवसुधेवमूर्तिःसुधाकरश्रीसदृशीचकीर्तिः॥पयोधिकल्पामति १२
रासफेंदोर्महीतलेन्यस्यनहीतिमन्ये॥इषदसमाप्तिरपिभंग्यंतरेणसादृश्यमेव॥वाचकलुप्तासमासगता॥दर

DR. BHAU DAJI

दलदरमितिप्रागुदाहृतेपद्येकर्माधारक्यज्ञानाद्युक्तावयथामलयानिलमनलीयतिमणिभवनेकाननीय- स्य-
तिक्षणतः॥विरहेणविकलहृदयानिर्जलमीनायतेमहिला॥अत्रानलमिवाचरतीत्यर्थेनलशब्दादुपमाना
दाचरइतिसूत्रेणकाननइवाचरतीत्यर्थेकाननशब्दाच्चतत्सूत्रस्थेनाधिकरणाच्चेतिवार्तिकेनचक्यच्॥
निर्जलमीनशब्दाच्चकर्तुःक्यङ्सलोपश्चेतिक्यङ्॥आचारमात्रार्थकतयाक्यच्क्यङोःप्रत्ययेवलक्षणया
स्वस्वार्थसादृश्यप्रतिपत्तिरितिनयेसादृश्यवाचकाभावाद्वाचकलुप्ता॥अनलीयतीत्यादिसमुदायस्यैवानला
दिसादृश्यप्रयोजकाचरणकर्तृशक्तत्वमितिनयेपिसादृश्यविशिष्टान्यतरमात्रवाचकाभावाद्वाचकलु
प्ताकर्मकर्तृणमुक्तातायथा॥निरपायंसुधापायंपयस्तवपिबंतिये॥जन्तुजेनिर्जरावारंवसंतिभुवितेन

र॰गं॰ राः॥अत्रसुधापायमितिसुधामिवनिर्जरावासमितिनिर्जराइवेत्युपमानेकर्मणिचेतिकर्मणिचकारात्कर्त्तर्यस्यु
१२२ पमानउपपदेणमुल्॥धर्मोपमानलुप्तावाक्यगासमासगाच॥यथा॥गाहितमखिलंगहनंपरितोदृष्टाश्च
विटपिनःसर्वे॥सहकारनप्रपेदेमधुपेननथापितेसमंजगति॥नथापितेसममितिहित्वाभवत्सममितिय
द्यार्यद्वैवविधीयतेतदेदमेवोदाहरणंसमासगाया।वाचकधर्मलुप्ताक्विबाप्तायथा॥कुचकलशेष्वबला
नामलकायामथपयोनिधेःपुलिने॥क्षितिपालकीर्त्तयस्तेहारंतिहरंतिहीरंति॥अत्रहारलरहीरशब्दाआ
चारार्थकेक्विपिलुप्तेधातवंते।तत्रहारादिशब्दालक्षणयाहारादिसादृश्यंबोधयंतिलुप्तोपिस्मृतःक्विबाचा १२२
रमितिपक्षेवाचकधर्मलोपःस्पष्टएवहारादिशब्दाएवलक्षणयातादृशसादृश्याभिन्नमाचारमितिपक्षेपि

सादृश्यस्येवधर्मस्यापितन्मात्रबोधकाभावाल्लोपएव॥वाचकधर्मलुप्तासमासगायथाशोणाधरांशुसंभि
भास्तन्विनेवदनांबुजे॥केसराइवकाशंतेकांतदंतालिकांतयः॥अत्रवदनांबुजयोरभेदविवक्षयाविशे
षणसमासेदंतावलिकांतीनांकेसरतादात्म्यंनतुकेसरसादृश्यंउपमितसमासेतुवदनांबुजयोर्धर्मिणोरौ
पम्ये पम्येकेसरदंतावलीकांतीनामपितद्धर्माणामौपम्योक्तिरुचितैव॥अतोधिकरणतावच्छेदकोपमामादाय
ऽत्र वाचकधर्मलुप्तोदाहृता।विधेयतावच्छेदिकानुपूर्व्येवावा।चकोपमेयलुप्ताक्यजाप्ताधर्मोपमानवाचकलुप्ता
समासगाचयथा॥तथातिलोत्तमीयंत्याम्मृगशावकचक्षुषा॥ममायंमानुषोलोकोनाकलोकइवाभवत्॥तिलो
क्य-त्तमीयंत्येतितिलोत्तमामिवात्मानमाचरंत्येत्याचारार्थकेक्याचितिलोत्तमापदस्यातिलोत्तमासादृश्येलाक्षणि

र॰गं॰ कतयावाचकस्यस्फुटत्वेनाप्रतीयमाननयाआत्मनउपमेयस्यचानुपादानाल्लोपः॥स्वयंतुसानोपमेया॥आचा
१२३ रकर्मणउपमानस्यतिलोत्तमारूपस्यतत्कर्म्यामुपमेयायामुपमानत्वासंगतेः॥अतआत्मैवात्रोपमेयतयोन्ने
यः मृगचक्षुषेतिमृगस्यचक्षुषीइवचक्षुषीअस्याइतिसप्तम्युपमानेपूर्वस्येतिसमासोत्तरपदलोपे॥मृग
पदस्यमृगचक्षुःसदृशलाक्षणिकत्वपक्षेवृत्तेर्विशिष्टार्थवाचकतापक्षेपिस्वस्वमात्रबोधकपदाभावात्त्रया
न– णांलोपइतिपंचविंशतिरुमापभेदाः॥इहान्यानपिभेदानन्येनिगदंति॥वाचकलुप्ताषड्विधोपवर्णिता॥कर्त्त
र्युपमानइतिणिनोसप्तम्यापिदृश्यतेकोकिलइवालपतिकोकिलालापिनीति॥तथाष्टम्यापिइवेप्रतिकृताविति १२३
कन्निलुप्यंतेनुष्यइतिलुपिचंचेवेत्यर्थे॥चंचापुरुषःसोयंयःस्वहितंनैवजानीतइत्यत्र॥नवम्याप्याचारक्विपिपदां
तुम्म (पे (०४७)

तरेणप्रतिपादितेसमानेधर्मेदृश्यते॥आल्हादिवदनंतस्याःशरद्राकामृगांकतीत्यादौ॥उपमानलुप्तावाक्यस
मासयोर्द्विविधोपवर्णितातृतीयापिदृश्यते॥यच्चोराणामस्यचसमागमोयच्चतैर्वधोस्यकृतः॥उपनतमेनद
कस्मादासीत्तत्काकतालीयमित्यत्रकाकतालशब्दयोर्लक्षणयाकागमनतालपतनबोधकयोरिवार्थेस
मासाच्चतद्विषयादितिज्ञापकात्समासेकाकइवतालइवकाकतालमितिकाकतालसमागमसदृशश्चोराणा
मस्यचसमागमइत्यर्थः॥ततःकाकतालमिवेतिद्वितीयइवार्थेपूर्वोक्तेनैवसूत्रेणछप्रत्ययेनतालपतनजन्यका
कवधसदृशश्चोरकर्तृकोदेवदत्तवधइत्येवंस्थितेप्रत्ययार्थोपमायामुपमानस्यतालपतनजन्यकाकवधस्या
नुपादानादुपमानलुप्ता॥वाचकोपमानलुप्तातुनाम्नैवननिर्दिष्टासाप्यत्रप्रकृत्यर्थेदृश्यतेधर्मोपमानलुप्ता

र॰गं॰ पिवाक्यसमासयोर्द्विविधैवोक्ता सा चात्रापि तृतीयचरणोक्तधर्मनिरासे प्रत्ययार्थे दृष्टा ॥ वाचकधर्मलुप्ताक्वि
१२४ प्समासयोर्द्वयोरेव कथिता सापि चंचापुरुषः सोऽत्यंतं विषयवासनाधीन इत्यत्र स्वहिताकरणरूपस्य धर्म
स्यानुपादाने कनोलोपे विलोक्यते ॥ एवं च द्वात्रिंशद्भेदाः ॥ अत्रेदमवधेयं कर्माधारक्यचि क्यङि च वाचकलुप्तो
दाहरणं प्राचामसंगतमिव प्रतीयते ॥ धर्मलोपस्यापि तत्र संभवात् ॥ न च क्यजाद्यर्थ आचार एव तत्र साधारणो
धर्मोस्तीति वक्तव्यं ॥ धर्ममात्ररूपस्याचारस्योपमाप्रयोजकत्वाभावात् ॥ नारीयते सपत्नसेनेत्यादौ स्त्र्यंत
रनिवेदितैः कातरत्वादिभिरभिन्नतयाध्यवसितस्याचारस्योपमानिष्पादकत्वात् ॥ यदि च क्यङर्थस्याचारमा १२४,
त्रमुपमानिष्पादकं स्यात्तदा त्रिविष्टपं तत्खलु भारतायत इत्यादौ स्फुटप्रसिद्धत्वादिरूपाचारोपस्थितावप्युपमा

लंकृतेरनिष्पत्तेः तस्यैव च सुपर्वभिः शोभितमंतराश्रितैरिति चरणांतरनिर्माणेन तस्या निष्पत्तेः ॥ क्यङाद्यर्थस्सा
धारणोपि नोपमां प्रयोजयति ॥ उपमाप्रयोजकतावच्छेदकरूपेण साधारणधर्मवाचकशून्यत्वस्यैव धर्मलोप
शब्देनाभिधानादन्यथा स्फुरस्वरूपमिदं वक्त्रप्रफुल्लमिव पंकजमित्यादौ पूर्णोपमापत्तेरिति दिक् ॥ यच्चाप्य
दीक्षितैरस्मिन्नेव प्रस्तावे धर्मलुप्ता वाक्यसमासतद्धितेषु दर्शिता द्विर्भावेपि दृश्यते पटुपटुर्देवदत्त इत्यत्र प्रका
रे गुणवचनस्येति सादृश्ये द्विर्भावविधानादिति निगदितं ॥ तत्तुच्छं ॥ अत्र च वाचकस्याप्यनुपादानाद्वाचकधर्म
लुप्तायामेव तदाधिक्यमुद्भावयितुमुचितं न तु धर्मलुप्तायां धर्ममात्रलुप्ताया एव धर्मलुप्ताशब्देन तैर्विवक्षणा
दन्यथा एकलुप्तास्वेव द्विलुप्तानां त्रिलुप्तायाश्च ग्रहणात्पृथगुपादानमसंबद्धमेव स्यात् ॥ न चात्र वाचकस्य द्विर्भा

र०गं० वस्यैवसत्वाभावात्तिल्लोपोपितुधर्ममात्रस्येतिवक्तुंशक्यंद्विर्भावस्यवाचकत्वोक्तेर्भाष्यकैय्यटादिविरुद्धत्वात्।।तदु
१२८ क्तंकैयटेनप्रकारेगुणवचनस्येतिसूत्रेसिद्धत्वेनिप्रतीकमुपादायद्विर्वचनस्यप्रकृतिःस्थानीइतितदर्थोवि
शेष्यतेनतुप्रकारः।तत्रसवर्णस्यगुणवचनत्वाद्व्यभिचाराभावात्तद्ग्रहणात्गुणवचनोयःशब्दोनिर्ज्ञातस्त
स्यसादृश्येद्योत्येद्वेभवतइतिसूत्रार्थइति।।इदंचान्यत्तस्मिन्नेवप्रस्तावेचित्रमीमांसाकृद्भिरभ्यधीयत।।नृणांयं
सेवमानानांसंसारोप्यपवर्गतितंजगत्यभजन्मर्त्यश्चंद्रकलाधरं।।अत्रक्विपकनोर्लोपेप्रत्येकंवाचकधर्मलो
पउभयत्रापीति।।नदरमणीयमेव।।कनोवाचकस्यलोपेपितंचंद्रकलाधरमभजन्नितिचंद्रकलाधरभजनरा १२९
हित्यरूपस्यधर्मस्यचंद्रवामर्त्यसाधारणस्योक्तत्वात्कथंतावद्धर्मस्यलोपः नचोपमेयमर्त्यविशेषणतयोपात्त

स्यचंद्रकलाधरभजनराहित्यस्यसादृश्योपसर्जनेचंद्रायामनन्वयाभसाधारण्यमितिवाच्यं।।तद्भक्तानांसुख
मयःसंसारोप्यपवर्गतितंशंभुमभजन्मर्त्यश्चैवात्महितारूतेरितिपाठेधर्मश्रवणमप्युभयत्रापिसंभवतीति
स्वोक्तेरसंगतत्वापत्तेः।।इहाप्युपमेयसंसारविशेषणतयोपात्तस्यसुखमयत्वस्यसादृश्योपसर्जनेपवर्गेन्वया
भावात्कथंकारंधर्मस्यसाधारण्यं।।उपमेयगतत्वेनोपमानगतत्वेनवाउपात्तस्यधर्मस्यशाब्देउभयान्वयेसत्य
पिवस्तुतउभयवृत्तित्वज्ञानमेवसाधारणतयानियामकमितिचेच्चंद्रकलाधरभजनराहित्येपिदीयतामेवंदृष्टिः।
यदिचोपमेयतावच्छेदकतयैवचंद्रकलाधरभजनराहित्यमत्रविवक्षितंसाधारणधर्मश्चस्वात्महिताकरणरू
पःसचात्रलुप्तएवेतिशपथेनस्वाभिप्रायःप्रकाश्यतेतदानिवारितोयंदोषस्तुष्यतुभवान्इदमप्यन्यत्तैरेववाचको

र॰गं॰ पमेयलुप्तायामुदाहरणंनिरमीयत॥रूपयौवनलावण्यस्पृहणीयतराकृतिः॥पुरतोहरिणाक्षीणामेषपुष्यायु-
१२६ धीयति॥इदंचपद्यमपशब्ददुष्टमवैय्याकरणतांकर्त्तुःप्रकाशयति॥तथाहि॥पुरतइतिनगरवाचिनःपुरश
ब्दात्तसिलिहरिणाक्षीणांनगरादित्यर्थस्यासंगतेःनहिपूर्ववाचकःपुरशब्दःक्वापिश्रूयतेपूर्वशब्दात्तुपूर्वापरा
धरावराणामसिपुरधवश्चैषामित्यसौपुरादेशेचपुरइतिभाव्यंनपुरतइति अतएवामुंपुरःपश्यसिदेवदारुमिति
प्रायुंक्तमहाकविः॥एवमेवमुखस्यपुरतश्चंद्रोनिष्प्रभइत्यप्रस्तुतप्रशंसेतिद्वितीयेप्रकरणारंभेप्यपशब्दितंतैः।
तथाचाहुर्वैयाकरणाःपत्यापुरतःसरता॥आत्मीयंचरणंदधातिपुरतोनिम्नोन्नतायांभुवि॥पुरतःसुदतीसमा १२६
गतंमामीत्यादयःसर्वेपिव्याकरणाज्ञानमूलाअपशब्दाइति।इयंचैवंभेदाउपमावस्त्वलंकाररसरूपाणांप्रधान

व्यंग्यानांवस्त्वलंकारयोर्वाच्ययोश्चोपस्कारकतयापंचधातत्रव्यंग्यवस्तूपस्कारिकायथा॥अनवरतपरोपकरण
व्यग्रीभवदमलचेतसांमहतां॥आपातकाटवानिस्फुरंतिवचनानिभेषजानीव॥अत्रतादृशवचनान्यर्थद्वारा
सेव्यमानस्यमनागप्यक्षुभ्यतःपरिणामेपरमंसुखंभवतीतिप्राधान्येनव्यंग्यस्यवस्तुनउपस्कारिकाभेषजोपमा।
व्यंग्यालंकारोपस्कारिकायथा॥अंकायमानमलिकेमृगनाभिपंकंपंकेरुहाक्षिवदनंतववीक्ष्यबिभ्रत्॥उल्लास
पल्लवितकोमलपक्ष्ममूलाश्चंचुपुटंचपलयंतिचकोरपोताः॥अत्रप्राधान्येनव्यंग्येआरोप्यमाणचंद्रकेभ्रांतिमत्य
लंकारेउपपादकस्यभालस्थमृगमदपंकविषयकस्यांकाभेदारोपस्याकसादृश्यरूपदोषमूलकत्वादुपमात्रालंका
रःस सोपस्कारिकानुदरदलदरविंदेत्यत्रप्रागेवोदाहृतारसपदेनासंलक्ष्यक्रमस्योपलक्षणाद्भावाद्युपस्कारिका

र॰गं॰ प्यत्रैवांतर्भाव्यायथानैवाययातिहृदयादधिदेवतेव॥वन्यकुरंगीववेपतेनितरामित्यादिषुप्रागुदाहृतेषुवाच्यव
१२७ स्तुपस्कारिकायथा॥अमृतद्रवमाधुरीभृतःसुखयंतिश्रवसीसखेगिरः॥नयनेशिशिरीकरोतिमेशरदिंदुप्रति
मंमुखंतव अत्रनयनशिशिरीकरणरूपेवस्तुनिवाच्येतेमुखस्यशरदिंदुपमोपस्कारिका॥वाच्यालंकारोपस्का
रिकायथा॥शिशिरेणयथासरोरुहंदिवसेनामृतरश्मिमंडलं॥नमनागपितन्विशोभतेतवरोषेणतथेदमान
नं॥अत्रवाच्यस्यदीपकस्योपमोपस्कारिका॥रसादिस्तुनवाच्यइतिप्रागेवाभिहितं॥अथकथमलंकारस्यालंका
रांतरोपस्कार्यत्वमुच्यतेप्रधानस्यैवालंकार्यत्वादितिचेत्॥मैवं अलंकारस्योपमादेर्ध्वन्यमानतायांप्राधान्याद्र
साद्विवदलंकारांतरोपस्कार्यत्वेनकोपितावदस्तिविरोधः॥एवमेवमुख्यतयावाच्यतायामपि॥यथात्मापणा

DR BHAU DAJI MEMORIAL

दौविक्रियमाणतायांकनकताटंकस्यरत्नाद्यलंकारांतरोपस्कार्यत्वेतस्यैवचकामिनीकर्णालंकारतायांपुनःप्रधा
नांतरसाभिध्यात्ताटंकस्यतद्गतरत्नानांचसाक्षात्परंपरयाचकर्णादिशोभोपस्कारकतयायथातदलंकारत्वमे
वमेवरसादिसाभिध्येरूपकादेस्तदुपस्कारकस्यालंकारांतरस्यचरसाद्यलंकारतेति॥एवंचप्राचांमतेपंचविंश
तिभेदायाःपुनःपंचविधानतायांसपादशतंभेदाःद्वात्रिंशद्भेदावादिनांतुषट्युत्तरंशतं॥इतश्चान्येपिप्रभेदाःकु
शाग्र्यीयधिषणैःस्वयमुद्भावनीयाः॥तत्रक्वचिदनुगाम्येवधर्मःक्वचिच्चकेवलबिंबप्रतिबिंबभावमापन्नः॥क्वचि
दुभयंक्वचिद्वस्तुप्रतिवस्तुभावेनकरंबितबिंबभावःक्वचिदसंनप्युपचरितः॥क्वचिच्चकेवलशब्दात्मकःस्तत्राद्यो
यथाशरीरदिंदुरिवाल्हादजनकोरघुनंदनःवनस्रजाविभातिस्मसेंद्रचापइवांबुदः॥अत्रपूर्वार्धेसकृन्निर्देशाद्

र॰ गं॰ र्मोनुगामीकेवलंबिंबप्रतिबिंबभावापन्नःकोमलातपशोणाभ्रेत्यत्रबोध्यः॥द्वितीयोपितूभयंतुरीयोपित्रिविधः
१२८ विशेषणमात्रयोर्विशेष्यमात्रयोस्तद्युगलयोर्वावस्तुप्रतिवस्तुभावेनकरंबितः॥तत्राद्योयथा॥चलद्भृंगमिवांभो
जमधीरनयनंमुखं॥तदीयंयदिदृश्येतकामःक्रुद्धोस्तुकिंततः॥अत्रचलनाधीरत्वयोर्विशेषणयोःवस्तुतएकरू
पयोरपिशब्दद्वयेनोपादानात्वस्तुप्रतिवस्तुभावः॥तद्विशेषणकयोश्चभृंगनयनयोर्बिंबप्रतिबिंबभावइति
तत्करंबितोयमुच्यते॥तत्रद्वितीयंयथाआलिंगितोजलधिकन्यकयासलीलंलग्नःप्रियंगुलतयेवतरुस्तमा
लः॥देहावसानसमयेहृदयेमदीयेदेवश्चकास्तुभगवानरविंदनाभः॥अत्रालिंगितत्वलग्नत्वयोर्वस्तुप्रति १२९
वस्तुभावस्तद्विशेष्यकयोश्चजलधिकन्याप्रियंगुलतयोर्बिंबप्रतिबिंबभावइत्ययमपितत्करंबितएवतृतीयेतृती

योयथा॥दशाननेनहृतेननीयमानाबभौसती॥द्विरदेनमदांधेनकृष्यमाणेवपद्मिनी॥अत्रविशेषणयोर्हृ
तत्वमदांधत्वयोर्विशेष्ययोश्चनीयमानत्वकृष्यमाणत्वयोर्वस्तुप्रतिवस्तुभावेनोभयतःसंपुटितोदशाननद्वि
रदयोर्बिंबप्रतिबिंबभावइत्ययमपितत्करंबितःविमलंवदनंतस्याःनिःकलंकमृगांकतीत्यत्रवैमल्यनिःक
लंकत्वयोर्वस्तुतएकरूपयोर्बिंबप्रतिबिंबभावनिर्मुक्तयोर्वस्तुप्रतिवस्तुभावमापन्नयोरुपमानिष्पादकत्वंयद्य
स्तितदाशुद्धवस्तुप्रतिवस्तुभावमापन्नोयेषांधर्मः॥नचकोमलातपशोणाभ्रसंध्याकालसहोदरद्युसदो
यतिसंध्याकायेन्दुरूपमायांधर्मेतिरस्यानवगमात्कुंकुमालेपकषायैवसनयोःकोमलातपशोणाभ्रयोश्चबिं
बप्रतिबिंबभावोयथावश्यमभ्युपेयःप्रकृतेतुनतथावस्तुप्रतिवस्तुभावःवदनमृगांकयोःसौंदर्यरूपसाधारण

र.गं. धर्मस्याप्रतीयमानत्वेनत्वेन धर्मांतरानपेक्षणादितिवाच्यं॥एवंतर्हियांत्या मुहुर्वलीतकंधरमाननंतदावृत्तवृं
१२९ तशतपत्रनिभंवहंत्येतिभवभूतिपद्येपिप्रतीयमानेनसौंदर्येणैवसामान्येननिर्वाहे कंधरावृंतयोर्बिंबप्रतिबिं
बभावस्यवलितत्वावृत्तत्वयोर्वस्तुप्रतिवस्तुभावस्यचसकलैरालंकारिकैःस्वीकारोविरुद्धःस्यादतोयथास्थितमे
वसाधुउपचरितेयोयथाशतकोटिकठिणचित्तःसोहंतस्याःसुधैकमयमूर्त्तेः॥येनाकारिषिमित्रंसविकलहृद
योविधिर्वाच्यः॥एषासीतांविवासितवतःस्वात्मगतोरामस्योक्तिः॥अत्रकाठिण्यंपार्थिवोधर्मश्चित्तेउपचरितः
॥केवलशब्दात्मकोयथा॥यत्रचसंतिसुमनसिमनुजपशौचशीलवंतःसर्वत्रसमानामंत्रिणोमुनयइव॥अ १२९
त्रोपमानोपमेयगतस्यार्थस्यैकस्याभावाच्छब्दएवधर्मः॥एवमेतेषांधर्माणांव्यामिश्रणंचसंभवतियथा॥श्या

मलेनांकितंभालेबालेकेनापिलक्ष्मणा॥मुखंतवांतरास्फुटभृंगफुल्लांबुजायते॥अत्रभालगतांकप्रसुप्तभृंगो
बिंबप्रतिबिंबभावमापन्नौक्वचिदर्थेचारेनुगामिन्यभेदमापद्यस्थितौ॥यथावासिंदूरारुणवपुषोदेवस्यरदां
कुरोगणाधिपतेः॥संध्याशोणांबरगतनवेंदुलेखायितःपातु॥अत्रसिंदूरसंध्याभ्यांगणाधिपगगनाभ्यांच
बिंबप्रतिबिंबभावमापन्नाभ्यांधर्माभ्यांसंपादिताभेदेनविशेषधर्मेणाभेदेनोपस्थितः॥क्वचिदर्थेनुगामी॥क्वचि
द्धेतुहेतुमद्भावेन॥यथा॥खलःकापथ्यदोषेणदूरेणैवविसृज्यते॥अपायशंकिभिर्लोकैर्विषेणाशीविषोयथा॥अ
त्रकापथ्यंविषंचबिंबप्रतिबिंबतांगतंदूरतोविसर्जनेनुगामिनीहेतुः॥यथावारूपवत्यपिचक्रूराकामिनीःदुःख
दायिनी॥अंतःकाटवसंपूर्णारूपकेचेंद्रवारुणी॥अत्ररूपवत्वदुःखदायित्वयोरनुगामिनोर्मध्येक्रौर्यकाटवेबिं

र॰गं॰ बप्रतिबिंबभावापन्ने दुःखदायित्वेन सहहेतुहेतुमद्भावेन मिश्रिते अपरेण तु शुद्धसामानाधिकरण्येन एवम
१३० न्यैरपि व्यामिश्रणं बोध्यं॥ प्रकारांतरं च लक्ष्यानुसारेण सुधीभिः स्वयमूहितुं शक्यं॥ यथा॥ यथा लतायास्तव
कानतायाः स्तवोऽवनम्रे नितरां समासि॥ तथा लता पल्लविनी सगर्वे शोणाधरायाः सदृशी तवापि॥ अत्र स्तना
वनम्राहं स्तबकनतायाः लतायाः उपमानमस्मीति गर्वमाविदध्याः यतः शोणाधरायाः उपमेयायास्तवापि पल्ल
विनीलतोपमानं भवतीति वाक्यार्थः यथा तथा पदप्रतिपाद्यायां तोपमानिकालतोपमेयिकोपमानिष्पादि
का अस्यां चोपमायां निरूपकतासंबंधेनोपमानोपमेयगते द्वे उपमे समसदृशशब्दाभ्यां प्रतिपादिते बिंबप्र १३०
तिबिंबभावमापन्ने साधारणधर्मतया स्थिते॥ तत्र निरूपकतासंबंधेन प्रधानीभूतोपमोपमानकांतागता

यामुपमायां प्रतिबिंबभूतायां गुच्छस्तनयोर्वस्तुप्रतिवस्तुभावापन्ननम्रीभवन विशेषणयोर्बिंबप्रतिबिंबभाव
मापन्नयोः साधारणधर्मत्वं॥ एवं तेनैव संबंधेन लतारूपोपमेयगतायां बिंबभूतायामुपमायामधरपल्ल
वयोः न च तेन सदृश इत्यादौ तन्निरूपित्तसादृश्याश्रयस्योपमेयस्य तस्य सदृइत्यादौ च तत्संबंधिसादृश्याश्रय
स्योपमानस्य प्रतीतेः सिद्धत्वात् प्रकृते च सदृशीति शब्दान्निवेद्यमानेष्वुपमानभावे कथं नाम लतायाः उपमेयत्वे
ति वाच्यं॥ सदृशशब्दप्रतिपाद्यधर्मभूतोपमायामुपमानत्वेपि यथा तथा शब्दवेद्योपमायां लतायाः उपमेयत्वे बा
धकाभावात्॥ एमन्येपि प्रकाराः यथा तेवाननं चंद्रस्तथा ह्रासोपि चंद्रिका॥ यथा चंद्रसमः चंद्रस्तथा त्वं सदृशी
तव एभिर्भेदैः प्रागुक्तानां सधर्माणां भेदानां यथासंभवं गुणने बहुतभेदा भवंति॥ तथा धर्माणां वाच्यतायां वा

र॰गं॰ च्यधर्मोबहुधोक्ताः॥व्यंग्यत्वेव्यंग्यधर्माधर्मलोपेपिगदितैव॥लक्ष्यतायांयथासर्पद्द्वशांतमूर्त्तिःश्वेवायमानपरि
१३१ पूर्णः॥क्षीबइवसावधानोमर्कटवन्निःक्रियोनितरामित्यत्र उपमानमहिम्नाशांतमूर्त्यादिशद्वैविरुद्धाधर्मा
प लक्ष्यंते॥इयंचोपमामुख्यार्थस्यक्वचित्साक्षादुपस्कारिणीक्वचिच्चोपस्कारकांतारोपकरणद्वारा॥तत्रसाक्षादु
पस्कारिणीप्रागबहुधोदीरिता॥परंपरयायथानदंतिमददंतिनः॥परिलसंतिवाजिव्रजाःपवंतिबिरुदावली
महितमंदिरेबंदिनः॥इदंनदवधिप्रभोयदवधिप्रवृद्धाननेयुगांतदहनोपमानयनकोणशोणद्युतिः॥अत्र
मुख्यार्थस्यराजविषयायाःकविरतेरुपस्कारकस्ययदेवतवकोपोदयस्तदेवरिपुणांसंपदोभस्मसाद्भविष्यं १३१
तीतिवस्तुनउपस्कारिकानयनकोणशोणद्युतेर्युगांतदहनोपमा॥इयंचैवयथावादिशद्वैर्वाचकैःप्रतिपादिता

वाच्यालंकारः॥लक्ष्यापिचालंकुर्वाणादृश्यते॥यथानीवींनियम्यशिथिलामुषसिप्रकाशमालोक्यवारिजदृशःश
यनंजिहासोः॥नैवावरोहतिकदापिचमानसान्मेनाभेर्निभासरसिजोदरसोदरायाः॥अत्रैकोदरप्रभवत्वरूपस्य
मुख्यार्थस्यबाधात्तदीयशोभालक्षणसमानांशहरत्वस्यसर्वांसोदरपदेनसदृशगेलक्ष्यते॥आर्थीचतत्रोपमा
प्रतीयमानाअवरोहतिलक्ष्यस्यविषयतयास्मृतिशून्यीभवनस्यनिषेधनेनप्रतीयमानायाःस्मृतेरुपस्कारिका॥
एवंप्रतिभटप्रतिमल्लादिशद्वानांतदीयन्यभवनतदीयशोभारूपस्यासर्वस्वापहरणादेःप्रयोजनस्यसत्वात्सा
दृयतीलक्षणेवनव्यंजनामुख्यार्थस्यबाधात्प्रयोजनेपुनर्व्यंजनैवेति॥क्वचिद्व्यंग्यापिचेयमुपमालंकारः॥यथा
॥अद्वितीयंरुचात्मानंमत्वाकिंचंद्रदृप्यसि॥भूमंडलमिदंमूढकेनवाविनिभालितं॥कस्यचिद्विदेशस्थितस्यकिर

र॰गं॰ णैरात्मानंसंतापयंतंचंद्रंप्रत्येषोक्तिः॥अत्रचअस्तिममप्रियायाःकदापिबहिरनिर्गतायाअतएवत्वयाप्यदृष्टा
१३२ याआननंत्वत्सदृशमितिप्रतीयमानायामुपमायांमूढपदेनध्वन्यमानायांतुचंद्रविषयायांवक्तृगतायामसूयायामलंका
रः॥एतेनाप्यदीक्षितैरुपमालक्षणेदत्तमव्यंग्यत्वविशेषणमयुक्तमेव॥नहिव्यंग्यत्वालंकारत्वयोरस्तिकश्चिद्वि
रोधः॥प्राधान्येनव्यंग्यतायांतुप्रधानत्वालंकारत्वयोर्विरोधादलंकारलक्षणंतत्रप्राप्तिप्रसांक्षोदित्युपस्कारकत्वे
नपुनर्विशेषणीयंतत्त्वव्यंग्यत्वेनप्रागुक्तायामसूयालंकारोपमायामव्याप्त्यापत्तेः॥विशिष्टोपमादिस्थलेविशे
षणाद्युपमोपनीतवाच्यसिध्यंगतयागुणीभूतव्यंग्यत्वंसिद्धस्यार्थस्योपस्करणाभावात्तुनालंकारत्वमितिनकाप्य १३२
संगतिः॥यच्चापिसेयमुपमासंक्षेपतस्त्रिविधाक्वचिद्वैचित्र्यमात्रविश्रांता॥यथासच्छिन्नमूलःक्षतजेनरेणुरि

त्यादौक्वचिदुक्तार्थोपपादनपरा॥यथाअनंतरत्नप्रभवस्येत्यादाविति तैरेवद्राविडशिरोमणिभिरभ्यधीयत॥त
दप्यहृद्यमेव॥नयनेशिशिरीकरोतुमेशरदिंदुप्रतिमंमुखंतवेतिवाच्योपस्कारिकायाशरदिंदूपमायाअक्रोडीक
रणात्॥अलंकारभूतोपमासुस्ववैचित्र्यमात्रविश्रांततायाउपमायाःसंग्रहेकोनामध्वन्यमानायास्तस्यानिरासा
याव्यंग्यत्वविशेषणदानदुराग्रहः॥अहोमहदेवेदमन्याय्यंयदलक्षणीयायाःसंग्रहोलक्षणीयायाश्चासंग्रह
इतिप्राचीनानांतूपमासामान्यंलक्षयतांध्वन्यमानायाइवास्याअपिसंग्रहोनानुचितः॥नतुस्वयत्नेनध्वन्यमा
नोपमांनिरस्यकंठरवेणालंकारभूतोपमालक्षकस्य॥यदिचप्रबंधोव्यंग्योपस्कारकत्वेनेयंसंगृह्यतइत्युच्यते
॥तदास्ववैचित्र्यमात्रविश्रांतेतिस्वोक्तिविरुद्धास्यात्॥अनंतरत्नप्रभवस्येत्यत्रगुणसमूहसमानाधिकरणएको

र॰गं॰ दोषोदोषत्वेननस्फुरतीत्यस्यार्थस्यपूर्वार्द्धप्रतिप्रतिपादितार्थसमर्थनात्मकस्यसामान्यरूपस्यविशेषरूपोदा
१३३ हरणप्रदर्शनमंतरेणसम्यगनाकलनादिंदुकिरणसमानाधिकरणोंकउदाहृतोनतूपमानतयानिर्दिष्टः
सामान्याद्विशेषस्यभेदाभावेनोपमितिक्रियायाअनिष्पत्त्याउपमालंकृतेरत्रानवतारादुदाहरणालंकारोयम
तिरिक्तः॥यथैकोयणचीतिवाक्यार्थस्यसामान्यस्यविज्ञानायोकारेदध्युदकेकारस्येवेतिवाक्यांतरेणैनहि
शेषउदाह्रियतेतनहृदत्रापीतितत्प्रसंगेविवेचयिष्यामः॥यच्चाप्यादीक्षितैर्लक्षितायांतुनैवंभेदास्तस्यांसाधारण
धर्मस्यानुगामितानियमादित्युक्तं।तन्न॥मलयइवजगतिपांडुर्वल्मीकइवाधिधरणिधृतराष्ट्रइत्यत्रानुगामि
धर्मस्याप्रत्ययाच्चंदनानांपांडवानांसर्पाणांदुर्योधनादीनांचबिंबप्रतिबिंबभावस्यैवप्रतिपत्तेः॥नचशब्देनोपा

DR BHAU DAJI MEMORIAL

त्तत्वंबिंबप्रतिबिंबभावेतत्रमित्याग्रहोविदुषामुचितःश्रौतत्वार्थत्वाभ्यांबिंबप्रतिबिंबभावस्यद्वैविध्यौचित्यात्॥अत
एवाप्रस्तुतप्रशंसादौप्रकृताप्रकृतवाक्यार्थयोरौपम्यमवयवबिंबप्रतिबिंबभावमूलंसंगच्छते॥इयमपिरूपकव
त्केवलानिरवयवामालारूपनिरवयवासमस्तवस्तुविषयसावयवा॥एकदेशविवर्त्तिसावयवाकेवलश्लिष्ट
परंपरितामालारूपश्लिष्टपरंपरिताकेवलशुद्धपरंपरिता॥मालारूपशुद्धपरंपरितावेत्यष्टधातत्रोपमायांकेवल
त्वंमालानंतर्गतत्वंनिरवयवत्वंचोपमांतरनिरपेक्षत्वंद्वयंचशतशःप्रागेवोदाहृता॥मालारूपनिरवयवायथा
॥आल्हादिनीनयनयोरुचिरैर्दवीवकंठेष्कृताशिशिरांबुजमालिकेव॥आनंदिनीहृदिगतारसाभावनेवसाने
वविस्मृतिपथंममजातुयाति॥यथावाकलेवसूर्यादमलानवेंदोः॥कृशानुपुंजात्प्रतिमेवहैमी॥विनिर्गतायात्तु

र॰गं॰ निवासमध्यादार्याबभौराघवधर्मपत्नी॥पूर्वमनुगामिनाधर्मेणाभिन्नदेशकालावछेदेनात्रतुबिंबप्रतिबिंबभाव
१३४ मापन्नेनैकदेशकालावछेदनेतिविशेषः॥अत्राधिकदीप्तिरूपेवाक्यार्थेउपमेउपस्कारिकेआत्यंतिकविनाशहेतुत्वे
नदेदीप्यमानत्वेनचसाधारण्येनसूर्यमंडलस्यनिष्कलंकानाभिव्यंजकत्वेनभस्मीभवनहेतुत्वेनचकृशानोर्यु
जस्यचलंकाप्रतिबिंबता॥मालारूपत्वंचात्रैकोपमेयकानेकोपमासामानाधिकरण्यात्॥समस्तवस्तुविषया
सावयवार्था॥कमलतिवदनंयस्यामलयंत्यरुकामृणालतोबाहूः।शैवालतिरोमावलिरद्भुतसरसीवसाबालायथा
वा॥ज्योत्स्नाभमंजुहसितासकलकलाकांतवदनश्रीः॥राकेवरम्यरूपाराघवरमणीविराजतेनितरां॥अत्रसर्वेषा १३४
मुपमानानांशब्देरेवाभिधानात्समस्तवस्तुविषयात्रंगोपमाभिर्निष्पाद्यमानत्वाच्चसांगाभवति॥एकदेशविव

र्त्तिनीसावयवायथा॥मकरप्रतिमैर्महाभटैः॥कविभीरत्नसमैःसमन्विता।कविनामृतकीर्त्तिचंद्रयोस्त्वमिहो
वीरमणेप्रसिकारणं॥अत्रोत्तरार्धेउपमितसमासएव॥विशेषणसमासवेद्यस्यतादात्म्यस्यतादात्म्यंप्रकृते
नुपयोगात्॥राज्ञाजलधेरुपमाशब्देनानभिहिताप्यंगोपमाभिराक्षिप्ताप्रतीयतइत्येकदेशोविवर्त्तनादेकदेश
विवर्त्तिनीकेवलश्लिष्टपरंपरितायथा॥नगरोत्तर्महींद्रस्यमहेंद्रमहितश्रियः॥करालयेखलक्षीबादेवाइ
वधिरेजिरे॥अत्रश्लेषोपस्थापितेनरुमेरुणामदिरागारस्योपमाक्षीबानांदेवोपमायाउपायइतिश्लिष्टपरंपरि
ताअन्योन्योपायतारूपस्यैवपरंपरितत्वमिहपरिभाषणात्मालारूपताविरहाच्चकेवला॥मालारूपश्लिष्टपरं
परितायथामहीभृतांरवलगणेरत्नसानुरिवस्थितः।त्वंकाव्येवसुधाधीशविपपर्वेवराजसे॥अत्रश्लेषोपस्थापि १

ताभ्यांपर्वतशृङ्गाभ्यांराजकाव्ययोरुपमेमेरुवृषपर्वभ्यांराज्ञउपमयोरुपायः॥नन्वत्रपर्वतानामिवराज्ञांशृङ्गद्व
यकवित्वेइत्येवंरूपाउपमाकथंप्रत्येतुंशक्याउपमानोपमेयशब्दयोः पार्थक्याभावादितिचेत्॥श्लेषेह्येकशब्दो
पात्तत्वेनरूपेणाभेदाध्यवसानस्येवतेनैवसाधर्म्येणसादृश्याध्यवसानस्यापिसुवचत्वात्तस्यैवचप्रकृतेप्रयो
ज्योपमानुकूलत्वात्॥केवलशुद्धपरंपरितायथा॥राजायुधिष्ठिरोनाम्नासर्वधर्मसमाश्रयः॥द्रुमाणामिवलो
कानांमधुमासइवाभवत्॥मालारूपशुद्धपरंपरितायथा॥मृगतांहस्यन्मध्येवृक्षतांचपटीरयन्॥ऋक्षतां
सर्वभूपानांत्वमिंदषरिभूतले॥उपमानयोःपरस्परउपमेययोश्चानुकूल्येउपमयोरेपोपायतानिरूपिता॥प्रा १३९
तिकूल्येउपायतायथाराजादुर्योधनोनाम्नासर्वैसत्वभयंकरः॥दीपानामिवसाधूनांझंझावातइवाभवत्॥अ

त्रोपमानयोर्दीपझंझावातयोरन्योन्यमुपमेययोश्चसाधुदुर्योधनयोःप्रातिकूल्येप्युपमयोःपरस्परमानुकूल्यादु
पायतैव॥एवंसरोजतामथसतांशिशिरत्तवताधुनांदर्भतांसर्वधर्माणांराज्ञानेनविदर्भितमित्यादौमालारूप
तायामपि॥उपमेयानांस्वोपमानानुपमानानामुपमाननयारशनोपमा॥यथावागिवमधुरामूर्त्तिर्मूर्त्तिरिवा
त्यंतनिर्मलाकीर्त्तिः॥कीर्त्तिरिवजगतिसर्वस्तवनीयामतिरमुष्यविभोः॥इयंधर्मभेदे॥धर्मैक्येतु॥भूधराइवमत्ते
भामत्तेभाइवसूनवः॥सुताइवभटास्तस्यपरमोन्नतविग्रहाः॥धर्मलोपेतुनस्येत्यस्योनंतरंभटाइवयुधिव्रजाइ
तिबोध्यं॥इयमेवंभेदाप्राचीनैर्भेदेगुणनेवागगोचरंभूमानंभजमानानेयत्तामर्हतीतिदिक्॥एषैवचयदासक
लेनवाक्येनप्राधान्येनध्वन्यतेतदापरिहितालंकारभावाध्वनिव्यपदेशहेतुः॥अस्यांचालंकारव्यपदेशःकदा

र॰गं॰ प्यलंकारभावमप्राप्तेषु मंजुषागतेषु कटकादिष्विवालंकुर्वाणगतधर्ममात्रसंस्पर्शनिबंधनः॥ क्वचिदसौ शब्द
१३६ शक्तिमूलानुध्वननविषयः क्वचिदर्थशक्तिमूलानुध्वननविषयः आद्योयथा॥ अविरलविगलद्दानोदकधारासा
रसिक्तधरणितलः धनदाग्रमहितमूर्त्तिर्जयतितरां सार्वभौमोयं॥ यथावाविमलतरमतिगभीरं सुपवित्रं स
त्ववत्करसं॥ हंसावासस्थानं मानसमिह शोभतेनितरां॥ अत्रानेकार्थानामपि शब्दानां प्रकरणेन प्रकृतेपि
शक्तिसंकोचे तन्मूलकेन ध्वननेन प्रतीयमानस्य दिग्गजसरोवररूपस्यार्थांतरस्याप्रस्तुतस्याभिधानं माभूदि
तिप्रकृताप्रकृतयोरुपमानोपमेयभावः प्रधानवाक्यार्थतया कल्प्यते॥ द्वितीयोयथा अद्वितीयरुचात्मानं दृष्ट्वा १३६
किं चेर्ष्यसि॥ भूमंडलमिदं सर्वं केनवापरिशोधितं॥ अत्र मृदादिपदाप्रयोगादसूयादेरप्रत्ययान्मुख्यतयोपमे

यव्यंग्या॥ अथात्र सादृश्यस्य पदार्थांतरत्वे बोधोविचार्यते॥ अरविंदसुंदरमित्यत्रारविंदनिरूपितसादृश्यप्र
योजकं लक्ष्यते॥ तच्च सुंदरपदार्थैकदेशे नसौंदर्येणाभेदसंसर्गेणान्वेति॥ तेनारविंदनिरूपितसादृश्यप्रयो
जकाभिन्नसौंदर्यवदभिन्नमिति धीः॥ निपातातिरिक्तनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादभेदानुसरणं॥ ए
कदेशान्वयस्तु देवदत्तस्य नप्तेत्यादाविवात्राप्यभ्युपेयः समासस्यैव विशिष्टार्थे शक्तिरित्येके॥ अरविंदमेव लक्ष
णया सर्वार्थबोधकं सुंदरपदं तु तात्पर्यग्राहकमित्यपरे॥ तथा अरविंदमिव सुंदरमित्यत्रेवार्थे सादृश्येऽरविंद
स्य निरूपितत्वसंसर्गेणान्वयस्तस्य च प्रयोजकता संसर्गेण सौंदर्ये॥ एवं चारविंदनिरूपितसादृश्यप्रयोज
कसौंदर्यवदभिन्नमिति॥ अरविंदमिवेत्यत्र त्वरविंदनिरूपितसादृश्यवदिति॥ निपातजन्योपस्थितिप्रयोज्यप्रका

र॰गं॰ रतानिरूपितविशेष्यतानिपातजन्योपस्थितिप्रयोज्यविशेष्यतान्यतरभिन्नविशेष्यतान्यतरभिन्नविशेष्यतासंस
१३७ र्गेणनामार्थप्रकारकबोधएवविशेष्यतयाविभक्तिजन्योपस्थितेर्हेतुत्वादिवार्थस्यनञर्थस्येवभेदसंसर्गेणना
मार्थविशेष्यत्वेविशेषणत्वेचनदोषः॥अरविंदमिवभातीत्यत्रारविंदनिरूपितसादृश्यस्यप्रकारतासंबंधेन
धात्वर्थेन्वयादरविंदसादृश्यप्रकारकधीर्विशेष्यइति॥नत्रैवसौंदर्येणेतिधर्मोपादानेतृतीयार्थःप्रयोज्यत्वंधा
त्वर्थेभानेइवार्थेसादृश्येवान्वेति॥तेनसौंदर्यप्रयोज्यारविंदनिरूपितसादृश्यप्रकारकाधीविशेष्यइति॥तथागज
इवगच्छतिपिकइवरौतिइत्यादौउपमानपदानांतत्तकर्तृकक्रियायांलक्षणयांगजादिगमनादिसदृशगमना १३७
द्यनुकूलकृतिमानितिनतुघटोनपश्यतीत्यत्रघटान्वितभावस्यदर्शनेकर्मतासंसर्गेणान्वयवारणायधात्व

र्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणशाब्दबोधंप्रतिविशेष्यतयाविभक्त्यर्थोपस्थितेर्हेतुत्वं॥एवंचगजइ
वगच्छतिपिकइवरौतीत्यादौनेवाद्यर्थस्यसादृश्यस्यधात्वर्थेन्वयःसंभवति॥तस्माद्गजादिसादृश्यस्यगमनादिक
र्तर्येवान्वयःस्वगमनादिकर्तृत्वेनसमानधर्मेणइत्थमेवव्याख्यातवादशिरोमणिव्याख्यातृभिरपिसिद्धांतितमि
तिचेन्नैवंगजइवगच्छतीत्यत्रसादृश्यस्यविधेयतयाप्रतीतेरपलापापत्तेः॥गजइवपुरुषःसगच्छतिपुरुषोयःसग
जइवगच्छतीतिवाक्याभ्यांभिन्नप्रतीत्योरानुभविकत्वात्॥एवंवनंगजइवगृहंदेवदत्तोगच्छतीत्यादौवनादेःसर्व
थैवानन्वयापत्तेश्च॥एवंप्रतिबिंबभूतस्यकारकमात्रस्यानन्वयोबोध्यः॥तस्माद्गजनिरूपितसादृश्यप्रयोजकगमना
श्रयइत्येवगजइवगच्छतीत्यत्रधीःकारकोपादानेतूपमानपदानांतत्कर्तृकक्रियायांलक्षणयेत्येवसाधु॥नत्वत्रा

र॰गं॰ गुक्तकार्यकारणाभावस्यधात्वर्थनिष्ठेत्यादेर्व्यभिचारः॥तस्यानंगीकारात्॥अंगीकारेत्वतूष्णीमासात् पृथगित्याद्य
१३९ र्थानांधात्वर्थान्वयोनुभवसिद्धोपलपनीयःस्यात्कथंतर्हिघटोनपश्यतीत्यादौघटाभावंपश्यतीतिनान्वयबोधः
धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणान्वयबोधंप्रतिनञ्जन्योपस्थितिमात्रस्यप्रतिबंधकत्वकल्पना
त्॥धात्वर्थस्यनामार्थभिन्नत्वेनविशेषणंतुद्वयोस्तुल्यंतेनपाकोनयागइत्यादौनव्यभिचारइत्यलमप्रसक्तविचारेण
॥अथारविंदतुल्योभातीत्यत्रकथंधीःतुल्यपदार्थस्यनिपातभिन्ननामार्थत्वेनधात्वर्थेभेदेनान्वयायोगात्॥तादृश
तुल्यत्वादेर्भानोद्देश्यतावच्छेदकत्वेभानमात्रविधेयतायांविवक्षितार्थाप्रतीतिःनचतुल्यपदेनतुल्यप्रकारलक्षण १३९
योपस्थापितोह्यभेदेनधात्वर्थेन्वेष्यतीतिवाच्यं॥क्रियाविशेषणत्वेनारविंदतुल्यशब्दस्यनपुंसकत्वापत्तेरितिचेत्॥

व्याकरणकर्तृस्वस्यसिद्धानुवादकत्वेनस्तोकंपचतीत्यादिमात्रविषयत्वेनक्रियाव्ययविशेषणानांक्लीबतेष्यतइत्यस्यो
पपत्तेः॥धातोरेवलक्षणयासकलार्थबोधकत्वमितरस्यतात्पर्यग्राहकतेत्येपिकेचित्॥अरविंदवत्सुंदरमित्यत्र
वतेस्तेनतुल्यमितिविहितस्यसादृश्यवदर्थकस्यसादृश्येलक्षणातस्यसुंदरपदार्थैकदेशेनसुंदरत्वेनान्वयादरविं
दमिवसुंदरमित्यत्रेवबोधः॥एकत्रशक्त्यापरत्रलक्षणयाचसादृश्यप्रतिपादनाद्वेत्यार्थीचेत्॥अरविंदवन्मुखमि
त्यत्रत्वरविंदनिरूपितसादृश्यवदभिन्नमिति॥अरविंदवत्सौंदर्यमस्येत्यत्रारविंदशब्दस्यारविंदसौंदर्येलाक्षणि
कतयाअरविंदसौंदर्यनिरूपितसादृश्याधिकरणमेतत्संबंधिसौंदर्यमितिमुखारविंदसौंदर्ययोःसादृश्यबोधे
शाब्देतयोरभेदाध्यवसायादभिन्नधर्ममूलापश्चान्मुखारविंदयोरपिसादृश्यधीः॥अरविंदेनतुल्यमित्यत्रतती

र॰गं॰ यार्थोनिरूपितत्वंतस्यचसादृश्येन्वयादरविंदनिरूपितसादृश्याश्रयाभिन्नमितितत्रैवसौंदर्येणेतिधर्मनिर्देशेतृ
१३९ तीयार्थःप्रयोज्यत्वंतेनारविंदनिरूपितसौंदर्यप्रयोज्यसादृश्यवदभिन्नमिति॥अरविंदमाननंचसममित्यत्रप्रथ
मंशाब्दात्सादृश्यवदभिन्नमितिबोधेपश्चान्मानसीव्यंजनिकीवापरस्परनिरूपितसादृश्यस्यप्रतीतिःप्रसिद्धनि
स्तरूपितसादृश्यस्यवाबिंबप्रतिबिंबभावापन्नेतुकोमलातपशोषणाभ्रसंध्याकालसहोदरःकुंकुमालेपनो
यातिकाषायवसनोयतिरित्यादौकुंकुमालेपनादिविशिष्टोयतिःकोमलातपादिविशिष्टसंध्याकालस
दृशाभिन्नइतिशाब्दबोधेपश्चात्सादृश्यप्रयोजकधर्माकांक्षायांश्रुतानांकोमलातपादीनामुपमानोपमेय
विशेषणानांसादृश्यमूलेतादात्म्याध्यवसानेसाधारणत्वनिष्पत्तिः॥कुंकुमालेपकाषायवसनाभ्यामयंय

DR BHAU DAJI

तिरित्यत्रकुंकुमालेपकाषायवसनयोरसाधारणयोरपिसाधारणत्वज्ञानजननद्वाराकल्पनीयसादृश्यनि
ष्पत्तिप्रयोजकत्वात्प्रयोज्यत्वेनसादृश्येन्वयः॥एकदेशान्वयःपुनरेषुपक्षेष्वगतिकतयाश्रीयतइत्युक्तमेवसा
दृश्यस्यसमानधर्मरूपत्वेतुअरविंदसुंदरंवदनमित्यत्रलक्षणयारविंदवृत्तिसमानधर्मःप्रतीयतेतस्यचाभे
देनसुंदरपदार्थैकदेशेनसुंदरत्वेनान्वयः॥अरविंदमिवसुंदरमित्यत्रारविंदार्थआधेयतासंसर्गेणइवपदा
र्थेनसमानधर्मेणान्वेतिशेषंप्राग्वत्॥सौंदर्येणारविंदेनसममित्यत्रसौंदर्योत्तरतृतीययाधान्येनधर्मीत्यत्रैवा
भेदार्थिकयाअन्यथाचनिरूपितत्वार्थिकयासौंदर्याभिन्नमरविंदनिरूपितंयत्सादृश्यंतद्वदभिन्नमितिधीः।क्यङः
र्थान्वारोधर्ममात्रं॥तस्यचोपमानपदेनलक्षणयोपस्थिततन्निरूपितसादृश्यप्रयोजकतासंसर्गेणाभेदेनवा

र·गं· विशेषणं॥विशेष्यंचाश्रयतयोपमेयंक्वजर्थाच्चारश्चानुरूपक्रियादिरित्यैदिक्॥तत्रेवादीनांद्योतकत्वमेवनवाच
१४० कत्वंनिपातत्वादुपसर्गवत्॥द्योतकत्वंचस्वसमभिव्याहृतपदांतरेणशक्त्यालक्षणयावाताद्दृशार्थबोधनेना
स्यर्थग्राहकत्वेनोपयोगित्वमितिवैयाकरणाः॥उपसर्गाणांद्योतकत्वमावश्यकमन्यथाउपास्यतेगुरुरनुभू
यतेरूक्षमित्यादौगुर्वादेर्लेनाभिधानंनस्यात्॥धात्वर्थकर्मताविरहात्।इवादीनांतुवाचकत्वंबाधकाभावा
त्।प्रागुक्तहेतुस्त्वप्रयोजकत्वात्नसाधकः॥अन्यथाअव्ययत्वादिहेतुनाअव्ययमात्रस्यैवद्योतकत्वापत्तिरि
तिनैयायिकाः॥अथास्याश्चमत्कारापकर्षकंयावत्तत्सर्वमपिदोषःकविसमयप्रसिद्धिराहित्यंउपमानोपमेय १४०
योर्जात्याप्रमाणेनलिंगसंख्याभ्यांवाननुरूप्यंबिंबप्रतिबिंबभावेधर्माणामुपमानोपमेयगतानांन्यूनाधिक्यं॥

अनुगामितायामनुपपद्यमानकालपुरुषविध्याद्यर्थकत्वंएवमादि॥क्रमेणयथात्रफुल्लकल्हारनिभामुखश्रीर
दच्छदःकुंकुमरम्यरागः॥नितांतशुद्धातवतन्विवाणीविभातिकर्पूरपरंपरेव॥मुनिःश्ववदयंभातिसततंपर्यट
न्महींविनिवृत्तक्रियाजातःश्वापिलोकेशुकायते॥सरसिप्लवदाभातिजंबीरंसुपचेलिमं॥आदिकारणतोयेघ
इवब्रह्मांडमंडलं॥एतस्यैवकिंचित्पदव्यत्यासेब्रह्मांडस्योपमेयतायांचायमेवदोषः॥द्राक्षेवमधुरंवाक्यंच
रितंकौमुदीयथा॥संदेवार्द्राणिचेतांसिसुधेवसुमहात्मनां॥वामाक्षिन्नवामांगोभासतेभाललोचनः॥शंपया
संपरिष्वक्तोजीमूतइवशारदः॥अत्रजीमूतगतोभालस्थलोचनप्रतिबिंबोनोपात्तइतिन्यूनत्वं॥भगवान्भवइति
कृतेतुबिंबस्यैवाभावात्नप्रतिबिंबापेक्षेतिसाधु॥विष्णुवक्षःस्थितोभातिनितरांकौस्तुभोमणिः॥अंगारकइवा

नेकतारके गगनांगणे॥ अत्र तारकाणां बिंबाभावादाधिक्यं॥ विष्णोर्वक्षसि मुक्तालिभासुरे भाति कौस्तुभ इत्य
र्थे तु न दोषः॥ अत्र विशेषणयोर्मुक्तालितारकागणयोर्बिंबप्रतिबिंबभावेन वक्षोगगनांगणयोर्विशेषणयोर्बिं
बप्रतिबिंबभावस्तन्मूला चोपमा॥ राजराजराजस्य राजहंसः करस्थितः॥ हस्तनक्षत्रसंसक्त इव पूर्णो निशा
करः॥ अत्र राजेति प्रतिपाद्यभूतकालावच्छिन्नक्रियाविशेषे राजहंसस्यान्वय इव न निशाकरस्येत्यनुपपद्यमा
नकालघटितत्वं धर्मस्य॥ यथावा॥ रणांगणे रावणवैरिणो विभोः शराः समंतात्तु ज्वलिता विरेजिरे निदाघम
ध्यंदिनवर्तिनोंबरे सहस्रभानोः प्रखराः करा इव॥ यथावा॥ आगतः पतिरितीरितं जनैः श्रृण्वती चकितमेत्य देह १४९
लीं कौमुदीव शिशिरीकरिष्यते लोचने मम कदा मृगेक्षणा॥ अत्र श्रृण्वतीति शत्राप्रत्यापितेन श्रवणसमका

लमेव प्रियाया देहल्यागमनमित्यर्थेनातिशयोक्त्यात्मनागमितस्त्वरातिशयः तद्गतमौत्सुक्यातिशयं पुष्णाति॥
कौमुद्युपमा तु तत्परिपोषितं प्रधानीभूतप्रियगतमौत्सुक्यं चकितमित्यागमनविशेषणमपि वस्तुतो विचार्य
माणमीक्षणविशेषणीभवत्तस्यैवानुकूलमिति स्थिते भविष्यत्कालावच्छिन्नशिशिरीकरणस्य साधारणधर्मस्यो
पमेयान्वितत्वमिव नोपमानान्वितत्वं॥ एतावती महीमालमंडले वनिमंडन॥ तारकापरिषन्मध्ये राजन्नू राजे
व राजसे॥ अत्र क्रियायां संबोध्योपमेयान्वय इव नोपमानान्वयः॥ राजेव संभरतं कोशं केदारमिव कर्षकः॥ भवं
तं त्रायतां नित्यं भयेभ्यो भगवान् भवः॥ अत्र प्रार्थ्यमानत्राणकर्तृत्वमुपमेये भवोपमानयो राजकर्षकयोर्नास्ति
तयोस्त्राणकर्तृत्वस्य सिद्धत्वात्॥ यदि तु त्रायत इति प्रार्थनानिर्मुक्तं त्राणकर्तृत्वमुच्यते न दा धर्मस्य साधारण

 त्वान्न दोषः॥ अथत्रायतइतिप्रार्थ्यमानतानिर्मुक्तेपित्राणकर्तृत्वेनसाधारण्यंप्रार्थ्यमानतायाइवविधेयता
 नुवाद्यत्वयोर्भेदकत्वादितिचेत्सत्यं॥ इहहि धर्मलोपरहितायामुपमायांधर्मवाचकशब्दप्रतिपाद्यैःप्रार्थनाभू
तभविष्यद्वर्त्तमानत्वादिभिर्विशेषणैर्विशिष्टस्यधर्मस्योपमानोपमेयसाधारण्याभावेप्रयोजकाभावान्नोप
मानिःपत्तिरितिनिर्विवादं तत्रविधेयत्वानुवाद्यत्वाभ्यांशब्देनानिवेदिताभ्यांविषयताभ्यांविशिष्टस्यधर्मस्यय
दिनास्तिसाधारण्यंमास्तुनामतत्पुदासीनैर्विशेषणैर्विशिष्टस्यसाधारण्यमपेक्षितमपितुधर्मवाचकशब्दनिवे
दितैः॥ एवंचंद्रवत्सुंदरंमुखमित्रापिसुंदरत्वस्योपमानेनुवाद्यत्वेउपमेयेचविधेयत्वेपिनसाधारण्यहानिः
॥ ननुनीलांचलेनसंवृतमाननमाभातिहरिणनयनायाःप्रतिबिंबितइवयमुनागभीरनीरांतरेणांकइत्यत्रो

पमानेचंद्रेयोगमर्यादयाभासमानएणरूपांकआननरूपोपमेयविशेषणरयंबिंबाभावात्कस्यप्रतिबिंबः
स्यादतआधिक्यापादकतयादोषः न चहरिणनयनसदृशस्यनयनस्योपादानात्तस्यैवबिंबस्यप्रतिबिंबःस्या
दितिवाच्यं॥ तादृशनयनस्यबहुव्रीह्यर्थकांताविशेषणतयाननविशेषणत्वेनबिंबत्वाभावादितिचेन्नैवंशब्देना
ननविशेषणत्वेनतादृशनयनस्याप्रतिपादनेपिकांताविशेषणत्वेनैवाननवृत्तित्वस्यापिप्रतिपत्तेः॥ नह्यान
नमविपर्यीकृत्यकांतांविशिष्टमीष्टेनयनमनुभवविरोधात्॥ तथापिसमभिव्याहारविशेषमापन्नेनशब्देना
प्रतिपादनाच्छाब्दबोधेनाननस्यनयनविशिष्टत्वेनविशेषयत्वमितिचेत्॥ संसर्गत्वेबाधकाभावात्स्वविशिष्टा
ननसंसर्गेणतादृशनयनस्यकांताविशेषणत्वात्यथाकथंचिदुपमेयवृत्तिताज्ञानस्यबिंबताप्रयोजकत्वात्॥

न

र॰गं॰ यद्वा॥कांताविशेषणतया तादृशनयनयोः शाब्दबोधेवृत्ते पश्चादानुपूर्व्यतद्विशेष्यतया वैयंजनिके मानसेवा
१४३ बोधेबाधकाभावात्॥एवंचतादृशवाक्यप्रयोज्यज्ञानेउपमेयविशेषणतयाभानस्यतादृशनयनस्यबिंबस्यस
त्वात्तदर्थंचचंद्रगतस्यैणरूपस्यांकस्यप्रतिबिंबतयोपादानमावश्यकमेवेतिनाधिक्यदोषः॥कविसमयसि
द्धतयाचमत्कारापकर्षकत्वाभावेनलिंगभेदोपिनात्रदोषः एवंचकविसमयसिद्धतयाप्रकारांतरेणवाप्रागु
क्तानांदोषाणांचमत्कारानपकर्षत्वेनास्यैवदोषत्वं॥यथा॥नवांगमेवांगणेपिगंतुमेषप्रकंपते॥इयंसौराष्ट्र
जानारीमहानटइवोद्धटा॥एवमन्यत्रापिज्ञेयं॥शेषंस्मरणालंकारप्रकरणेविकल्पप्रकरणेचवक्ष्यामइत्यु १४३
मानिरूपणसंक्षेपः॥इतिरसगंगाधरेउपमाप्रकरणं॥अथास्याएवभेदउपमेयोपमानिरूप्यते॥तृतीय

सदृशव्यवच्छेदबुद्धिफलकवर्णनविषयीभूतंपरस्परमुपमानोपमेयभावमापन्नयोरर्थयोःसादृश्यंसुंदरमु
पमेयोपमा॥तडिदिवतन्वीभवतिभवतीवेयंतडिल्लतागौरीत्यत्रपरस्परोपमायामतिव्याप्तिवारणायभूतां
तं॥अत्रतानवगौरिमभ्यामनुगामिधर्माभ्यांप्रयोजितमुपमाद्वयंनतृतीयसदृशंव्यवच्छिनत्ति॥एकेनधर्मे
णैकप्रतियोगिकेपरानुयोगिकेसादृश्येनिरूपितेपरप्रतियोगिकस्यैकानुयोगिकस्यापितेनधर्मेणसादृश्य
स्यार्थतःसिद्धतयाशब्देनपुनस्तदुक्तिःस्वनैरर्थक्यपरिहारायतृतीयसदृशव्यवच्छेदमाक्षिपति॥प्रकृतेचैके
नतानवरूपेणधर्मेणतडित्प्रतियोगिकेकामिन्यनुयोगिकेसादृश्येनिरूपितेतेनैवधर्मेणकामिनीप्रतियो
गिकस्यापितडिदनुयोगिकस्यसादृश्यस्यार्थतःसिद्धावपिगौरत्वेनधर्मेणसिद्धिरितितदर्थमुपात्तस्यद्वितीय

र॰गं॰ सादृश्यवचनस्य न तृतीयसादृश्यव्यवच्छेदफलकत्वं सदृशीन वतान्वि निर्मिं विधिनानेति समस्तसंमतं ॥ अथचे
१४४ भिपुणं विभाव्यते मतिमारोहति कौमुदीमनागिति तृतीयसदृशाव्यवच्छेदफलकवर्णनविषये सादृश्ये ऽतिव्या
प्तिवारणाय परस्परमिति लिंगवचनानंदादिदुष्टसादृश्यवारणाय सुंदरमिति ॥ अथेयमुदाह्रियते ॥ कौमुदी
भवत्प्रतीविभाति मे कांतराक्षि भवतीव कौमुदी ॥ अंबुजेन तुलितं विलोचनं लोचनेन च तवांबुजं समं ॥ इयं
चतावद्विविधा ॥ उक्तधर्मा व्यक्तधर्मा च ॥ उक्तधर्मा तावदनुगाम्यादिभिः प्रागुक्तैर्धर्मैरनेकधा ॥ अनुगामीधर्मो
यथा ॥ निखिले निगमकदंबे लोके घष्येष निर्विवादोर्थः शिव इव गुरुर्गरीयान् गुरुरिव सोयं सदाशिवो पि तथा १४४
॥ बिंबप्रतिबिंबभावमापन्नो यथा ॥ रमणीयस्तबकयुता विलसितवक्षोजयुगलशालिन्यः ॥ लतिका इव तावनि

तावनिता इव रेजिरे लतिकाः ॥ अत्र रमणीयत्वविलसितत्वाभ्यां विशेषणाभ्यां युतत्वशालित्वाभ्यां च विशेष्याभ्यां
परस्परं वस्तुप्रतिवस्तुभावमापन्नाभ्यां संपुटितः स्तबकस्तनरूपः परस्परं बिंबप्रतिबिंबभावापन्नो धर्मः ॥ उप
चरितो यथा ॥ कुलिशमिव कठिनमसतां हृदयं ज्ञानी हि हृदयमिव कुलिशं ॥ प्रकृतिः सतां स्रमधुरा सुधेव हि प्र
कृतिरिव च सुधा ॥ केवलशब्दात्मको यथा ॥ अविरतचित्तो लोके वृक इव पिशुनोत्र पिशुन इव च वृकः ॥ भारतमिव स
च्चित्तं सच्चित्तमिवाथ भारतं सरूपं ॥ व्यक्तधर्मो यथा ॥ वारिधिराकाशसमो वारिधिसदृशस्तथाकाशः सेतुरिव
स्वर्गंगा स्वर्गंगेवांतरा सेतुः ॥ अत्रापारत्वादिर्व्यज्यमानो धर्मः सर्वापि स्फुटे वाक्यभेदे प्रपंचिता ॥ आर्थे तु वाक्य
भेदे ॥ अभिरामतासदनमंबुजाननेनयनद्वयं जनमनोहरं तव ॥ इयति प्रपंचविषयेपि वेधसे तुलबामुदंचतिप

र॰गं॰ रस्परात्मना॥अत्रपरस्परात्मनातुलनामुदंचतीतिसंक्षिप्ताद्वाक्यादिदमेतेनैतच्चानेनतुलनामुदंचतीतिवा
१४९ क्यद्वयंद्विकारकमुल्लसते॥एवंपूर्णालुप्तादयोप्यस्याउपमायाइवप्रायशःसर्वेपिभेदाःसंभवंतितेचामुयैवदि
शासकृद्बुद्धिभिरुन्नेतुंशक्याइतिनेहनिरूप्यंते॥चित्रमीमांसाकृत्तुप्राचीनलक्षणमव्याप्त्यतिव्याप्त्यादिभिर्दूष
यित्वाअन्योन्येनोपमाबोध्याव्यक्त्यावृत्त्यंतरेणवा॥एकधर्माश्रयायास्यांसोपमेयोपमामतेतिस्वयंलक्षणमा
हुः॥अस्यार्थःसंक्षेपेणसपदकृत्यस्तदुक्तरीत्यासहृदयानांसौकर्यायोच्यते॥अन्योन्येत्यन्योन्यप्रतियोगिकत्व
विशिष्टाव्यक्त्याव्यंजनव्यापारेणवृत्त्यंतरेणशक्त्यावाबोध्यावेद्या॥एकधर्माश्रयाएकधर्मप्रयोज्यायाउपमासो १४९
उपमेयोपमामतेत्यन्वयः॥अन्योन्येतिविशेषणादिदंतच्चसममित्युभयविश्रांतोपमायानिरासः॥अत्रान्योन्यप्र

DR BHAU DAJI

तियोगिकत्वस्यव्यंजनव्यापारमात्रगम्यत्वेनोपमायाश्चशक्तिवेद्यतयापरस्परनिरपेक्षेणैकेनव्यापारेणान्योन्य
प्रतियोगिकत्वविशिष्टायास्तस्याअबोधनात्॥परस्परंनैरपेक्ष्यस्यात्रवाकारेणाभिधानात्॥एकधर्माश्रयेतिवि
शेषणाद्दंतोभिरभ्रैरिवद्यौर्घनसंन्निभैर्गजैश्चद्यौरिवाभ्रैरितिकस्यचित्पद्यस्यार्थेपरस्परोपमायांनातिव्याप्तिस्तत्रो
पमायांनानुगतप्रयोजकधर्मैक्याभावाद्भूतलोपमानिकायांप्रयोजकस्यरजस्सामनुगामिधर्मस्यनभस्तलोपमा
निकायांप्रयोजकस्यघनसदृशगजानांबिंबप्रतिबिंबभावापन्नधर्मस्यचभेदात्॥व्यक्तेतिचविशेषणंव्यंग्योप
मेयोपमासंग्रहार्थमितीदमुपमेयोपमात्वप्रयोजकंलक्षणमिति॥तन्न॥अहंलतायाःसदृशीत्यखर्वगर्वंगौरांगि
गर्वंनकदापियायाःगवेषणेनालमिहापरेषामेषापितुस्मातवतावदस्ति॥अत्रअन्योन्यप्रतियोगिकत्वविशिष्टा

र॰गं॰ याउपमायास्तनुत्वादिरूपैकधर्माश्रयायाव्यत्यंतरेणशक्याबोधनादुपमेयोपमात्वापत्तेः॥नचात्रान्योन्यप्रतियो
१४६ गिकत्वमुपमायांनप्रतीयते॥लतादिसंबंधिसादृश्याश्रयत्वस्यैवास्मत्पदार्थेन्वयादितिवाच्यं॥मुखस्यसदृशश्चं
द्रश्चंद्रस्यसदृशंमुखमित्युपमेयोपमायामव्याप्तेःअहंलतायाइत्यत्रोपमेयोपमाभ्रांतिर्नुमर्हति॥गर्वमात्रनि
रासपरत्वेनोत्तरार्द्धेउपमायास्तृतीयसदृशव्यवच्छेदाप्रतिपत्तेः॥अतएवान्यान्यपित्वसदृशगनिसंत्येवत्तेषांग
वेषणेनकिंफलमित्येतदर्थकंगवेषणेनेत्युत्तरार्द्धसंगच्छतेतृतीयसब्रह्मचारिव्यवच्छेदाद्युपमेयोपमाजीवि
तमित्यालंकारिकसिद्धांतात्॥अन्यथाभुवस्तलमिवव्योमकुर्वन्व्योमेवभूतलमित्यत्राप्युपमेयोपमात्वनिवार १४६
णप्रयासवैयर्थ्यापत्तेः॥नचतृतीयसदृशव्यवच्छेदफलकत्वमुपमाविशेषणंवाच्यं॥विशेषणांतरवैयर्थ्यापत्तेः॥

विशेषणव्यावृत्त्यानामाभुक्तिनिकविशेषणेनैववारणात्‌अन्योन्यप्रतियोगिकत्वविशिष्टाउपमाएकव्यक्तिमात्रवे
द्येत्यप्ययुक्तमेवखमिवजलंजलमिवखमित्यादौखजलयोः सादृश्यान्वयेप्रतियोगित्वस्यसंसर्गत्वेनव्यक्त्यविष
यत्वात्व्यक्तिवेद्यानांपदार्थानांसंसर्गोव्यक्त्यवेद्यइत्यभ्युपगमात्॥अन्यथाप्रकारतापत्तेः॥यदप्यलंकारसर्व
स्वकृतोक्तं॥द्वयोःपर्यायेणतस्मिन्नुपमेयोपमा॥तच्छब्देनोपमानोपमेयत्वप्रत्यवमर्शः॥पर्यायोयौगपद्याभावः
॥अतएवात्रवाक्यभेदइति॥तन्न॥अत्रद्वयोरितिव्यर्थंएकस्योपमानोपमेयात्मकेगगनंगगनाकारमित्यादौवा
क्यभेदाभावेनपर्यायाभावादेवाप्रसक्तेः॥यदिचस्फुटत्वार्थंउपमानोपमेयत्वयोग्यतासंपादकलिंगवचनभेद
राहित्यप्रतिपत्त्यर्थंकविसमयप्रसिद्धिस्फोरणार्थंवाद्वयोरितिग्रहणंस्यादथापिप्रागुदीरितेअहंलतयासदृशी

रं॰गं॰ त्यखर्वमितिपद्येप्रतिपाद्यायामुपमायामतिव्याप्तेः॥ नह्यत्तुनायुगपदुन्मीषितेनतावन्नसद्यःपरस्परतुला
१४७ मधिरोहतांद्वैप्रस्यंदमानपरुषेतरतारमंतश्चक्षुस्तवप्रचलितभ्रमरंचपद्ममिति॥ कालिदासपद्येप्रति
पाद्यायामुपमानोपमेययोर्युगपदुपमानोपमेयभावायामुपमेयोपमायांवाक्यभेदाभावादव्याप्तेश्च।
नचात्राधाननःशब्दैकेपिपर्यवसितोवाक्यभेदोस्तीतिवाच्यं॥ तथापिसवितावियवतिविधुरपिसवितरति ताये
न ग दिनंतियामिन्यःयामिनयंतिदिनानिचसुखदुःखवशीकृतेमनसीतिकस्यचित्कवेःपद्येपरस्परोपमायाम
तिव्याप्तेः॥ नचेयमुपमेयोपमेतिशक्यतेवक्तुं॥ सुखसमयेदुःखदोपिसुखयति॥ दुःखसमयेचसुखदोपि १४७
दुःखयतीत्येतावन्मात्रस्यार्थस्यविवक्षितत्वात्तृतीयसदृशव्यवच्छेदाप्रतीतेः॥ एवंरजोभिःस्यंदनोद्धूतैर्गजै

श्चघनसंनिभैः॥ भुवस्तलमिवव्योमकुर्वन्व्योमेवभूतलमित्यत्रपरस्परोपमायामतिव्याप्तेःसदृशांतरव्यवच्छेद व्याप्तेश्च। व॰
कत्वेनविवक्ष्यमाणेतुनस्मिन्नस्मदुक्तएवपर्यवसानं॥ यच्चविमर्शनीकारेणोक्तं॥ सचवाक्यभेदःशाब्दोआर्थ
श्च॥ शाब्दोयथा॥ रजोभिःस्यंदनोद्धूतैरित्यादि॥ अस्याश्चोपमानांतरतिरस्कारएवफलंअतएवोपमेयेनोपमे
त्यन्वर्थाभिधत्वमिति॥ तन्नुच्छं॥ नहिरजोभिःस्यंदनोद्धूतैरित्यत्रोपमानांतरतिरस्कारःप्रतीयते॥ द्वयोरुपमयोरेक
धर्मकत्वाभावादाद्यायाउपमायाअनुगामिधर्मप्रयोज्यत्वाद्वितीयायाश्चबिंबप्रतिबिंबभावापन्नधर्मप्रयोज्य
त्वात्॥ यदपिपरस्परमुपमानोपमेयत्वमुपमेयोपमेतिलक्षणंविधायसवितावियवतीत्यादिप्रागुक्तंपद्यंरत्ना
करेमोदाहारितच्चतदीयेनैवसपोपमानांतरनिषेधार्थइतिग्रंथेनविरुद्धं॥ नह्यस्मिन्पद्येउपमानांतरनिषेधः॥

रु॰गं॰ प्रतीयतेद्वन्तिप्रागेवावेदनात्॥प्रतीयतएवेतिचेत् पुरेऽपिपृच्छ्यहृदयमेवस्वकीयमित्यलंविवादेन॥इयंचोपमे न—
१४९ योपमायदिकस्याप्यर्थस्योत्कर्षाधायिकातदालंकारोन्यथातुस्ववैचित्र्यमात्रपर्यवसितेति।एवमलंकारांतरेपि
न— ज्ञेयं॥अथध्वन्यमानेमुदाह्रियते॥गांभीर्येणातिमात्रेणमहिम्नापरमेणच॥राघवस्यद्वितीयोऽब्धिरंबुधेश्चापि
राघवः॥द्वितीयशब्दस्यसादृश्यविशिष्टेशक्त्यभावाद्व्यक्तिरेव॥यदितुलक्षणातदेदमुदाहरणं॥सुधासमुद्रंनवर
म्यवाणीवाचंद्रमाचंद्रसुधासमुद्रः॥माधुर्यमध्यापयितुंदधानेखर्वेतरामानरगर्वमुद्रां॥अत्रवागादिकर्तृक
स्यपरस्पराध्यापनस्यबाधान्माधुर्यसंक्रांतिविशेषस्यलक्षणयाबुध्यमानस्यप्रयोजनंस्वप्रयोज्यान्योपमानोपमे १४९
भावः। यभावः॥अथदोषाः॥तत्रतावत्प्रागुक्तायावंतउपमायादोषाअनुक्ताश्चविस्तृतिभयात्तेसर्वेप्युपमात्वाक्रांतत्वाद

स्यामपिबोध्याः॥अयंपुनरन्योपिदोषोयदेकोपमावैलक्षण्यमपरस्यामुपमायांयथा॥कमलमिववदनमस्या
त्र वदनेनसमंतथाकमलं॥अत्रश्रौत्यार्थीकृतवैलक्षण्यं॥कमलतिवदनंतस्याकमलंवदनायतेजगति॥क्विप्क्य
ङ्कृतमत्रवैलक्षण्यं॥एवमत्रैवपद्मंवदनायतइतिनिर्माणेवक्त्रायतइतिवाउपमानोपमेयवाचकवैलक्ष
ण्यं॥एवंप्रकारेष्वनेकेवैलक्षण्ययदिसहृदयोद्वेजकंतदादोषः॥इत्युपमेयोपमाप्रकरणं॥अथानन्वयः॥द्विती न४
यसदृशव्यवच्छेदफलकवर्णनविषयीभूतंयदेकोपमानोपमेयकंसादृश्यंतदनन्वयः॥सचकस्याप्युपस्कारकत्वे
लंकारोऽन्यथात्वलंकार्यः॥लोहितपीतैःकुसुमैराचितामाभातिभूभृतःशिखरंदावज्वालनज्वालैःकदाचिदाकीर्णमि
वसमये॥अत्रलोहितपीतकुसुमाचितंभूभृतःशिखरंस्वेनैवकस्मिंश्चित्समयेदावज्वालाकीर्णेनोपमीयतइति

र०गं० तत्सादृश्यवारणायभूतांतं॥इदंवाप्रत्युदाहरणं॥नखकिरणपरंपराभिरामंकिमपिपदांबुरुहद्वयंमुरारेः॥
१४९ अभिनवसुरदीर्घिकाप्रवाहप्रकरपरीतमिवस्फुटंचकास्ति॥अत्रापिनखकिरणपरंपराभिरामंहरेःपादांबुजंस्वा
त्मनैवसुरदीर्घिकाप्रवाहप्रकरपरीतेनोपमीयते॥संप्रतिसुरदीर्घिकाप्रवाहेणभगवत्पदांबुरुहस्यसंबंधा
भावात्सुरनिम्नगोत्पत्तिकालावच्छिन्नस्यतस्योपमानतावगमायाभिनवेतिप्रवाहविशेषणं॥नह्यत्रसादृश्यव
र्णनस्यफलंद्वितीयसब्रह्मचारीव्यवच्छेदः॥तस्याप्रतिपत्तेः॥स्तनाभोगेपतन्भातिकपोलात्कुटिलोलकः॥सुधांशु
बिंबतोमेरोर्लंबमानइवोरगइतिकल्पितोपमानिकायामुपमायामतिप्रसंगकारणायेकोपमानोपमेयकमि १४९
मिति॥अत्रासतउपमानस्यकल्पनयासदुपमानंनास्तीतिद्वितीयसदृशव्यवच्छेदस्याप्रतीतिः॥उदाहरणसं

मृतलहर्याख्येमदीयेगंगास्तवे॥कृतक्षुद्राघौघानथसपदिसंतप्तमनसःसमुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिव
हाः॥अपिप्रायश्चित्तप्रसरणपथातीतचरितान्नरानूरीकर्तुंत्वमिवजननित्वंविजयसे॥यथावा॥इयत्तिप्रपंच
विषयेतीर्थानिकियंतिसंतिपुण्यानि॥परमार्थतोविचारेदेवीगंगातुगंगेवपूर्वपद्येवाच्योनुगामीधर्मइहतुव्यं
ग्यइतिविशेषः॥तुशब्दोत्रतीर्थांतरेभ्योवैलक्षण्यंप्रतिपादयंस्तत्प्रयोजकंभगवद्वासुदेवात्मकत्वंधर्मंश्रीगंगायां
व्यनक्ति॥उभयत्रापिश्रीगंगाविषयकरत्युपस्कारकत्वादलंकारोयंबिंबप्रतिबिंबभावापन्नोधर्मस्त्वत्रनास्ति॥
तस्मिंश्चसतिकिंचिद्धर्मावच्छिन्नेनस्वेनसादृश्यस्यधर्मांतरावच्छिन्नेस्वस्मिन्नन्वयेबाधकाभावात्सदृशांतरव्यव
छेदाप्रतिपत्तेश्चानन्वयएवनस्यात्॥सचपूर्णोलुप्तश्चेतितावद्द्विविधः॥पूर्णस्तूपमावत्षड्विधोपिसंभवति॥यथा॥

र०गं० गंगाहृद्या यथा गंगा गंगा गंगेव पावनी।।हरिणा सदृशो बंधुर्हरितुल्यः परो हरिः।।गुरुवद्गुरुराराध्यो गुरुवद्गौ
१५० रवं गुरोः।।लुप्तेपि धर्मलुप्तः पंचविधोपि संभवति।।प्रागुक्ते सार्धपद्ये धर्मवाचकपदमपहाय पदांतरादाने त
थावाचकलुप्ता।।रामायमाणः श्रीरामः सीता सीता मनोहरा।।ममांतःकरणे नित्यं विहरे तां जगद्गुरु इत्यत्र क्यङ्
समासयोः।।एवं लंकापुरादति नरां कुपितः फणीव निर्गत्य जातु पतनापतितैः परीतः क्रुद्धं रणे सपदि दाशरथिं
दशास्यः संरब्धदाशरथिदर्शमहो ददर्श।।एवं कर्तृणमुलादावप्यूह्यं।।अंबरत्यंबरं यद्वत्समुद्रोपि समुद्रति
।।विक्रमार्कमहीपालत्वथात्वं विक्रमार्कसि।।अत्र वाक्यार्थावयवेष्वनवयेषु धर्मवाचकयोर्लोपः मुख्यवाक्या १५०
र्थस्त्वनन्वयफलेन निरूपमत्वेन समानधर्मेणप्रयोजिता मालोपमेवैषा च ज्ञानसौकर्यायात्रैव निरूपिता।।

एतावति प्रपंचेस्मिन्सदेवासुरमानुषे।।केनोपमीयतां तज्ज्ञै रामा रामपराक्रमः।।अत्र वाचकधर्मोपमानानां लो
पः।।अत्र चोपमानलुप्तादयो ये भेदा असंभवाद्दृष्ट्वत्वाच्च नोदाहृताः।।यस्तु तेन तदेकदेशेनावसितभेदेनया
उपमानतया कल्पितेन सादृश्यमनन्वयः।।अत्र च उपमेयेनैवोपमानतया कल्पितेनोपमेयस्यामुख्यावर्णा
समानसाधर्म्य पादमेकोऽनन्वयः।।उपमेयैकदेशस्य तत्र थैवोपमानताकल्पनमपरः।।उपमेयस्यैव प्रतिबिं
बत्वादिनाभेदेनावसितस्य तत्वकल्पनं तृतीयः।।आद्यो यथा युद्धेर्जुनोऽर्जुन इव प्रथितप्रताप इत्यादि।।द्विती
यो यथा।।एतावति प्रपंचे सुंदरमहिलासहस्रभरितेपि।।अनुहरति सुभग तस्या वामार्धं दक्षिणार्धस्य।।तृती
यो यथा।।गंधेन सिंधुरधुरंधरवक्त्रमैत्रीमैरावणप्रभृतयोपि नेशिक्षितास्ते।।तत्वं कथं त्रिनयनाचलरत्नभी

र०गं० त्रिस्वीयप्रतिछविपुपूथयन्तित्वेमेपि।।एषूपमानांतरविरहस्त्रिविधपिभेदेषुगम्यतइत्यन्वयस्त्रीविधइतिरत्नाक
१९१ रेणोक्तं।।तन्न।।उपमानांतरविरहप्रतीतिमात्रादेवान्वयत्वेस्तनाभोगेपतन्नूभातीत्यत्रोपदर्शितायाःकल्पितो
पमायांअपितथात्वापत्तेः।।यद्यर्थातिशयोक्तावतिप्रसक्तेश्च।।नादृशप्रतीतिफलकैकोपमानोपमेयकसाद
श्यस्यतत्वेपुनः।।कथंनामवामार्धदक्षिणार्धयोर्भिन्नयोःसादृश्येतद्भेदत्वोपन्यासः।।नचसतदेकदेशैस्तत्र
तिबिंबश्चेत्येतदन्यतमप्रतियोगिकसादृश्यमनन्वयइतिकाव्याप्तिरतिव्याप्तिर्वेतिवाच्यं।।नास्त्यन्वयोस्येतियो
योगार्थविरहेणतदेकदेशसादृश्यस्यानन्वयपदार्थत्वासंभवात्।।अपिच।।अनन्वयेगगनंगगनाकारमि
त्यादौउपमेयस्यैवोपमानत्वेनोपन्यासादुपमेयातिरिक्तोपमानविरहप्रतीतिद्वारानिरुपमत्वमुपमेयगतं

DR BHAU DAJI MEMORIAL

सिध्यति।।अत्रचवामार्धस्योपमेयस्यदक्षिणार्धरूपोपमानकथनेननिरुपमत्वंविरुद्धमेव।।कांतायांत्वतिनि
न२ रूपमत्वप्रत्ययस्तुनान्वयस्यफलंभवितुमर्हतितस्याअनुपमेयत्वात्।।यदपिचालंकारसर्वस्वकृताऽनन्वय
ध्वनित्वमत्रभविष्यत्यन्यथालंकारध्वनेर्विषयापहारःस्यादित्युक्तं।।तदपितुच्छं।।अस्याप्युपमाननिषेधफल
कमभिन्नोपमानोपमेयकंसादृश्यंस्वरूपमित्युक्तं।।प्रकृतेचवामार्धदक्षिणार्धयोस्तद्बाधितमित्युक्तमेव।।
कांतायांपुनरुपमाननिषेधस्यव्यंग्यत्वेपिअभिन्नोपमानोपमेयकसादृश्यस्यस्वरूपस्याप्रत्ययात्।।नहिनि
रूपमत्वप्रतीतिषुसर्वास्वभिन्नोपमानोपमेयकसादृश्यप्रतीतिपूर्वकत्वमितिनियमोस्ति।।कल्पितोपमातिश
योक्त्योरसमालंकारध्वनौचव्यभिचारात्।।तस्मान्नास्त्येवात्रानन्वयगंधोपि।।यच्चायमनन्वयोव्यंग्योप्यस्ति।।

र०गं० यथाअद्ययाममगोविंदजातात्वयिगृहागते।।कालेनैषाभवेत्प्रीतिस्तवैवागमनात्पुनः।।अत्रगृहागतंश्री
१९२ कृष्णंप्रतिविदुरवाक्ये।।इयंत्वदागमनप्रभवाप्रीतिर्बहुकालव्यवहितेपुनरपित्वदागमनेनैवभवेन्नान्येने
त्युक्तिभंग्यात्वदागमनप्रभवप्रीतेःसैवसदृशीनान्यितरप्रभवेतिव्यज्यतइत्यप्पयदीक्षितेनाभिहितंतदपिन।
अमुष्यास्त्वदागमनप्रभवायाः।प्रीतेर्वारांतरत्वदागमनप्रभवाप्रीतिःसदृशीतिप्रत्ययस्यसर्वजनसिद्धतया
श्रीकृष्णागमनजन्यप्रीतिसामान्यावयवयोर्द्वयोःप्रीतिव्यक्त्योःसादृश्यस्याबाधितत्वाद्योगार्थाभावेनानन्वय
एवनायंभवितुमर्हति।।स्वस्मिन्स्वसादृश्यस्यान्वयाभावादनन्वयइत्युपमाप्रकरणेस्वयमेवाभिधानात्।। १९२
उपमेयस्यप्रीतिव्यक्तिविशेषस्यसदृशांतरव्यवच्छेदेबाधात्तादृशप्रीतिसामान्यस्यचावयविनोनिरूपमनयाप्र

तीयमानस्यानुपमेयत्वात्पूर्वोदाहरणतुल्यमेवैतत्।क्वचिदवयवयोरुपमाप्यवयविगतनिरूपमत्वव्यं
जिकेतिस्थितेसामान्यस्यश्रीकृष्णागमनप्रीतेःसैवसदृशीतिमध्येस्वसादृश्यप्रत्ययकरणंपुनर्नसहृदयहृ
दयमारोढुमिष्टे।।रत्नाकरोक्तस्यैवानन्वयप्रकारस्याप्रव्यंग्यतेत्यपिनयुक्तंतस्यप्रागेवदूषितत्वात्।।प्रकृते
वाच्यत्वात्स्वयमनन्वयप्रकरणेतस्यप्रतिपादनविरहाच्च।।इदंपुनरनन्वयध्वन्युदाहरणं।।पृष्टाःखलुपर
पुष्टाःपरितोदृष्टाश्चविटपिनःसर्वे।।भेदेनभुविनपेदेसाधर्म्यंतेरसालमधुपेन।।अत्रभेदेनेत्युक्त्याअभेदे
नसादृश्यमन्वयात्मकंतुपेदइतिध्वन्यते।।यथावा।।नगेभ्योयांतीनांकथयतटिनीनांकतमयापुराणांसंह
र्तुःसुरधुनिकपर्दोधिरुरुहे।।कयावाश्रीभर्तुःपदमितरयाक्षालिसलिलेस्तुलालेशोयस्यांतवजननिदी

र०गं० येनकविभिः॥अत्रकयावात्वदितरयाश्रीभर्त्तुःपदंसलिलैरक्षालियस्यांकविभिस्तवतुलालेशोपिदीयेतेत्य
१९३ र्थेनत्वयिपुनःसलिलक्षालितश्रीरमणचरणायांनवतुलादीयेतैवेत्यर्थोनन्वयात्माश्रीगंगागतनिरूपम
त्वपर्यवसायीइतरपदमहिम्नाव्यज्यते॥इतिरसगंगाधरेनन्वयप्रकरणं॥सर्वथैवोपमानिषेधोअसमाख्या
लंकारः॥अयंचानन्वयेव्यंग्योपितच्चमत्कारानुगुणतयारूपकदीपकादावुपमेवनपृथगलंकारव्यपदेशंभ
जते॥वाच्यतायांतुस्वातंत्र्येणचमत्कारितयापृथक्व्यपदेशभाक्॥यथा॥भूमीनाथशहावदीनभवतस्तु
ल्योगुणानांगणैरेतद्भूतभवत्प्रपंचविषयेनास्तीतिकिंब्रूमहे॥धातान्नतनकारणैर्यदिपुनःस्रष्टिंनवांभाव १९३
येत्तस्यादेवतथापितावकतुलालेशंदधानोनरः॥यथावाभुवनत्रितयेपिमानवैःपरिपूर्णेविबुधैश्चदानवैःन

भविष्यतिनास्तिनाभवन्नपयस्तेभजनेतुलायदं॥अत्रराजस्तुत्युत्कर्षकत्वादसमालंकारः॥आत्यंतिकःकाचित्क
श्चसदृशनिषेधोसमोपमानलुप्तोपमयोर्विषयः॥सर्वथैवोपमाननिषेधेनसादृश्यस्याप्रतिष्ठानात्रोपमागंधोपि
॥यत्तु कुतोमरीहसिकंटककलिआइकेअइवणाइंमालईकुसुमसरिच्छंभमरभमंतोनुयावहिसीति
नेयमुपमानलुप्तोपमा॥तस्याःसंभवदुपमानानुपादानविषयत्वात्॥अपित्वसमालंकारइतिरत्नाकरेणोक्तंत
दसत्॥मालतीकुसुमसदृशंभ्रमरभ्रमन्नापिनप्राप्स्यसीत्युक्त्यावर्त्ततांनामतत्सदृशंकापि॥त्वयातुदुःप्रापमे
वेतिप्रत्ययादात्यंतिकोपमाननिषेधाभावादुपमानलुप्तोपमैवेयंभवितुमर्हतिनासमालंकारः॥अन्यथामाल
तीकुसुमसदृशंनास्त्येवंब्रूयान्नतुप्राप्स्यसीति॥अथासमालंकारध्वननेनैवचमत्कारोपपत्तेरनन्वयस्य

 पृथगलंकारताकथमितिचेत्॥सत्यं॥दीपकादेरप्युपमाभिव्यक्त्यैवचमत्कारोपपत्तौकथंनामपृथगलंका
१९४ कारत्वमितितुल्यं॥नचदीपकादावुपमायाव्यंग्यत्वेपिगुणीभावात्प्रकृतेतुस्वसादृश्यस्यस्वस्मिन्नतितमांति
रस्कारेणासमालंकारस्यैवमुख्यतयाध्वननाद्वैषम्यमितिवाच्यंयथाहिदीपकसमासोक्त्यादौगुणीभूतव्यंग्यस
त्वेप्यलंकारत्वंनहीयतेएवमनन्वयेप्रधानव्यंग्यसत्वेपीतिनकिंचिद्विरुद्धं॥अनन्वयशरीरस्यसादृश्यमात्रस्य
वाचत्वेनवाच्यालंकारव्यपदेशोपिसुरूएव॥दीपकाद्यलंकारकाव्येगुणीभूतस्यव्यंग्यस्यसत्वादस्तुनामगुणी
भूतव्यंग्यत्वंध्वनित्वंपुनर्नक्काप्यलंकृतिकाव्येदृष्टमितिचेत्पर्यायोक्तसादृश्यमूलाप्रस्तुतप्रशंसादिकाव्ये १९४
ध्वनित्वस्यस्फुटत्वात्॥प्रांचस्तुनेदमलंकारांतरमित्यप्याहुः॥अयंचासमालंकारोव्यज्यमानोयथा॥मयित्व

दुपमाविधौवसुमतीशवाचंयमेनवर्णयतिमामयंकविरितिक्रुधंमारुथाः॥चराचरमिदंजगज्जनयतोवि
धेर्मानसेपदंनहिदधेनरांतवखलुद्वितीयोनरः॥अत्रयएतावंतंसमयंविधातुर्मानसंनाधिरूढःसोग्रेपि
मानाभावाभारोहेनेदःसर्वथैवनास्तीतिगम्यते॥एवंचव्यज्यमानोप्यसमोत्रप्रधानीभूतराजस्तुत्युत्कर्षकत
यालंकारएव॥मुख्यतयाध्वन्यमानोयंयथा॥सदसद्विवेकरसिकैरालोक्यसमस्तलोकमथकविभिःगणि
तागगनलतादेगणनायांतन्वितवसदृशी॥अयंकचिदुपमानस्यनिषेधात्कचिच्चसाक्षादुपमायाएव॥अद्य
स्तूयदर्शितोद्वितीयोयथा॥पूर्णमसुरैरसातलममरैःस्वर्गोवसुंधराचनरैः॥रघुवंशवीरतुलनातथापिखलु
जगतिनिरवकाशैव॥एवंपूर्णतयालुप्ततयाचास्यापियथासंभवंभेदाऊह्याः॥इतिरसगंगाधरेअसमालं

 लंकारः॥सामान्येननिरूपितस्यार्थस्यसुखप्रतिपत्तयेतदेकदेशंनिरूप्यतयोरवयवावयविभावउच्यमा
 नउदाहरणं॥अर्थांतरन्यासवारणायोच्यमानइति॥वचनंचेवयथानिदर्शनदृष्टांतादिशब्दैःकाव्येषुस्फु
टं॥नचेवयथाशब्दयोःसादृश्यवचनयोरवयवावयविभावेविशेषसामान्यात्मकेनास्तिवृत्तिरितिवाच्यं॥लक्ष
णायाःसाम्राज्यात्॥अन्यथाप्युत्प्रेक्षाबोधकतापिदुर्घटास्यात्॥उदाहरणं॥अमितगुणोपिपदार्थोदोषेणै
केननिंदितोभवतिनिखिलरसायनराजोगंधेनोग्रेणलशुनइव॥नचात्रपदार्थलशुनयोरुपमाशक्यावक्तुंत
योःसामान्यविशेषभावेनसादृश्यस्यानुल्लासात्तथात्वेत्विवादिशब्दानामिवसदृशादिशब्दानामप्यलंकारे
ऽस्मिन्प्रयोगःस्यात्॥यथावा॥अतिमात्रबलेषुचापलंविधानःकुमतिर्विनश्यति॥त्रिपुरद्विषिवीरतांव

हन्नवलिप्तःकुसुमायुधोयथा॥अत्रत्रिपुरद्विड्वीरतेअतिमात्रबलचापलयोर्विशेषो॥अवलेपकुसुमायुधौ
चकुमतिरित्यत्रगुणप्रधानयोः॥यथावाउपकारमेवकुरुतेविपद्गतःसद्गुणोनितरांमूर्छागतोमृतोवानिदर्श
नंपारदोत्ररसः॥दृष्टांतोवाइवादिशब्दप्रयोगेसामान्यार्थप्राधान्यंवाक्येक्यंनिदर्शनादिशब्दप्रयोगेतुविशेष
प्राधान्यंवाक्यभेदश्चेतिविशेषः॥तत्रतावदमितगुणइतिपद्येक्रियाप्रधानमाख्यातमितिनयेमितगुणपदार्थ
कर्तृकमेकदोषहेतुकंनिंदाविषयीभवनंनिखिलरसायनराजलशुनकर्तृकोग्रगंधहेतुकनिंदाविषयीभ
वनावयवकमिति धीः प्रथमांतविशेष्यकबोधवादिनांतूग्रगंधहेतुकनिंदाविषयीभवनाश्रयतादृशलशु
नावयवकःतादृशपदार्थएकदोषहेतुकनिंदाविषयीभवनाश्रयइति॥अत्रापिविशेषवाक्यार्थेक्रियान्वयोमुख्य

र॰गं॰ तेहेत्वंतरान्वयार्थं।।अन्यथातादृशलघुनावयवकेतादृशपदार्थएवक्रियान्वयेनोपपत्तिःस्यात्।।एवंयथाशद्ध
१९६ स्खलेपि।।उपकारमेवेत्यत्रतुविपद्गताभिन्नःसद्गुणउपकारानुकूलकृतिमानितिपूर्ववाक्यार्थः।।अत्रास्मिन्नर्थे
मूर्छांगतोमृतोवापारदोनिदर्शनमेकदेशइत्युत्तरवाक्यार्थोगुणइतिकेषांचित्।।इतरेषांतुतादृशकर्तृकाता
दृशक्रियेतिपूर्ववाक्यार्थेतादृशःपारदएकदेशइति।।प्रधानावयवस्येवगुणावयवस्यापिविशिष्टार्थावयवत्वा
त्घटमानयेत्यत्रनीलघटवत्।।अर्थिभिश्छिद्यमानोपिसमुन्निर्नव्यकंपत्रविनाशेप्युन्नतःस्थैर्यंनजहातिद्रुमो
यथा।।अत्रदधीच्यालंबनायांतदीयलोकोत्तरचरितस्मरणोद्दीपितायामेतत्पद्यप्रयोगानुभावितायामेतत्प १९६
द्यनिर्मातृगतायांरतौप्रधानभूतायामर्थ्यालंबनस्तत्कृतयाच्ञाश्रवणोद्दीपितोगात्रच्छेदाभ्यनुज्ञापनानुभा

वितोधृत्यासंचारिभावेनपोषितोमुनिगतउत्साहोगुणः।।तत्रचाद्यार्धततीयचरणगतस्यार्थांतरन्यासस्यो
त्कर्षकतयास्थितस्यविवेचनद्वारालंकरणंचतुर्थचरणशकलगतंउदाहरणं।।एवमेवचानंतररत्नप्रभवस्य (त्न
यस्यहिमंनसौभाग्यविलोपिजातं।।एकोहिदोषोगुणसन्निपातेनिमज्जतींदोःकिरणेष्विवांकइतिकालिदास
पद्येपिबोध्यं।।अस्मिंश्चालंकारेअवयवावयविभावबोधकस्येवशब्दादेःप्रयोगःसामान्यविशेषयोरेकरूप
विधेयान्वयश्चार्थांतरन्यासभेदोद्वैलक्षण्याधायकइतितत्प्रकरणेनिपुणतरमुपपादयिष्यामः।।प्राञ्चस्तुना
यमलंकारोतिरिक्तःउपमयैवगतार्थत्वात्।।नचसामान्यविशेषयोःसादृश्याननुभवात्कथमुपमेतिवाच्यं।।
निर्विशेषंनसामान्यमितिसामान्यस्ययत्किंचिद्विशेषंविनाप्रकृतित्वायोगात्तादृशविशेषमादायविशेषात्त

र॰गं॰ रस्यसादृश्यांशेबाधकाभावात्॥इत्यादिभिराभिमुख्येनप्रतीयमानस्यापिसामान्यविशेषभावस्यपरिणा
१६७ मेसादृश्यएवविश्रांतेरित्याहुः॥इत्युदाहरणप्रकरणं॥सादृश्यज्ञानोद्बुद्धसंस्कारप्रयोज्यंस्मरणंस्मरणालं
कारः॥यथादोर्दंडद्वयेकुंडलीकृतलसत्कोदंडचंडध्वनिध्वस्तोद्दंडविपक्षमंडलमथत्वांवीक्ष्यमध्येरणं
॥वल्गद्गांडिवमुक्तकांडवलयज्वालावलीतांडवभ्रश्यत्खांडवरुष्टपांडवमहोकोनक्षितीशःस्मरेत्॥यथावा
भुजभ्रमितपद्दिशोद्दलितहस्तदंतावलंभवंतमरिमंडलकथनपश्यतःसंगरेकरालकुलिशाहतिस्फुटवि
भिन्नविंध्याचलोनकस्यहृदयंझटित्यधिरुरोहदेवेश्वरः॥अनयोःपद्ययोःप्रधानीभूतायाराजविषयकर
विनिष्वरनेरुत्कर्षकतयास्मरणमलंकारः॥आद्येवाच्यंद्वितीयेतुलक्ष्यमितिविशेषः॥वीररसोपिचात्रप्रधा

DR BHAU DAJI

नोत्कर्षकतयालंकारएवएकीभवत्प्रलयकालपयोधिकल्पमालोक्यसंगरगतंकुरुवीरसैन्यंसस्मारनत्रम
हिपुंगवकायकांतंनिद्रांचयोगकलितांभगवान्मुकुंदः॥अत्रतल्पनिद्रयोःस्मरणंयद्यपिनतल्पनिद्रा
सादृश्यदर्शनोद्बुद्धसंस्कारप्रयोज्यंतथापिसैन्यगतपयोधिसादृश्यदर्शनोद्बुद्धपयोधिविषयकसंस्कारजन्यप
योधिस्मरणाधीनत्वाद्भवत्येवयत्किंचित्सादृश्यदर्शनोद्बुद्धसंस्कारप्रयोज्यंनहिसादृश्येस्मर्यमाणसंबंधित्वंवि
वक्षितं॥एवंवाच्ययोस्तल्पनिद्रास्मरणयोरेनत्कारएतयाआक्षिप्तस्यपयोधिस्मरणस्यवाविशेषेणसंग्रहा
यलक्षणेजन्यत्वमपहायप्रयोज्यत्वमुपात्तं॥क्वचित्तुसदृशाग्रज्ञानोद्बुद्धसंस्कारजन्यंसदृशविषयकमेवस्मरण
मलंकारः॥भुजगेंद्रनिद्रादिस्मृतिस्तुनालंकारइत्याहुः॥इतएवनिजालयंगतायावनितायागुरुभिःसमाव

र०गं० तायाः परिवर्त्तितकंधरं नतभ्रुस्मयमानं वदनांबुजं स्मरामि ॥ अत्रस्मरणंचिंतोद्बुद्धसंस्कारप्रयोज्यत्वान्नालंका
१९८ रोव्यंग्यत्वविरहाच्चनभावः ॥ एवंदरानमत्कंधरबंधमीषन्मिमिलीतस्निग्धविलोचनाब्जं अनल्पनिश्वासभराल
साग्याः स्मरामिसंगंचिरमंगनायाः इत्यापिस्मृतिर्नभावोनाप्यलंकारः ॥ व्यंग्यस्यैवव्यभिचारिणोभावत्वात् यथा ॥
सावैकलंकविधुरामधुराननश्रीः ॥ अयंचालंकारिकाणांसंप्रदायोयत्सादृश्यमूलकत्वेस्मरणंनिदर्शनादिवदलं
कारस्तथास्यव्यंग्यतायांभावस्तयोरभावेतुवस्तुमात्रं अप्पयदीक्षितास्तु ॥ स्मृतिःसादृश्यमूलायावस्त्वंतरसमाश्रया
स्मरणालंकृतिः सास्यादव्यंग्यत्वविशेषिता ॥ यथा ॥ अपितुरगसमीपादुत्पतंतंमयूरंनसरुचिकलापंबाणलक्ष्यी १९८
चकार ॥ सपदिगतमनस्कश्चित्रमाल्यानुकीर्णेरतिविगलितबंधेकेशपाशेप्रियायाः ॥ यथा ॥ दिव्यानामपिकृतवि

स्य
स्मयांपुरस्तादंभस्तःस्फुरदविंदचारुहस्तां ॥ उद्वीक्ष्यश्रियमिवकांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्यशौरिः ॥
एकत्रसदृशदर्शनात्तत्सदृशकर्णिकास्मृतिरितरत्रसदृशदर्शनात्तत्सदृशलक्ष्मीसंबंधिनोजलनिधिमंथनस्य
स्मृतिः ॥ उभयत्रापिसादृश्यमूलकवस्त्वंतरस्मृतित्वमविशिष्टं सदृशान्यसदृशसाधारण्यार्थतयालक्षणेवस्त्वंत
रग्रहणमर्थवत् ॥ सौमित्रेननुसेव्यतांतरुतलंचंडांशुरुज्जृंभतेचंडांशोर्निशिकाकथारघुपतेचंद्रोयमुन्मी
लति ॥ वत्सैतद्विदितंकथंनुभवताधत्तेकुरंगंयतः क्वासिप्रेयसिहाकुरंगनयनेचंद्राननेजानकि ॥ अत्रश्रुतकु
रंगसंबंधिनस्तन्नयनस्यस्मरणात्तत्सदृशमीतानयनस्मृतिस्तत्संबंधिसितास्मृतिश्चेति ॥ किंत्वेषाव्यंग्याअ
लंकार्यभूताचतद्वाच्यत्यर्थमव्यंग्यत्वविशेषणं ॥ अन्युच्चाःपरितःस्फुरंतिगिरयःस्फारास्तथांभोधयस्तानेतान

र०गं० पिबिभ्रतीकिमपिनश्रांतासितुभ्यंनमः॥आश्चर्येणमुहुर्मुहुस्तुतिमितिप्रस्तौमियावद्भुवस्तावद्बिभ्रदिमांस्मृ
१९९ तस्तवभुजोयाचस्तत्तोमुद्रिताःस्तूयमानभूसंबंधिनोभूभृतःस्मृतिर्नसादृश्यमूलेतिनात्रस्मरणालंकारः॥किं
तुस्मृतेःसंचारिभावस्यभूभृद्विषयरतिभावांगत्वात्प्रेयोलंकारः॥एतद्ध्वनयेसादृश्यमूलेतिविशेषणमित्याहुः॥
तदेतत्सर्वमरमणीयंयत्तावदुच्यतेसदृशासदृशयोःकेशपाशजलनिधिमंथनयोःसंग्रहायलक्षणेवस्त्वंतरग
लणमर्थवदितितत्रसादृश्यमूलास्मृतिःस्मरणालंकारइत्येतावतैवकेशपाशस्मरणस्यैवजलनिधिमंथनस्म
रणस्यापिसंग्रहाद्वस्त्वंतरसमाश्रयत्वविशेषणमनर्थकं॥एकत्रसादृश्यदर्शनोद्बुद्धसंस्कारजन्यत्वेनअप १९९
रत्रचसादृश्यदर्शनोद्बुद्धसंस्कारजलक्ष्मीस्मरणोद्बुद्धसंस्कारजन्यत्वेनचसादृश्यमूलत्वस्याविशेषात्॥नहि

सादृश्यमूलेत्युक्तेसदृशविषयेतिलभ्यतेयेन॥जलनिधिमंथनस्मृतेरसंग्रहःस्यात्॥यदपिसोमित्रेननुसेव्यता
मित्यत्रस्मृतिर्व्यंग्याअलंकार्यभूताचतद्ध्वनयेव्यंग्यत्वविशेषणमित्युक्तं॥तत्रनेयंस्मृतिरलंकार्यभूताकिंतु
ज्ञानक्यालंबनोनिशासमयोद्दीपितः॥संतापादिनानुभावितउन्मादेनसंचारिणापरिपोषितोविप्रलंभःप्रधा
नत्वेनालंकार्यः॥तस्यचस्मृतिरुत्कर्षहेतुत्वादलंकारएवातोनितरांतद्ध्वनयेव्यंग्यत्वविशेषणदानमनुचि
तं॥नहिव्यंग्यत्वालंकारत्वयोर्विरोधइतिवक्तुंशक्यंनित्यव्यंग्यानांरसभावादीनामपिव्यंग्यतायामलंकारत्वाभ्यु
पगमात्॥प्रधानव्यंग्यव्यावृत्त्यर्थंपुनरुपस्कारकत्वंसर्वेष्वप्यलंकारलक्षणेषुदेयमितिप्रागेवावेदितं॥यदप्यु
क्तमत्युच्चाःपरितःस्फुरंतिगिरयइत्यत्रस्मृतेःसंचारिभावस्यभूभृद्विषयरतिभावांगत्वात्प्रेयोलंकारइतितन्नोभा

र॰गं॰ वस्यभावाद्यंगतायांप्रेयोलंकारत्वंनह्यत्रस्मृतिर्भावः तस्याःस्मरतिनावाचकेनाभिधानात्॥ नहिवाच्यस्यव्यभि
१६० चारिणोभावत्वंवक्तुंयुक्तंव्यभिचार्यंजितोभावइतिसिद्धांतविरोधात्॥ तथाचोक्तंसर्वस्वकृताप्रेयोलंकारस्य
तु सादृश्यव्यतिरिक्तनिमित्तोत्थापितास्मृतिर्विषयस्तत्रापिविभावाद्याम्मूरितत्वे॥ यथाअहोकोपेपिकांतंमुखमि
ति॥ नतुस्वशब्दनिवेद्यत्वे॥ यथा॥ अत्रानुगोदंमृगयानिवृत्तस्तरंगवातेनविनीतखेदः॥ रहस्त्वदुत्संगनिषण्णमू
र्द्धास्मरामिवानीरगृहेषुसुप्तमित्यादावितिं॥ ननुभावाद्यंगीभूतभावत्वंनप्रेयोलंकारलक्षणमपितुभावाद्यंगी
भूतसंचारितत्वमात्रंतथाचप्रकृतेस्मरणस्यस्वशब्दनिवेद्यत्वेनभावत्वविरहेपिसंचारित्वानपायात्प्रेयोलंकार १६०
त्वमविरुद्धमेवेतिचेदेवंतर्ह्यंगांगीभूतरूपायित्वमात्रंरसालंकारत्वंनतुव्यज्यमानत्वविशिष्टमित्यस्यापिसुवच

कु
त्वादेवंचचराचरोभयाकारजगत्कारणविग्रहं॥ कस्मांतकालसंहृद्वंहरंसर्वहरंनुमइत्यत्रक्रोधस्यस्वशब्दनि
वेदितत्वेपिदेवताविषयकरतिभावांगीभूतरूपायितानपायाद्रसालंकारतास्यात्नचेष्टापत्तिः॥ अपसिद्धां
तात्तस्माद्व्यज्यमानस्यैवरूपायिनःपरांगत्वेयथारसालंकारत्वमेवंव्यज्यमानस्यैवसंचारिणोभावाद्यंगतायां
प्रेयोलंकारत्वमितिनात्रस्मृतिमादायप्रेयोलंकारतावाच्या॥ किंतुभूविषयकरतेःपूर्वार्द्धव्यंग्यायाउत्तरार्द्धव्यं
ग्यभूभृतविषयरतिभावांगत्वाद्युक्ताप्रेयोलंकारतावक्तुं॥ उक्तंचमम्मटभट्टैरत्रभूविषयोरत्याख्योभावोराजविष
यरतिभावस्येति॥ अपिचमहदिदमाश्चर्यंयत्स्वेनैवनिर्मितःकुवलयानंदाख्यःसंदर्भोपिविस्मृतः॥ उक्तंच
तत्रविभावानुभावाभ्यामभिव्यंजितोनिर्वेदादिभावः॥ सयत्रापरस्यांगंसप्रेयोलंकारइति॥ यदपिसदृशानु

र॰गं॰ भवादृस्वंतरस्मृतिःस्मरणमित्यलंकारसर्वस्वरत्नाकरयोःस्मरणालंकारलक्षणमुक्तंतदपिन॥सदृशास्मरणा
१६१ दृदृष्टेनसंस्कारेणजनितेस्मरणेअव्याप्तेः॥यथा॥संत्येवास्मिन्जगतिबहवःपक्षिणोरम्यरूपास्तेषांमध्येमम
तुमहतीवासनाचातकेषु॥यैरध्यक्षैरथनिजसखंनीरदंस्मारयद्भिःस्मृत्यारूढंकिमपिभवतिब्रह्मकृष्णाभिधा
नं॥अत्रचचातकदर्शनादेकसंबंधिज्ञानात्उत्पन्नेनापरसंबंधिनोजलधरस्यभगवत्सदृशस्यस्मरणेनजनि
तंभगवतःस्मरणंभगवद्विषयरतिभावांगं॥यदिचसदृशानुभवादित्यपहायसदृशज्ञानादितिलक्षणेनिवे
श्यतेतदाभवत्यस्यापिसंग्रहइतिदिक्॥अथास्यध्वनिर्यथा॥इदंलताभिस्तबकानताभिर्मनोहरंहंतवनां १६१
तरालं॥सदैवसेव्यंस्तनभारवत्योनचेद्युवत्योर्हृदयंहरेयुः॥अत्रस्तबकानताभिर्लताभिस्तनभारवतीनांयुव

तीनांस्मरणमलंकार्यस्याभावादनुपसर्ज्जनंस्तनस्तबकरूपस्यबिंबप्रतिबिंबभावमापन्नस्यसाधारणधर्मस्यवा
च्यत्वेपितत्प्रयोजिसादृश्यमूलकस्यस्वशब्दवाच्यत्वविरहाद्व्यंग्यंच॥युवत्यइतिचसर्वतोक्तिन्नर्थादितिङीपिसा
धु॥यथाच॥इदमप्रतिमंपश्यसरस्सरसिजैर्वृतं॥सखेमाजल्पनारीणांनयनानिदहंतिमां॥अत्रापिसरसि
जज्ञानाधीनात्सदृशानयनस्मृतिःप्राधान्येनध्वन्यते॥अथास्मिन्स्मरणालंकारेउपमादोषाःप्रायशःसर्वए
वदोषाःविशेषतश्चानियमेनास्मिन्व्यज्यमानसादृश्यस्यशब्दवाच्यतायांदोषः॥यथा॥उपकारमस्यसाधोर्नै
वाहंविस्मरामिजलदस्य॥दृष्टेनयेनसहसानिवेद्यतेनवघनश्यामः॥अत्रस्मृत्यैवयनसादृश्यंभगवतःप्रतीमा य
नंकाव्यवृत्त्याकदर्थितं॥निवेद्यतेदेवकीतनयइतितुसाधु॥अत्रसादृश्यप्रयोजकस्यसाधारणधर्मस्यसाक्षादु
रु॰वप

र॰गं॰ पादानानुपादानयोरुपमायामिवात्रापिव्यवस्था॥ तथाहि॥ उपमायां तावत्क्वचिद्धर्मो नियमेन प्रतीयमानः
१६१ साक्षादुपादेय एव॥ यथा शंखवत्पांडुरच्छविरित्यत्र पांडुरत्वं शंखवत्पांडुरोयमित्यादौ तु नानानिषेधेषु धर्मेषु
नैनैव धर्मेण सादृश्यमित्यस्य दुरवगमत्वात्॥ सर्वत्रोपमानोपमेयसाधारणस्य श्लिष्टशब्दात्मकस्यान्यस्य वा
स्वानभिप्रेतस्य साधारणधर्मस्योपमाप्रयोजकत्वसंभवात्तद्वारणाय पांडुरत्वादिधर्मो वाच्यतां नीयते॥ यथा वा
अरविंदमिव सुंदरं मुखमित्यादौ सुंदरत्वादि॥ न नीयते च क्वचिद्धेतुरन्यस्यानुपस्थानात्प्रसिद्धेः॥ प्राबल्यात्॥
यथा॥ अरविंदमुखमित्यादौ सरव॥ अप्रसिद्धश्च धर्मोवश्यं साक्षादुपादेयो अन्यथा तस्याप्रतिपत्तौ कवेस्तदुपमा १६२
निर्माणप्रयासवैयर्थ्यापत्तेः॥ यथा नीरदा इव नैभांति बलाकाराजिताभटा इत्यादौ श्लिष्टशब्दात्मकः॥ इत्थं च

कश्चित्साधारणो धर्मः साक्षादनुपादेय एव कश्चिदुपादेयोऽनुपादेयश्च॥ कश्चिदुपादेय एवेति सहृदयसंमतः
समयः एवमुपमाजीवातुकेस्मिन्स्मरणालंकारेपि बोध्यं॥ तत्रानुगामिनो धर्मस्याध्याहारूढं भवति किमपीत्यादौ पद्ये
निवेदितमेव स्मरणं॥ बिंबप्रतिबिंबभावापन्नेपि धर्मे भुजभ्रमितपट्टिशेत्यादि निरूपितं कुलिशपट्टिशयोर्भूधरदंता
वलयोश्च बिंबप्रतिबिंबभावात्॥ उपचरितं यथा॥ क्वचिदपि कार्ये मृदुलं क्वापि च कठिनं त्रिलोकयहृदयं ते कोन स्मर
ति नराधिप नवनीतं किंच शतकोटिं॥ यथा वा॥ अगाधं परितः पूर्णं आलोक्य समलार्णवं हृदयं रामभद्रस्य सस्मा
र पवनात्मजः॥ अत्र मृदुलत्वादयो धर्मा हृदयेषूपचरिताः॥ इयांस्तु विशेषो॥ यदेकत्रानुभूयमाने स्मर्यमाणनवनी
तादेः सादृश्यस्य सिद्धिरपरत्र नु स्मर्यमाणे हृदयेऽनुभूयमानस्य समुद्रस्येति सादृश्यस्योभयाश्रयत्वात्॥ केवलशब्दा

र॰गं॰ त्मकेयथा॥ऋतुराजंभ्रमरहितंयदाहमाकर्णयामिनियमेन॥आरोहतिस्मृतिपथंतदेवभगवान्मुनिर्व्यासः
१६३ ॥अत्रभ्रमरहितशब्दोव्यासवसंतयोःसाधारणः एवमन्येपिप्रभेदाःसुधीभिरूह्यायाइहपुनर्दिङ्मात्रमुपदर्शितं
॥इतिरसगंगाधरेस्मरणालंकारनिरूपणं॥अथाभेदप्रधानेषुरूपकंतावन्निरूप्यते॥उपमेयतावच्छेदकपु
रस्कारेणोपमेयेशब्दान्निश्चीयमानमुपमानतादात्म्यंरूपकंतदेवोपस्कारकत्वविशिष्टमलंकारः॥उपमेय
तावच्छेदकपुरस्कारेणेतिविशेषणादपह्नुतिभ्रांतिमदतिशयोक्तिनिदर्शनानांनिरासः॥अपह्नुतौस्वेच्छया
निषिध्यमानत्वाद्भ्रांतिमतिचतज्जनकदोषेणैवप्रतिबध्यमानत्वादतिशयोक्तिनिदर्शनयोश्चसाध्यवसान १६३
लक्षणामूलकत्वादुपमेयतावच्छेदकस्यनास्तिपुरस्कारः॥शब्दादितिविशेषणान्मुखमिदंचंद्रइतिप्रात्यक्षिका

DR BHAU DAJI

हार्यनिश्चयगोचरचंद्रतादात्म्यव्यवच्छेदः निश्चीयमानमितिविशेषणात्संभावनात्मनोनूनंमुखंचंद्रइत्याद्यु
त्प्रेक्षायाव्यावृत्तिः॥उपमानोपमेयविशेषणाभ्यांसादृश्यलाभात्करंमनोरमारामेत्यादिश्लेषद्वारोपविषयतादा
त्म्यनिरासःसादृश्यमूलकमेवचतादात्म्यंरूपकमामनंति॥तथाचाहुः॥तद्रूपकमभेदोयउपमानोपमेययोः
॥उपमैवतिरोभूतभेदारूपकमुच्यतइति॥तच्चयत्रविषयविषयिणोरेकविभक्त्यंतत्वेननिर्देशस्तत्रसंसर्गोन्य
त्रतुशब्दार्थतयाक्वचिद्विशेषणंविशेष्यंचेतिविवेचयिष्यते॥यत्तुसादृश्यप्रयुक्तःसंबंधांतरप्रयुक्तोवायद्वान्
भिन्नयोःसामानाधिकरण्यनिर्देशःससर्वोपिरूपकंसारोपलक्षणामूलकत्वस्यतुल्यत्वेनसादृश्यप्रयुक्तस्यता
दात्म्यस्येवसंबंधांतरप्रयुक्तस्यापितादात्म्यस्यसंग्रहात्तुमौचित्यात्॥तस्माद्दुराग्रहएवायंप्राचामुपमानोपमेय

र०गं० योरभेदोरूपकंनतुकार्यकारणादिकयोरितिरत्नाकरेणोक्तं॥नच॥अपह्नुत्यादौभिन्नयोःसामानाधिकरण्यस्य
१६४ सत्वात्तत्रातिव्याप्तेः॥किंच॥सादृश्यमूलकस्मरणंस्मरणालंकारोननुचिंतादिमूलमितिभवतैवपूर्वमुदितंतत्र
यदिसादृश्यामूलकस्यापिकार्यकारणादिकयोःकल्पितस्यताद्रूप्यस्यरूपकत्वमभ्युपेयतेनदासादृश्यामूलकस्य
चिंतादिमूलस्यस्मरणस्याप्यलंकारकत्वमभ्युपेयतां॥नचस्मरणस्यभावत्वमुच्यमानंनिर्विषयंस्यादितिवाच्यं॥
तस्यव्यज्यमानविषयत्वेनोपपत्तेः॥अप्पदीक्षितास्तु॥बिंबाविशिष्टेनिर्दिष्टेविषयेयद्यनिन्हुते॥उपरंजकतामेति य—
विषयीरूपकंतदा॥अत्रबिंबाविशिष्टइतिविशेषणात्त्वत्पादनखरत्नानांपदलक्तकमार्ज्जनं॥इदंश्रीखं १६४
डलेपेनपांडुरीकरणंविधोरितिनिदर्शनायानिरासः॥तत्रविषयस्यमार्ज्जनस्यालक्तकादिरूपबिंबविशिष्टत्वात्॥

निर्दिष्टइतिविशेषणान्निगीर्णविषयायांकमलमनंभसिकमलेचकुवलयमेतानिकनकलतिकायामित्याद्यति
शयोक्तौनातिव्याप्तिः॥अनिह्नुतेनिषेधास्पृष्टइतिविशेषणादपन्हुतौनातिव्याप्तिः॥उपरंजकतामाहार्यताद्रू
प्यनिश्चयगोचरतामेतीत्यनेनससंदेहोत्प्रेक्षासमासोक्तिपरिणामभ्रांतिमत्स्वतिव्याप्तिनिरासःससंदेहोत्प्रे
क्षयोर्निश्चयस्यैवाभावात्समासोक्तिपरिणामयोर्विषयिताद्रूप्यस्यागोचरत्वात्समासोक्तौव्यवहारमात्रसमा
रोपात्परिणामेचारोप्यपरिणामस्यैवविषयद्रूप्यगोचरत्वात्॥भ्रांतिमतिस्त्वतः॥कल्पितस्यवाप्रवृत्त्यादिपर्य
तिकस्वारसिकभ्रमस्यैवनिबंधनेनतस्यानाहार्यत्वादित्याहुः॥नच॥त्वत्पादनखरत्नानामित्यादिनिदर्शनाव्या
वृत्त्यर्थंबिंबाविशिष्टत्वंविषयविशेषणंतावदयुक्तमेव॥यद्यत्रमुखंचंद्रइत्यादिरूपकांतरइवसत्यपिश्रौता

र०गं० रोपेनेदंरूपकमपितुनिदर्शनेत्युच्यते॥तदामुखंचंद्रइत्यपिनिदर्शनेत्युच्यतांनिरस्यतांचरूपकदाक्षिण्य
१६९ कोपीनंकिंच॥त्वत्पादेत्यत्रकिंपदार्थनिदर्शनोच्यतेआहोस्विद्वाक्यार्थनिदर्शनानाद्यः।बिंबप्रतिबिंबभावा
पन्नपदार्थघटितविशिष्टार्थयोरेवात्राभेदप्रतीतेः॥कुवलयानंदगतनिदर्शनाप्रकरणेत्वयोक्तमार्गेणध
र्म्यंतरेपदार्थेतद्वृत्तिधर्मस्यपदार्थस्यभेदेनारोपस्याभावाच्च॥नद्वितीयःवाक्यार्थरूपकोच्छित्यापत्तेःइष्टाप
त्तौवैपरीत्यस्यसुवचत्वाच्च॥अस्माभिर्निदर्शनाप्रकरणेवक्ष्यमाणयासरण्याअभेदस्यश्रौतत्वार्थत्वाभ्यामुद्दे
श्यविधेयभावालिंगनालिंगनाभ्यांचरूपकनिदर्शनयोर्वैलक्षण्येनसकलव्यवस्थोपपत्तेःतस्मादत्रवाक्यार्थ १६९
रूपकमेवनवाक्यार्थनिदर्शना॥तस्याश्चैवमुदाहरणंनिर्मातव्यंत्वत्पादनखरत्नानियोरंजयतियावकैः॥इंदु

चंदनलेपेनपांडुरीकुरुतेहिसः॥अत्रकर्त्रोरभेदस्यशाब्दत्वेपिक्रिययोरभेदस्याशाब्दत्वात्तस्यैवचसमग्रभरसहि
ष्णुत्वान्निदर्शनैव॥ननुयदीदमुदाहरणंनिदर्शनायांनस्यात्तदाकथमलंकारसर्वस्वकृतातत्प्रकरणेउदाहृ
तमितिचेत्॥अनेनैवप्रतारितोसि॥नहिप्रामाणिकेनभवताकदापिपरेणानुक्तंकिंचिदुच्यतेयदपिरूपकेबिं
बप्रतिबिंबभावोनास्तीत्युक्तंतदपिभ्रांत्यैव॥तथाहिचसर्वस्वटीकायांविमर्शिन्यामुदाहृतंबिंबप्रतिबिंबभावेन
रूपकं॥कंदर्पद्विपकर्णकंबुमलिनैर्दानांबुभिर्लांछितंसंलग्नांजनपुंजकालिकमलंगंडोपधानंरतेः॥व्योमानो
कहपुष्पगुच्छमलिभिःसंछाद्यमानोदरंपश्येतच्छशिनःसुधासहचरंबिंबंकलंकांकितं॥अत्रकलंकस्यदानांबुप्र
दिभिःप्रतिबिंबनंलांछितत्वांकितत्वयोःशुद्धसामान्यरूपत्वमित्युक्तंचेत्यास्तांतावत्तथानिर्दिष्टशब्देनाभिहि

र॰गं॰ तेइत्यस्ययेनकेनचिद्रूपेणशब्देनाभिहितइत्यर्थउक्ताहेउपमेयतावच्छेदकरूपेणसुंदरत्वेनरूपेणशब्देनाभि
१६६ हितइति।आद्येसुंदरंकमलंभाति।रुतायामिदमङ्कुनमित्यत्रातिप्रसंगःसुंदरपदेनसुंदरत्वेनरूपेणेदंपदेनच
विषयस्याननस्याप्रतिपादनात्।।नचात्रसुंदरपदार्थस्यारोप्यमाणकमलान्वयएवननुवदनरूपविषयान्वय
इतिवाच्यंकमलपदेनकमलताद्रूप्येणाननस्यैवलक्षणयोपस्थापनात्तत्रैवसुंदरादिपदार्थान्वयोयुक्तोननुवि
शेषणीभूतेकमले।अथतादृशंविषयमुद्दिश्यविषयिताद्रूप्यंयत्रविधीयतइत्यपिलक्षणवाक्यार्थःप्रकृतेचसुं
दरत्वावच्छिन्नमुद्दिश्यकमलताद्रूप्यस्याविधानान्नातिप्रसंगइतिचेन्ननमुखचंद्रस्तुसुंदरइत्यादिरूपकेसमास १६६
गतयोर्विषयविषयिणोःपृथग्विभक्तिमंतरेणोद्देश्यविधेयभावाऐकपंचाशदुत्तरशतानवदव्याप्त्यापत्तेःद्वि
भावा

तीयेत्वनिन्हुतइतिविशेषणवैयर्थ्यं।।अपन्हुतावुपमेयतावच्छेदकस्यनिषिध्यमानतयातेनरूपेणविषयस्या
निर्दिष्टत्वादेवलक्षणस्याप्रयुक्तेः।।निश्चयगताहार्यत्वविशेषणवैयर्थ्यंच।भ्रांतिमतिदोषविशेषेणप्रतिबध्यमा
नतयानास्त्युपमेयतावच्छेदकसंस्पर्शइतितावतैववारणात्।।अपिच।।नायंसुधांशुःकिंतर्हिसुधांशुःप्रेयसीमु
खमितिकुवलयानंदोक्तायामपन्हुतावतिप्रसंगः।।अत्रहिसुधांशोःसुधांशुत्वनिन्हवेप्यारोपविषयस्यानिन्ह
वात्।।नचेदंरूपकमेवेतिवाच्यं।।त्वदुक्तिविरोधापत्तेः।।यच्चाप्युक्तमव्यंग्यत्वविशेषणाच्चेदमेवालंकारभूतस्यरू
पकस्यलक्षणमितितदपिन।।नहिव्यंग्यत्वालंकारत्वयोर्विरोधोस्तिप्रधानव्यंग्यरूपकवारणायपुनरुपस्कारकत्वं
विशेषणमुचितमित्यसकृदावेदनात्।अनलंकारत्वस्यतुल्यतयाप्रधानव्यंग्यरूपकस्येवप्रधानवाच्यरूपकस्यापि

म

र०गं० वारणीयत्वेन तद्वारकविशेषणाभावेन तत्रातिप्रसंगाच्च ॥ यच्च तद्रूपकभेदो यद् उपमानोपमेययोरित्यादिप्राची
१६७ नैरुक्तं ॥ तच्चिंत्यं अपन्हुत्यादावुपमानोपमेययोरभेदस्य प्रतीतिसिद्धतया तत्रातिप्रसंगात् ॥ अथोपमानोपमेय
योरित्युक्त्या उपमेयतावच्छेदकं ॥ पुरस्कृत्योपमानतावच्छेदकावच्छिन्नाभेद इत्यर्थलाभाद् अपन्हुतौ चोपमेयतावच्छे
दकस्य पुरस्काराभावान्नातिप्रसंग इति चेन्न ॥ नूनं मुखं चंद्र इत्याद्युत्प्रेक्षायां तथाप्यतिप्रसक्तेः ॥ न च प्रकृतं यन्निषि
ध्यान्यत् साध्यते सा त्वपन्हुतिः ॥ संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यदित्याद्यपन्हुत्युत्प्रेक्षादीनां बाधकत्वात्तत्प
रिगृहीताविषयातिरिक्तो रूपकस्य मुखं चंद्र इत्यादिविषयः स्यात् यथा शरमयं बर्हिरित्येतद्विषयातिरिक्तो कुश १६७
मयं बर्हिरित्यस्य ॥ यथा वा कूसादिविषयातिरिक्तो विषयः सिचः लोकेपि यथा ब्राह्मणेभ्यो दधि दयं तक्रं कौंडिन्या

येत्यत्र तक्रसंप्रदानातिरिक्तं दध्नः संप्रदानमिति वाच्यं ॥ वैषम्यात् ॥ विशेषशास्त्रं हि स्वविषयातिरिक्तं विषयं म्मा
हयत् सामान्यशास्त्रस्य बाधकमित्युच्यते ॥ प्रकृते च रूपकस्य लक्षणं धर्मः स यद्युत्प्रेक्षादिवृत्तिः स्यात्तर्हि तमस्माद्वि
षयान्निरस्य विषयांतरं म्माहयेत् न हि घटत्वं स्वाधिकरणात् पृथिवीत्वं द्रव्यत्वं वा निरस्य विषयांतरं म्माहयितुमी
ष्टे ॥ तस्माद् अनिप्रसक्तिर्लक्षणेस्मिन् दोषः ॥ ननु संभावनात्मिकोत्प्रेक्षा कथं तस्यामभेदात्मकरूपकलक्षणाति
प्रसक्तिरिति चेन्न ॥ विनिगमकाभावेन संभाव्यमानाभेदस्याप्युत्प्रेक्षारूपत्वात् विषयसंभावनाभ्यामुत्प्रेक्षायाम
लंकारद्वयव्यवहारापत्तेश्च निश्चीयमानत्वेनाभेदो विशेषणीय इति चेदस्मादुक्त एव तर्हि पर्यवसितिरिति दिक्
॥ तदिदं रूपकं सावयवं निरवयवं परंपरितं चेति तावत् त्रिविधं ॥ तत्राद्यं समस्तवस्तुविषयमेकदेशविवर्ति चे

र॰गं॰ तिद्विविधंद्वितीयमपिकेवलंमालारूपंचेतिद्विविधं॥तृतीयंचश्लिष्टपरंपरितंशुद्धपरंपरितंचेतिद्विवि
१६९ धंसत्प्रत्येकंकेवलमालारूपत्वाभ्यांचतुर्विधमित्यष्टविधमाहुः॥तत्रपरस्परंसापेक्षनिष्पत्तिकानांरूपकाणां
संघातःसावयवं॥तत्रापिसमस्तानिवस्तूनिआरोप्यमाणानिशब्दोपात्तानियत्रतत्समस्तवस्तुविषयं॥यत्रच
कश्चिदवयवःशब्दोपात्तमारोप्यमाणंकश्चिच्चार्थसामर्थ्याक्षिप्तंतदेकदेशेशब्दानुपात्तविषयिकेअवयवरूप
केविवर्त्तनात्स्वस्वरूपगोपनेनान्यथात्वेनवर्त्तनादेकदेशविवर्त्ति॥यद्वा॥एकदेशेउपात्तविषयिकेअवयवेवि
शेषणस्फुटतयावर्त्तनादेकदेशविवर्त्ति॥समस्तवस्तुविषयंसावयवंयथा॥अविरलमौक्तिकतारेधवलांशुक १६९
टि चंद्रिकाचमत्कारेवदनपरिपूर्णचंद्रेरुंद्रेहरिराकासिनात्रसंदेहः॥अत्रसमुदायात्मकस्यसावयवरूपकस्याव

यवानांसर्वेषामपिवस्तुतःसमर्थ्यसमर्थकभावस्यपरस्परतुल्यत्वेपिकवेराकाररूपस्यैवसमर्थ्यत्वेनाभिप्रेत
त्वात्तत्समर्थकतयोपादानमितरेषामितिगम्यते॥एवंस्थितेसमर्थकरूपकाणांविषयविषयिणोःपृथग्विभक्ति
रश्रवणादनुवाद्यत्वेपिसमर्थ्यरूपकस्यतयोःपृथग्विभक्तिश्रवणाद्विधेयतयातदादायसंघातात्मकस्यसावय
वरूपकस्यापिविधेयत्वमत्रव्यपदिश्यते॥यथाभटसंघातांतर्गतस्यमुख्यस्यकस्यापिभटस्यजयपराजयाभ्यां
भटसंघातोजितःपराजितश्चेत्युच्यते॥व्योमांगणेसरसिनीलिमदिव्यतोयेतारावलीमुकुलमंडलमंडितेस्मि
न्॥आभातिषोडशकलादलमंकभृंगंसूर्याभिमुख्यविकचंशशिपुंडरीकं॥अस्यतुसावयवरूपकस्यानुवाद्यत्व
मेव॥अत्रपूर्णचंद्रस्यसूर्याभिमुख्यंज्योतिःशास्त्रसिद्धं तेनसूर्याभिमुख्येचंद्रस्यकथंविकाशइतिनशंकनीयं॥

र॰गं॰ एकदेशविवर्त्तिसावयवं यथा॥भवग्रीष्मप्रौढातपनिवहसंतप्तवपुषो बलादुन्मूल्य द्राग्निगडमविवेकव्य
१६९ तिरेकं विशुद्धेस्मिन्नात्मामृतसरसि नैराश्यशिशिरे विगाहंते दूरीकृतकलुषजालाः सुकृतिनः॥अत्रसहचरै
निगडादिरूपकैः स्वरूतिषुगजरूपकमाक्षिप्यते॥यथावा॥रूपजलाचललनयनानाभ्यावर्त्ताकचावलिभुजंगा
मज्जंतियत्रसंतः सेयंतरुणीतरंगिणी विषमापूर्वंतु कवेः समर्थत्वेनाभिमतस्यरूपकस्यापेक्षैवहेतुसमर्थक
त्वेनाभिमतस्यनयनयोर्मीनरूपकस्येतिविशेषः॥अत्रचमत्कारविशेषजनकतयारूपकसंघातात्मकमपिसा
वयवरूपकं रूपकालंकृतिभेदगणनायां गण्यते॥यथामौक्तिकालंकृतिभेदगणनायामेकनासामौक्तिकमि १६९
वसंघातात्मिकामौक्तिकमंजर्यादयोपिगण्यंते॥अन्यथामालारूपस्योपमादेस्तद्भेदगणनेगणनप्रसंगात्॥

एतेनगवांसंघातोगोभिदानां कपिलादीनां गणनायां यथा न गण्यते तथा रूपकभेदगणनप्रस्तुतेन नतत्संघाता
त्मकं सावयवं गणनीयमिति परास्तं॥एवमस्मात्संघातात्मकात्सावयवान्मालारूपकस्य संघातात्मकेनाविशे
षेण्येकविषयकत्वपरस्परनिरपेक्षत्वाभ्यामस्ति महान्विशेषः निरवयवं केवलं यथा॥बुद्धिर्दीपकलालोके यया
सर्वंप्रकाश्यते॥अबुद्धिस्तामसी रात्रिर्यतः किंचिन्नभासते॥अत्ररूपकद्वयमपि सापेक्षरूपकसंघातात्मकत्व
विरहान्निरवयवं मालात्मकत्वविरहाच्च केवलं॥निरवयवं मालारूपं यथा॥धर्मस्यात्मा भागधेयं क्षमायाः
सारः सृष्टेर्जीवितं शारदायाः॥आज्ञासाक्षाद्ब्रह्मणो वेदमूर्त्तेराकल्पांतं राजतामेषराजा एकविषयकनानाप
दार्थारोपरूपत्वान्मालारूपमिदं परस्परसापेक्षत्वविरहाच्च निरवयवं॥यत्रचआरोपएव आरोपांतरस्यनिमित्तं

र॰गं॰ त्परंपरितं॥ तत्रापिसमर्थकत्वेनविवक्षितस्यारोपस्यश्लेषमूलकत्वेश्लिष्टपरंपरितंयथा॥ अहितापकरण
१७० भेषजनरनाथभवान्करस्थितोयस्यतस्यकुतोहिभयंस्यादखिलामपिमेदिनींचरतः॥ अत्रद्वयोरप्यारोपयोः
समर्थ्यसमर्थकभावस्यवस्तुतस्तुल्यत्वेप्यहितानामकेपरणमेवाहीनांतापकरणमितिश्लेषमूलकेनारोप
णराजनिभेषजतादात्म्यारोपस्यसमर्थनीयतयाकवेरभिप्रायोअतएवभंगश्लेषनिवेदितोहिभयाभावोपि
संगच्छते॥ इदमेवमालारूपंयथा॥ कमलावासकासारः क्षमाध्वतिफणीधरः॥ अयंकुवलयस्येंदुरानंदयति
मानवान्॥ शुद्धपरंपरितंकेवलंयथादेवाःकेपूर्वदेवाःसमितिमननरंसंतिकेवापुरस्तादेवंजल्पंतिनावत्रतिभ १७०
टपृतनावर्त्तिनःक्षत्रवीराः॥ यावन्नायातिराजभयनविपयनामेतकश्रासिमूर्त्तेर्मुधारिप्राणदुग्धाशनमसृणरु

चिस्त्वत्कृपाणोभुजंगः॥ अत्रापिभुजंगारोपोदुग्धारोपसमर्थ्यत्वेनाभिमतः॥ तदेवमालारूपंयथा॥ प्राचीसंध्या
समुद्यन्महिमदिनमणेर्मानमाणिक्यकांतिर्ज्वालामालाकरालाकवलितजगतःक्रोधकालानलस्य॥ क्षोणीं
दोःसंगरेतेलसतिनयनयोरुद्भटाशोणिमश्रीःआज्ञाकांतापदांभोरुहनरुविगलन्मंजुलाक्षारसाभाअद्यपि
आ/ सावयवेप्यारोपआरोपांतरस्योपायस्तथापितत्रारोपातिरिक्तेनकविसमयसिद्धेनसादृश्येनाप्यारोपांतर
स्य= सिद्धिःसंभवति॥ यथासुंदरिराकासिनात्रसंदेहइत्रमौक्तिकादीनांताराद्यारोपंविनाप्योज्ज्वल्यमात्रेणापि
सुंदर्यरिकारोपसिद्धेरिहतुनयनशोणिम्निज्वालाद्यारोपानलसमारोपंनियमेनापेक्षते॥ एवंकारुण्यकु
सुमाकाशइत्यत्राकाशखलयोःसादृश्यस्याप्रसिद्धतयारोपसिद्ध्यर्थमारोपएवोपायइतिवेलक्षण्यं॥ कश्चि

र॰गं॰ नुबद्धारोपात्मकात्सावयवारोपद्वयात्मकत्वमेवास्य वैलक्षण्यबीजमित्याहुः ॥ काव्यं सुधा रसज्ञानां कामिनां
१७१ कामिनी सुधा ॥ धनं सुधा सलोभानां शांतिः संन्यासिनां सुधा ॥ अत्र च विषयमालाकृतो न कश्चिच्चमत्कारविशे
ष इति न पृथग्भेदगणनायां गण्यते ॥ आरोप्यमाणमाला तु चमत्कारविशेषशालित्वाद्गण्यते ॥ अथ कथं नाम श्लिष्ट
परंपरितं कमलावासकासार इत्यादावेकस्यारोपस्यारोपांतरोपायत्वं ॥ यतः श्लेषेण कमलानामावासस्य कम
लाया आवासस्य चाभेदमात्रमत्र प्रतीयते नैकत्रान्यारोपः तस्य स्वतंत्रविषयनिर्देशापेक्षत्वात् ॥ न च शुद्धाभेदप्र
त्यय एवारोपः ॥ विषयनिगरणात्मिकायामतिशयोक्तावपि तत्प्रसंगात् न च शुद्धाभेदप्रत्ययेनात्रार्थः ॥ यत्संबं
धिनि यत्संबंध्यभेदस्तस्मिंस्तदभेद इति कमलावासकासार इत्यादौ राजनि कासारारोपो राजसंबंधिनि ल

DR. BHAU DAJI MEMORIAL

क्ष्म्याश्रयत्वे कासारसंबंधिसरोजाश्रयत्वाभेदारोपेण समर्थयितुं शक्यः ॥ श्लेषेण तु पुनर्लक्ष्म्याश्रयत्वसरोजा
श्रयत्वयोरभिन्नत्वेन प्रत्ययादभिन्नधर्मनिबंधनो राजकासारयोरप्यभेदप्रत्ययः स्यान्न तु राजनि विषये का
सारविषयिकस्यारोपस्य प्रकृतस्य सिद्धिः ॥ इमावभिन्नावित्याद्याकारस्य शुद्धाभेदप्रत्ययस्याप्रकृतत्वात्प्रागुक्त
श्चारोपो मृग्यः ॥ स च न श्लेषसाध्य इति ॥ सत्यं श्लेषेण शुद्धाभेदप्रतीतिः सत्यां प्रकृतारोपसमर्थनायां तरामानस
स्य राजसंबंधिनि कासारसंबंध्यभेदारोपस्य कल्पनान्नानुपपत्तिः ॥ कथं हि परंपरितरूपके सौजन्यचंद्रिकाचंद्रो राजे
त्यादौ रूपकत्वं अभेदारोपस्य सत्यत्वेऽपि तस्य सादृश्यमूलकत्वाभावादिति चेत् ॥ न समर्थकारोपेण धर्मैक्यसंपा मैं
दने सादृश्यस्य निष्प्रत्यूहत्वात् ॥ स्यादेतत् ॥ सौजन्यचंद्रिकाचंद्र इत्यत्र तत्पुरुषावयवे समानाधिकरणतत्पुरुष

र॰गं॰ चंद्रिकायामभेदसंसर्गेण सौजन्यस्य विशेषणत्वात्प्रतीयमानश्चंद्रिकागतसौजन्याभेदो न राजनि चंद्राभेदात्म
१७२ कं रूपकं समर्थयितुं प्रभवति ॥ यत्संबंधिनियतसंबंधभेद इत्यादिप्रागुक्तत्वात् ॥ अपितु सौजन्यविषयं चंद्रिकाभे
दः ॥ यथा ॥ सौजन्यं ते धराधीश चंद्रिका त्वं सुधानिधिः ॥ स च दुरुपपाद एव ॥ न चानयोः समानवित्तिवेद्यत्वाभा
नुपपत्तिरिति शक्यं वक्तुं ॥ प्रामाणिकैर्हि सामान्यास्तत्वस्य त्यागात् ॥ ननु शाब्दबोधव्युत्पत्तिवैचित्र्यनियंत्रितैरेवम त-|
न्यत्रापि कथं समासगतं शुद्धरूपकं परिते द्वयोरारोपयोर्निर्वाह्यनिर्वाहकभावः कथं वा शशिपुंडरीकमित्यादौ पुं
डरीकरूपकमुच्यते ॥ पुंडरीकाभेदात्मकस्य पुंडरीकतादूप्यस्याभावात् ॥ शश्यभेदप्रत्ययाच्च पुंडरीके शशी १७२
व| त्यत्रेव शशिरूपकमुच्यतां ॥ एवं नीलिम दिव्यतो येतारावलीमुकुलमंडलमंडिते षोडशकलादलमंकारंगमि

त्यत्राप्युत्तरपदार्थे पूर्वपदार्थाभेदस्यैव भानात्पूर्वपदार्थरूपकापत्तिः ॥ तथा च सुविरलमौक्तिकतारं धवलां
शुकचंद्रिकाचमत्कारे ॥ वदनपरिपूर्णचंद्रे सुंदरि राका सि नात्र संदेह इत्यत्र सुंदर्यां विषयाभूतायां राकाता
दात्म्यावगमात्स्फुटमेव ताबद्राकारूपकं ॥ तत्र च चरणत्रयगतं निरूपकोणि राकारूपकानुगुणतयोपात्तान्य ता-|
पि नानुगुण्यमाचरंति ॥ तारा चंद्रिका पूर्णचंद्राणां मौक्तिकधवलांशुकवदनाभिन्नत्वे सिद्धे पि न सुंदर्यां राका
तादूप्यं संभवति ॥ प्रत्युत विपरीतं राकायां सुंदरीतादूप्यं न पां राकासंबंधित्वात्सर्वमेव व्याकुलमिति ॥ अ
त्र वदंति ॥ अनेन दलावदिशेषणस्य संसर्गो भवति ॥ स च यथा मुखं चंद्र इत्यादौ वाक्यगते रूपके स्वप्रतियोगि
नश्चंद्रस्य स्वानुयोगिनि मुखविशेषणतायाः निर्वाहकस्तथैव समासगते मुखचंद्र इत्यादौ रूपके स्वानुयो

र॰गं॰ गिनो मुखस्य प्रतियोगिनि चंद्रे विशेषणतायाः॥ एवं चोभयत्रापि वस्तुतश्चंद्राभेद एव संसर्गः॥ क्वचिदनु
१७३ योगित्वमुखः क्वचिच्च प्रतियोगित्वमुखो विशेषणविशेष्यभाववैचित्र्यात्। ननु मुखं चंद्र इत्यत्र मुखाभेदः सं
सर्गस्तथा सति चंद्ररूपकानापत्तेर्मुखरूपकापत्तेश्च॥ स्वप्रतियोगिकाभेद एव विशेषणस्य संसर्गो न तु स्वानुयो षण
गिकाभेद इति तु दुराग्रहः॥ एवं च सौजन्यचंद्रिकेत्यादौ वस्तुतः सौजन्याभेदो न सौजन्यस्य चंद्रिकाविशे
षणस्य संसर्गोऽपि तु चंद्रिकाभेद एव॥ तथा च सौजन्यनिष्ठाभेदप्रतियोगिनी चंद्रिकेति पर्यवसितेऽर्थे भंग्यंत
रेण सौजन्ये चंद्रिकाभेदसिद्धौ जातायां राजनि चंद्राभेदोऽपि निष्पद्यत इति परंपरितेनानुपपत्तिः॥ शशि १७३
पुंडरीकमित्यादावपि शशिनिष्ठाभेदप्रतियोगि पुंडरीकमिति पर्यवसितेऽर्थे पुंडरीकाभेदस्याभानात्पुंड

रीकरूपकमव्याहतं॥ एवमन्येष्ववयवरूपकेषु बोध्यं। एवं स्फविरलमौक्तिकतारे इत्यादावपि ताराद्यभेद एव मौक्ति
कादिगतो मौक्तिकादीनां तारादिविशेषणानां संसर्गो भवन्नेकारूपकस्य समर्थको भवतीति सर्वं सुस्थं॥ सोऽयम
भेदो यत्रानुयोगित्वमुखस्तत्र रूपकस्य विधेयता यत्र च प्रतियोगित्वमुखस्तत्रानुवाद्यत्वमिति दिक्॥ तत्र प्राचीसं
ध्यासमुद्यन्मृडिमदिनमणेरित्यत्रारोप्यमाणयोः परस्परमारोपविषययोश्चानुकूल्ये रूपकयोरनुग्राह्यानुग्राह
कभावो दर्शितः॥ प्रातिकूल्ये यथा॥ आनंदमृगदावाग्निः शीलशाखिमदद्विपः ज्ञानदीपमहावायुरयं खलसमाग
मः॥ यथा वा॥ कारुण्यकुसुमाकाशः शांतिशैत्यहुताशनः॥ यशःसौरभ्यलशुनः पिशुनः केन वर्ण्यतां॥ एकत्र नाश्य
नाशकभावरूपमपरत्र चात्यंतिकसंसर्गशून्यतारूपं प्रातिकूल्यमुपमानयोस्तथैवोपमेययोश्च॥ अनुग्राह्यानुग्रा

र॰गं॰ हकभावः पुनरारोपयोरविशिष्ट एव॥ तथा॥ अयं सज्जनकार्पासरक्षणैककृतानाशनः॥ परदुःखाग्निशमनमारु
१७४ तः केन वर्ण्यते॥ अत्र रक्षाशमनपदे विरोधिलक्षणया विपरीतार्थबोधकं॥ एवं पदार्थरूपकं लेशतो निरूपित
मेवं वाक्यार्थे विषये वाक्यार्थान्तरस्यारोपे वाक्यार्थरूपकं॥ यथा हि विशिष्टोपमायां विशेषणानामुपमानोपमेयभा
व आर्थस्तथात्रापि वाक्यार्थघटकानां पदार्थानां रूपकमर्थादवसेयं॥ आत्मनोऽस्य तपोदानैर्निर्मलीकरणं हि यत्॥
क्षालनं भास्करस्येदं सरसैः सलिलोत्करैः॥ अत्रात्मनि तपोदानेषु चारोपविषये विशेषणेन यथा बिंबभूतेषु भास्कर
स्य सलिलक्षालनादीनां च विषयिविशेषणत्वेन प्रतिबिंबानां रूपकं गम्यमानं प्रधानीभूतविशिष्टरूपकांगमिदं रू १७४
पकं रूपके च बिंबप्रतिबिंबभावो नास्तीति केनाप्यालंकारिकंमन्येन प्रतारितस्य दीर्घश्रवसउक्तिरश्रद्धेयैव॥ यया

रिवादिशब्दप्रयोगे उपमानयोरेकत्रान्यारोपे रूपकमिति नियमादत्र यदि रूपकं नांगीकुरुषे नैवांगीकुरु न हि त
[illegible]·B.| त्रैव यथादिशब्दप्रयोगे उपमामपि॥ सुचुन्वयिकोपो महीपालसुधांशाविव पावक इत्यादौ स्वकल्पितेन विशिष्ट
न धर्मिणा सादृश्यस्य प्रत्ययादुपमां प्रपेदिन न हि तत्रैवं वक्तव्य निरासेन्वयिकोपो महीपालसुधांशोलव्यवाहन इत्या
दौ रूपकमपि॥ तथा॥ कुंकुमद्रवलिप्तांगः काषायवसनो यतिः॥ कोमलातपबालाभ्रैः संध्याकालेन संशय इत्यादा
वपि विशिष्टरूपकं बोध्यं॥ न्वयिकोप इत्यत्र विषयिणः स्वबुद्धिकल्पितत्वात्कल्पितविशिष्टरूपकमिदं तु न तथेति वि
शेषः॥ न चैवमादौ प्रतीयमानोत्प्रेक्षा वक्तुं शक्या अभेदस्य निश्चीयमानत्वात्। उत्प्रेक्षायां वा सत्यां संभाव्यमानता
स्यात्॥ अन्यथा मुखं चंद्र इत्यादावपि प्रतीयमानोत्प्रेक्षापत्त्या रूपकविलोपापत्तेः॥ अथ बाधा विचार्यन्ते॥ तत्र प्राञ्चः॥

र०गं० विषयिवाचकपदेनविषयिवृत्तिगुणवतोलक्षणयासारोपयोपस्थितेविषयेतस्याभेदेनसंसर्गेणविशेषणात
१७९ यान्वयः॥एवंचमुखंचंद्रइत्यत्रचंद्रवृत्तिगुणवदभिन्नंमुखमितिधीः॥अतएवालंकारभाष्यकारोलक्षणापरस्मा
र्थयोवतारूपकमित्याह॥नचचंद्रसदृशंमुखमित्युपमातोस्यकोभेदः॥बोधवैलक्षण्याभावेनविच्छित्तिवैलक्ष
ण्याभावात्‌वृत्तिमात्रवैलक्षण्यस्याप्रयोजकत्वादितिवाच्यं॥लाक्षणिकबोधोत्तरंजायमानेनप्रयोजनाभूते
नाभेदबोधेनैववैलक्षण्यात्‌॥निरूढलक्षणातिरिक्तायालक्षणायाःप्रयोजनवत्तानियमात्‌॥अभेदबुद्धेश्च
वस्त्वंतरवित्तिभाव्यत्वेननबाधबुद्धिप्रतिबंध्यत्वमित्याहुः॥तथास्तु॥नामार्थयोरभेदसंसर्गेणान्वयस्यव्युत्पत्ति १७९
सिद्धत्वाच्चंद्राभिन्नंमुखमितिलक्षणांविनैवबोधःफलस्यान्यथैवोपपत्तेर्लक्षणाकल्पनस्यान्याय्यत्वात्‌॥किंचयदिच

रूपकेलक्षणास्यान्मुखचंद्रइत्यत्रोपमितिविशेषणसमासयोरुत्तरपदस्यलाक्षणिकत्वाविशेषादेकस्योपमात्व
मन्यस्यरूपकत्वमितिव्याहतंस्यात्‌॥अपिच॥मुखंनचंद्रसदृशमपितुचंद्रइत्यादौसादृश्यव्यतिरेकमिश्रितेसादृश्य
बुद्धेरयोगात्‌॥एवंदेवदत्तमुखंचंद्रएवयज्ञदत्तमुखंतुनतथापितुचंद्रसदृशमित्यादौनत्वर्थस्यलक्ष्यमाणचंद्रस
दृशान्वयित्वाच्चंद्रसदृशश्चंद्रसदृशइतिबोधकादर्थापत्तेश्च॥नहिनञःफलीभूतज्ञानविषयेणाभेदेनान्वयोयु
क्तः॥एतदन्वयवेलायांतस्यानुपस्थितेः॥सादृश्याभेदबोधस्यचाहार्यत्वान्नबाधबुद्धिप्रतिबध्यत्वं॥यद्वा॥आहा ता-।
र्यान्यत्वस्येवशाब्दान्यत्वस्यापिबाधनिश्चयप्रतिबध्यतावच्छेदककोटौनिवेशःसतिचबाधनिश्चयेनतज्ज्ञानशाब्दबुद्धे ॥ दूरात्
रनुत्पादोयोग्यताज्ञानविरहात्‌॥सतिचक्वचिदाहार्ययोग्यताज्ञानेतद्बुद्धेरिष्टत्वात्‌॥अतएवयोग्यताज्ञानस्य

र॰गं॰ बाधनिश्चयपराहतस्यापिशाब्दधीहेतुत्वं॥तस्मादेवन्यतरप्रकारेणकाव्येसर्वत्रबोधोपपत्तिः॥अपिच॥तद्धर्मध
१७६ र्मवत्त्वबुद्धेःकथंतदभेदबुद्धिःफलंस्यात्॥नहिसाधारणधर्मावच्छिन्नाभेदज्ञानस्यतत्तदसाधारणधर्मावच्छिन्नाभे
दज्ञानहेतुत्वंक्वाप्यवगतं॥घटपटयोर्द्रव्यत्वेनाभेदग्रहेपिघटत्वादिनाभेदग्रहात्॥तदभिन्नत्वेनज्ञानस्यपुनस्त
द्धर्मप्रतिपत्तिःफलंस्यात्प्रवाहाभिन्नत्वज्ञानस्यवशेत्यपावनत्वादिप्रतिपत्तिः॥अतएववाक्रूपयासुधयासिंचन्हर
मांतापमूर्छितंजगज्जीवनतेनाहंजीवितस्मिनसंशयइत्यादावमृताभिन्नत्वबोधस्यैववक्रूपायाःसेककरणत्वेना
= न्वयस्तादृशसेकस्यचजीवनेहेतुत्वमेवेतिदिक्॥अथकथंगांभीर्येणसमुद्रोयंसौंदर्येणचमन्मथइत्यत्रबोधः॥शृणुत्रा १७६
छ्ग। चांनावच्छिन्नमाणैकदेशसादृश्यप्रयोज्यतायाअभेदस्यवातृतीयार्थस्यान्वयाद्गांभीर्यप्रयोज्यसमुद्रसादृश्यवदभि

न्नोयंगांभीर्यप्रयोज्यसमुद्रवृत्तिधर्मवदभिन्नोयमितिवाधीः॥लक्षणांविनैवाभेदसंसर्गेणान्वयवादिनांपुनर्गम्यक
विनास्वेच्छामात्रादुपकल्पिताअसंतोप्यंतःकरणपरिणामात्मकाअर्थाउपनिबध्यंतेमुखचंद्रादयस्तेषुसाधारण
धर्माणामप्येवप्रयोजकत्वंतदुर्शनाधीनत्वात्तत्प्रमितेः॥एवंचगांभीर्यादिप्रयोज्यसमुद्राद्यभिन्नइतिबुद्धिरप्रत्यू
हेति॥यद्वाज्ञानजन्यज्ञानेप्रकारत्वंतृतीयार्थः॥वन्हिमान्धूमादित्यादौपंचम्यर्थतयातस्यकल्पनावत्॥एवंचगां
भीर्यज्ञानजन्यज्ञानप्रकारसमुद्राभिन्नइत्यादिर्बोधः॥तदिदंरूपकंविषयविषयिणोःसामानाधिकरण्येअपदा
र्थतयासंसर्गः॥यथा॥बुद्धिदीपकलेत्यादौ॥वैयधिकरण्येचशाब्दार्थतयाक्वचिद्विशेष्यं॥यथाकैशोरवयसिक्रम
णतनुतामायातितन्व्याःस्तनावागामिन्यखिलेश्वररतिपतौतत्कालमस्याज्ञया॥आस्यपूर्णशशांकतानयनयोस्तादा

र०गं० त्म्यमारोपरुहां॥ किंवासीदमृतस्याभेदविगमः साध्विस्मितेनान्वितः॥ अत्र शशांकतादात्म्यभेदविगमशब्देनाभिधीय
१७१ मानं रूपकं॥ अथ मांतविशेष्यतावादिनां नयविशेष्यं क्रियाविशेष्यतावादिनां तु तत्रैव किंचिदध्यासेनानिष्पन्नतत्क्रिया
दानां किंचिच्च विशेषणं॥ यथा॥ अविचिंत्यशक्तिविभवेन सुंदरि प्रथितस्य शंबररिपोः प्रभावतः॥ विधुभावमेति
तमांतवाननं नयनं सरोजदलनिर्विशेषतां॥ इह द्वितीयार्थे विशेषणीभूतं विधुत्वादि विध्वभेदात्मकतया रूपकं॥
एवं मुखचंद्र इत्यादावुपमितसमासेनावद्रूपमेव॥ विशेषणसमासे तु रूपकं बाधश्च शशिपुंडरीकमित्यादावि
व प्राक्प्रतिपादितदिशा बोध्यः॥ मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती॥ शैवालिनीव केशैः सुर
सेयं सुंदरि सरसी इत्यादौ तृतीयायाः अभेदार्थकत्वात्तस्य च प्रागुक्तदिशा प्रतियोगित्वमुखस्यार्थवशादन्वये

न तन्निष्ठाभेदप्रतियोगिमीनवतीति बोधः॥ मीनवत्त्वं चस्वाभिन्नद्वारकमेवात्स्फोरणायैव नयनाभ्यामित्युक्तं॥ मी
नाभिन्ननयनवतीति तु पर्यवसितं॥ नयनाभेदतु मीनेषु गृह्यमाणे सरसी रूपकापेपणादित्युक्तमेव॥ साधारण
धर्मश्चात्राप्युपमायामिव क्वचिदनुगामी क्वचिद्बिंबप्रतिबिंबभावमापन्नः क्वचिदुपचरितः॥ क्वचिच्च केवलशब्दा
क्व— त्मा॥ सोपि च चिह्नेनोपात्तः॥ क्वचित्प्रतीयमानतया नोपात्तः॥ उपात्तानुगामी यथा॥ जडानंधान्पंगून्प्रकृतिबधिरानु
क्तिविकलान् ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन्॥ निलिंपैर्निर्मुक्तानपि च निरयांतनिपतितान्नरानंब त्रातुं
त्वमिह परमं भेषजमसि॥ अत्र त्रातुमिति तु मुख्येन शब्देनोपात्तो जडांधादित्राणं भेषजभागीरथ्याः॥ अयमेवा
नुक्तो यथा॥ समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्महैश्वर्यं लीलाजनितजगतः खंडपरशोः॥ श्रुतीनां सर्वस्वं

DR. BHAU DAJI

र॰गं॰ स्कृतमथमूर्त्तंसुमनसांसुधासाम्राज्यंतेसलिलमशिवं नः शमयतु॥अत्रसौभाग्यभागीरथ्याःस्वभावव्यापकत्वे स्वा-।
१७८ धा-। भाग्यकत्वपरमोत्कर्षरूपकत्वादिरनुपात्तःप्रतीयमानोधर्मः।एवमीश्वरासाधारणधर्मत्वपरमगोप्यत्वनिरतिश
यसुखजनकत्वान्याधामरसकलजनजरामृत्युहरणक्षमत्वंचात्तरारोपेष्वनुगामीनि॥बिंबप्रतिबिंबभावमा
पन्नाविशिष्टरूपकप्रसंगेनिरूपितः।उपचरितोयथा॥अविनैरंपरकार्यकृतांसतांमधुरिमातिशयेनवचो
पि॰ श-। मृतं॥अत्रमानसमंबुनिधिर्यशोविमलशारदचंद्रिका॥अत्रामृतरूपकेविषयेवचस्युपचरितामधु
रिमातिशयशब्देनोपात्तः॥अंबुनिध्यादिरूपकेचगांभीर्याद्यनुपात्तंकिंचलशब्दात्मकोयथा॥अंकितान्यक्षसं १७८
घातैःसरागाणिसदैवहि॥शरीरिणांशरीराणिकमलानिनसंशयः॥अत्रसरागशब्दादिरुपात्तएवप्रतीयते॥

नरूपनः॥आद्याद्यभंग्नाद्वितीयस्तुभग्नः॥अयमेवसाधारणोयत्रयुक्तिरूपेणोपन्यस्यतेनद्धेतुरूपकं॥यथा॥पं
ह= चशाखःप्रभोयस्तेशाखासुरतरोरसौ॥अन्यथातेनपूर्यंतेकथंसर्वमनोरथाः॥एवंप्रायेणशाविरलक्रांतःकपा
लस्तवसुंदरि॥मनोभवव्याधिमत्वान्मृगांकःखलुनिर्मलः॥इत्यत्रश्लेषेणरसचंद्रयोःकपोलेताद्रूप्यप्रत्ययाद्धेतुरू तू।
पकेनिरवयवंहेतुस्तुतिपुष्टिःएवमन्येपिप्रकाराज्ञेयाः॥उल्लासःफुल्लपंकेरुहपटलपतन्मत्तपुष्पंधयानां
निस्तारःशोकदावानलविकलहृदांकोकसीमंतिनीनां॥उत्पातस्तामसानामुपहततमहसांचक्षुषांपक्ष्मपातः॥सं
घातःकोपिधाम्नामयमुदयगिरिप्रांततःप्रादुरासीत्॥अत्रोपमेयउपमानस्यनारोपोअपितुकारणकार्यस्य
तिरूपकंनभवतीतिप्राचः॥एतन्मतानुसारेणैवास्माभिरभिलक्षितं॥उद्भटखल्लाःपुनरारोपमात्रंरूपकंवदंत

र०गं० इत्थापि रूपकमेवाचक्षत इति प्रागेव निरूपितं॥ ननु कारुण्यकुसुमाकाशः शांतिशैत्यकृतावनः॥ यशःसौ
१११ रभ्यलशुनः पिशुनः केन वर्ण्यतां इत्यत्र लशुनकृतावनाकाशैः पिशुनस्य किं साधर्म्यं येन तेषामस्मिन् रूपकमु
च्यत इति चेत्॥ यशःसौरभ्ययोः शांतिशैत्ययोः कारुण्यकुसुमयोश्च ताद्रूप्ये शब्दादुपस्थापिते नंतरमुपस्थि
ते यशोरूपसौरभ्याद्यभावयत्वमेव तत्॥ एवमपि लशुनखलयोः ताद्रूप्यसिद्धौ सत्यां लशुनरूपखलाद्युत्पत्तेर्व
न यशःसौरभ्ययोः स्ताद्रूप्यसिद्धिर्यशःसौरभ्ययोस्ताद्रूप्यसिद्धौ च यशोरूपसौरभ्यशून्यत्वेन लशुनखलयो
स्ताद्रूप्यमित्यन्योन्याश्रयो नाशंकनीयः॥ सकलसिद्धेः कल्पनामयत्वेन कल्पनायाश्च स्वप्रतिभाधीनत्वात्॥ शि १७१
ल्पिभिः परस्परावष्टंभमात्राधीनस्थितिकाभिः शिलेष्टकाभिर्गृहविशेषनिर्माणाच्च॥ अथास्य ध्वनिः। तत्र शब्द

शक्तिमूलो यथा॥ विज्ञत्वं विदुषां गणेषु कवितां सामाजिकानां कुले मांगल्यं स्वजनेषु गौरवमथो लोकेषु सर्वत्र
पि॥ दुर्वृत्तेष्वशनितां नृलोकवलये राजन्त्वमव्याहतं मित्रत्वं च वदन्न किंच न जने दैवत्वमेका भुवि॥ अत्र शक्तिनि
शुक्लत्वा-। यंत्रणेपि बुधत्व~~[illegible]~~दीनि बु~~[illegible]~~द्यभेदरूपाणि राजनि व्यज्यंते॥ यथा वा॥ अविरलविगलद्दानोदकधारासा धा-।
रसिक्तधरणितलः॥ धनदाग्रमहितमूर्तिर्देवत्वं सार्वभौमोसि॥ अर्थशक्तिमूलको यथा। कस्तूरिकातिलकमा
लि विधाय सायं स्मेरानना सपदि शीलय सौधमौलिं॥ प्रौढिं भजंतु कुमुदानि मुदामुदारामुल्लासयंतु परितो
हरितां मुखानि॥ अत्र वर्ण्यमानं कलंकचंद्रिकाविशिष्टचंद्राभिन्नमिति रूपकं कुमुदविकासादिना ध्वन्यते॥ ति-।
ननु भ्रांतिमान् कुमुदानां हरितां चाचेतनत्वान्नवाचेतनेषु कुमुदेषु मुदामसंभवादवश्यं कुमुदादिषु चेतन

रं०गं० त्वारोपणाभाव्यंतेनचभ्रांतिसिद्धिरितिवाच्यंमनुपदस्यविकासेलाक्षणिकत्वात्॥इदंचाविविक्तमुदाहरणं॥तिमि
१८० रंहरंतिहरितांपुरःस्थितंतिरयंतितापमथतापशालिनां॥वदनत्विषस्तवचकोरलोचनेपरिमुद्रयंतिसरसीरु
हश्रियः॥इहापिवदनंचंद्रइतिगम्यते॥आनंदवर्द्धनाचार्यास्तुप्राप्तश्रीरेषकस्मात्पुनरपिमयितंमंथखेदंविदध्या
न्निद्रामप्यस्यपूर्वामनलसमनसोनैवसंभावयामि॥सेतुंबध्नातिभूयःकिमितिचसकलद्वीपनाथानुयात
स्त्वय्यायातेविकल्पानितिदधतइवाभातिकंपःपयोधेः॥अत्ररूपकाश्रयेणकाव्यचारुत्वव्यवस्थापनाद्रूपकध्वनिरि
त्याहुः॥तच्चिंत्यं॥अत्रत्वजलधिकंपहेतुत्वेनविकल्पत्रयंकल्प्यते॥तच्चप्रकृतेराजविशेष्यकांजलनिधिगतामना १८०
हार्यविष्णुतादात्म्यज्ञानरूपांभ्रांतिमेवाक्षिपति॥नरूपकंतज्जीवातोराहार्यविष्णुतादात्म्यनिश्चयस्यकंपजन

कत्वात्॥कविजलधिगतत्वेनवैयधिकरण्याच्च॥अज्ञातमेवकेवलंविष्णुतादात्म्यंजलधेःकंपेनुपयुक्तमेव॥चम
त्कारिण्यपिचात्रभ्रांतिरेवेतिध्वनिरपितस्याएवयुक्तः॥अथास्यापिकविसमयविरुद्धतयाचमत्कारापकर्षकालिं
गभेदादयोदोषाःसंभवंति॥यथा॥बुद्धिरब्धिर्महीपालयशस्करनिम्नगा॥कृतयस्तुशरत्कालचारुचंदिरचंद्रिका
॥अत्रविषयविषयिणोर्लिंगादिकृतंवैलक्षण्यंतयोस्तादात्म्यबुद्धेःप्रतिकूलं॥क्वचित्कविसमयासिद्धतयाचमत्कारहा
निराहित्यंतुनामीदोषः॥यथासंतापशांतिकारित्वाद्वदनंतवचंद्रमाइत्यादौहेतुरूपकेइति॥इतिरसगंगाधरेनि
रूपितंरूपकप्रकरणं॥अथपरिणामः॥विषयीयत्रविषयात्मतयैवप्रकृतोपयोगीनस्वातंत्र्येणसपरिणामः॥अत्र
चविषयाभेदोविषयिण्युपयुज्यते॥रूपकेतुनैवमितिरूपकादस्यभेदः॥अयमुदाह्रियते॥अपारेसंसारविषमवि

र०गं० पयारण्यसरणौ मम भ्रामं भ्रामं विगलितविरामं जडमतेः॥ परिश्रांतस्यायं तरणितनयातीरनिलयैः समंतात्सं
१८१ तापं हरिनवतमालस्तिरयतु॥ भगवदात्मतयैव तमालस्य संसारतापनिवर्त्तनक्षमत्वं मार्गश्रांतजनसंतापहार
कत्वाद्रमणीयशोभाधारत्वाच्च तमालो विषयितयोपात्तः॥ अयं समानाधिकरणो वाक्यगः॥ समासगो यथा॥ मद्वै
व्यासपुत्रस्य श्रावं श्रावं वचःसुधां॥ उपमन्युसुतो राजा परां मुदमवाप्तवान्॥ अत्रापि सुधायाः स्वात्मना नश्रवणक
र्मत्वमपि तु वचनात्मतयैवेति भवति परिणामः॥ व्यधिकरणो यथा॥ अहीनचंद्रा लसतानने न ज्योत्स्नावती चापि शु
चिस्मितेन॥ इयं त्रियामोपासितपक्षदोषा तोषाय केषां न महीतले स्यात्॥ अत्र सर्वेषामेव तोषाय स्यादित्यनेन विरहिजन १८१
तोषजनकत्वमपि लभ्यते॥ तत्रारोप्यमाणशुक्लपक्षरजन्याः स्वात्मना बाधितो योषारूपेण तु संगच्छत इति भवति परि

णामः॥ स च परस्परसापेक्षबहुसंघातात्मकतया सावयवस्तत्राद्याधिगतो द्वाव्वयवौ व्यधिकरणौ द्वितीयार्थगतश्चैकः व-।
समानाधिकरणः॥ यच्चाप्यदीक्षितेन वैय्यधिकरण्येन परिणाम उदाहृतं॥ तारानायकशेखराय जगदाधाराय धा
राधरच्छायाधारककंधराय गिरिजासंगैकशृंगारिणे॥ नद्याशेखरिणे दृशा तिलकिने तारापतेर्नाशिने नागैः कंक तारा धिपेना-
णिनेनगेन गृहिणे नाथाय सेयं नतिः॥ यथा वा द्विर्भावः पुष्पकेतोर्विबुधविटपिनां पौनरुक्त्यं विकल्पश्चिंतारत्नस्य वी त्रिणे।
प्सा तपनतनुभुवो वासवस्य द्विरुक्तिः॥ द्वैतं देवस्य दैत्याधिपमथनकलाकेलिकारस्य कुर्वन्नानंदं कोविदानां जगति
विजयते श्रीनृसिंहः क्षितींद्र इति॥ अत्र चिंत्यते॥ तारानायकशेखरायेति पद्ये गिरिजासंगैकशृंगारिणि भगवति शवे
कविकर्तृकानतिः प्रक्रांता शृंगारता च शेखरादीनि विभूषणान्यपेक्षंत इति न आरोप्यमाणशेखररूपतयैवोपया त्याः

र॰गं॰ गोनस्वरूपेण॥एवं दृश्यापि तिलकरूपतयेति रूपकमेव शुद्धं भवितुमर्हति॥ननु परिणामे विषयाभिन्नत्वेन विपर्य्य
१९२ वतिष्ठत इत्युक्तं॥प्रकृते च विषयवाचकेभ्यो नद्यादिशब्देभ्यः परस्यास्तृतीयाया अभेदार्थकत्वाछब्दे स्वरादेश्च तद
न्वयित्वात्कथं नात्र परिणाम इति चेत्॥न विषयाभिन्नत्वेन विषयिणां भानेपि तेन रूपेण तस्यानुपयोगात्॥दूर्भावः
पुष्पकेतोरिति पद्येपि कोविदानंदजननजगदुत्कर्षिकथ्येत॥नत्र कोविदानंदजनकत्वमपि राज्ञ आरोप्यमाणद्वि B राशोषु लिंहस्य|
तीयमन्मथादितादात्म्येन यथा संभवति न तथा केवलस्वरूपेण॥तथाहि॥अहो नयना नाम स्मरदायानां साफल्यमय
द परो मन्मथोस्माभिरालोक्यत इति मन्यमानानां तेषां नयनानंदस्तावत्पुष्पकेतुनैवोपपद्यते न राज्ञा॥एवम १९२
परोयं कल्पतरुश्चिंतामणिर्हि तांश्चकर्णाइंद्रश्च भगनायमन्यो दारिद्र्यमस्माकं परिहरिष्यति॥हरिः खल्व

यं संसारं हरिष्यतीत्यभिमानाज्जायमानस्तेषामानंदोप्यारोप्यमाणैः कल्पवृक्षादिभिरेवेति न विषयास्तेन विषयिण
उपयोगो अपि तु स्वात्मनैवेति कुत्रास्ति परिणामः॥अलंकारसर्वस्वकारस्तु॥आरोप्यमाणस्य प्रकृतोपयोगित्वे परि
णाम इति सूत्रयित्वा आरोप्यमाणं रूपके प्रकरणाप्रयोगित्वाभावात् प्रकृतोपरंजकत्वेनैव केवलेनान्वयं भजते परि
णामे तु प्रकृतात्मतयारोप्यमाणस्योपयोग इति प्रकृतमारोप्यमाणतया परिणमतीति व्याख्यातवान्॥अत्रापि चिंत्यते॥
आरोप्यमाणस्य प्रकृतोपयोग इत्यस्य प्रकृतकार्ये उपयोग आहोस्वित्प्रकृतविषयात्मतया उपयोगोर्थः|न तावदाद्यः|
दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुंदरि नास्मि दूये॥उद्यत्कठोरपुलकांकुरकंटकाग्रैर्यत्खिद्य
ते तव पदं ननु सा व्यथा मे॥इति तदुदाहृतरूपकोदाहरणे आरोप्यमाणानां कंटकानां प्रकृतखेदव्यथारूपकार्ये उ

र॰गं॰ पर्यायेणातिप्रसंगात्॥ न द्वितीयः। अथ पल्लिमतामुपेयिवद्भिः सरसैर्वल्किपथाश्रितैर्वचोभिः॥ क्षितिभर्तुरुपायनं
१८३ चकार प्रथमं तत्परतस्तुरंगमाद्यैरित्यत्र स्वोक्तव्यधिकरणपरिणामोदाहरणासंगत्यापत्तेः॥ राजसंदर्शनेप्युपा
यनस्यारोप्यमाणस्य स्वात्मनैवोपयोगो न तु विषयवचोरूपतया वचसां तु विषयाणामारोप्यमाणोपायनरूप
त्वेन परमुपयोग इति प्रत्युत विपरीतं॥ तस्मादस्मदुक्तमेव व्यधिकरणपरिणामस्योदाहरणं साधु॥ इदं तु पुन
र्व्यधिकरणरूपकं भवितुमर्हति॥ तृतीयार्थाभेदोऽपि मीनवतीनयनाभ्यामित्यत्रैव प्रकृतस्यार्थानुपयोगिकोऽबोध्यः॥
केचित्तु क्वचित्केवलो विषयः स्वात्मना न प्रकृतोपयोगी स्वयमारोप्यमाणाभिन्नतयावतिष्ठते तत्रारोप्यमाणपरिणामः॥
यथा॥ वदनेनेंदुना तन्वी शिशिरीकुरुते दृशौ॥ अत्र वदनमिंदुभिन्नतयावतिष्ठते केवलस्य वदनस्य दृक्शिशिरी

DR BHAU DAJI MEMORIAL

कारकत्वायोगात्॥ क्वचिच्चारोप्यमाणः स्वात्मना न प्रकृतकार्योपयोगी स्वयं विषयाभिन्नतयावतिष्ठते तत्र विषयपरिणा
मः। यथा॥ वदनेनेंदुना तन्वी स्मरतापं विलुंपति॥ अत्रेंदुर्वदनाभिन्नतयावतिष्ठते॥ केवलस्येंदोः स्मरतापापनोद
कत्वायोगात्॥ एवं च परिणामद्वयात्मकमिदं रूपकमेव भवितुमर्हति विषयतावच्छेदकविषयितावच्छेदकान्यत
रपुरस्कारेणानिश्चीयमानविषयिविषयान्यतरत्वस्य तल्लक्षणत्वादन एवोक्तं॥ तद्रूपकमभेदाय उपमानोपमेय
योरिति तस्मान्न रूपकात्परिणामातिरिच्यत इति वदंति॥ अथ बोधः॥ हरिर्नवतमाल इत्यत्र भगवदभिन्नतमाल इति नि
र्विवादं यथा॥ तथा श्राव्यं श्राव्यं वचः सुधामित्यत्र विशेषणसमासगतपरिणाम एव च भिन्नां सुधामिति पाय्यं पाय्यं वचः ना-/°
सुधामिति रूपकं तु वचो निरोधाभेदप्रतियोगिन्नां सुधामिति बुद्धिः॥ एवं वदनेंदुना तन्वी स्मरतापं विलुंपतीति परिणामे ने।

र॰गं॰ वदनेनेंदुना तन्वि शिशिरीकुरुते दृशोः इति व्यस्तरूपके च बाधवैलक्षण्यं॥ तथा शांतिमिच्छसि चेदाशु सतां वागमृ
१८४ तं शृणु। हृदये धारणाद्यस्य न पुनः खेदसंभवः॥ इति परिणामश्च। एवमिति विहाय पिबेति कृते तत्रैव रूपके वि[illegible]मीरि ध्वा–।
वाग्बाणैर्धूयंते साधवः खलैः॥ सद्भिर्वचोमृतैः सिक्ताः पुनः स्वस्था भवंति ते इति रूपके च बाधव्यवस्थितिः॥ तथा अ
हीनचंद्रा लसताननेन ज्योत्स्नावती चापि शुचिस्मितेनेति व्यधिकरणपरिणामे ऽभेदस्य तृतीयार्थत्वाल्लसदानना
भिन्नहीनतरचंद्रयुक्तेति धीः॥ मीनवती नयनाभ्यामित्यत्र तु सरसीतादात्म्यारोपो बाधकाभावात्तावत्सिद्धस्तस्य
च मीनयोर्नयनाभेदारोपेणासमर्थनान्नयनयोर्मीनाभेदारोपो मृग्यः॥ स च तृतीयायाः प्रकृत्यर्थाभेदार्थकता १८४
यां न संभवतीति यथाकथंचित्तस्याः प्रकृत्यर्थनिष्ठाभेदप्रतियोगित्वार्थकत्वं वाच्यं॥ तेन नयननिष्ठाभेदप्रतियोगि

मीनयुक्तेति धीः॥ एवं चात्रारोप्यमाणे विषयप्रतियोगिकाभेदस्याभानान्न परिणामो अपि तु रूपकमेव॥ इयमे
व सरणिर्नग्राशेखरिणा दृशां तिलकिने इति प्रागुक्ताप्पयदीक्षितदत्तोदाहरणे च वचोभिरुपायनं चकारेत्यलं
कारसर्वस्वोदाहरणे च बोध्या॥ यदि पुनरारोप्यमाणे यथाकथंचिद्विषयाभेदप्रत्ययमात्रात्परिणामतोच्यते
नाद्रियंते च प्रकृतोपयोगस्तदा प्रवृत्तोस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकामिति॥ तदुदाहृतरूपकस्य परिणा
मतापत्तिः प्रेमलतिकामिति समासे प्रेम्णो विषयस्य लतिकायामारोप्यमाणायामभेदेन विशेषणत्वादिति दि
क्॥ अर्थपरिणामध्वनिर्विचार्यते। तत्र यत्तावदप्पयदीक्षितेन विद्याधरात्तध्वन्युदाहरणमनूद्य दूषितं[६]। तथाहि
॥नरसिंह धरानाथ के वयं तव वर्णने॥ अपि राजानमाक्रम्य यशो यस्य विजृंभते॥ अत्र राजपदेन चंद्रविषयेनि

६ चित्रमीमांसायाम्.

र॰गं॰ दिष्टत आरोप्यमाणस्य नृपस्याक्रमणरूपकार्योपयोगिनः प्रतीतेः परिणामो व्यज्यत इति ॥ तदयुक्तं ॥ तत्र ह्यारोप्य
१८८ माणस्य नृपस्य नृपात्मनैवाक्रमणोपयोगो न चंद्रात्मनेति ॥ तदसत् ॥ अत्र विजृंभणं नाम न केवलं प्रागल्भ्यमात्रं क
वैरिभिरंतर्यन्न यशः कर्तृकाक्रमणेन नृपस्य नृपात्मनैव कर्मतारूपउपयोगः स्यादपि तु निरतिशयेन मे गुणवत्तायां त्य-।
स्वसमानजातीयद्वितीयराहित्यप्रयुक्तः प्रौढिविशेषः आक्रमणं तु न्यक्कारभाव एव ॥ एवं चैवंविधविजृंभणेन चंद्रक
र्मकमेवाक्रमणमुपयुज्यते न तु नृपकर्मकमिति विषयितया व्यज्यमानस्यापि नृपस्य चंद्रात्मनैवाक्रमणोपयो
ग इति रमणीयमेव विद्याभरणोक्तं परिणामव्यंग्यताया मुदाहरणं ॥ यदपि तेनैव परोक्तिदूषयित्रा स्वयं परिणा १८८
याम| मस्य व्यंग्यतामुक्तं ॥ विगाहितपद्मसंतापं चित्तचिंतां परित्यज ॥ नन्वस्ति शीतलः शौरेः पादाब्जनखचंद्रमाः ॥ अत्र वि

रतापार्तिप्रतिहरिपादनखचंद्रसद्भावप्रदर्शनेन तमेव निषेवस्व तन्निषेवणादयं तापः शांतिमेष्यतीति परिणा
मो व्यज्यत इति तत्तुच्छं ॥ आरोप्यमाणस्य विषयात्मकत्वेन प्रकृतकार्योपयोगं परिणाम इति स्वयमेवोक्तं ॥ तत्र
प्रकृतकार्योपयोगमात्रं न परिणामशरीरमपि तु विषयिगतायाः प्रकृतकार्योपयोगितायाः अवच्छेदकीभूतं विष
यतादूप्यं ॥ एवं चात्र नखचंद्रसद्भावप्रदर्शनेन तन्निषेवणादयं तापः शांतिमेष्यतीति प्रकृतोपयोगितायां व्यंग्यत्वे
त् शक्य-| पि तदवच्छेदकीभूतस्य विषयिणि विषयतादूप्यस्य परस्य परिणामस्य वाक्यवाच्यत्व [redacted] संसर्गाद्यसर्वथैव न व्यं
ग्यत्वं वक्तुमुचितं ॥ इदं तूदाहरणं युक्तं ॥ इंदुना परसौंदर्यसिंधुना बंधुना विना ॥ ममायं विषमस्तापः केन वा शम
यिष्यते ॥ अत्र वक्तुर्विरहितया व्यज्यमानरमणीवदनाभिन्नत्वेनेंदुरभिप्रेतस्तेन रूपेणैव तस्य प्रकृतविरहसंतापश

र॰गं॰ मनहेतुत्वात्॥ न चात्र विषयनिगरणात्मिका अतिशयोक्तिर्वक्तुं शक्या॥ तस्यां ह्यारोप्यमाणाभिन्नत्वेन विषयस्य प्र
१८६ त्ययात्॥ यथा कमलं कनकलतायामित्यादौ कनकलताभिन्नायां वनितायां कमलाभिन्नं मुखमिति॥ इह तु मु नम्।
खस्य चंद्राभिन्नत्वेन प्रत्यये पुनर्न विरहतापशमनरूपप्रकृतकार्यसिद्धिरिति चंद्रस्यारोप्यमाणो मुखरूपविष स्य।
याभिन्नत्वं मृग्यं॥ तच्च व्यंग्यतायामेव भवतीति परिणामध्वनिरेवायं नातिशयोक्तिः॥ अयं त्वर्थशक्तिमूलः॥ श
ब्दशक्तिमूलपरिणामध्वनिर्यथा॥ पांथ मंद मते किं वा संतापमनुविंदसि॥ पयोधरं समाश्रयस्व येन शांतिमवाप्नु
शमि-/B. याः॥ अत्र तृह्यातितापशमनं तुल्येनोपस्थितमंदबाधनीयविशेष्यकस्मरतापवत्ताविशिष्टबुद्धौ सत्यां सहृदयस्य ता
दृशतापशमकरमणीस्तनरूपविषयताद्रूप्यबुद्धिर्भवति॥ दोषाश्चात्र पूर्ववदूह्याः॥ इति रसगंगाधरे परिणा

मप्रकरणं॥ मधु द्राक्षा साक्षादमृतमथ वामाधररुधा कदाचित्केषांचिन्न खलु विदधीरन्नपि मुदं॥ ध्रुवं ते जी
वंतोप्यहह मृतका मंदमतयो न येषामानंदं जनयति जगन्नाथभणितिः॥ अथ ससंदेहः॥ सादृश्यमूलो भारसमा
नविरोधकसमबलनानाकोट्यवगाहिनी धीः रमणीया संदेहालंकृतिः॥ अधिरोप्य हरस्य हंत चापं परिता
पं प्रशमय्य बांधवानां॥ परिणेष्यति वा न वा युवायं निरपायं मिथिलाधिनाथपुत्रीं॥ अत्र मिथिलाराजनोक्तौ तच्चिं
ताभिव्यंजकसंशयमात्रे अतिव्याप्तिवारणाय सादृश्यमूलेति॥ सादृश्यज्ञानरूपदोषजन्येत्यर्थः॥ तेन नसिंहवत्प्रांत
रं गच्छमृगं हंसं वस्य वाश्ववदित्युपमाविकल्पेवाकारप्रतीतविरोधकत्वांतरगमनगृहं हंस वनरूपनानाधर्मावगाहि
नि सादृश्यविषयकत्वेपि नातिप्रसंगः॥ तस्य सादृश्यज्ञानरूपदोषाजन्यत्वात्॥ मालारूपकातिप्रसंगवारणाय भा

र०गं० समानविरोधकेति।उत्प्रेक्षाव्यावृत्तयेसमबलेति।समानभासकसामग्रीकत्वार्थकंएतद्विशेषणद्वयं।प्राप्तस्यैवा
१८७ नेकत्वस्यस्फुटत्वार्थंनानेति।स्थाणुर्वापुरुषोवेतिलौकिकसंशयनिवृत्तयेरमणीयेति।चमत्कारिणीत्यर्थः।।एत
च्चविशेषणंसामान्यालंकारलक्षणप्राप्तमेव।।एवमुपस्कारकत्वमपिबोध्यं।।एतद्विशेषणद्वयस्यसादृश्यमूल
कत्वस्यचाभावेसंशयमात्रमेव।।यद्वा।सादृश्यहेतुकानिश्चयसंभावनान्यतरभिन्नधीरमणीयासंशयालंकृ
तिः।।साचशुद्धानिश्चयगर्भानिश्चयांताचेतित्रिविधा।।आद्यायथा।मरकतमणिमेदिनीधरोवातरुणतरस्त
रुरेषवातमालः।।रघुपतिमवलोक्यतत्रदूरादृषिनिकरैरितिसंशयःप्रपेदे।।द्वितीयायथा।।तरणितनया १८७
किंस्यादेषानतोयमयीहिसामरकतमणिज्योत्स्नावास्यान्नभसामधुराकृतः।।इतिरघुपतेःकायच्छायाविलोक

नकौतुकैर्वनवसतिभिःकैःकैरादौनसंदिदिहेजनैः।।तृतीयायथा।।चपलाजलदाच्युतालतावातरुमुख्या
दितिसंशयेनिमग्नः।।गुरुनिःश्वसितैःकपिर्मनीषीनिरणैषीदथतांवियोगिनीति।।एषुसंशयेषुमंजूषादिग
तकटकादिविवालंकारस्यव्यपदेशाः।।एवंचतंदृष्टवान्प्रथममद्भुतधैर्यवीर्यगांभीर्यमक्षणविमुक्तसमीप
जानिं।।वीक्ष्याथदीनमबलाविरहव्यथार्त्तरामोनवायमितिसंशयमापलोकः।।इत्यत्रापिचमत्कारेसादृश्यमूल प-।
त्वाभावान्नसंशयस्यालंकारत्वं।।एवमारोपमूलोयंससंदेहालंकारः।अध्यवसानमूलोपिदृश्यते।।यथा।।सिंदूरैः
परिपूरितंकिमथवालाक्षारसैःक्षालितंलिप्तंवाकिमुकुंकुमद्रवभरैरेतन्नभोमंडलं।।संदेहंजनयन्नृणामितिप रेतन्।
रिघ्रातत्रिलोकत्विषांप्रातःप्रातरुपातनोतुभवतांभव्यानिभास्वान्निधिः।।अयंचसंशयस्सविषयविषयककविरतिप

र०गं० रिपोपकतया कामिनीकरगतकंकणादिरिव मुख्यतयालंकव्यपदेश्यः॥ अत्र च विवक्षितविवेचने क्रियमाणे वि
१८८ किरणव्रातं सिंदूरत्वादिकोटिकः संशयः पर्यवस्यति॥ स च न सारोपः विषयविषयिणोस्तदनुकूलविभक्ते
रभावात्॥ अतः सिंदूरत्वादिना संशयधर्मि किरणव्रातोऽध्यवसीयत इति॥ अत्र विचार्यते॥ सिंदूरैः परिपूरितं
किमथ वेति पद्येनाथ सिंदूरादिकरणकपरिपूरितत्वादिकोटिको जगन्मंडलधर्मिकः संशयः शब्दात्प्रतीयते॥ त
स्मिंश्च संशये किमिदं सिंदूररजोवारण्यादाहोस्वित्लाक्षारसस्नाताहो कुंकुमद्रव इति सूर्यकिरणधर्मिकं संशयां
तरमानुगुण्यमाधत्ते॥ यथा पुरोवर्त्तिनि तुरगे स्थाणुर्वायं पुरुषो वेति संशयो भूतलमिदं स्थाणुमत्पुरुषवद्वेति १८९
संशये॥ एवं च सूर्यकिरणधर्मिकः संशयो गुणीभूतो व्यंजनागम्यत्वात् [illegible] विषयविषयिणोरारोपानुकूलविभ

क्तिकतां नापेक्षते॥ अपेक्षते च साक्षाच्छब्दवेद्यता[illegible]मिति कुतोऽध्यवसानमूलता संशयस्य॥ एतेनाध्यवसान या—
मूलतां संशयस्य निरूपयतो विमर्शिनीकारस्योक्तिरपास्ता॥ अप्यदी[illegible]क्षितास्तु अस्याः सर्गविधौ प्रजापतिर
भूच्चंद्रो नु कांतिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूह
लो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिरित्यत्र चंद्रादीनां संदेहधर्मिणामेवानेकत्वं प्रकारस्तु वर्णनीये
वनितास्रष्टृत्वमेकमेवेत्यनेककोटिकत्वाभावाद्विरोधेन परस्परप्रतिक्षेपकतया निबद्धानेककोट्यवगाहित्वरू
पस्य संशयलक्षणस्याव्याप्तिमाहुः[6]॥ तन्न॥ अत्र हि अस्याः सर्गविधौ यः प्रजापतिरभूत्स नु किं नु चंद्रः किं नु मद
नः किं वा नु वसंत इति संशयः प्रजापतिधर्मिकश्चंद्रत्वादिनानाकोटिक एवेति कुतोऽव्याप्तिः॥ न चात्र चंद्रादिधर्मिकः

६ चित्रमीमांसायाम्

§ चित्रमीमांसायामेव ·

र॰गं॰ संशयोयायुक्तोवक्तुं॥एवंचप्रजापतेःप्रथमोदृशोनस्यात्॥यदपि"साम्यादप्रकृतार्थस्ययाधीरनवधारणे"तिप्राचां
१८९ लक्षणंमत्कृताप्रबंधेनतएवदूषितंवंतस्तदपिन॥साम्यनिमित्तानिश्चयसंभावनान्यतरभिप्रायाधीरितिनदर्थ
या-B करणदोषाभावात्॥निश्चयत्वंतुसंशयघटितमेवनिर्वचनीयं॥उक्तेषूदाहरणेषुसोयंसंशयालंकारःस्वशब्द
वेद्यत्वाद्वाच्यःलक्ष्योयथा॥साम्राज्यलक्ष्मीरियमृध्यकेतोःसौंदर्यसिद्धेरधिदेवतावा॥रामस्यरामामवलोक्यलोकैः
शितिसंभ्रमदोलारुरुहेतदानीं॥अत्रपर्यायेणोभयकोट्यालंबनतयादोलासादृश्यात्संशयोत्रदोलाशब्देनलक्ष्यते॥
व्यंग्योयंयथा॥तीरेतरुण्यावदनंसलासंनीरेसरोजंचमिलद्विकासं॥आलोक्यधावत्युभयत्रमुग्धामरंदलुब्धालि
किशोरमाला॥अत्रकमलधर्मिकाभेदेनसंसर्गेणपुरोवर्त्तिव्यक्तिद्वयप्रकारकः कमलमिदमिदंवेतिभ्रमरगतः

DR BHAU DAJI MEMORIAL

* "कमलाभेदबुद्धेर्भ्रमरप्रवृत्त्युपायत्वेनापेक्षणात् (?) इदंपदार्थभेदबुद्धिविरशिकैविवाच्यम्। एकपदार्थधर्मिकापरपदार्थभेदबुद्धेरपरपदार्थधर्मिकैकपदार्थभेदबोधप्रयोजकत्वेन" This is the reading of B for the portion between the inverted commas: That some thing is wanting in this ms is evident from the text with which the sentence commences since they remain अनन्वित.

संशयोव्यंग्यः॥नच*"भ्रमरप्रवृत्त्युपायतयाकमलाभेदबुद्धेरपेक्षणादिदंपदार्थभेदबोधप्रयोजकत्वेन"कमलाभेद
बोधसाम्राज्यात्कमलत्वमेतद्वृत्तितद्वृत्तिवेतिवासंशयाकारःसोयंसंशयध्वनिः॥आज्ञासुमेपारविलंघनीयाकिंवा
तदीयानवचापयष्टिः॥वनस्थितािकिंवनदेवतावाशकुंतलावामुनिकन्यकेयं॥यद्यप्यत्रापिवाचकशब्दाभावाद्व्यं
ग्यएवभवितुमर्हतिसंशयस्तथापिविषयनिरूपणेनस्फुटमावेदितत्वान्नध्वनिव्यपदेशस्यहेतुरपितुगुणीभूत
व्यंग्यप्रभेदव्यपदेशस्य॥अनुगामीचात्रप्रतिकारंपृथगेवनिर्दिष्टः॥यत्तुचित्रमीमांसायांसंशयध्वन्युदाहरणप्र
संगेअप्पय्यदीक्षिताः॥कांचित्कांचनगौरांगींवीक्ष्यसाक्षादिवश्रियं॥वरदःसंशयापन्नोवक्षस्स्थलमवैक्षत॥अत्रसं
शयस्यशब्दोपात्तत्वेपितावन्मात्रस्यानलंकारत्वात्तदलंकारताप्रयोजकस्यवक्षस्स्थलेस्थितेवलक्ष्मीःततोवतीर्यपु

र०गं० रम्मिष्ठतीत्येवंसंशयाकारस्यवक्षरुहलमवेक्षतेत्यनेनव्यंग्यत्वात्संदेहालंकारध्वनिरत्रेति ॥ यथादर्पणेचपरिभोग
१०० दर्शिनीपृष्ठतःप्रणयिनोनिषेदुषःवीक्ष्यबिंबमनुबिंबमात्मनःकानिकान्यपिचकारलज्जयायत्रकानिकान्यपि
इतिसामान्यतानिर्दिष्टानुभावविशेषप्रतीत्यर्थंलज्जाशब्दप्रयोगेपितस्याःस्वविभावानुभावाभ्यांरसानुगुणा
भिव्यक्तिरूपोध्वनिरित्याहुः ॥ तदेतत्ध्वनितत्त्वविज्ञैरुपहसनीयमेव ॥ तथाहि ॥ संशयाविष्टइत्यत्रसंशयपदेन
कस्मिन्पदार्थेविरुद्धनानापदार्थसंबंधावगाहिज्ञानंसाक्षादेवनिवेद्यते ॥ तत्रकोसौविरुद्धोनानार्थइतिविशेषाकां
क्षायांवक्षरुहलावेक्षणेनवक्षरुहलग्नंवलक्ष्मीस्तितावतीर्यांकिंपुरस्तिष्ठतीत्यादिरर्थोव्यंजनव्यापारेणबोध्यमानः १००
शक्त्यासंशयशब्दनिवेदितज्ञानविशेषपरतोभूतेनसामान्यार्थेनसाकमभेदेनपर्यवस्यति ॥ एवंचसंशयमात्र

स्यशक्त्याबोधनाद्वक्षःस्थललक्ष्मीतेवेत्यादिविषयभागस्यापिविरुद्धनानार्थत्वेनसामान्याकारेणावलीढतयातथैवक
वलीकरणाद्वाच्यार्थसंशयपर्यवसायकत्वाच्चनकस्यापिध्वनिव्यपदेशहेतुत्वंयुक्तं ॥ सर्वथा~~वस्तु~~चुंबितस्यचतथा वाच्य-
त्वमितिध्वनिमार्गप्रवर्तकैःसिद्धांतितत्वात् ॥ तथाचद्वितीयोद्योतेशब्दार्थशक्त्याक्षिप्तोपिव्यंग्योर्थःकविनापुनःयत्रावि
ष्क्रियतेस्वोक्त्यासान्यैवालंकृतिर्ध्वनेरितिसूत्रयित्वासंकेतकालमनसंविटंज्ञात्वाविदग्धया ॥ हसन्नेत्रार्पिताकूतंली
लापद्मंनिमीलितं ॥ अत्रसंकेतकालमनसंज्ञात्वालीलापद्मंनिमीलितमितिवदताकविनालीलापद्मनिमीलन
स्यप्रदोषाभिव्यंजकत्वंस्वोक्त्यैवनिवेदितमितिध्वनिमार्गादयमपरएवगुणीभूतव्यंग्यस्यमार्गः ॥ यथावा ॥ अंबा
शेतेत्रवृद्धापरिणतवयसामग्रणीरत्रतातोनिःशेषागारकर्मश्रमशिथिलतनुःकुंभदासीतथात्र ॥ अस्मिन्पापा

र॰गं॰ ह्रमेकाकतिपयदिवसप्रोषितप्राणनाथा पांथायेत्थंतरुण्याकथितमवसरव्याहृतिव्याजपूर्वं।।अत्रनिःशंकंर
१९१ न्तुमायाहीत्यर्थश्चरणत्रयव्यंग्योप्यवसरव्याहृतेर्व्याजत्वंब्रुवताकविनास्फुटत्वोक्त्यानिवेदितइत्ययमपिनध्वने
र्मार्गइत्याहुरानंदवर्द्धनाचार्याः।।तृतीयोद्योतेचगुणीभूतव्यंग्यनिरूपणेव्यंग्यस्यार्थस्ययदिमनागप्युक्त्यात्रका
शनंतदागुणीभावएवशोभतेतस्माद्यत्रोक्तिंविनाव्यंग्योर्थस्तात्पर्येणप्रतीयते तत्रतस्यप्राधान्यात्ध्वनित्वमि त—|
तितदुक्तिविवेचनेभिनवगुप्तपादाचार्याः।।एवंचैवंविधेषुविषयेषुव्यंजकत्वस्यव्यंग्यस्यवामनागुक्तिसंस्पर्शमा
त्रेणध्वनित्वंनिराकुर्वाणाःकांचित्कांचनगौरांगीमितिपद्येशब्दाभिहितव्यंग्येध्वनित्वंकथमिवस्वीकुर्वीरन्।।एते १९१
नदर्पणेचपरिभोगदर्शिनीतिप्रागुक्तपद्येलज्जाध्वनित्वंयदीक्षितैरभ्यधीयततदप्यपास्तमितिदिक्।।अस्मिंश्चसं र—|

३ आलोचनाख्ये ध्वन्यालोकव्याख्याने.

शयेनानाकोटिषुक्वचिदेकएवसमानोधर्मः।।क्वचित्पृथक्सोपिक्वचिदनुगामीक्वचिद्बिंबप्रतिबिंबभावमापन्नः
क्वचिदनिर्दिष्टःक्वचिन्निर्दिष्टः।।तत्रमरकतमणिमेदिनीधरोवेतिप्रागुदाहृतपद्येश्यामाभिरामत्वंधर्मिणाराम
स्यकोदंडोश्चतमालमरकतमहीधरयोरेकएवानुगामीधर्मःप्रतीयमानत्वादनिर्दिष्टः।।सएवनिर्दिष्टोयथा।।नेत्रा
भिरामंरामायावदनंवीक्ष्यतत्क्षणं।।सरोजंचंद्रबिंबंवेत्यखिलाःसमशेरत।।अत्रनेत्राभिरामत्वरूपस्त्रिष्वेकए
वानुगामीधर्मोनिर्दिष्टः।।पृथगनुगामीनिर्दिष्टोयथा।।प्रागुदाहृतआज्ञासुमेयोरित्यादौ।।यथावा।।संपश्यतांता
मतिमात्रतन्वींशोभाभिराभासितसर्वलोकां।।सौदामिनीवासितयामिनीवेत्यवंजनानांहृदिसंशयोभूत्।।अत्रा
तिमात्रतनुत्वंसौदामिन्यांशोभाभिराभासितसर्वलोकात्वंचसितयामिन्यासहकांतायाःपृथगनुगामीधर्मःमाना स—|

र॰गं॰ धर्मः॥अत्रैव पूर्वार्धगतविशेषणद्वयस्यागे स एवानिर्दिष्टः॥बिंबप्रतिबिंबभावापन्नो यथा॥तीरे तरुण्या वद
११२ नं सहासमित्यादौ प्रागुक्ते॥यथा वा॥सपल्लवा किंनु विभाति वल्लरी सफुल्लपद्मा किमियं नु पद्मिनी॥समुल्लस
त्पाणिपदां स्मितानना मितीक्षमाणैः समलंभि संशयः॥अत्र पल्लवफुल्लपद्मे पाण्याननयोः प्रतिबिंबे कोट्योः
पृथङ्निर्दिष्टे॥इदमुदधेरुदरं वा नयनं वात्रेरुतेश्वरस्य मनः॥दशरथगृहे तदानीमेवं संशेरते स्म कवयोपि॥अत्र
तदानीमिति प्रकरणसाहाय्यवशाद्दशरथगृहेण धर्मिणाक्षिप्तस्य तत्कालजातस्य भगवतो रामस्य जलध्युदरा
दिसंशयकोटित्रयाक्षिप्तः साधारणश्चंद्रः प्रतिबिंबः॥इमौ च बिंबप्रतिबिंबभावावनिर्दिष्टावपि प्रतीयमानौ सा ११२
दृश्यं प्रयोजयतः॥एतेनानुगाम्येव धर्मोलुप्तः संभवति न तु बिंबित इति वदंतः परास्ता इति दिक्॥अयं च क्वचि

अना

दनाहार्यः क्वचिदाहार्यः यत्र हि कविना परनिष्ठः संशयो निबध्यते प्रायशः तत्रा(अना)हार्यः यथा तीरे तरुण्या मरकत
मणिमेदिनीधरो वेत्यादिषु प्रागुदाहृतेषु पद्येषु॥तत्र भ्रमरादीनां संशयानां नाम्नाद्यनिश्चयाभावात्॥यत्र च स्व
गत एव तत्राहार्यः॥यथा॥अलिर्मृगो वा नेत्रं वा यत्र किंचिद्विभासते॥अरविंदं मृगांको वा मुखं वेदं मृगीदृशः॥अ
त्र वक्तुः कवेस्तत्त्वज्ञतया संशयो वाहार्य एव॥परं परितोपि चायं संभवति|विद्वद्दैन्यतमःस्विन्मूर्त्तिरथ वा वैरींद्र
धिः वंशाटवीदावाग्निः किमहो महोज्ज्वलयशःशीतांशुदुग्धांबुधिः किं वानेगभुजंगदष्टवनिताजीवातुरेवं नृणां केषा
मेष नराधिपान्जनयत्यस्मिन्नराः कल्पना॥अत्राप्याहार्यः क्वचित्परनिष्ठोपि कविना निबध्यमान आहार्यो भवति य बि॰
था|गगनाद्गलितो गभस्तिमान्नु तवायं शिशिरो विभावसुः|मुनिरेव मरुंधतीपतिः सकलज्ञः|समशेत राघवं॥अ

× गलित(व गो:

र॰गं॰ अत्र मुनेर्वसिष्ठस्य सर्वज्ञत्वेनोपात्तस्य संशय आहार्य एव। यद्यप्यत्र मुनीनां च मतिभ्रम इत्युक्त्या तस्यानाहार्य एव संशयो वक्तुं शक्यस्तथापि कोटितावच्छेदकयोः शिशिरत्वगगन[illegible]रग्निसूर्यरूपकोटिद्वये आहार्यबाध
१९३ स्यैवावश्यवाच्यतया पुरोवर्त्तिन्यभेदेन कोटिद्वयाभेदांशेपि तस्यैव न्याय्यत्वात्। इह च कोटिद्वयार्थ मिसादृश्य यदादर्यो
योऽप्यत्वगगन[illegible]गतत्वरूप वैधर्म्यनिरासकमविद्यमानमपि गगनगलितत्वं शिशिरत्वं चारोप्यते वक्त्रा एवमाद
यो न्येपि प्रकाराः सुधीभिः समुन्नेयाः॥ इति रसगंगाधरे ससंदेहः॥ अथ भ्रांतिमान्। सदृशे धर्मिणि तादात्म्येन धर्म्यं
तरप्रकारकोनाहार्यो निश्चयः सादृश्यप्रयोज्यश्चमत्कारी प्रकृते भ्रान्तिः॥ सा च पशुपक्ष्यादिगता यस्मिन्वाक्यसंदर्भे नि १९३
बध्यते स भ्रान्तिमान्॥ अत्र च भ्रांतिमात्रमलंकारः भ्रांतिमानलंकार इति व्यवहारस्त्वौपचारिकः॥ तथा चाहुः॥ प्रमात्रे

तदर्थो भ्रांतिरूपा यस्मिन्नन्वद्यते॥ स भ्रांतिमानिति ख्यातोऽलंकारस्त्वौपचारिक इति॥ लक्षणे मीलितसामान्यतद्गुण ?
यं॰ वारणाय धर्मिस्वरूपं रूपकविवृत्तिवारणाय नाहार्य इति कविविभिन्न इति वा॥ संशयवारणाय निश्चय इति॥ इदं
वि॰ रजतमिति रंगविशेष्यकबोधवारणाय चमत्कारीति क[illegible]प्रतिभानिर्वर्त्तित इत्यर्थः॥ रंगे रजतमिति बुद्धेर्लौकिकत्व
यानकविप्रतिभानिर्वर्तितत्वं॥ अकरुणहृदयप्रियतम मुञ्चामि त्वामितः परं नाहं इत्यालपति करांबुजमादायालीज
नस्य विकलासा॥ इत्यत्र नायिकासंदेशहरस्यांको व्यज्यमानस्योन्मादस्य वारणाय सादृश्यप्रयोज्य इति॥ न चात्रो
न्मादस्य प्राधान्यात्सकलालंकारसाधारणेनोपस्कारकत्वविशेषणेनैव वारणमिति वाच्यं॥ तस्यापि पर्यायेति कवि
प्रत्यंगोपस्कारकत्वात्॥ यद्वा संदेहे शेरास्संदेशश्रुतवतो नायकस्य स्वमित्रं प्रति भेदं वाक्यमकरुणहृदयेत्यादि

र॰गं॰ तदास्मिन्नेवपद्येस्तेतिपदव्यंग्यायाःस्मृतेरुपस्कारकेउन्मादेतथात्यतिप्रसंगापत्तेःसादृश्यप्रयोज्यत्वमावश्यकं
११४ ।।लक्षणेचात्रैकत्वंविवक्षितमन्यथावक्ष्यमाणानेकगृहीतृकानेकप्रकारकैकविशेष्यकभ्रांतिसमुदायात्मन्युल्ले
खेतिप्रसंगापत्तेः।।अतएवैकवचनमपिसार्थकं।।उदाहरणं।।कनकद्रवकांतिकांतयामिलितंराममुदीक्ष्यकांत
या।।चपलायुतवारिदभ्रमात्तन्नृत्यंतिचातकपोतकैर्वने।।अत्रचातकगतहर्षोपस्कारकतयातद्गताभ्रांतिरलंकारः क-।
।।अत्रैवयदिपरिफुल्लपतत्रपल्लवैर्मुमुदेचातकपोतकैर्वनेइत्युत्तरार्धंनिर्मीयतेतदाभ्रांतिध्वनिः।।प्राचांयदीक्षितेन
लक्षणमुक्तं§।।कविसंमतसादृश्याद्विषयेपिहितात्मनिआरोप्यमाणानुभवोयत्रसभ्रांतिमान्मतइति।।तन्न।।कवि ११४
ज्यो संमतसादृश्यप्रयोज्यविषयेआरोप्यमाणानुभवोयत्रवाक्यसंदर्भेसभ्रांतिमानितिभ्रांतिमतोलक्षणंविधायरू

§ चित्रमीमांसायाम्

पकव्यावृत्त्यर्थंपिहितात्मनिइत्युच्यते।।नचैतद्युक्तं।।नहिरूपकवाक्येआरोप्यमाणस्यानुभवोवर्ण्यते।।किंतुतस्मा
ज्जायते।।नचात्रानुभवांतंभ्रांतेर्लक्षणमस्त्विमंचभ्रांतिमतः।।तत्रभ्रांतिलक्षणेरूपकातिव्याप्तिवारणायविषयेपिहि
तात्मनीतिविशेषणमितिवाच्यं।।अनुभवत्वघटितस्यभ्रांतिलक्षणस्यानुभूयमानाभेदात्मकेरूपकेकथमप्यप्रवृत्तेः
।।यदिचरूपकपदेरूपकबुद्धिपरमितिमत्वाथसामंजस्यंविधीयतेतदापिविषयतावच्छेदकानवगाहिनिमरकतमणि
मेदिनीधरोयातरुणतरस्तरुरेपवातमालइतिसंशयेतिप्रसंगात्।कमलमितिचंचरीकाश्चंद्रइतिचकोराःस्वमुख
मनुधावंतीतिभ्रांतिसमुदायात्मन्युल्लेखेतिव्याप्तेः।।अत्रभ्रांन्यासंकीर्णउल्लेखइतिचेत्।नह्येतावताउल्लेखांशातिव्या
प्तिर्नदोषः।।नहिदुग्धभागजलभागानांव्यामिश्रतास्तीतिदुग्धलक्षणंजलांशातिव्याप्तिकंकर्तुंयुक्तं।।यच्चापिभिन्नकर्तृ

* चित्रं— । § चित्रमीमांसायामेव·

र०गं० कोत्तरोत्तरभ्रांताउदाहृतं सिंजानमंजिरीतिस्तनकलशयुगं चुंबितं चंचरीकैस्तत्रासोल्लासलीलाः किसलयमन
१९८ सापाणयः कीरदृष्टः तत्क्लोपायालपंत्यः [illegible]निनदधियं ताडिताः काकलोकैरित्थं चोल्लंद्रसिंहल्वदरिमृगदृशां
नाथ्यरण्यं शरण्यमिति ॥ तत्र विचार्यते ॥ स्तनकलशयुगे हि नतावन्मंजरीसादृश्यं कविसमयसिद्धं येन तन्मूलो च
चरीकाणां भ्रांतिरूपनिबध्यते ॥ दोपांतरमूलानुमानालंकार इत्यनुपदमेव निरूपितं ॥ अपिच ॥ धर्मिणि कलश
रूपकानुवादे मंजरीभ्रांतिरूपमलंकारांतरमुपनिबध्यमानमुद्वेजकमेव सहृदयानां न हि सादृश्यमूलकालंका
राविच्छिन्नसादृश्यमूलकमलंकारांतरं शोभते ॥ यथा मुखकमलं तव चंद्रवत्प्रतीमहृदिति प्रागेव निवेदनात् ॥ प्रत्युत
कलशरूपकेण मंजरीसादृश्यतिरस्काराच्च ॥ तत्रासोल्लासलीलाः किसलयमनसापाणयः कीरदृष्टा इत्यत्र विधे

यविमर्शो हि धेयांतरमाकांक्षितं ॥ कीरदृष्टा इति तु भाव्यं ॥ जाता इत्यध्याहारेऽपि विवक्षितस्याविधेयत्वमविवक्षितस्य
च विधेयत्वं प्रसज्येत ॥ एवं तत्क्लोपायालपंत्यः पिकनिनदधिया ताडिताः काकलोकैरित्यत्र न तावत्पिकनिनदास्ता
डनयोग्याः काकानां येन तद्धिया आलपंत्यस्तास्ताड्यरन्नापि पिकनिनदभ्रम आलपंतीषु संभवति संभ[illegible]वानुसा वन- ।
दृश्यमूल ॥ पिकनिकरधियेति तु भाव्यं ॥ अथ तदालापेषु पिकनिनदबुद्धेरपि तासु पिकबुद्ध्युत्पादनद्वारा संभवत्येव
ताडनोपयोग इति त्रयोऽन्यस्वार्थकर्तृतीययापिकनिनदधीत्रयोज्यकाककर्तृकताडनकर्मत्वमालपंतीनां सुप्रति
पाद[illegible]मेवेति चेत नैवं ॥ तथात्रतांतरसिद्धः चौरबुध्याहतः साधुरित्यादौ चोरबुद्धिहननयोः सामानाधिकरण्येन हे
तुहेतुमद्भावगमकत्वव्युत्पत्तेः ॥ एवं दंतिबुध्याहतः भृंगैर्वराहो वनगोचर इत्यत्रापि विज्ञेयं तयावराहस्तं दंतिबुद्धे

BHAU DAJI

र०गं० श्रवं गाढवृत्तिज्ञाननन्तरं तु भावागमः त्वदुक्तरीत्यादौ तिबुद्धातिकृतं बाधकदर्शनेव ॥ किंच पिकानां द्विकूजितादि
१०६. शब्दैरेव शब्दैर्वर्ण्यते न तु निनदादिशब्दैः सिंहदुंदुभ्यादिशब्दत्रैयोग्यैः ॥ तथा प्रथमद्वितीयचरणस्थयोः योग-|
स्तनपाण्ड्योर्यथाकथंचिद्व्यवहितमपि जातान्वयमपि त्वदरिमृगदृशामिति षष्ठ्यंतमन्वेतुं शक्नुयात् न तु तृ
तीयचरणस्थ आलुपंत्य इत्यस्मिन् विशेषणविशेष्यभावेनेति तासां ताटस्थ्यमेव स्यात् ॥ विभक्तिविपरि-|
णतावपि प्रक्रमभंगो संकुलत्वाभ्यां क्लिष्टमेवेति ॥ पद्यमेवं व्युत्पन्ननिर्मितमेवोदाहृतेस्तु भ्रांत्यलंकारांश मिद-|
मादायोदाहृतमिति दिक् ॥ यत्त्वलंकारसर्वस्वकृता लक्षितं ॥ सादृश्याद्वस्त्वंतरप्रतीतिर्भ्रांतिमानिति ॥ तत्रोत्रा १०६
मुक्तसंशयालंकारे वक्ष्यमाणायामुत्प्रेक्षायां चातिप्रसंगात् ॥ प्रतीतिपदस्य निश्चयपरत्वे रूपकविस्तावति

प्रसंगात् ॥ विषयतावच्छेदकानवगाहित्वेन निश्चयो विशेषणीय इति चेद्विशेष्यतां तथा प्यतिशयोक्तिविना ब-|
वतिप्रसक्तिरवारितेवं ॥ अनाहार्यत्वेन निश्चयविशेषणत्वे पुनरस्मदुक्त एव पर्यवसितिः मुख्यार्थासंग
तिश्च ॥ तत्र कनकद्रवकांतिकांतयत्यत्र रसांतात् द्विता विविप्रतिबिंबभावः ॥ युतत्वामीक्लिन्नत्वयोश्च शुद्धसामा
न्यरूपता ॥ रामंस्निग्धतरश्यामं विलोक्य वनमंडले ॥ धाराधरधियाधारं नृत्यंति स्म शिखावलाः ॥ अत्रास्नि
ग्धत्वश्यामत्वयोरनुगामित्वं ॥ इति रसगंगाधरे भ्रांतिमत्प्रकरणं ॥ अथोल्लेखः ॥ एकस्य वस्तुनो निमित्तवशा श्च-|
द्यदनेकैर्ग्रहीतृभिरनेकप्रकारकं ग्रहणं तदुल्लेखः ॥ अधरं बिंबमाज्ञाय मुखमिंदुं च तन्वितं ॥ कीराश्चंचरीका
श्च विंदंति परमां मुदं ॥ अत्र कीरचंचरीकाभ्यामधरवदनयोर्बिंबत्वेन पद्मत्वेन च ग्रहणं भ्रांतिरूपमिति प्रसंग

र.गं. वारणायैकस्यवस्तुनइति॥ धर्मस्यात्माभागधेयंक्षमायाइत्यादिमालारूपकेअतिप्रसंगवारणायानेकैर्गृ ग्र-
१९७ हीतृभिरित्यविवक्षितबहुत्वकंग्रहणविशेषणं॥ नृत्यत्त्वद्वाजिराजिप्रखरखुरपुटप्रोद्धुतेधूलिजालेरालोका
लोकभूमीधरमतुलंनावंप्रयातेविश्रांतिकामयंतेरजनिरितिधियाभूतलेसर्वलोकाः॥ कोकाःक्रंदंतिशोकानल
विकलतयाकिंचनंदत्युलूकाः॥ अत्रधूलिजालरूपस्यैकस्यवस्तुनोनेकैर्लोककोकोलूकैर्गृहीतृभिरेकेनैवरज
नीत्वरूपेणप्रकारेणग्रहणमितिनत्रातिप्रसंगवारणायानेकप्रकारकमिति॥ ग्रहणमितिग्रहणसमुदायावि
वक्षितः॥ एकवचनंजातौ॥ अनेकग्रहीतृकस्यैकस्यग्रहणस्याप्रसिद्धेः॥ तेनद्वयोर्बहूनांवाग्रहणेनिमित्तवशा १९७
दितितुवस्तुकथनमात्रं॥ उदाहरणं॥ नरैर्वरगतिप्रदेत्यथसुरैःस्वकीयापगेत्युदारतरासिद्धिदेत्यखिलसिद्ध

संघैरपि॥ हरेस्तनुरितिश्रितामुनिभिरस्तसंगैरियंतनोतुममशंतनोःसपदिशंतनोरंगना॥ अत्रबलिष्ठारुचि
भ्यांनिमित्ताभ्यामस्त्यनेकग्रहीतृकवरगतिप्रदात्वाद्यनेकप्रकारकग्रहणसमुदायोगंगाविषयकरतिभावोप
स्कारकः॥ शुद्धएवचात्रायमुल्लेखालंकारोरूपकाद्यमिश्रणात्॥ संकीर्णोपिदृश्यते॥ यथा॥ आलोक्यसुंदरिमुखं
तवमंदहासंनंदंत्यमंदमरविंदधियामिलिंदाः॥ किंचालिपूर्णमृगलांछनसंभ्रमेणचंचूपुटंचटुलयंतिचि
रंचकोराः॥ अत्रैकैकग्रहणरूपभ्रांत्यासमुदायात्मकःशुद्धोल्लेखःसंकीर्णः॥ वनितेतिवदंत्येतांलोकाःसर्वे
वदंतुतेयूनांपरिणतासेयंनपश्यंतिमतंमम॥ अत्रविषयतावच्छेदकस्यपरसमत्वेननिषेध्यतयापन्यासा
दपह्नुत्यासंकीर्णः॥ अप्पय्यदीक्षितास्तु॥ एवमपियदि॥ कांत्याचंद्रंविदुःकेचित्सौरभेणांबुजंपरे॥ वक्रंतववयंत्र

र०गं० मस्तु परसंकंयं गतं द्वयमित्यपह्नवोदाहरणविशेषेतिव्याप्तिः शंक्या तदानीमनेकधोल्लेखनं निषेधास्पृष्टत्वेन
११९ विशेषणीयं ॥ तत्राद्योल्लेखनद्वयं परमतत्त्वोपन्याससामर्थ्यात् गम्यमाननिषेधमिति नातिव्याप्तिरित्याहुः ॥ तत्र
ध । ॥ द्विविधश्चायमुल्लेखः शुद्धोऽलंकारांतरसंकीर्णश्चेत्युक्त्वा श्रीकंठजनपदवर्णने यस्तपोवनमिति मुनिभिरगृह्य क्त्वा ।
तेत्यादौ शुद्धोऽयमनगरमिति शत्रुभिर्वज्रपंजरमिति शरणागतैरित्यादौ भ्रांतिरूपकादिसंकीर्ण इति स्वयमेवोक्त
वान् ॥ इहाप्यपह्नुत्या संकीर्ण उल्लेख इत्यस्य सुवचत्वात् ॥ यदि चैवंविधापह्नुतिवारणाय निषेधास्पृष्टत्वं विशे
षणमुच्यते ॥ तदा कपाले मार्जारः पय इति करान् लेढि शशिनस्तरुच्छिद्रप्रोतान्विसमिति करी संकलयति रतांते ११९
तल्पस्थान् हरति वनिताप्यंशुकमिति प्रभामत्तश्चंद्रो जगदिदमहो विभ्रमयतीति त्वदुदाहृतभ्रांतावतिप्रसंगः क

थं नाम वार्यते मार्जाराद्यनेकगृहीतृकानेकधोल्लेखनस्य तत्रापि सत्त्वात्स्वस्वप्रियाहारत्वप्रयोगारूपनिमित्तभेदाच्च । मि-
॥ तस्मात्संकीर्णनिवारणाय यत्नोऽनर्थक एव ॥ संशयसंकीर्णो यथा भानुरग्निर्यमो वायुर्बलिः कर्णोऽथ वा शि
विः ॥ प्रत्यर्थिनश्चार्थिनश्च विकल्प्यंत इति त्वयि ॥ अत्र द्वयोर्ग्रहणयोः प्रत्येकं संशयत्वं समुदायस्य तूल्लेखता ॥ अयं
स्वरूपमात्रोल्लेखने स्वरूपोल्लेखः प्रागेव निरूपितः ॥ फलानामुल्लेखे फलोल्लेखो यथा ॥ अर्थिनां दातुमेवेति त्रातु
मेवेति कातराः । ज्ञातोऽयं हंतुमेवेति वीरास्त्वां देव जानते ॥ हेतूनामुल्लेखे हेतूल्लेखः ॥ यथा ॥ हरिचरणनखरसंगादे
केदारमूर्द्धसंस्थितेरन्ये त्वां प्राहुः पुण्यतमामपरे स्मरंति निजवस्तुमाहात्म्यात् ॥ अथ प्रकारांतरेणाप्युल्लेखो दृश्यते ॥
॥ यत्र असत्यपि ग्रहीत्रनेकत्वे विषयाश्रयसमानाधिकरणादीनां संबंधिनामन्यतमानेकत्वप्रयुक्तमेकस्य वस्तुनो

र०गं० नेकप्रकारत्वं॥अयमपिद्विविधःशुद्धोलंकारांतरसंकीर्णश्च॥शुद्धोयथा॥दीनव्रातेदयार्द्रानिखिलरिपुकुलेनि
१९९ र्दयाकिंचमूढाकाव्यालापेषुतर्कप्रतिवचनविधौकर्कशत्वंदधाना॥रु[illegible]धर्मेघल[illegible]वसुनिपरविपद्दर्शने
कादिशांकाराजभाजन्मरम्यस्फुरतिबहुविधानावकीचित्तवृत्तिः॥अत्रदीनव्रातादीनांविषयाणामनेकत्वाच्चि श्र-|
त्तवृत्तेरनेकविधत्वंराजविषयकरतिभावोपस्कारकोयमुल्लेखः॥यद्यपिचित्तवृत्तिव्यक्तीनामत्रैक्यंनास्तितथा
पितदीयचित्तवृत्तित्वेनसामान्येनतासामेकत्वंविवक्षितं॥यथावा॥कांतराःपरदुःखेषुनिजदुःखेषुकातराः॥
अर्थघल्लोभायशसिसल्लोभाःसंतिसाधवः॥अत्रापिसा[illegible]धवःसंतीत्यनेनमृताअपिनमृतास्तदितरेपुनरमृताअ १९९
पिमृताइत्यर्थाभिव्यक्तिद्वाराव्यज्यमानेसाधूत्कर्षविशेषेउपस्कारकोयं॥यथावा॥तुषारस्तापसव्रातेतामसे

षुचतापिनः॥दुर्गंतास्ताडकाशत्रोर्भृत्यासुमेमभूयैतें॥पूर्वपद्ययोर्विषयानेकत्वप्रयुक्तमिहत्वाश्रयानेकत्वप्रयुक्त
मनेकविधत्वंदुर्गंतानां॥विद्वत्सुविमलज्ञानाविरक्तायतिषुस्थिताः॥स्त्रीयेषुतुग्ररोद्वारानानाकाराःक्षितौखलाः॥
अत्रविद्वदादिसहचरभेदप्रयुक्तंखलानामनेकविधत्वंएवमन्येषांसंबंधिनांभेदेप्यूह्यं॥संकीर्णोयथा॥गगने
चंद्रिकायंतेहिमायंतेहिमाचले॥पृथिव्यांसागरायंतेभूपालनवकीर्त्तयः॥अत्रोपमयाआपाततःप्रतीयमानया
रा-| पर्यवसितयावोल्लेखस्यासंकीर्णः॥उपरिकरवालधाराकाराःक्रूराभुजंगमपुंगवात्॥अंतःसाक्षाद्द्राक्षादीक्षागुरवो द-/
जयंतिकविजनाः॥अत्रोपमाव्यतिरेकाभ्यांतयोःसमुच्चयेनचसंकीर्णः॥यमःप्रतिमहीभृतांहुतवहोसितभ्रुवा
हुंसनांखलुयुधिष्ठिरोधनपतिर्धनाकांक्षिणां॥मृगेंद्रशरणार्थिनांकुलिशकोटिभिर्निर्मितंत्वमेकइहभूपलवकवि त

वृ|B. र०गं० धाविधात्रा कृतः॥अत्र कविना यमत्वादिना रूपेण राज्ञो रूपवत्तः करणाद्रूपकेण विपक्षभूपालादीनामेतस्मिन्छाया
२०१ ते यमत्वादिना भ्रांतिरपि संभवतीति भ्रांतिमता विपक्षभूपालादिभिरनेकैर्गृहीतृभिर्यमत्वादिभिरनेकैर्धर्मैरु
प्र| ल्लेखनात्प्रागुक्तोल्लेखप्रकारेणवासंकीर्णोयं संबंधिपक्षतभेदयुक्तवं नैकविधत्वकउल्लेखः॥अत्रेदं ण्यि-|
बोध्यं॥प्रथमनिरूपितोल्लेखप्रकारे यमहाविष्णुरिति वैष्णवाः शिव इति शैवाः यज्ञपुरुष इति याज्ञिकाः स्वभाव इ
ति लौकायतिकाः ब्रह्मेत्यौपनिषदा विदंति सोयमादिपुरुषो हरिरित्यादौ तत्तद्द्रष्टृकतत्तत्प्रकारकज्ञानसमुदा
यस्य चमत्कारजनकतया अनुभवसिद्धत्वेनालंकारत्वं द्वितीये तु प्रकारे यः शिशुषु सदयो दुष्टेषु करालः इत्यादौ न २००
तद्विषयभेदभिन्नस्य प्रकारसमुदायमात्रस्य तथात्वं न तु विद्यमानस्यापि ज्ञानांशस्य चमत्कारत्वेनानुभवात्॥ न-|

चमत्कारनिबंधनोयमलंकारो भावउपमादीनां॥अत एवास्माभिर्विषयाद्यन्यतमानेकत्वप्रयुक्तमेकस्य वस्तुनोने
कप्रकारत्वमिति द्वितीय उल्लेखो लक्षितः॥एवं च लक्षणद्वयान्यतरत्वमुल्लेखसामान्यलक्षणतावच्छेदकमित्याहुः॥ ण-|
परे तु प्रकारद्वयेपि वर्ण्यवृत्तित्वेन भासमानप्रकारसमुदाय एवोल्लेख इत्यपि वदंति॥अथोल्लेखस्य ध्वनिः॥यथा॥
अनल्पतापाः कृतकोटिपापा गदैकशीर्णा भवदुःखजीर्णाः॥विलोक्य गंगां विचलत्तरंगाममी समस्ताः सुखिनो भवंति ल—
तृ ॥अत्र पूर्वार्द्धोदीरितानां चतुर्णां विलोकनकर्तृणां स्वस्वोक्त्या क्रमेण तापपापरोगभयनाशकत्वप्रकारकाणि गंगाह
णान्याक्षिप्यंते॥अयं च शुद्धस्योल्लेखस्य ध्वनिः॥संकीर्णस्य यथा॥स्मयमानाननां तत्र तां विलोक्य विलासिनीं॥चकोराः
चंचरीकाश्च मुदं परं तरां ययुः॥अत्र ध्वन्यमानया एकैककर्तृकरूपया भ्रांत्या तदुभयसमुदायात्मा उल्लेखः संकीर्णः॥ उ-|

र॰गं॰ न चात्र भ्रांतेरेव चमत्कार इति शंक्यापह्नवदुल्लेखः॥अनेककर्तृकानेकधाग्रहणस्यालंकारांतरविविक्तविषयस्य
२०१ चमत्कृतेरत्रापि सत्वाद्द्वितीयस्योल्लेखस्य ध्वनिर्यथा॥भासयति व्योमगता जगदखिलं कुमुदिनीर्विकासयति
ति। कीर्त्तिस्तव धरणिगता सगरकृतायासमफलतां नयते॥अत्राधिकरणभेदप्रयुक्तमेकस्यामेव कीर्त्तौ चंद्रि
कात्वसागरत्वरूपानेकविधत्वं रूपकसंकीर्णं ध्वन्यते॥इति रसगंगाधरे पंडितराजजगन्नाथभट्टनिर्मिते उल्ले
खप्रकरणं॥अथापन्हुतिः॥उपमेयतावच्छेदकनिषेधसामानाधिकरण्येनारोप्यमाणमुपमानतादात्म्यमपन्हु
तिः॥रूपकवारणाय तत्तीयांतं॥अस्यां चोपमेयतावच्छेदकस्य निषेधादुपमेयतावच्छेदकोपमानतावच्छेद
कयोर्विरोधो गम्यते॥रूपके तु तयोः सामानाधिकरण्यप्रत्ययात्स निवर्त्तते॥उदाहरणं॥स्मितं नैतत्किंतु प्रकृति

DR BHAU DAJI

रमणीयं विकसितं मुखं ब्रूते मूढः कुसुममिदमुद्यत्परिमलं स्तनद्वंद्वं मिथ्या कनकनिभमेतत्तनु फलयुगं लता रम्या यु
सेयं भ्रमरकुलनम्या न रमणी॥इयं चानुमाह्वानुमाहकभावापन्नावयवकसंघातात्मकतया सावयवा॥निर
वयवा यथा॥श्यामं सितं च सुदृशो न दृशोः स्वरूपं किंतु स्फुटं गरलमेतदथामृतं च॥नो चेत्कथं निपतनादन
योस्तदेव मोहं मुदं च नितरां दधते युवानः॥अत्र प्रतिज्ञातार्थवैपरीत्यबाधकोपन्यासाद्धेत्वपन्हुतिः॥अस्यां
च नञादिभिः साक्षात्परमतसिद्धत्वाद्युपन्यासैश्च किंचिद्व्यवधानेन विषयस्य निषेधे बोध्यमाने प्रायशो वाक्यस्य
भेदः॥मिषछलछद्मकपटव्याजवपुरात्मादिशब्दैस्तु नस्यैक्यं॥क्वचिदपन्हवपूर्वकत्वं क्वचिच्चारोपपूर्वकत्वं क
चिद्विषयितादात्म्यविषयनिषेधयोरेकस्य शाब्दत्वमेकस्यार्थत्वं क्वचिदुभयोः शाब्दत्वमथोभयोरार्थत्वं विधेयत्व

२०गं० मनुवाद्यत्वं वेत्येवमनेकप्रकाराः संभवंति॥ परंतु न ते वैचित्र्यविशेषमावहंतीत्युगणनी[illegible]एवमपि दिङ्मात्र या:|
२०२ मुपदर्श्यंते॥ तत्र प्रागुपदर्शितायां सावयवापन्हुतौ प्रथमावयवे पन्हवपूर्वकत्वं उभयोः शाब्दत्वं विधेयत्वं वाक्य (बं-|
भेदश्च। द्वितीयावयवे तु कक्रगतामृदनोत्स्यात् दूतभ्रांतिप्रतिपत्तिव्यवहितो निषेधप्रतिपत्तिरिति निषेध आर्थः
॥ तादृप्यशाब्दं विधेयत्ववाक्यभेदापन्हवपूर्वकत्वानि पूर्ववत्॥ चतुर्थावयवे पुनरारोपपूर्वकोपन्हवः॥ उभयोः
थ्र-| शाब्दत्वं विधेयत्वं वाक्यभेदश्च प्रथम[illegible]मवदेव॥ वदने विनिवेशिता भुजंगीपिशुना रसनामिषेण धात्रा॥ अनयाक नो|
थमन्यथावल्गीढा नहि जीवंति जना मनागमंत्राः॥ अत्र कवाक्यत्वं निषेधतादृप्ययोरार्थत्वं विधेयत्वं च॥ निवेश २०२
नस्य विधेयत्वात्॥ एवमन्यदप्यूह्यं॥ अत्र लक्षणे आरोप्यमाणमित्यस्याहार्यनिश्चयविषयी[illegible]क्रियमाणमित्यर्थः॥

तेनेनसंग्रामांगणसंमुखाहतकियद्विश्वंभराधीश्वरव्याकीर्णीकृतमध्यभागविवरोन्मीलन्नभोनीलिमा॥ अं
नस-| गारप्रखरैः करैः कवलयन् सद्यो जगन्मंडलं मार्तंडोयमुदेति केन पशुना लोके शशांकीकृतः॥ अत्र विरहिजनवा
क्येनायं शशांकोपि तु सच्छिद्रो मार्तंड इति छायामात्रमपन्हुतं नत्वपन्हुत्यलंकारः॥ तज्ज्ञानस्य दोषविशेषजन्य
त्वेनानाहार्यत्वात्। किंतु भ्रांत्यलंकार एव॥ अस्मिन्मृगांवानेत्रवा यत्र किंचिद्विभासते॥ अरविंदं मृगांकोवा मुखंवे
दं मृगीदृशः। इत्यत्र मुखमरविंदं वेति कविनिष्ठाहार्यसंशये मुखनिषेधसामानाधिकरण्येनाविषयीभवतोरविं
दतादात्म्यस्य निश्चयविषयत्वाभावान्न संगतिः। न चात्र विषयनिषेधस्यापदार्थत्वं शंक्यं वाशब्दार्थत्वात्॥ यत्तु कुव स्या-|B.
लयानंदाख्ये संदर्भे अप्पयदीक्षितैरपन्हुतिप्रभेदकथ[illegible]नावे पर्यस्तापन्हुत्याख्यं भेदं निरूपयद्भिरभिहितं॥ न-|

स्ता- सा-

र० गं०" अन्यत्र तस्यारोपार्थः पर्यस्तापन्हुतिस्तु सा नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखमिति॥ अत्रचिंत्यते॥ नायम-
२०३ पन्हुतेर्भेदो वक्तुं युक्तः॥ अपह्नुति सामान्यलक्षणानाक्रांतत्वात्॥ तथाहि॥ प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वप
ह्नुतिः॥ उपमेयमसत्यं कृत्वोपमानं सत्यतया यत्स्थाप्यते सापह्नुतिरिति काव्यप्रकाशोक्तलक्षणबहिर्भावस्ताव
त्स्फुट एव॥ एवंविषयापन्हवे वस्त्वंतरप्रतीतावपन्हुतिरित्यलंकारसर्वस्वोक्तलक्षणमपि नात्र प्रवर्त्तते॥ प्र
कृतस्य निषेधेन यदन्यत्वप्रकल्पनं॥ सा स्यादपन्हुतिर्वाक्यभेदाभेदवती द्विधेति चित्रमीमांसागतं त्वभिर्मि
कि तर्हि सुधांशुः| तमपि लक्षणमिह तथैव॥ तस्मान्नायं सुधांशुः प्रेयसी~~मुखमित्यत्र दृढारोपरूपकमेवभवितुमर्हति नापन्हु~~ २०३
~~तिः॥ उपमेयतोपमानावछी~~मुखमित्यत्र दृढारोपरूपकमेवभवितुमर्हति नापन्हुतिः॥ उपमेयतोपमाने

नावच्छेदकयोः सामानाधिकरण्यस्य निरूह्यभानात्॥ तदुक्तं विमर्शिन्यां॥ न विषयं विषमित्याहुर्ब्रह्मस्वं विषमुच्य
ते॥ अत्र विषत्वस्य निषेधपूर्वं ब्रह्मस्वविषये आरोप्यमाणत्वाद् दृढारोपरूपकमेव नापन्हुतिरिति॥ यदि च प्राचीनम
तमुपेक्ष्यालंकाररत्नाकारेणैवमयाप्ययं प्रकारोपह्नुतिमध्ये भणितः इत्युच्यते तदा आहार्यताद्रूप्यनिश्चयस्य समान-
त्वाद्रूपकभेद एवापह्नुतिरित्युच्यतां निरस्य तां च प्राचीनमुखदाक्षिण्यं॥ एवमपि चित्रमीमांसागतत्वभिर्मितापन्हुति
लक्षणस्यात्राव्याप्तिः स्थितैव॥ अपि च॥ यदि नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखमित्यत्र पर्यस्तापह्नुतिरित्युच्य
निर्दिष्टं॥ तदा तस्यामेव त्वत्कृतचित्रमीमांसागतस्य बिंबाविशिष्टे विषयेऽप्यनिन्हुते [illegible]उपरंजकतामेति विषयीरू
पकं तदेति रूपकलक्षणस्यातिव्याप्तिर्वज्रलेपायिता स्यात्॥ विषयिणो निन्हवेपि विषयस्यानिन्हुतत्वात्॥ अथापि चि

र॰ गं॰ त्रमीमांसायांप्राचीनमतानुसारेणरूपकलक्षणंकुवलयानंदंरत्नाकराद्यनुसारेणापह्नुतिर्वोक्तिरितियथा
२॰४ कथंचित्सामञ्जस्यंविधेयमितिदिक्॥अनल्पजांबूनददानवर्षंतथैवदर्पंजनयन्नृजनेषु॥दारिद्र्यधर्मंक्षपणक्षमो
यंधाराधरोनैवधराधिनाथः॥सावयवारोपेयमपह्नुतिः॥आरोपमात्रोपायत्वेपरंपरितारोपाप्येषासंभवति॥य
था॥मनुष्यइतिमूढेनखलः केननिगद्यते॥अयंतुसज्जनांभोजवनमत्तमतंगजः॥अस्याश्चध्वनिः॥यथा॥दयि
तेरदनत्विषांमिषादयिनेमीविलसंतिकेसराः॥अपिचालकवेषधारिणोमकरंदस्पृहयालवोलयः॥अत्रनैता
रदनत्विषः किंतुकिंजल्कपरंपराः नचैतेअलकाः अपितुअलयइतिपूर्वोत्तरार्द्धाभ्यांहेअर्द्धनीतावक्त्राकद्वेनैव प॰२॰४
निवेदितेताभ्यांचनत्वंनारीकिंतुकमलिनीतितृतीयापह्नुतिर्व्यंजनव्यापारेणप्राधान्येननिवेद्यते॥नत्संबंधि

६ चित्रमीमांसायाम्

वस्तुनिषेधारोपयोस्तन्निषेधारोपनिवेदकत्वस्यन्याय्यत्वात्तुल्ययोगितातुगुणतयास्थिता॥यत्त्वप्पयदीक्षि
तैरपह्नुतिध्वनावुक्तं॥वदालेख्यकौतूहलतरलतन्वीविरचितेविधायैकांचक्रंरचयतिसुपर्णंसुतमपि॥अ
पिस्विद्यत्पाणिस्त्वरितमपमृज्यैतदपराकेरपौष्पंचापंमकरमुपरिष्टाल्लिखतिइत्यादावपह्नुतिध्वनिरुदा
हर्त्तव्यः॥अत्रहिचक्रसुपर्णलेखनेननायंसाधारणःपुरुषःकिंतुपुंडरीकाक्षइतिकयाचिद्व्यंजितं अन्ययातु
तस्याप्येतादृशंरूपंनसंभवतीत्याशयेननायंपुंडरीकाक्षोऽपिकिंतुमन्मथइतितदुभयमपमृज्यपुष्पसायकम
करध्वजलेखनेनव्यंजितमिति॥तदेतदापातरमणीयं॥यत्तावदुच्यतेचक्रसुपर्णलेखनेननायंसाधारणःपुरु
षःकिंतुपुंडरीकाक्षइतिकयाचिद्व्यंजितमितितत्रापह्नुतेर्द्वौभागौ॥उपमेयनिषेधउपमानारोपश्चेति॥तयोस्ता

र॰गं॰ यदुपमानारोपभागः पुंडरीकाक्षोयमित्याकारश्चक्रसुपर्णलेखनेनवक्तुंशक्यः चक्रसुपर्णयोस्तत्संबंधित्वात्।।
२०९ ननुनायंसाधारणः पुरुषइत्युपमेयनिषेधभागोपिव्यंजकस्यारोपमात्रव्यंजनसमर्थस्य तादृशनिषेधव्यंजनेसा
मर्थ्याभावान्नाप्यनुभवसिद्धः सः येनतद्व्यंजनायोपायोगवेष्येत।। नापिगवेष्यमाणोपितद्व्यंजनोपायः शाब्दो
र्थोवाउपलभ्यते।। येनानुभवकलहोपिस्यात्।। नचसाधारणपुरुषनिषेधमंतरेणपुंडरीकाक्षतादात्म्यारोपो
दुर्घटइतिसोपिध्यज्यतइतिवाच्यं।। रूपकोच्छेदापत्तेः।। मुखंचंद्रइत्यादौमुखनिषेधमंतरेणचंद्रत्वंदुरारोपमि
त्यस्यापिसुवचत्वात्।। तत्रापिमुखनिषेधावगमेजितमपन्हुत्या।। अथमुखंचंद्रइतिरूपकेमुखत्वसामानाधिकर २०६
ण्येनचंद्रतादात्म्यस्यारोप्यमाणतयानमुखनिषेधापेक्षेति चेत्प्रकृतेपितर्हितादृशसाधारणपुरुषत्वसामाना

धिकरण्येनपुंडरीकाक्षतादात्म्यारोपरूपमसौराजापुंडरीकाक्षइत्याकाररूपकमेवभवितुमर्हतिनापन्हुतिः।।
यदपिचोच्यतेनायंपुंडरीकाक्षोऽपितुमन्मथइत्यादि।। तत्रयद्यपिचक्रसुपर्णदूरीकरणेननायंपुंडरीकाक्ष
इतिनिषेधः पुष्पचापध्वजगतमकरयोर्लेखनेनचमन्मथोयमित्युपमानारोपश्चव्यंग्योभवितुमर्हति।। तथापि
नासावपन्हुतिः प्रकृतस्यनिषेधेनयदन्यत्वप्रकल्पनमितित्वत्कृतलक्षणस्याप्यत्रासत्वात्।। अत्रहि।। निषेध्यस्य
भगवतः पुंडरीकाक्षस्यावर्ण्यत्वेनाप्रकृततयाप्रकृतनिषेधाभावात्।। नहिपूर्वारोपिततामात्रेणप्रकृतत्वंवक्तुंश
क्यं।। प्रकृतपदस्यारोपविषयपरतायानिषिद्धविषयमित्यादिनाग्रन्थस्य फलंब्रुवताभवतैवस्फुटीकरणात्।। का
व्यप्रकाशकृतापिप्रकृतंयन्निषिध्यान्यत्साध्यतेसात्वपन्हुतिरितिसूत्रंव्याचक्षाणेनोपमेयमसत्यंकृत्वेत्यादिना

र॰गं॰ प्रकृतपदस्योपमेयपरतयैवव्याख्यानाच्च॥प्राचीनमतसिद्धेयमपन्हुतिर्व्यंग्यत्वेनास्माभिरिहोच्यते॥त्वयापिकुश
२०६ काशावलंबनमात्रंप्रकृतस्यनिषेधेनेत्यादिलक्षणंकुर्वताभवतैवतस्याबहिःकरणात्॥एवमपिउक्तपद्येकोलं
कारोव्यंग्यइतिचेत्॥विच्छित्तिवैलक्षण्येतिरिक्तोन्यथात्वपन्हुतिरेवास्तुलक्षणंतुतदाप्रसक्तयत्किंचिद्वस्तुनिषेध
सामानाधिकरण्येनक्रियमाणवस्त्वंतरारोपत्वमेव॥तस्मात्सर्वमेवेदमहृदयंगमंसहृदयानां॥इतिपंडितराज
भट्टजगन्नाथनिर्मितेरसगंगाधरेअपन्हुतिप्रकरणं॥अथोत्प्रेक्षाप्रकरणं॥तद्भिन्नत्वेनतदभाववत्त्वेनवाप्रमि
तस्यपदार्थस्यरमणीयतद्वृत्तितत्समानाधिकरणान्यतरतद्धर्मसंबंधनिमित्तकंतत्त्वेनतद्वत्त्वेनवासंभावनमु २०६
र- त्प्रेक्षा॥लोकोत्तरप्रभावत्वांमन्येनारायणंपरमित्यत्रतादृशप्रभावस्यनारायणत्वव्याप्यतासंभावनादृशायांसाम

ग्र्यभावेनानुमित्यनुदयाज्ञायमानायांनारायणेनानेनप्रायश्शोभवितव्यमितिसंभावनायामतिप्रसंगवारणा
यतद्भिन्नत्वेनप्रमितस्येतिसंभावनायामाहार्यतांगमयति॥एतेनरामंस्निग्धतरश्यामंविलोक्यवनमंडले॥प्रा
योधाराधरोयंस्यादितिनृत्यंतिकेकिनइत्यत्रसंभावनायांधाराधरधियाधारंनृत्यंतिस्मशिखावलाइत्यत्रभ्रां
तौचनातिप्रसंगः॥वदनकमलेनबालेस्मितसुषमालेशमावहसियदा॥जगदिहतदेवजानेदशार्धबाणेनवि ष-
जितमिति॥अत्रजगज्जयसंभावनायामतिप्रसंगवारणायरमणीयतद्धर्मनिमित्तकमिति॥स्मितस्यसंभावना
छापकत्वेपिजगद्विजितरूपविषयविषयिसाधारणत्वाभावान्नदोषः॥एतेनप्रायःपतेद्द्यौःशकलीभवेद्गौः
स्वा- सहाचलैरंबुधिभिःसमूलैर्द्वीपैः॥नूनंज्वलिष्यंतिदिशःसमस्तायैद्रौपदीरोदितिहाहतेति॥अत्रापिरोदनकारणीभू द-

र॰गं॰ तकेशाग्महणादिजन्यपापनिमित्तोच्छापितायांस्वर्गपतनादिसंभावनायांनातिप्रसंगः॥ प्रायश्छाणुनानेनभवित
२०७ व्यंनूनंपुरुषेणानेनभाव्यंदूरस्थोयंदेवदत्तइवाभातिइत्यादौनिश्चलत्वचंचलत्वादिसाधारणधर्मनिमित्तायांसंभा
वनायामतिप्रसंगःस्यादतोरमणीयत्वंधर्मगतमुपात्तंरूपकविच्छित्त्यतिप्रसंगवारणायसंभावनमिति॥ अत्रचतादा
त्म्येनसंसर्गेणधर्म्युत्प्रेक्षायाःसंसर्गान्तरेणधर्मोत्प्रेक्षायाश्चसंग्रहायैकोक्त्यालक्षणद्वयंविवक्षितं॥ साचोत्प्रेक्षा
द्विविधावाच्याप्रतीयमानाच॥ इवनूनंमन्येजानेअवैमिऊहेतर्कयामिशंकेउत्प्रेक्षेइत्यादिभिःव्यञ्जकाचारक्विबादिभि
ःप्रतिपादकैःसहितायत्रोत्प्रेक्षासामग्रीतत्रवाच्योत्प्रेक्षा॥ यत्रचप्रतिपादकशब्दरहितंतत्सामग्रीमात्रंतत्रप्र
तीयमाना॥ यत्रतत्सामग्रीरहितंप्रतिपादकमात्रंतत्रसंभावनामात्रमेवनोत्प्रेक्षा॥ सापिप्रत्येकंत्रिविधास्वरूपो

DR BHAU DAJI MEMORIAL

त्प्रेक्षाहेतूत्प्रेक्षाफलोत्प्रेक्षाचेति॥ तत्रजातिगुणक्रियाद्रव्या[?]रूपाणांतदभावरूपाणांचपदार्थानांता
दात्म्येनान्तरेणवासंबंधेनजातिगुणक्रियाद्रव्यात्मकैर्व्यस्तैःसमुच्चितैरुपात्तैरनुपात्तैःनिष्पन्नैर्निष्पाद्यैर्वानिमि २
त्तभूतैर्धर्मैर्यथासंभवंजातिगुणक्रियाद्रव्यात्मकेषुविषयेषूत्प्रेक्षणंस्वरूपोत्प्रेक्षा॥ तत्राभेदेनसंसर्गेणधर्मिस्व
रूपोत्प्रेक्षासंसर्गान्तरेणधर्मस्वरूपोत्प्रेक्षेतिचोच्यते॥ उक्तविधेषुपदार्थेषुप्रागुक्तप्रकाराणांपदार्थानांतथा
विधैरेवनिमित्तैर्यथासंभवंहेतुत्वेनफलत्वेनचसंभावनंहेतूत्प्रेक्षाफलोत्प्रेक्षाचोच्यते॥ एताश्चकश्चिन्निष्पन्न
क्व- शरीराःकश्चिन्निष्पाद्यशरीराइत्येवमाद्यनल्पविकल्पाःसंपद्यन्ते तथापिदिङ्मात्रमुपदर्श्यन्ते॥ आख्यायिकायांजा-चे
त्यवच्छिन्नस्वरूपोत्प्रेक्षायथा॥ तनयमैनाकगवेषणलंबीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानायाभग ग

र॰गं॰ वत्याभागीरथ्याः सखीति ॥ अत्र भागीरथ्यां द्रव्ये जातो वा हिमगिरिभुजायमानायां संबंधिभुजत्वजात्यवच्छिन्नः
२०९ तादात्म्येनोत्प्रेक्ष्यते ॥ तत्र च भागीरथीगतानां श्वैत्यशैत्यलंबत्वजलधिजठरप्रविष्टत्वानां धर्माणां निमित्तता सिद्धा
–यतु छ्वपि B. … विषयि– यत्रिषुपि हिमगिरिभुजगतत्वमवश्यसंपादनीयं ॥ तेषां च मध्येऽनुपात्तयोः श्वैत्यशैत्ययोर्हिमगिरिसंबंधित्वादेव
भुजगतत्वं संपन्नं ॥ इतरयोरपि संपादनाय तनयमेनाकगवेषणं फलमुत्प्रेक्षितं ॥ तत्साधनताज्ञानस्य लंबत्व
जलधिजठरप्रवेशानुकूलयत्नजनकत्वात् ॥ एवं च विषयिगततादृशगवेषणफलकेलंबत्वजलधिजठरप्रविष्ट
त्वाभ्यां विषयगतयोः सादृश्यिकलंबत्वजलधिजठरप्रविष्टत्वयोरभेदाध्यवसानानिर्वाह्योक्त्या साधारण्यसंपत्तेर्नि २०९
मित्तता ॥ न चात्र फलस्याप्युत्प्रेक्षणात्फलोत्प्रेक्षेति वक्तुं शक्यं ॥ उत्प्रेक्ष्यमाणफलनिष्पादितनिमित्तोत्थापितायां स्वरू

§ B reads correctly "वैयाधिकरण्यापत्ते कूजनादिविशिष्टे बक…"

पोत्प्रेक्षायामेव विधेयत्वाच्चमत्कृतेर्विश्रामादुत्प्रेक्षाप्रतिपादकस्य प्रत्ययस्य फलेनानन्वयाच्च ॥ तथैवात्र व्यपदेशो
युक्तः ॥ अनिगीर्णविषया चेयं ॥ उपात्तानुपात्तगुणक्रियात्मकनिमित्ता ॥ निष्पाद्यविशिष्टशरीरा जात्युत्प्रेक्षा ॥ हिम
गिरिभुजस्य कविनैव निष्पादितत्वात् ॥ तादात्म्येन गुणस्वरूपोत्प्रेक्षा यथा ॥ अंभोजिनीबांधवनंदनायां कूजनब
कानां समजो विरेजे ॥ रूपांतराक्रांतमहः समंतात्पुंजीभवन् शुक्ल इवाश्रयार्थी ॥ अत्र वैयाधिकरण्यापत्तेः पृथक्
ज्ञानविशिष्टे बकत्वजात्यवच्छिन्नविषये पुंजीभवन् विशिष्टः शुक्लगुणस्तादात्म्येनोत्प्रेक्ष्यते ॥ तत्र बकगतानां कूज
नैर्मल्यपुंजीभवनानां शुक्लगुणगतत्वमंतरेण बकशुक्लयोरभेदस्य दुरुपपादत्वात्तत्सिद्धये तेषां विषयिगतत्वं
साध्यं ॥ तत्र नैर्मल्यस्यानुपात्तस्य यथाकथंचिदुत्प्रेक्ष्यमाणे विषयिणि सिद्धत्वात्कूजनपुंजीभवनयोर्निष्पादनाय रू

र०गं० पां नराक्रांतगृहत्वमाश्रयार्थित्वं चहेतुत्वेनोत्प्रेक्षितं ॥ इहापिप्रागवत्साद्दजिकयोः कल्पिताभ्याममभेदाध्यवसाना
२०१ त्साधारण्यं ॥ एवमन्यत्राप्यूह्यं ॥ पूर्वोदाहृतेयथाफलस्योत्प्रेक्षणेपिनफलोत्प्रेक्षा तथेहापिदेनारीति ॥ क्रियास्वरूपोत्प्रेक्षाय
था ॥ कलिंदजानीरभरेर्धमग्नाबकाः प्रकामं कृतभूरिशब्दाः ॥ ध्वांतेन वैराद्विनिगीर्यमाणाः क्रोशंति मन्ये शशिनः
किशोराः ॥ अत्र प्रथमांतविशेष्यकबोधवादिनामभेदसंसर्गेण कलिंदजानीरार्धमग्नकृतभूरिशब्दोभयविशिष्टे
षु बकेषु विषयेषु ध्वांतकर्तृकवैरहेतुकनिगरणकर्माभिन्नोत्प्रेक्षितशशिकिशोरतादात्म्योत्प्रेक्षणपूर्वकं क्रोशन
कर्तृकत्वं धर्मउत्प्रेक्ष्यते ॥ तत्र तादात्म्योत्प्रेक्षणे धर्म्युत्प्रेक्षायां साधारणो धर्मः संबद्धांतरेणोत्प्रेक्षणे धर्मोत्प्रेक्षायां २०१
तत्समानाधिकरणो धर्मश्च विषयगतो निमित्तमिति स्थिते प्रकृते क्रोशनकर्तृत्वरूपधर्मोत्प्रेक्षायां तत्समानाधिक

रणनिगरणकर्मत्वरूपधर्मस्य विषयगतत्वसिद्धये अनुबाद्यतया शशिकिशोरतादात्म्यमनूपात्तं श्वैत्यं निमित्तक
मुत्प्रेक्ष्यते ॥ तत्र यथा विशिष्टोपमायामुपमानोपमेयविशेषणतद्विशेषणानामार्थमौपम्यमेवमत्रापि विषयबक
विशेषणतद्विशेषणयोरर्धमज्जनयमुनाजलयोर्मूलोत्प्रेक्षा ॥ विषयिशशिकिशोरविशेषणतद्विशेषणाभ्यां निगर
णध्वांताभ्याम अभेद आर्थः ॥ ततश्च ध्वांतकर्तृकनिगरणेसिद्धे मुख्योत्प्रेक्षानिर्वाहः क्रोशनशब्दनयोरपि बिंबप्रतिबिं
बभावेनाभेदः ॥ तेन कलिंदजानीरार्धमग्नकृतभूरिशब्दोभयाभिन्नबकाध्वांतनिगीर्यमाणशशिकिशोराभयाभि
भाः क्रोशनक्रियानुकूलव्यापारवंत इवेति बोधाकारः ॥ आख्याते भावप्राधान्ये तु अभेदेन क्रोशनक्रियोत्प्रेक्षा ॥ तत्र श
ब्दयत्ते बककविशेषणतया प्रतीयमानमपि शब्दनं विषयतया वतिष्ठते ॥ अध्यवसानवशगतक्रोशनक्रियायां च ताद

र॰गं॰ शावकाविशेषणंतादृशशावकेषुचाभेदेनतादृशशशिकिशोराः॥नतुशशिकिशोराएवसाक्षात्क्रियायां॥एवंचबका
२१० नामनन्वयापत्तेः॥विषयिविषयिविशेषणानांप्राग्वदेवबिंबप्रतिबिंबभावेनाभेदप्रतिपत्तिः॥तथाराज्याभिषेकमाज्ञा
यशंबरासुरवैरिणः॥सुधाभिर्जगतीमध्यंलिंपतीवसुधाकरः॥अत्रापिचंद्रेविषयेतादृशलेपनकर्तृत्वरूपधर्मोत्प्रे
क्षणीयंदर्शनकिरणव्यापनेविषयेचंद्रकर्तृकसुधाकरणकलेपनकर्तृत्वस्यतादात्म्येनोत्प्रेक्षणमितिद्वितीयं॥तत्र
प्रथमेमन्मथवल्लीकारकत्वरूपनिमित्तानुपादानादनुपात्तनिमित्ताविषयस्योपादानादुपात्तविषया।द्वितीयेपितस्यै
वनिमित्तस्यानुपादानादनुपात्तनिमित्ताविषयस्यनिगीर्णतयाअनुपात्तविषयेतिविशेषः॥तादात्म्येनद्रव्यस्वरूपो २११
त्प्रेक्षायथा॥कलिंदशैलादियमाप्रयागंकेनापिदीर्घापरिखानिखाता॥मन्येतलस्पर्शविहीनमस्यामाकाशमानी

×नि॰

लमिदंविभाति॥अत्रयमुनायांनीलत्वदीर्घत्वनिमित्तकमाकाशतादात्म्योत्प्रेक्षणं।आकाशत्वस्यस्वरूपात्मकत्वाद्र
व्योत्प्रेक्षेयं॥अतएवाकाशपदप्रवृत्त्याश्रयत्वाद्यनुपस्थितिदशायामप्याकाशधीः॥नीलत्वरूपनिमित्तस्यविषयिणिसिध्य
र्थंतृतीयचरणोपादानंदीर्घत्वरूपनिमित्तसिध्यर्थंचपूर्वार्द्धं।जात्यादीनामभावोत्प्रेक्षायथा॥बाहुजानांसमस्ताना
मभावइवमूर्त्तिमान्॥जयत्यनिबलोलोकेजामदग्न्यःप्रतापवान्॥अत्रजात्यवच्छिन्नाभावोविरोधित्वनिमित्तेनता
दात्म्येनोत्प्रेक्ष्यते॥विनाशइवेत्युक्तौतुध्वंसः।समस्तलोकदुःखानामितिप्रथमचरणेकृतेगुणाभावः॥द्यौरंजनकाली
भिर्जलदालीभिस्तथावव्रे॥जगदखिलमपियथासीन्निर्लोचनवर्गसर्गमिव॥अत्रापिचाक्षुषज्ञानसामान्यशून्य
त्वेनगुणाभावेननिमित्तेनपार्यंतिकःक्रियाभावोधर्मः॥एवंद्रव्याभावोत्प्रेक्षापिस्वयमूह्या॥मालारूपाप्येषासंभव

र॰गं॰ नि॥यथा॥द्विनेत्रइववासवःकरयुगोविवस्वानिवद्वितीयइवचंद्रमाःश्रितवपुर्मनोभूरिव॥निराकृतनिरिवांबुधिर्गु B reads न।
२११ रुरिवक्षमामागतोनुतोनिखिलभूसुरैर्जयतिकोपिभूमिपतिः॥अत्रराजगतानांद्विनेत्रत्वादीनांवासवादितादात्म्य
विरोधिनांविरोधनिवर्त्तनायविषयिषुवासवादिष्वारोपेणसाधारणीकरणं।नचात्रोपमाशक्यनिरूपणाद्विनेत्रत्वा
दीनामुक्तेर्निष्प्रयोजनकत्वापत्तेः॥नचोपमानिष्पादकंतेषांसाधारण्यंतदभावेपिपरमैश्वर्यादिभिःप्रतीयमानैस्तस्या
न। निष्पत्तेः॥असुंदरत्वादुपमानिष्पादकत्वेनकवेरनभिप्रेतत्वाच्च।नचात्रद्विनेत्रत्वादिभिर्धर्मैर्वासवादिसादृश्यंराज्ञःकवे
रभिप्रायविषयः।एवंद्वितीयत्वादीनांचंद्रादिष्वारोपोप्युपमायांसत्यामनर्थकएवस्यात्॥अभेदप्रतिपत्तौतुसहस्रने २११
त्रेणसहस्रकरेणविधिसृष्टावेकेनवपुर्विहीनेनजलाकारेणस्वर्गगतेनतेनकथमस्याभेदःस्यादितिप्रतिकूलधिय

मपसारयतांविषयिगतानांद्विनेत्रत्वाद्यारोपाणामस्त्येवोपयोगः॥अत्रेवशब्दस्याभावेतदारोपंरूपकंविषयिगत
विशेषणानामभावेतूपमाउभयेषामभावेशुद्धरूपकमितिविवेकः॥एवंस्वरूपोत्प्रेक्षादिरुपदर्शिता॥अथहेतूत्प्रेक्षा गु।
॥यथा॥त्वत्प्रतापमहादीपशिखाविपुलकज्जलैः॥नूनंनभस्तलेनित्यंनीलिमानूतनायते॥अत्रनीलिमसामाना
धिकरण्येनोत्प्रेक्षितस्यहेतुत्वेनोत्प्रेक्षणं॥कज्जललेपनैरितिकृतेइयमेवक्रियाहेतूत्प्रेक्षा॥गुणहेतूत्प्रेक्षायथा॥
परस्परासंगसुखान्नतभ्रुवःपयोधरौपीनतरौबभूवतुः॥तयोरमुष्यन्नयमुन्नतिंपरामवैमिमध्यस्तनिमानमंचति
॥अत्रपूर्वार्द्धेसुखस्यगुणस्यहेतुत्वंतावत्पंचम्यैवनिर्दिष्टं॥उत्तरार्धेधर्मिविशेषणतयानूद्यमानस्यगुणभावस्यत्वा
र्थं॥यथा॥भोक्ताभुंजानोवातृप्यतीत्यादौभोजनादेः॥यथावा॥व्यागुंजन्मधुकरपुंजमंजुगीतामाकर्ण्यस्तुतिमुदयन्

र॰गं॰ नयातिरेकात्॥आभूमीतलननकंधराणिमन्येरण्येस्मिन्नवनीरुहांकुटुंबकानि॥क्रियाहेतूत्प्रेक्षायथा॥महागुरुक
२१२ लिंदमहीधरोदरविदारणाविर्भवन्महापानकावलिवेल्लनादिवश्यामलतेति॥द्रव्यहेतूत्प्रेक्षा॥यथा॥वराकोयंरा
कारमणइतिवर्णांतिसहसासरःस्वच्छंमन्येमिलदमृतमेतन्मखभुजां॥अमुष्मिन्याकापिद्युतिरतिघनाभातिमिष
तामियंनीलच्छायादुपरिनिरपायाद्गगनतः॥अत्रामृतसरो[illegible]रूपत्वेनोत्प्रेक्षितेचंद्रमसिनीलत्वेनाध्यवसितमेक
लंकमुपरिवर्त्तिनभोहेतुकत्वमुत्प्रेक्ष्यते॥एतेनद्रव्यस्यहेतुत्वेनोत्प्रेक्षणंनास्तीतिप्राचांप्रवादोनिरस्तः॥एषामेवाभा
वानांहेतुत्वोत्प्रेक्षा॥यथा॥नितांतरमणीयानिवस्तूनिकरुणोज्झितः॥कालःसंहरतेनित्यमभावादिवचक्षुषः॥अ २१२
B reads चि-| त्रकालस्यसाहजिकेसंहारकत्वेचक्षुरभावस्यहेतुत्वेनोत्प्रेक्षा॥निःसीमशोभासौभाग्यंनताम्यानयनद्वयं॥अन्योन्या

लोकनानंदविरहादिवचंचलं॥अत्रगुणाभावस्य॥जनमोहकरंनवालिमन्येचिकुराकारमिदंघनांधकारं॥वदनेंदु
रुचामिहाप्रचारादिवतन्वंगिनितांतकांतिकांतं॥इहद्वितीयार्धेक्रियाभावस्य|प्रथमार्धेतुजात्यवच्छिन्नाभावस्यजात्य
रि-| वच्छिन्नस्यवास्वरूपोत्प्रेक्षैव॥ननगाःकाननगायद्वृंदनीषुत्वदंघ्रिपर्युदतीषु॥शकलीभवंतिशतधाशंकेश्रवणेंद्रि सु-|
याभावात्॥इहश्रोत्रत्वस्यजातिगुणक्रियाभ्योतिरिक्तस्यविवेकेक्रियमाणेआकाशस्वरूपतयातदवच्छिन्नाभावस्य
द्रव्याभावस्यहेतुत्वेनोत्प्रेक्षा॥निमित्तंचक्रियाभावः॥एवंहेतूत्प्रेक्षादिक्॥अथफलोत्प्रेक्षा॥दिवानिशंवारिणिकंठद
घ्नेदिवाकराराधनमाचरंती॥वक्षोजनार्येकिमुपक्ष्मलाक्ष्यास्तपश्चरत्यंबुजपंक्तिरेषा॥अत्रवक्षोजत्वमवयवव्यक्ति
जातिस्तल्प्रत्ययार्थः॥त्वतलोःप्रकृतिप्रवृत्तिनिमित्तेभावेविधानात्॥सएवचात्रतपश्चरणक्रियायाःसाहजिकजला

र॰गं॰ वरूछानाभिन्नतयात्र फलत्वाध्यवसितायाः फलत्वेनोत्प्रेक्ष्यते॥ नचात्र प्राप्तिक्रियामंतरेणजातेः शुद्धायाअफलत्वात्क्रि
२१३ | यायाएवफलत्वमितिवाच्यं प्राप्तेः संसर्गतयानुद्धारे वजात्यादेः फलत्वोपपत्तेः॥ अन्यथाफलत्वबोधकचतुर्थ्याअनुप
पत्तेः॥ अतएवब्राह्मण्यायतपस्तेपेविश्वामित्रः सुदारुणमित्यादयः प्रयोगाः॥ गुणफलोत्प्रेक्षायथा॥ वियोगवान्हिकुं
डेस्मिन्हृदयेतेवियोगिनि॥ प्रियसंगसुखायेवमुक्ताहारस्तपस्यति॥ क्रियाफलोत्प्रेक्षायथा॥ हालाहलकालानलका
कोदरसंगतिंकरोतिविधुः॥ अभ्यसितुमिवतदीयांविद्यामद्यापिहरशिरसिगतः॥ अत्रविरहिवाक्येभ्यसनक्रिया
यास्तुमुनाफलत्वंलभ्यते॥ एवंलक्ष्यानुसारेणयथासंभवमन्यदप्युदाहार्यं॥ इहजात्यादयोहिभेदाः प्राचामनुरो २१
धादुदाहृतावस्तुतस्तुनैषांचमत्कारवैलक्षण्यमस्तीत्यनुदाहार्यतेनैव॥ चमत्कारवैलक्षण्यंपुनर्हेतुफलस्वरूपात्म

डाक्टर भाऊ दाजी DR BHAU DAJI

कानांत्रयाणांप्रकाराणामेवेति॥ प्रागुदाहृतेष्वेवपद्येषुवाचकानामिवादीनांत्यागेप्रतीयमाना अर्थसामर्थ्यावसेय
त्वात्ननुव्यंग्येतिभ्रमितव्यं॥ तस्याः प्रकृतेप्रसंगाभावात्॥ धर्मस्वरूपोत्प्रेक्षा॥ यथा॥ निधिंलावण्यानांतवखलुमुखं
निर्मितवतोमहामोहंमन्येसरसिरुहसूनोरुपचितं॥ उपेक्ष्यत्वांयस्माद्विधुमयमकस्मादिहकृतीकलाहीनंदीनंवि
कलइवराजानमतनोत्॥ पूर्वार्द्धोत्प्रेक्षितमोहरूपधर्मसिद्धयेद्वितीयार्द्धे अविचार्यकारित्वंतत्सामानाधिकरण्येनो
पात्तं॥ अस्याश्चस्वरूपस्यविपर्ययित्वनिमित्तात्मनोधर्मउपमायामिवबिंबप्रतिबिंबभावादिभिर्भिन्नउपात्तानुपात्तश्च॥ हे
तुफलयोर्विषयित्वेनतुप्रतिहेतुफलेनिरूपितेसधर्मः कल्प्यमानोपिविषयगतसाहजिकधर्माभिन्नतयाध्यवसीयमा ति-|R.
नोनिमित्तंसंपद्यते॥ सचोपात्तएवभवति॥ अन्यथाकंप्रतिहेतुफलयोरन्वयः स्यादितिसंक्षेपः॥ अत्रचप्राचामवो

र०गं० चांचानेकधादर्शनंव्यवस्थितं॥तत्रप्राचामित्थंसर्वत्राभेदेनैवविषयिणोविषयेउत्प्रेक्षणंनसंबंधांतरेण॥तथाहि
२१४ धर्मिस्वरूपोत्प्रेक्षायांमुखंचंद्रंमन्येइत्यादौतावद्विषयिणश्चंद्रस्याभेदोविषयेमुखेस्फुटएव॥नामार्थयोर्भेदेनसाक्षा
द्न्वय|B. देवतस्याव्युत्पत्तेः॥उपात्तविषयाचेयं॥एवंअस्यांमुनीनामपिमोहमूहेइत्यत्रनिषेधपद्येधर्मस्वरूपोत्प्रेक्षा
यामपिमुनिसंबंधिनिधर्मांतरेविषयेदमयंतीविषयकमोहस्यविषयिणोभेदेनैवोत्प्रेक्षाग्राश्चरसाध्यवसानत्वा उत्प्रेक्षा|B.
त्विषयस्यानुपादानंसंगच्छते॥निमित्तधर्मस्तुतदंगासक्तवृत्तित्वं॥एवंलिंपतीवतमोंगानिवर्षतीवांजनंनभइत्या श्च|
दौकस्यापिपद्येनप्रथमांतार्थकर्तरिलेपनकर्तृत्वादरुत्प्रेक्षणं॥तस्याख्यातार्थविशेषणत्वेनैकदेशत्वात्॥नापि २१४
लेपनादिकर्तुरभेदेनतस्यक्रियाविशेषणत्वेनाप्राधान्यात्॥किंतुतमःकर्तृकमंगकर्मकंलेपनमुत्प्रेक्ष्यतेनभःक

र्तृकमंजनकर्मकंवर्षणंचोत्प्रेक्ष्यमाणाभ्यांचताभ्यांविषयस्यतमःकर्तृकव्यापनस्यनिगीर्णत्वादनुपादानं॥अतएवं
वमादावियमनुपात्तविषयोच्यते॥निमित्तधर्मश्चश्यामीकारकत्वादिरनुपात्तएव॥अतएवसंभावनमथोत्प्रेक्षा
प्रकृतस्यसमेननेयदितिलक्षणंविधायोक्तं॥व्यापनादिलेपनादिरूपतयासंभावितमितिमम्मटभट्टैः॥एवंउन्मेषयो
ममनसहतेजातिवैरीनिन्नायामिंदोरिंदीवरदलदृशातस्यसौंदर्यदर्पः।नीतःशांतिंप्रसभमनयावक्त्रकांत्येतिहर्षा
द्दुग्नामन्येललिततनुतेपादयोःपद्मलक्ष्मीरित्यादौप्राचीनपद्येहेतूत्प्रेक्षायामपिनहर्षरूपहेतुमात्रमुत्प्रेक्ष्यतेलक्ष्मी
रूपेविषयेकिंतुतद्धेतुकंकार्यंलगनादिरूपंविषयितादात्म्येनसाहसिकलगनादौविषयेकार्यस्यनिमित्ततावादि त्ति|B
¹ omit this syl. नामपिविषयगतंसमानजातीयेनाभेदाध्यवसानस्यावश्यवाच्यत्वादन्यथाहेतुरूपंविषयिसामानाधिकरण्यं तत्र|B.
§ स-|B. × ण-|B.

र॰गं॰ धर्मस्यकार्यरूपस्यविषयावृत्तित्वादुत्प्रेक्षैवनस्यादेतएवचोरस्ययद्गीतिपञ्चाशिकायितस्यभालत्वचंकंटकिनोवनां ठ- | Bilhaṇa's Charita I. 116.
२१८ ताः॥अद्यापिकिंवानुभविष्यतीतिव्यपाटयत्द्रष्टुमिवाक्षराणीत्यादिपरपद्येफलोत्प्रेक्षायांकंटकिषुवनांतेषुवि
षयेषुनकेवलंभालत्वग्विपाटननिमित्तकललाटाक्षरदर्शनंफलमुत्प्रेक्ष्यते॥किंतुनत्फलकंभालत्वग्विपाट
नादिरूपंविषयिकंटकजविपाटनादौविषयेतादात्म्येनेतिसर्वत्राभेदेनैवविषयिणउत्प्रेक्षणमितिदर्शनं॥त
त्रविचार्यते॥नसर्वत्राभेदेनैवोत्प्रेक्षणमितिनियमेकिंचिदस्तिप्रमाणं॥लक्ष्येषुभेदेनाप्युत्प्रेक्षणस्यदर्शनादस्यां णम् |
मुनीनामपिमोहस्त्वहइत्यादौ॥नचमुनिसंबंधिनिधर्मविशेषेमोहस्याभेदेनोत्प्रेक्षणमितिवाच्यं॥भेदेनोत्प्रेक्ष २१८
णेबाधकाभावेनैदृशकल्पनायानिरर्थकत्वात्॥नह्यभेदेनैवोत्प्रेक्षणमितिवेदेनबोधितंयदर्थमयमाग्रहःस्यात्

लक्षणनिर्माणस्यपुरुषाधीनत्वात्॥लिंपतीवतमोंगानिइत्यत्रापिलेपनादिकर्तृत्वेकेनमआश्रेषुविषयेषूत्प्रेक्षा
तइत्येवयुक्तं॥अनुकूलव्यापारात्मकस्यकर्तृत्वस्यैवाख्यातार्थत्वात्तस्यचप्रथमांतविशेष्यआश्रयतासंसर्गेणान्व
यन्नदोषः॥भावप्रधानमाख्यातमित्यस्यभावोव्यापारस्तदर्थकमाख्यातंतिङित्यर्थकरणान्नविरोधःसत्वप्रधाना
निनामानीत्युत्तरवाक्यगतस्यप्रधानशब्दस्याभिधेयपरत्वात्फलमात्रार्थस्यापिधातोराख्यातार्थव्यापारव्यधिक
रणत्वसमानाधिकरणत्वाभ्यामर्थगताभ्यांसकर्मकत्वव्यवहारः॥नामार्थयोर्भेदेनान्वयाभावाच्चभावरूढ अकर्मक- | B.
र्थव्यापारस्यननामार्थेनान्वयः॥अतएवचकर्त्तरिक्तादिस्येनेनविशिष्टशक्तिबाधकेननयजादिषुभावसत्त्वणं
स्यविशेषणशक्तिबाधकस्यगतार्थत्वाच्छाब्दानुवृत्तिपक्षस्वीकाराच्चकर्त्तरिक्तादित्यत्रधर्मपरस्यापिकर्त्तृसत्त्वेण णि | B.

ल: B र० गं० स्य तु: कर्मणीत्यत्र धर्मपरतायामपि न दोषः॥ यद्वास्तां फलव्यापारयोर्यातोराश्रयश्चातिङोर्थः॥ परंतु देवदत्तः पचमा
२१६ न इत्यादिवद्देवदत्तः पचतीत्यादिष्वपि प्रथमांतार्थ एव तिङर्थस्याभेदेन विशेषणत्वं युक्तं न तु भेदेन धात्वर्थभावनायां।
सर्वजनसिद्धस्योद्देश्यविधेयभावस्य भंगापत्तेः॥ सत्यां हि गतौ प्रत्ययार्थे प्रकृत्यर्थो विशेषणमित्यस्या गतेस्याप्यनुग्र
ह एव न्याय्यः॥ भावप्रधानमाख्यातमित्यस्य भावनार्थको धातुरित्यर्थकरणान्न विरोधः॥ न चैवं व्याकरणविरोधो
दूषणमिति वाच्यं॥ स्वतंत्रत्वेनालंकारिकतंत्रस्य तद्विरोधस्यादूषणत्वात्॥ प्रपंचयिष्यते चैतदधिकमुपरिष्टादिति
प्रकृतमनुसरामः॥ एवं वलिंपतीवेत्यादौ भेदेनाभेदेन वा तिङर्थस्यैव प्रथमांतार्थ एवोत्प्रेक्षणं न तु धात्वर्थस्य २१६
स्वनिगीर्णव्यापनादौ सर्वजनसिद्धाया इवार्थस्य विधेयताया अनुपपत्तेः॥ तमः कर्तृकलेपनमिवेत्यस्मादपि

उद्देश्यबोधकशून्यवाक्याद्दुष्प्रतीत्यापत्तेश्च॥ यद्विषयिसंबंधिनालेपनादिना विषयसंबंधिनो व्यापना
देर्निमित्ततासंपत्तये स्वतादात्म्यसंपादनेन निगीर्णत्वादनुपात्तविषयत्वमध्यवसानमूलत्वं चोच्यते॥ तदारूप्यके
प्यनुपात्तविषयत्वमुच्यतामध्यवसानमूलत्वं च लोकान्हंति खलो विषमित्यादौ खलसंबंधिनो दुःखदानादेर्विष
संबंधिहननात्मनाध्यवसानात्॥ तस्मान्निमित्तांशे तिशयोक्तिरेव॥ एवमुन्मेषयो ममन सहन्त इत्यत्र लक्ष्मीरूप
विषये लगनहेतुत्वेन दर्पडप्रश्पतत्र साहजिकसंबंधेन तादात्म्येनाध्यवसितं लगनमेव निमित्तं॥ तथाप्रिसंपाठ B m. पि।
लीयत्र विचिन्वता त्वां भ्रमता मयान्नूपुरमेकमूर्व्यां॥ अदृश्यत त्वच्चरणारविंदविश्लेषदुःखादिव बद्धमौनं॥ अत्रापि मौ
नहेतुत्वेन नूपुरे विश्लेषदुःखमुत्प्रेक्ष्यते॥ तत्र विश्लेषत्वनिमित्तकनिःशब्दत्वाध्यवसितं मौनं निमित्तं विश्लेषदुःख

त्व॰

र॰गं॰ समानाधिकरणत्वेसतिनूपुरध्वनित्वात्॥ननुनिश्चलत्वनिमित्तकेनिःशब्दत्वविषयेविश्लेषदुःखहेतुकमौनमभेदेनउ ख-|
२१७ त्प्रेक्षायामिवशब्दान्वितस्योत्प्रेक्ष्यतायाउत्सर्गसिद्धत्वात्तविषयस्यनिगीर्णतयाविषयिणोविधेयत्वानुपपत्तेश्चनिमि
त्तांतरगवेषणापत्तेश्च॥यद्यप्येककालप्रभवत्वादिरस्तिसाधारणोधर्मोनिमित्तंतथापितस्याचमत्कारित्वादुपमा
यामिवोत्प्रेक्षायामप्यप्रयोजकत्वात्॥एवंचफलोत्प्रेक्षायामपिबोध्यं॥एतेनयदाहेतुफलधर्मस्वरूपोत्प्रेक्षोदाह दा॰
रणेघपितादात्म्येनैवोत्प्रेक्षेतिप्राचांमतमनुसरताद्रविडपुंगवेनयदुक्तंतदपिपरास्तं॥अलंकारसर्वस्वकृता
तावदुत्प्रेक्षायालक्षणमित्थंनिगदितंविषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायःसचद्विविधः॥सिद्धः २१७
साध्यश्च॥तत्रसाध्यत्वप्रतीतौव्यापारप्राधान्येउत्प्रेक्षेति॥अस्यार्थः॥सिद्धत्वंनिगीर्णविषयत्वंसाध्यत्वंचनिगी
(क॰) B. omit.

त्ता

र्यमाणविषयत्वं॥यत्रहिसिद्धत्वंतत्राध्यवसितप्राधान्यंयथातिशयोक्त्यादौ॥यत्रसाध्यत्वंतत्रव्यापारस्याध्यवसान
क्रियायाःप्राधान्येउत्प्रेक्षेति॥एवमभेदगर्भमुत्प्रेक्षालक्षणंविधायविषारूढौयत्रत्यत्रनूपुरगतस्यमौनित्वस्यहे
क्ष्य३ तुत्वेनदुःखगुणउत्प्रेक्ष्यते॥तत्रमौनित्वमेवनूपुरगतनिःशब्दत्वाभेदेनाध्यवसितंनिमित्तमित्युक्तं॥एवंयत्रधर्मए
वधर्मिगतत्वेनेत्यादिनाधर्मोत्प्रेक्षाप्रसंगेलिंपतीवतमोङ्गानीत्यत्रलेपनक्रियाकर्तृत्वोत्प्रेक्षणेव्यापनादिनिमित्तमि
त्युक्तंतदेतत्सर्वंपरस्परविरुद्धं॥नहिदुःखगुणोत्प्रेक्षायामभेदगर्भोऽध्यवसायोऽस्ति॥मौनांशेसन्नप्यध्यवसायःसि
द्धत्वादतिशयोक्तेरेवविषयोभवितुमर्हतिनोत्प्रेक्षायाः॥त्वन्मतेमौनस्यनिमित्तत्वेनानुत्प्रेक्ष्यत्वाच्च॥एवंलिंपतीवेत्य
त्रलेपनांशाध्यवसायोपितस्यापिव्यापनरूपतयासिद्धस्यत्वयाकर्तृत्वोत्प्रेक्षानिमित्तत्वेनोक्तत्वाच्च॥व्यापनादौतत्प्रेक्षा

र०गं० विषयेनिमित्तमन्यदन्वेष्यंस्यादितित्वयैवबाधकस्योपन्यासात्।।निमित्तांशाध्यवसानंतुप्रमादावपिरुछितं।।किंचनूनं
२१९ मुखंचंद्रइत्यादौकुत्राध्यवसायः विषयस्यजागरूकत्वात्।।नचसिद्धाध्यवसायेविषयस्यजठरवर्त्तित्वंसाध्यंतुनिगीर्य
च्छि- माणत्वात्पृथगुपरुद्धिरितिवाच्यं।।साध्याध्यवसानेमानाभावात्।।अन्यथारूपकादेरप्यध्यवसानगर्भत्वापत्तेः।।
किंच।।अध्यवसानंलक्षणाभेदः नचात्रविधेयांशेलक्षणास्ति।।अभेदादिसंसर्गेशाब्दार्यबोधस्यैवस्वीकारात्।तस्मा
प्राचीनानामाधुनिकानांचोक्तयोनक्षोदक्षमाः।।एवंप्रासंगिकम्।।तत्रतावद्धुम्यर्थापेक्षानिष्कर्षः प्राचीनमतपरीक्षावस
प्र- रेकृतएव।।हेतूपेक्षायांतुपंचम्यर्थोहेतुरभेदश्चप्रकृतिप्रत्ययार्थयोः संसर्गइतिपक्षेविश्लेषदुःखाभिन्नहेतुःपंचम्य २१९
तार्थः।।तस्यचप्रयोज्यतासंसर्गेणापेक्षणमिवादिनाबोध्यते।।प्रयोज्यत्वंपंचम्यर्थइतिदर्शनेनिरूपितत्वंप्रकृतिप्रत्य

यार्थयोःसंसर्गः।आश्रयतासंसर्गेणचोपेक्षणं।उभयथापिपंचम्यर्थएवोपेक्ष्यस्तेनैवेवाद्यर्थान्वयात्।।उपेक्ष्यतावच्छे
दकसंबंधेनोपेक्ष्यसमानाधिकरणश्चधर्मोतिशयोक्तौमोनाभिन्नत्वेनाध्यवसितनिश्चलत्वादिर्निमित्तं।।बहुमौनं
चविषयः।मौनद्वारकंचबहुमौनस्यप्रयोज्यत्वंसंभाव्यते।।एवंप्रयोज्यधर्मकेधर्मिणिसर्वत्रापिधर्मद्वारकएवपंचम्य
र्थान्वयः।।यत्रतुधर्मएवकिंचिद्धर्माभिन्नत्वेनाध्यवसितःसाक्षाद्विषयः तत्रविषयतावच्छेदकधर्मोनिमित्तंयथातत्रै मौ-
वविश्लेषदुःखादिवमौनमस्यतिनिर्माणमौनत्वं।।एवंतृतीयार्थेपिबोध्यं।।फलोपेक्षायांतुमुख्यादेरर्थःफलं।।प्राग्वत्
प्रकृत्यर्थप्रत्ययार्थयोरभेदःसंसर्गः।।तच्चसाधनतासंसर्गेणान्वेतीतितेनैवसंसर्गेणोपेक्ष्यते।।यत्रचोपेक्ष्यतेतत
द्दंशोविशेषणतयाभासमानोधर्मोनिमित्तं।।सचधर्मिणिविषयेऽभिन्नत्वेनाध्यवसितोधर्मस्तथाभूतेचधर्मेविषयेत

र॰गं॰ द्विशेषणीभूतोन्यइतिविवेकः॥ एवंचयत्रसमासप्रत्ययगुणीभूतेविषयेहेतुफलान्वयोनसाक्षात्संभवति॥ तत्रप्र
२१९ धानएवविषयेनादृशविशेषणद्वारकप्रयोज्यत्वप्रयोजकत्वाभ्यांसंसर्गाभ्यांहेतुफलयोरुत्प्रेक्षाबोध्या॥ यद्यपिवि
शेषणेपियथाकथंचिद्धेतुफलयोरन्वयाद्विशेषणस्यापिविषयत्वमुचितं तथापिविषयविषयिणोरुद्देश्यविधेय
भावप्रत्ययस्यानुरोधादियंसरणिराश्रिता॥ यदिचतस्यनास्त्येवानुरोधस्तदाप्राचांरीत्यैवरमणीयंस्यात्॥ किं
हे-| च॥ प्राचांमतेहेतुफलोत्प्रेक्षास्थलेतद्धेतुकफलकयोःकार्यकारणयोरेवनिगीर्णविषयेउत्प्रेक्षणात्स्वरूपस्योत्प्रे
क्षायामेवपर्यवसानंतद्धेतुफलयोः॥ एवंचविभागश्चिरंतनानामुच्छिन्नःस्यात्॥ अथस्वरूपतादात्म्याविशेषेपि
हेतुफलाविशेषणकशुद्धस्वरूपोत्प्रेक्षायाहेतुफलविशेषणकस्वरूपोत्प्रेक्षायामस्तिहेतुफलकृतएवभेदइति

BHAU DAJI MEMORIAL

चेत्॥ तनयमैनाकगवेषणलंबीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानायाभगवत्याभागीरथ्याःसखी
तिप्रागुदाहृतायांस्वरूपोत्प्रेक्षायांतनयमैनाकगवेषणरूपस्यफलस्योत्प्रेक्षाविशेषणकोटिप्रविष्टत्वात्फलोत्प्रे स्य-|
क्षात्वापत्तेः॥ उत्प्रेक्षासाक्षाद्विशेषणतायाअप्रयोजकत्वादित्यलंस्वगोत्रकलहेन॥ उत्प्रेक्ष्यमाणेष्वपियस्यविष
यिणउत्प्रेक्षाविधेयतयाभासतेतेनदीयोत्प्रेक्षयैवव्यपदेशःप्राधान्यात्तेनविश्लेषदुःखादिवबहूमोनमित्यत्रनू
पुरगतत्वेनदुःखस्योत्प्रेक्षणेपिनतदुत्प्रेक्षयाव्यपदेशोन्याय्यःतस्याअंगत्वेनानुवाद्यत्वात्किंतुपंचम्यर्थोत्प्रेक्षया
॥ तस्याएवइवशब्दवेद्यत्वेनविधेयत्वात्॥ तथाचोक्तस्येतिपद्येपिवनांतरगतत्वेनललाटाक्षरदर्शनोत्प्रेक्षयापिन नन्|
पितुतुमुन्नर्थोत्प्रेक्षया॥ एवंतनयमैनाकेत्यादिगद्येन फलोत्प्रेक्षयाव्यपदेशःनापिकलिंदजानीरभरेर्धमग्नाइत्य

र०गं० त्रशशिकिशोरतादात्म्योत्प्रेक्षयातदुत्थापितयाध्वांतकर्तृकवैरहेतुकनिगरणकर्मतादात्म्योत्प्रेक्षयावा॥प्रागु
२२० क्तादेवहेतोरितिदिक्॥द्विविधोहितावद्धर्मोपिस्वतएवसाधारणःसाधारणीकरणोपायेनासाधारणोपिसाधा
क-| रणीकृतश्चसचोपायःकचिद्रूपकंकचित्श्लेषःकचिदपन्हुतिःकचित्बिंबप्रतिबिंबभावःकचिदुपचारःकचिद
दीव-| but B retains दिदि| भेदाध्यवसायरूपोतिशयः॥यथा॥नयनेंदीवरानंदमंदिरंमिलदिंदिरं॥इदमिंदीवरंमन्येसुंदरांगितवाननं
॥अत्रप्रथमार्धगतःप्रथमोधर्मोरूपकेणविषयिसाधारणीकृतः।द्वितीयश्चविलक्षणशोभयोरभेदाध्यवसाये
न॥केवलशब्दात्मकोप्ययंसंभवति॥अंकितान्यक्षसंघातैःसरोगाणिसदैवहि॥शंकेपंकेरुहाणीतिशरीराणि २२०
शरीरिणां॥अयमुपात्तएवभवति॥अर्थमयस्त्वनुपात्तोपिभवति॥यथा॥द्विनेत्रइववासवइत्यादौजगदीश्व

रत्वादिः॥नचात्रद्विनेत्रत्वादिरूपउपात्तएवसाधारणोधर्मःसाधारण्यार्थमेवतस्यविषयिण्यारोपादितिवाच्यं॥
तस्यारोपेणासाधारणत्वेकृतेप्यसुंदरत्वेनोत्प्रेक्षोत्थापकत्वविरहात्॥साधारणीकरणंतुप्रतिबंधकनिरासार्थ
मित्युक्तमेव॥दृष्टिःसंभृतमंगलांबुधमयीदेवत्वदीयासभाकाव्यस्याश्रयभृत्तमास्यकरुणाधाराधरःसुंदरःको म-|
वि-| धस्तेशनिर्भरमत्मधिपणस्वांतंतुसोमास्पदंराजन्नूनमनन्नर्कमभवान्सर्वम्महालंबनं॥अत्रोत्प्रेक्ष्यमाण
स्यसर्वमहालंबनस्यधर्मेपुनस्तद्द्वाश्रितांगकत्वेषुविशेषणीभूतेसत्तत्तत्स्वविषयस्याङ्गाधर्मभुकस्माणाभ द-|
यत्वादिषुविशेषणानांकल्माणदीनांश्लेषेणतादात्म्यसंपादनद्वारातादृशाधेमाणासधारणतासंपत्तिः॥यथा
वा॥विभातियस्यांललितालकायांमनोहरावैश्रवणस्यलक्ष्मीः॥कपोलपालिंतवतन्विमन्येनरेंद्रकन्येदिशमु

र० गं० त्तराख्यां॥इहापिविषयविषयिधर्मविशेषणयोरलौकिकयोःश्रवणवैश्रवणयोःश्लेषेणाभेदेधर्मस्यसाधार
२२१ ण्यं।यथावा॥नासत्ययोगोवचनेषुकीर्त्तौनतथार्ज्जुनःकर्मणिचापिधर्मः॥चित्तेजगत्प्राणभयोपायदास्तेवशंवदास्तेकि
मुपांडुपुत्राः॥अत्रपांडुपुत्रेषुविषयेषुराजवशंवदतातादात्म्योत्प्रेक्षायांराजाश्रितत्वरूपोविषयिधर्मःश्लेषेणवि
षयाणांतदाश्रितानांचासत्याभावश्रुतकगुणपुण्यपरमेश्वराणामभेदसंपादनद्वाराविषयसाधारणीकृतोंतना
न्तर्गतमाणिक्यवपुर्बहिरुपागतं॥मनोनुरागितेतन्विमन्येवल्लभमीक्षते॥अत्रवल्लभेक्षणस्यमनस्युत्प्रेक्षायांत
न्निमित्तमंतःप्रदेशाद्बहिरागमनमपेक्ष्यं॥तच्चबहिःप्रदेशसंबंधरूपंमाणिक्यमात्रवृत्तिमनसोनसंभवतीति २२१
माणिक्यापन्हुत्यामनोगतंक्रियते।बिंबप्रतिबिंबभावस्तुकलिंदजानीरभरेर्धमग्नाइत्यत्रैवनिरूपितः॥माधुर्यपरम

सीमासारस्वतजलधिमथनसंभृता।पिबतामनल्पसुखदावसुधायांननुसुधाकविता॥अत्रकवितायांमाधुर्यपानयो
र्मुख्ययोरसंभवादास्वादश्रवणयोरमुख्ययोरुपचारेणमुखाभ्यांसाधारणीकरणं।लक्षणयाशक्याभेदेनलक्ष्यबोध मुख्या- | B.
र्गु | नात्।अभेदाध्यवसायमात्रंयथाप्रागुदाहृतायांहेतूत्प्रेक्षायांव्यालोलजन्मधुकरपुंजमंजुगीतामित्यत्रशाखानीचैःकं त्व- | B.
धरानमनयोरभेदाध्यवसायएवत्रपाल्हेतूत्प्रेक्षानिमित्ततयोपात्तस्यकंधरानमनस्यनीचैःशाखाननकंधरोभयसा
धारण्येबीजं।एवंसर्वत्रहेतुफलयोरुत्प्रेक्षणेयस्यहेतुःफलंचोत्प्रेक्ष्यतेसोनेनप्रकारेणसाधारणीकृतोनिमित्तमि स्य- |
त्यसकृदावेदितं॥एवंक्वचिदुपात्तोधर्मोविषयविषयिसाधारण्याभावादसुंदरत्वाद्धास्वयमुत्प्रेक्षणंसाक्षाद्दुर्ला
पयितुमसमर्थोपितदुल्लापनक्षमधर्मांतरोल्लापनेनानुकूल्यविधानादुपयुज्यते॥यथा॥यौरंजनकालीभिरिति यौ- |

र॰गं॰ प्रागुदाहृते पद्ये ऽदिवोजलदालीसमावृतत्वरूपो धर्म उपात्तो जगतो निर्लोचनवर्गसर्गतोत्प्रेक्षायां वैयधिकरण्या
२२२ दप्रयोजकोपि स्वप्रयोज्यनिबिडांधकारप्रयुक्तचाक्षुषज्ञानसामान्यशून्यत्वस्य तथाविधोत्प्रेक्षानिमित्तस्योत्थाप
नेनाविषयोप्युपात्तो निरूपित एव क्वचिदयमपह्नुतोपि भवति ॥ यथा ॥ जगदंतरममृतमयैरंशुभिरापूरयन्नयंनि
जा-| तरां ॥ उदयति वदनव्याजात्किमु राजा हरिणशावनयनायाः ॥ इत्युत्प्रेक्षाप्रकरणं ॥ अथातिशयोक्तिः ॥ विषयिणा
विषयस्य निगरणमतिशयस्तस्योक्तिः ॥ तच्च स्ववाचकपदेन शक्यतावच्छेदकरूपेणैवान्यस्य बोधनं ॥ अत्र च विष
ये विषयिवाचकपदस्य लक्षणायाः शक्यतावच्छेदकमात्रप्रकारकलक्ष्यविशेष्यकबोधकत्वं शक्यतावच्छेद २२२
कमतः शक्यासाधारणधर्मस्य लक्ष्यासाधारणधर्मस्य च भानाभानयोर्न विरोधः ॥ परे तु मात्रविशेषणं न देयं तेन

१ आ-| लक्ष्यासाधारणोपि धर्मो भासत इत्याहुः ॥ केचित्तु लक्षणया लक्ष्यासाधारणधर्मप्रकारेणैव बोधः ॥ अनंतरं च व्यापा
रांतरेण शक्यतावच्छेदकप्रकारेण लक्ष्यबोध इत्याहुः ॥ बाधज्ञानस्य च यथा न प्रतिबंधकत्वं तथोक्तं प्राक् ॥ अत्र चैक
पदोपात्तत्वान्नोद्देश्यविधेयभावः ॥ उदाहरणं ॥ कलिंदगिरिनंदिनीतटवनांतरं भासयन् सदा पथि गतागतक्लम
भरं हरन् प्राणिनां ॥ स्फुरत्कनककांतिभिर्नवलताभिरावेष्टितो मम माशु हरतु श्रमान् नितमां तमालद्रुमः ॥ अत्र तमा
व-| लेन भगवतो निगरणे कलिंदनंदिन्यादीनि त्रीणि चरणत्रयगतानि विशेषणानि तदनुगृहार्थं विषयविषयिणोः सा
धारणधर्मतया साक्षादुपात्तानि ॥ चतुर्थमपि चतुर्थचरणगतमवैयाकरणानां दर्शने वैयाकरणानां तूपात्तया त
माला भिन्नकर्तृकयाश्रमहरणक्रियया भगवतो भिन्नं तादृशक्रियाकर्तृत्वं तथा न्यक्कारितं ॥ द्वितीयचरणे चोच्चावचयोनिसं -तथा P.|

नम्र।

र०गं० चरणस्यपथ्यादीना॥तृतीयेपिलताभिगोपीनांनिगरणंतस्मिन्नेवानुग्राहकतया॥एवंचसावयवेयमतिशयोक्तिः
२२३ ॥यत्रनानुग्राहकंगीमांनिगरणांनरंकिंतुशुद्धंसाधारणधर्मादिसानिरवयवा॥यथा॥नयनानंदसंदोहतुंदिली
करणक्षमा॥तिरयत्वाश्रुसंतापंकापिकादंबिनीमम॥अत्रभगवन्मूर्त्तिर्निगीर्णानामार्थयोरभेदसंसर्गेणविशेष्य व।
विशेषणभावस्यव्युत्पन्नतयारूपकेतावदुचितोविषयविषयिणोस्तेनसंसर्गेणविशेषणविशेष्यभावोनप्रकृतेविष
यितावच्छेदकरूपेणविषयस्यैवभानादभेदसंसर्गस्यात्रसक्तेः॥अभेदप्रधानाअतिशयोक्तिरितिप्रवादस्तुप्रागुक्तेसंस
र्गारोपरूपकइवविषयितावच्छेदकस्यैवभेदाभावरूपतयानिर्वाह्यः॥नचविषयितावच्छेदकंक्वचित्प्रकृतेनिगरण २२३
दार्ढ्यायिविषयमात्रवृत्तिधर्मस्वसमानाधिकरणधर्मभिन्नत्वाभ्यांप्रसिद्धंयथाकलिंदनगनंदिनीत्यादौतमालत्वादि॥

मित्यादि।

क्वचिदप्रसिद्धमपिकल्पितोपमादावुपमानमिवकविनास्वप्रतिभयाकल्पितंधर्मिणइवधर्मस्यापिकल्पनायाअविरुद्ध
त्वात्॥यथास्मृतापितरुणातपेयथावाजगज्जालंज्योत्स्नामयनवसुधाभिर्जटिलयन्जनानांसंतापंत्रिविधमपिसद्यः
प्रशामयन्नाश्रितोवृंदारण्यंनतनिखिलवृंदारकनुतोममस्वांतध्वांतंतिरयतुनवीनोजलधरः॥अत्रविषयधर्मविशि
ष्टतयाकल्पितेनलोकोत्तरजलधरत्वेनरूपेणभगवतःप्रतिपादनेतत्समानाधिकरणत्वेनकल्पितानांविशेषणा
नामानुगुण्यं॥एवंचनिगरणेसर्वत्रापिविषयितावच्छेदकधर्मरूपेणैवविषयस्यभानंनविषयप्रभिन्नत्वेनेतिरूप
दैवा। कातिशयोक्तिःस्यान्निगीर्याध्यवसाननइत्युक्तौअत्रातिशयोक्तौरूपकविशेषणंरूपकेदर्शितानांविधानामिहापिसंभवो
स्तीत्यतिदेशेनप्रदर्शितार्थंतेनात्राप्यभेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिरितिद्वैविध्यंकुवलयानंदेयदुक्तंतन्निरस्तमित्तिन

र०गं० व्याः प्रांतु रूपक इवात्रापि विषय्यभेदो भासते परं तु निगीर्णे विषये इति रूपकादस्याः विशेषः अध्यवसायस्य सिद्धत्वे
२२४ नाप्राधान्यान्निश्चयात्मकत्वाच्च साध्याध्यवसानायाः संभावनात्मकोत्प्रेक्षाया वैलक्षण्यमित्याहुः ॥ कथं तर्हि किमल
मिदमनंबुजातं जयति तमां कनकलतिकायामित्यादाविदंत्वादेर्विषयतावच्छेदस्योद्धेखान्निगरणमिति चेन्न इदमि
त्यस्य कमलत्वविशिष्टे विशेषणत्व एवातिशयोक्तिः उद्देश्यतावच्छेदकत्वे तु रूपकमेव ॥ एवं गौरयमायुरेवेदमित्यादा
वपि बोध्यं ॥ अत एवातिशयोक्तावभेदो नुवाद्य एव न विधेय इति प्राचामुक्तिः संगच्छते ॥ एवमेकः प्रकारोतिशयस्य प्र-।
यत्र भेदेप्यभेदः ॥ अथ प्रकारांतरं यत्राभेदेपि भेदो लोकान्तरत्वप्रतिपत्त्यर्थः ॥ इदमेव प्रस्तुतस्यान्यत्वमित्यनेनोक्तं ॥ २२४
स.। उदाहरणं ॥ अन्या जगद्धितमयी मनसः प्रवृत्तिरन्यैव कापि रचना वचनावलीनां ॥ लोकोत्तरा च कृतिराकृतिरार्यहृद्या

विद्यावतां सकलमेव चरित्रमन्यत् ॥ एवमन्यः प्रकारो यत्रासंबंधेपि संबंधो वर्ण्यो त्कर्षार्थः ॥ यथा ॥ धीरध्वनिभि
रलं ते नीरद मे मासिको गर्भः ॥ उन्मदवारणबुध्या मध्ये जठरं समुच्छलति ॥ अत्र सिंहीवचने समुच्छलनासंबंधेपि
समुच्छलनसंबंधोक्तिः शौर्यातिशायिका ॥ यथा वा ॥ गिरं समाकर्णयितुं तदीयां सदा रसज्ञैरनुभावनीयां ॥ स
मीहते नित्यमनन्यचेता नाभस्वदालंभरिवन्नानेता ॥ यथा वा ॥ तिमिरं शारदचंद्रिर तारकाः कमलविद्रुमचंपक
कोरकाः ॥ यदि मिलंति कदापि तदाननं खलु तदा कलया तुलयामहे ॥ पूर्वत्र निर्णयिमान इह तु संभाव्यमान इ
ति विशेषः ॥ तथान्यः प्रकारो यत्र संबंधेप्यसंबंधः ॥ यथा ॥ पीयूषकस्तोमस्मामपि ते गिरं निपीतवतां ॥ नोपायक
स्म ते नायोपाधरबिंबमधुरिमोद्रेकः ॥ अत्र तोषसंबंधेप्यसंबंधः ॥ एवमेवान्योपि प्रकारो यत्र प्रयोजकस्य प्रयोज्य

र॰गं॰ स्यचपौर्वापर्यविषयः सर्वद्वयोः सहभावात् प्रयोजकस्य प्रयोज्यानंतरभावाद्वेति द्विधा॥ आद्यो यथा॥
२२९ प्रतिखुरनिकरशिलातलसंघट्टसमुच्छलद्विद्युद्वल्लीकृतविस्फुलिंगच्छटापटलानां वाजिनामिति हयवर्णने॥ अत्र
समुच्छलनविद्युद्वल्लीकरणयोः सहोत्पत्तिर्गम्यते॥ द्वितीयो यथा॥ पुरः पुरस्तादरिभूपतीनां भवंति भूवल्लभभस्मशे
षाः॥ अनंतरं तु भ्रूकुटीविटंकात् स्फुरंति रोषानलविस्फुलिंगाः॥ अत्र भेदद्वये प्रयोजकातिशयकृतः प्रयोज्यशैघ्र्यातिशयो गम्यः॥ एवं चैतत्पंचकान्यतमत्वमतिशयोक्तिसामान्यलक्षणमिति प्राचीनाः॥ अन्ये तु संबंधे असंबंधः अ
संबंधे संबंध इति भेदद्वयं नातिशयोक्तिः एतादृशातिशयस्य रूपकदीपकोपमापन्हुत्यादिषु स्वभावोक्तिभिन्नेषु प्राय
शः सर्वेष्वप्यलंकारेषु सत्वात्॥ नहि यथारुचि नवसूक्तावलिकाचिद्विच्छित्तिः॥ कार्यकारणपौर्वापर्यविपर्ययस्यापि ते

BHAU DAJI MEMORIAL

नैव व्याप्ततया भेदांतरानापत्तेश्च॥ तस्माद्विषयिणि निगीर्याध्यवसानं विषयस्य तस्यैवान्यत्वं यद्यादिशब्दैरसंभ
विनोऽर्थस्य कल्पनं कार्यकारणपौर्वापर्यविपर्ययश्चेत्येतदन्यतमत्वमतिशयोक्तिमाहुः॥ नव्यास्तु निगीर्याध्यव
सानमेवातिशयोक्तिः प्रभेदांतरेष्वनुगतरूपाभावादलंकारांतरमेव॥ ननु प्रस्तुतान्यत्वभेदे भेदेनाभेदस्यासं
बंधे संबंध इति भेदे संबंधेऽसंबंधस्य संबंधे संबंध इति भेदे असंबंधेन संबंधस्य कार्यकारणपौर्वापर्यविपर्यये च
तेनैवानुपूर्व्यस्य च निगरणं रत्नाकरविमर्शनीकाराद्युक्तप्रकारेण संभवतीति चेत् न॥ अन्यत्वादिभिः अनन्यवस्तुप्रती
तेरेव चमत्कारत्वं न त्वन्यत्वादिभिः तेषामनुभवासंगतेः॥ न चान्यतमत्वमनुगतमिति शक्यते वक्तुं॥ विच्छित्तिर्वैलक्ष
ण्ये सत्यन्यतमत्वस्याप्रयोजकत्वात्॥ अन्यथाऽपमारूपकादिकनिपयान्यतमत्वं सकलान्यतमत्वं वा न लक्षणमुपमा

र०गं० दयश्चतद्वदा इत्येवकिंनब्रूयाः॥ अलंकारांतरत्वेगौरवमित्यपिनवाच्यं॥ नह्यत्राकृतपदार्थकल्पनयेनगौरवंस्यात्
२२६ ॥ प्रधानोत्कर्षकतारूपस्यालंकारकत्वस्यत्वयापिस्वीकारात् अलंकारविभाजकोपाधिपरिगणनस्यचपुरुषपरिकल्पित
त्वादित्यपिवदंति॥ गगनचरंजलबिंबंकथमिवपूर्णंवदंतिविद्वांसः॥ दशरथचत्वरचारीहृञ्चरहारीविधुस्तुपरिपू
र्णः इत्यादौविषयिणः स्वाभाविकस्यनिन्हवेनदृढाध्यवसानातिशयोक्तिः॥ यन्नुकुवलयानंदेयद्यपन्हुतिगर्भत्वंसंव
सापन्हवामतेवत्सूक्तिषुसुधाराजन्भ्रांताः पश्यंतितांविधो॥ इत्यत्रपर्यस्तापन्हुतिगर्भत्वमतिशयोक्तेराहुः॥ तच्चिंत्यं॥
पर्यस्तापन्हुतेरपन्हुतित्वंनप्रामाणिकसंमतमितिप्रागेवावेदनात्॥ यद्यपितेरेवोक्तंसंबंधातिशयोक्तिः स्यादयोगेयो
गकल्पनं॥ सौधाग्राणिपुरस्यास्यस्पृशंतिविधुमंडलमिति तदपिन॥ अत्रैवस्पृशंसीवेंदुमंडलमितिकृतेकोलंकार इत्प्रे २२६ द-/

मु-।

क्षेतिचेत् तर्हि इवादेरभावाद्गम्योत्प्रेक्षेयं[illegible]चिता॥ इवादिसत्वेयावाच्योत्प्रेक्षासैवेवाद्यभावेगम्योत्प्रेक्षेतिनियमस्य
सर्वसंमतत्वात्॥ त्वत्कीर्तिर्भ्रमणश्रांताविवेशस्वर्गनिम्नगामितित्वदुक्तगम्योत्प्रेक्षायाः सौधाग्राणीत्यस्यचोत्प्रेक्षांशेवि
शेषानुपलंभात्॥ तथाहि त्वत्कीर्तिरित्यादौबहुदूरभ्रमणेनस्वर्गगमनेवास्वर्गंगाप्रवेशतादात्म्योत्प्रेक्षेतिपक्षेनयेस्वर्गसंबंधित्व
रूपानुपात्तधर्मनिमित्तेयं॥ कीर्तौस्वर्गंगाकर्मकप्रवेशकर्तृत्वोत्प्रेक्षेतिनयेतादृशगमनरूपानुपात्तधर्मनिमित्ता॥ वि
शेषणीभूतभ्रमणश्रांतत्वरूपहेतूत्प्रेक्षेतिनयेतुतादृशगमनतादात्म्याध्यवसितस्वर्गंगाप्रवेशरूपोपात्तधर्मनिमित्ते
तिसर्वथागम्यैव॥ सौधाग्राणीत्यत्रपरमोर्द्ध्वदेशसंयोगेचंद्रमंडलस्पर्शतादात्म्योत्प्रेक्षायांपरमोर्ध्वदेशवृत्तित्वरू
पानुपात्तधर्मनिमित्ता॥ तादृशस्पर्शकर्तृत्वोत्प्रेक्षायांतुपरमोर्ध्वदेशसंयोगरूपानुपात्तधर्मनिमित्तेतिद्वयमपिगम्योत्प्रे

र०गं० त्रेक्षैव ।। तस्मादुत्प्रेक्षासामग्री यत्र नास्ति ना दृशमुदाहरणमुचितं ।। यथास्मदीयं धीरध्वनिभिरित्यादि ।। सुंदरत्वे सत्यु
२२७ पस्कारकत्वमलंकारसामान्यलक्षणमिहापि न विस्मरणीयं ।। इयं चातिशयोक्तिर्वेदेपि दृश्यते ।। यथा द्वासुपर्णा सयुजा
सखाया समानं वृक्षं परिषस्वजाते ।। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ।। स्मृतौ च ।। या निशा स
र्वभूतानां तस्यां जागर्ति संयमी ।। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।। अथास्या ध्वनिः देव त्वद्दर्शनादेव क्षी
यंते पुण्यराशयः ।। किं चादर्शनितः पापमशेषमपि नश्यति ।। पुण्यपापयोः सुखदुःखभोगमात्रेण नाश्यतया दर्शना
दर्शनाभ्यां तज्जन्यसुखदुःखयोराश्वशेषशब्दाभ्यां च जन्मशतोपभोग्ययोस्तयोरेवाक्षेपादिमाभ्यां पूर्वयोर्निगरणं २२७
व्यज्यते ।। न च पूर्वाभ्यामग्निमयोरेव निगरणं किं न स्यादिति वाच्यं नाशोक्तिसामंजस्याय नाशकतावच्छेदकावच्छिन्नत्वे

न प्रत्ययस्यावश्यकतया तन्निगरणासंभवात् ।। उपमानेन महता क्षुद्रस्योपमेयस्य महत्वाधानाय निगरणस्यौचित्याच्च
।। एतेन न नदप्राप्तिमहादुःखेत्यादिकाव्यप्रकाशे व्याख्यातः ।। इति रसगंगाधरे अतिशयोक्तिप्रकरणं ।। ।। अथ तुल्य
योगिता प्रकृतानामेव वाप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वयस्तुतुल्ययोगिता औपम्यं चात्र गम्यं ।। तत्प्रयो
जकस्य समानधर्मस्योपादानात् वाचकाभावाच्च ।। अत एवालंकारिकाणामपि सादृश्यं पदार्थांतरं न तु साधारण
धर्मरूपमिति विज्ञायते ।। अन्यथौपम्यस्यात्र गम्यत्वोक्तेरनुपपत्तेः ।। केचित्तु सादृश्यभाव एवातिरिक्तः सादृश्यं तु त
त्तत्साधारणधर्मात्मकमेव स च इवादिपदानां शक्यतावच्छेदकः तत्तत्साधारणधर्मवाचकैस्तु तत्तत्साधारणधर्मस्य
त्व शक्यतावच्छेदकतत्तद्धर्मरूपेण बोधनेपि सादृश्यभावरूपेण बोधो व्यंजनसाध्य एवेत्यपि वदंति ।। उदाहरणं ।। प्रिये

र॰गं॰ विषादं जहिहीति वाचं प्रिये सरागं वदति प्रियायाः॥ बारामुदारा विजगाल धारा विलोचनाभ्यां मनसश्च मानः॥ अ
२२८ त्रमानिन्यावरणर्यत्वात्तदीयत्वेन प्रकृतयोः कर्त्रोरश्रुमानयोर्विगलनक्रियासमानधर्मत्वेनोपात्ता विलोचनमनसोर
पादानयोश्च॥ कारकाणां सर्वेषामपि क्रियान्वयस्य तुल्यत्वात्॥ एवं चतुर्णां क्रियारूपधर्मैक्येपि द्वयोर्द्वयोरेवौपम्यं
४ त्व B | प्रतीयते न परस्परं चतुर्णां॥ तदपादानस्यानकर्तृत्वरूपे विशेषे सामान्यस्य पर्यवसानं शेषमुपरिष्टाद्बोध्यं॥ ना—|
न्यंचति वयसि प्रथमे समुदंचति किंच तरुणिमनि सुदृशः॥ उल्लसति कापि शोभा वचसां च दृशां च विभ्रमाणां
च॥ अत्र गुणः॥ यदि च विलसंत्यहमहमिकया वाचो गतयश्च विभ्रमाश्च भृशमित्युत्तरार्द्धं तदा क्रिया॥ यदि दधति २२९
स्म मधुरिमाणं वाचो गतयश्च विभ्रमाश्च भृशमिति क्रियते तदा गुणविशिष्टा क्रिया केवलगुणेन साक्षात्संबंधाभावा

६/ल कमलानां B ॰ङ्कनकानाम्?

त्केवलक्रियायाश्चाहृद्यत्वात्॥ अत्र कृतानामेव यथा॥ यं चति बाल्ये सुदृशः समुदंचति गंडसीम्नि पांडिमनि॥ मालिन्य
ला—| माविरासीद्राकाधिपलवलिकमलानां॥ अत्र गुणः आविर्भावक्रियायाः साक्षाद्धर्मिभिरनन्वयात्॥ न्यंचति राधिप का—|
पुरस्ं | ति लवलीच पुंडरीकं चेति कृते क्रिया॥ धवलीभवत्यनुदिनं लवलीकनककमलानि धिश्राय मिति कृते गुणविशिष्टक्रिया॥
त्वयि पाकशासनसमे शासति सकलं वसुंधरावलयं॥ विपिने वैरिवधूनां वर्षंति विलोचनानि च दिनानि॥ अत्रोभय
साधारणयोर्गुणक्रिययोरभावाच्छब्दमात्रश्लेषमूलेनाभेदाध्यवसानेनोपिंडीकृतार्थे वा॥ यत्त्वलंकारसर्वस्वकृता
तदनुगामिना कुवलयानंदकृता च गुणक्रियाभिसंबंधत्वे गुणक्रियारूपैकधर्मान्वय इति चोक्तं॥ न दापात नः
शासति त्वयि हे राजन्नखंडावनिमंडलं॥ न मनागपि निश्चिंते मंडले शत्रुमित्रयोरित्यत्राभावरूपस्यैव धर्मस्यान्वया

र॰गं॰ त्॥गुणक्रियैस्तुपलक्षणंवाधर्ममात्रस्य॥एवंएकस्वंदानशौ[illegible]लोसित्रत्यर्थिषुतथार्थिवित्यादावपिदानशीलरूपे
२२१ कान्वयात्तुक्षणप्रवृत्तिः॥यथाकथंचिदनेकत्रैकान्वयस्यचमत्कारित्वापेक्षितत्वात्॥एतेनहितादितेव्यक्तितोन्यमपरा
तुल्ययोगिता॥प्रदीयतेपराभूतिर्मित्रशात्रवयोःसमेत्यादिनातुल्ययोगितायाःप्रकारांतरंयत्कुवलयानंदकृतालक्षि
तमुदाहृतंचतत्परास्तं॥अस्याअपिवर्ण्यानामितरेषांवाधर्मैक्यंतुल्ययोगितेतिपूर्वलक्षणाक्रांतत्वात्॥एकानुपूर्वी
बोधितवस्तुकर्मकदानपात्रत्वस्यपरंपरयातादृशशब्दस्यप्रागुक्तमार्गेणार्थस्यवाधर्मस्यैक्यात्॥यश्चनिंबंपरशुना
यश्चैनंमधुसर्पिषायश्चैनंगंधमाल्याद्यैःसर्वस्यकटुरेवसइत्यत्रापिकटुत्वविशिष्टस्यनिंबस्यैवपरंपरयाछेदकसेव ॥स्ये
कपूजकधर्मत्वसंभवात्॥नचात्रव्यक्तिनियामकसंबंधेनधर्मिवृत्तित्वंविवक्षितं॥धर्मस्यवक्ष्यमाणकारकदीपका २२१

दावव्याप्त्यापत्तेः॥अथचंद्रइवसुंदरंमुखमित्याद्युपमायांचंद्रमुखयोरेकधर्मान्वयादतिव्याप्तिः॥नचात्रप्रकृतानामे
वाप्रकृतानामेवेत्युक्तत्वान्नतथेतिवाच्यं॥प्रागुक्तेप्रियेविषादमितिपद्येजगालमानोहृदयादमुष्याविलोचनाभ्यामिव
प्र— वारिधारेत्युत्तरार्द्धकृतेकृतयोर्मानिवारिधारयोरुपमायांतथाप्यतिव्याप्तेः॥चंद्रइवसुंदरंमुखमित्यत्रापिवक्ष्यमाणदी
पकलक्षणातिव्याप्तेश्च॥नचौपम्यस्यगम्यत्वेसतीत्यपिविशेषणीयमितिवाच्यं॥चंद्रांशुनिर्मलंवारिचंद्रोहंससमद्युति
तिः॥हंसास्तुशरदिस्मेरपुंडरीकमनोरमाइत्यत्रवाचकाभावाद्गम्योपमायांतथात्वेतिप्रसंगात्॥यदिचात्रनव्यंग्याउपमा प्य—
किंतुसमासस्यवाच्या॥पूर्वपदस्यलक्ष्यावेतिसूक्ष्ममीक्ष्यते॥तथापिहंसास्तुमानसभुवश्चंद्राश्चवनसंशयइत्यादिरूप
कादिष्वतिप्रसंगः॥नह्यत्रापिचंद्रादिसादृश्यविशिष्टेचंद्रादिपदानांलाक्षणिकत्वादुपमालक्ष्यैवेतिशक्यतेवक्तुं॥रूप दु—

र॰गं॰ केलक्षणानास्तीतिप्रागेवप्रतिपादनादितिचेन्न॥यत्रतथोक्तानांधर्मिणांयथोक्तधर्मान्वयएवचमत्कारीतत्रतुल्य
२३० योगितादीपकंवा॥यत्रतादृशधर्मान्वयप्रयुक्तंसादृश्यमभेदोवातत्रोपमारूपकादिकमेव॥अलंकारताप्रयोजकं
सुंदरत्वेसत्युपस्कारकत्वमित्यसकृदावेदनात्॥अन्यथासादृश्यस्यात्रप्रत्ययात्तदापोपमाव्यवहारस्यापत्तेरि दा-|
तिदिक्॥एवंचदधीचिबलिकर्णेषुहिमहेमाचलादिषु॥अदातृत्वमधैर्यंचदृष्टंभवतिभासतेइत्यादौरत्रानारूपेषा
ध्या| यथासंख्यावहरःसदसिचेत्राश्चंद्रचंदनचंद्रिकाः॥अथत्वंसंगरेसौम्याःशेषकालानलाश्रयइत्यत्रस्वरूप ध्य-|
द्वयेनराजविषयकरतिभावभूषणतयास्थिता॥यत्रचप्रकृतानामेवाप्रकृतानामेवक्रियाणामेककारकान्वयःसाकार २३० वा|
कतुल्ययोगिता॥यथा॥वसुदातुंयशोधातुंविधातुमरिमर्दनं॥त्रातुंचसकलांपृथ्वीमतीवनिपुणोभवान्॥अत्रराज्ञः

६३-|

स्तावकवाक्येप्रकृतानांक्रियाणामेकेनकर्त्रासाधारणेनधर्मेणौपम्यं॥यथावा॥दूरीकरोतिकुमतिंविमलीकरोति
चेतश्चिरंतनमघंचुलुकीकरोति॥भूतेषुकिंचकरुणांबहुलीकरोतिसंगःसतांकिमुनमंगलमातनोति॥अत्रअर्थांत
रन्यासान्विता॥केपिस्मरंत्यनुसरंतिचकेचिदन्येपश्यंतिपुण्यपुरुषाःकतिचस्पृशंति॥मातर्मुरारिचरणांबुजमा शं-|
ध्विगंगेभाग्याधिकाःकतिपयेभवतींपिबंति॥अत्रैकंकर्मक्रियाणांसाधारणं॥व्यंग्येषायथा॥अयेलीलाभग्नत्रिपु
रहरकोदंडमहिमन्कथायत्रोदंचत्यतुलबलधैर्यस्यभवतः॥अयंकोवातत्रप्रसमरफणाकोणनिहितक्षितिःशे
षःश्रीमान्कमठकुलचूडामणिरपि॥अत्रकोवाइत्यनेनवाच्यलक्ष्यव्यतिरिक्तस्यागणनीयत्वस्यशेषकमठाभ्यामप्र
कृताभ्यामन्वयःप्रतीयते॥इतिरसगंगाधरेतुल्ययोगिताप्रकरणं॥अथदीपकं॥प्रकृतानामप्रकृतानांचैकसाधा

र॰गं॰ रणधर्मान्वयोर्दीपकं॥ व्याग्वदेवात्राप्यौपम्यस्यगम्यत्वं॥ प्रकृतार्थमुपात्तोधर्मः प्रसंगादप्रकृतमपिदीपयतिप्रका
२३१ शयतिसुंदरीकरोतीतिदीपकं॥ यद्वा दीपवद्दीपकंसंज्ञायांकन्॥ दीपसादृश्यंचप्रकृताप्रकृतप्रकाशकत्वेन
बोध्यं॥ उदाहरणं॥ अमृतस्यचंद्रिकायाललितायाश्चापिकवितायाः॥ सुजनस्यचनिर्माणंजनयतिनहिकेस्यसंतोषं
॥ यथावा॥ सुधायाश्चंद्रिकायाश्च संजीविन्यामहौषधेः॥ दयादृष्टेश्चदेवनेराजन्विश्वसंजीवनंगुणः॥ यथावा॥ मृतस्य
लिप्साकृपणस्यदित्साविमार्गगायाश्चरुचिःस्वकांते॥ सर्पस्यशांतिः कुटिलस्यमैत्रीविधातृसृष्टौनहिदृष्टपूर्वा॥ अत्राभा
वः साधारणोधर्मः कस्यचित्प्रकृतत्वेदीपकमन्यथातुल्ययोगितैवयत्रक्रियासाधारणोधर्मस्तत्रयावतांकर्त्रादिकार २३
काणांसन्निधानंतेषांस्वजातीयेनान्येनसहतुल्ययोगितादीपकंवापृथक्पृथग्भवति॥ औपम्यस्यापिपृथगेवभास

MEMORIAL BHAU DAJI

मानत्वात्॥ यथा॥ सुजनाःपरोपकारंशूराःशस्त्रंधनंकृपणाः कुलवत्योमंदाक्षं प्राणात्ययएवमुंचंति॥ अत्रकर्तृकर्म
णोः॥ एवंवक्ष्यमाणेलावण्येनप्रमदेत्यत्रकर्तृकरणयोः॥ दिविसूर्यइत्यत्रकर्त्रधिकरणयोः॥ अमुनैवन्यायेनानेका
सांक्रियाणामेककारकान्वयेकारकदीपकं॥ यथा॥ वसुदातुंयशोधातुंविधातुमरिमर्दनं॥ त्रातुंचमादृशान्राजन्न
तीवनिपुणोभवान्॥ अत्रवृत्तिहीनस्यकस्यचिद्दीनस्यवचनेवसुदानस्वत्राणलक्षणयोः क्रिययोः प्रकृतयोररिमर्दनस्य
चाप्रकृतस्ययशोधानस्यचोभयात्मनःसाधारणंकर्तृकारकं॥ यथावा॥ वासयतिहीनसत्वानतिसत्वानुद्धतान्विवा
सयतित्रासयतिसकलशत्रून्भीतिविदामग्रणीर्नराधिपतिः॥ अत्रकस्यचिद्धीनसत्वस्यसत्वाधिकमसहमानस्यवा
शत्रुपरिपीडितस्यवाकस्यचित्राजानंकंचित्प्रत्युक्तौसामान्यविशेषरूपायामप्रस्तुतप्रशंसायामेकस्याःक्रियायाःप्रकृ

र०गं० नायाइतरयोश्चाप्रकृतयोःसाधारणंतत्।।यदितुप्रागुक्तवक्तृभिन्नस्यकस्यचिद्द्रष्टुःश्रोतुर्वानीतिमात्रबोधकस्यचेय
२३२ मुक्तिस्तदाक्रियाणांप्रकृताप्रकृतरूपत्वाभावात्तुल्ययोगितैव।।यत्तुसकृद्वृत्तिस्तुधर्मस्यप्रकृताप्रकृतात्मनां।।सैवक्रि
यासुबह्वीषुकारकस्येति[redacted]दीपकमितिलक्षणमुक्त्वा स्विद्यतिकूणतिवेल्लतिनिमिषतिविलोकयतितिर्यक् विवलति।
।।अंतर्नंदतिचुंबितुमिच्छतिनवपरिणयावधूःशयने इतिद्वितीयदीपकमुदाहृतंकाव्यप्रकाशकृद्भिःतत्रविचार्यते।। प—।
तृ। प्रथमार्धगतलक्षणेनैवदीपकद्वयस्यापिसंग्रहाद्द्वितीयलक्षणंव्यर्थं।।गुणिनांकारकाणांचगुणक्रियारूपधर्मस्ये
वक्रियाणामपिकारकरूपधर्मस्यसकृद्वृत्तेःसाम्राज्यात्। नचक्रियाणांप्रकृताप्रकृतात्मताविरहेपिशुद्धप्रकृतत्वेशुद्धा २३२
प्रकृतत्वेपिवाकारकस्यसकृद्वृत्तेर्दीपकत्वंक्रियाभिमानांतुप्रकृताप्रकृतात्मतायामेवक्रियादेर्धर्मस्येतिवैलक्षण्या

ल्लक्षणद्वयमितिवाच्यं।।कारकतुल्ययोगितोच्छेदापत्तेःसकलालंकारिकसिद्धांतविरोधापत्तेश्चलक्षणद्वयस्यान
श्रम। नुगतत्वाच्चतादृशलक्षणद्वयान्यतरत्वस्यलक्षणत्वेगौरवापत्तेःपूर्वप्रसंगाच्च।।एवंचस्विद्यतिकूणतिइत्याद्युदाहरणमपि
नसंगच्छतेक्रियाणांशुद्धप्रकृतत्वात्।।किंचदीपकतुल्ययोगितादौगम्यमौपम्यंजीवातुरितिसर्वेषांसंमतं।।नचात्रस्वे
दनकूणनादीनामेककारकान्वितानामप्यौपम्यंकविसंरंभगोचरस्तस्मात्समुच्चयालंकारोत्थापनमुचिता।।अस्म
दु। रि। द्दीक्षितानांवसुदानादीनांहीनसत्ववासनादीनांचराजकर्तृकाणांपद्यद्वयगतानामौपम्यप्रतीतौसहृदयहृदयमेव
प्रमाणमितिनप्रतिबंदिदानावसरः।।यदितुस्वेदनादीनामौपम्यंप्रतीयत एवेत्याग्रहस्तथापिक्रियाणांशुद्धप्रकृतत्वा
त्तुल्ययोगितास्यादपितुनदीपकमितिआस्तांतावत्।।यदपिविमर्शिनीकृतोदाहृतं।।आलिंगितुंशशिमुखींवसुधांचपातुं श—।

रं॰गं॰ कीर्त्तिंच साधयितुमर्ज्जयितुंच लक्ष्मीं॥त्वद्भक्तिमद्भुतरसां हृदयेच कर्त्तुं मंदादरं जनमहं पशुमेव मन्ये॥अत्रालिंगना
२३३ द्यनेकक्रियाकर्तृत्वेनैक एव जनो निर्दिष्ट इति॥तदपि चिंत्यं॥आलिंगनादीनां क्रियाणां मंदादरत्वेनैकाश्रयत्वस्यावश्य
कत्वेपि परस्परमेकाश्रयकत्वस्यानावश्यकत्वाच्च॥यश्च शशिमुखीमालिंगितुं यश्च सुधां पातुं योपि कीर्त्तिं साधयितुं य
श्च लक्ष्मीमर्जयितुं यश्चापि भवद्भक्तिं कर्त्तुं मंदादरस्तं सर्वमपि जनं पशुं मन्ये इति तु मुभं तानां भिन्नकर्तृत्वेप्युपपत्ते
रेककारकान्वयकृतं क्रियाणामौपम्यं चमत्कारीति न शक्यते वक्तुं॥किंतु शशिमुखीसुधाकीर्त्तिलक्ष्मीत्वद्भक्तीनां बिंब
प्रतिबिंबभावकृतं॥नापि वानेककर्तृकत्वे कश्चिदर्थस्यास्ति परिपुष्टिः प्रत्युत प्रातिकूल्यं॥सर्वेषां पशुत्वोक्त्यपेक्षया सक २३३
लतादृशक्रियाकरणमंदादरस्यैकस्य पशुत्वोक्तेरमणीयत्वात्॥यदि तु विमर्शनीकारोक्तिरवश्यं समर्थनीयेत्याग्रह

स्तदेत्थं समर्थ्यतां क्रियाणां कर्तुरेकत्वाभावेपि कर्तृतावच्छेदकस्य मंदादरत्वस्यैक्यात्तस्यैव च परंपरासंबंधेनानेकक्रि
यासाधारणधर्मस्य सकृद्वृत्तिरस्तीति न दोषः॥कारकस्यैव कारकविभाजकोपाध्यवच्छेदकस्यापि सकृद्वृत्तेः कारकदीप
कत्वेन परिभाषितुं शक्यत्वात् कारकसकृद्वृत्तेस्त्वस्माभिरुक्तमेवोदाहरणमनुसर्तव्यं॥अत्रेदं बोध्यं॥तुल्ययोगितातो
दीपकं न पृथग्भावमर्हति धर्मसकृद्वृत्तिमूलाया विच्छित्तेरविशेषात्॥विच्छित्तिवैलक्षण्यस्यैवालंकारविभागहेतुत्वात्
॥न च धर्मस्य सकृद्वृत्तेरविशेषेपि धर्मिणां प्रकृतत्वाप्रकृतत्वाभ्यां प्रकृताप्रकृतत्वेन च तुल्ययोगितायां दीपकस्य विशेष
इति वाच्यं॥तत्रापि तुल्ययोगितायां धर्मिणां केवलप्रकृतत्वस्य केवलाप्रकृतत्वस्य विशेषस्य सत्वादलंकारद्वैतापत्तेः॥श्ले
षेपि द्वैतापत्तेश्च॥सर्वेषामप्यलंकाराणां प्रभेदवैलक्षण्याद्वैलक्षण्यापत्तेश्च॥न च दीपके वास्तवमौपम्यं गम्यमनुपमेयो

 पमानयोः प्रकृताप्रकृतरूपयोस्तत्र सत्वात्॥ तुल्ययोगितायां च वैवक्षिकं उपमानोपमेयस्वरूपाभावात् अतो वैलक्ष
 ण्यमिति वाच्यं॥ उपमेयोपमानत्वयोः प्रकृताप्रकृतरूपत्वेमानाभावात्॥ खमिव जलं जलमिव खमित्याद्युपमेयोपमायां प्र वरवमि—
तीपे चौपम्यानापत्तेश्च॥ तस्मात्तुल्ययोगिताया एव त्रैविध्यमुचितं॥ प्रकृतानामेव धर्मस्य संछव्यत्तिरप्रकृतानां प्रकृ
ताप्रकृतानां चेति॥ एवं च प्राचीनानां तुल्ययोगितातो दीपकस्य पृथगलंकारतामाचक्षाणानां दुराग्रहमात्रमिति तु
नव्याः॥ अमुं चालंकारं धर्मस्य गुणक्रियाद्यात्मकस्यादिमध्यावसानगतत्वेन त्रिविधमामनंति॥ यथा॥ न भाति रम
णीयोपि वैराग्येण विना यतिः॥ वैदुष्येण विना विप्रो नरलोकस्त्वया विना॥ वैराग्येन प्रमदा मदातिरेकेण वारणाधि २३५ ला—
पतिः भाति विभवेन [illegible] राजन् भवता च वसुमतीवलयं॥ आखंडलेन नाकः कुंडलिकुलकुंडलेन पातालं नरमंड

नरिपुखंडन भवता भूमंडलं विभाति तमां॥ एवं तुल्ययोगितायामप्यूह्यं॥ वस्तुतस्तु धर्मस्यादिमध्यांतगत्वेपि चम तन्
त्कारवैलक्षण्याभावात् त्रैविध्योक्तिरापातमात्रात्॥ अन्यथा धर्मस्य उपाद्युपमध्योपांत्यगतत्वे ततोपि किंचिन्न्यू
नाधिकशब्दवृत्तित्वे वानंतभेदप्रसंगात्॥ एवं केवलानुगामिसाधारणधर्मतायां दर्शितं दीपकं॥ बिंबप्रतिबिं
बभावेनाप्यतत्संभवति॥ यथा॥ शीलभारवती कांता पुष्पभारवती लता॥ अर्थभारवती वाणी भजते काम
शीलभारेण| पि श्रियं॥ लता कुसुमभारेण सुंदरी॥ कविता चार्थभारेण श्रयते काममपि श्रियं॥ इदमेव लतादिष्वन्यतमस्य प्राक
रणिकत्वे दीपकस्योदाहरणमन्यथा तुल्ययोगितायाः॥ अत्र बिंबप्रतिबिंबतायां न केवलं क्रियारूपमनुगामिमात्रं
चमत्कारकारणमपि तु कुसुमादि बिंबप्रतिबिंबकरंबितं द्वयांस्तु विशेषो यत्केवलबिंबप्रतिबिंबभावेनाप्युपमा

र॰गं॰ दीनां भवति निष्पत्तिर्यथा ॥ कोमलातपबालाभ्रेत्यादौ प्रकृते तु न तथा ॥ अननुगामिनं विना धर्मस्वरूपस्यैवानिष्पत्तेः
२३९ ॥ नहि बिंबप्रतिबिंबमात्रेण धर्मस्य सकृद्वृत्तिः संभवति ॥ तथामृतस्यन्दिपद्येत्यादि प्रागुक्तेऽमृतादीनां कारकदीप
के कारकतुल्ययोगितायां च वसुदातुमित्यादावुक्तक्रियाणां धर्मित्वात्तद्विशेषणानां वस्त्रादीनां बिंबप्रतिबिंबता बोध्या
॥ उत्तरोत्तरस्मिन् पूर्वपूर्वस्योपकारकतायां मालादीपकं ॥ यथा ॥ आस्वादेन रसो रसेन कविता काव्येन वाणी तया
लोकान्तःकरणानुरागरसिकः सभ्यः सभा वामुना ॥ दारिद्र्यानलदह्यमानजगतीपीयूषधाराधर क्षोणीनाथ त्वया भ
वांश्च भवता भूमंडलं भासते ॥ एतच्च प्राचामनुरोधादस्माभिरिहोदाहृतं ॥ वस्तुतस्त्वेतद्दीपकमेव न शक्यं वक्तुं ॥ सा २३९
दृश्यसंपर्काभावात् । किंत्वेकावलीप्रभेद इति वक्ष्यते ॥ अस्मिंश्चालंकारद्वये क्रियादेर्धर्मस्यैकरूप्येण धर्मिष्वनन्वयो

दोषः ॥ यथा प्रागुक्ते पद्ये रसिकाः सामाजिकास्तैः सभा इति कृते एकवचनान्तैर्धर्मिभिरेकरूप्येणान्वयेपि सामाजिकै
रनन्वयाद्वचनविपरिणामेनान्वये उपमायामिव स्यादेव दोषः ॥ एवं जहल्लिंगनामार्थस्य धर्मस्य सकृद्वृत्तौ लिंगभे
म- दोपि दोषः ॥ यथा जगति नरेंद्रास्तस्मिन् वैदुष्यं तत्र सत्कविता ॥ कविताया परिणामो दुःप्रापः पुण्यहीनेन यदि
श्रु तु तपसा नानेन शक्यते लब्धुमित्याख्यातान्तक्रियतेन दा लिंगभेदो न दूषणं ॥ एवमजहल्लिंगनामार्थस्य सकृद्वृत्ता
वपि न दोषः ॥ यथा फलमतिशायितं तपस्याया इति चतुर्थचरणनिर्माणे ॥ एवं पुरुषस्यैकरूप्याभावे दोषः ॥ यथा दिवि
सूर्यो भुवि त्वं च पाताले पन्नगाग्रणीः दिक्षु दिग्पालवर्गश्च राजपुंगव राजते ॥ यदि च त्वमित्यत्र भवानिति क्रियते तदा न
दोषः ॥ एवं कालभेदेप्यूह्यं ॥ एतेन संग्रामांगणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा य

र॰गं॰ द्युत्समासादितं॥कोदंडेनशराःशरैररिशिरस्तेनापिभूमंडलंतेनत्वंभवताचकीर्तिरमलाकीर्त्याचलोकत्रय
२३६ मितिप्राचीनानांपद्यं दीपकांशेपिसदोषमेव॥ ॥इतिरसगंगाधरेदीपकप्रकरणं॥ ॥अथप्रतिवस्तूपमा॥
तत्रतावत्सादृश्यस्ययत्रचमत्कारितातत्रोपमेत्युक्तंतस्यांचसाधारणधर्मस्यसर्वेपिप्रकारायथासंभवंनिरूपि
ताःसादृश्योपस्कृतस्यवस्त्वंतरस्यचमत्कारितायांभेदाभेदान्यतरप्रधानाअन्येलंकाराश्चतेष्वपिसाधारणधर्मा
णांयथावसरंयथासंभवंचस्थितिःप्रदर्शितैव॥इदानींवस्तुप्रतिवस्तुभावापन्नसाधारणधर्मोत्थापितावाक्यार्थ
गताप्रतिवस्तूपमानिरूप्यते॥नचास्यावाक्यार्थगतत्वेनैवोपमातोभेदइतिभ्रमितव्यं॥दिविभातियथाभानुस्तथात्वं २३६ स्त
भ्राजसेभुविइत्यादौवाक्यार्थेप्युपमायाःसंभवात्॥अतएवभिन्नशब्दोपात्तैकधर्मकत्वेनापिनवैलक्षण्यंवक्तुंश

क्यं॥प्रकृतेभातिभ्राजतिभ्यांधर्मस्यैकस्यैवप्रतिपत्तेः॥तस्माल्लक्षणानुसारेणालंकारांतरेभ्योवैलक्षण्यमस्याबो
ध्यं॥अथकिमस्यालक्षणं॥वाक्यार्थगतोपमात्वमितिचेत्॥प्रागुक्तवाक्यार्थोपमायामतिव्याप्तिः॥नचार्थत्वेनतद्वि
शेषणीयमितिवाच्यं॥दृष्टांतालंकारेतथाप्यतिप्रसंगात्॥वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकत्वेनापितद्विशे
षणीयमितिचेत्तथापितावत्कोकिलविरसान्यापयदिवसान्वनांतरेनिवसन्।यावन्मिलदलिमालःकोपिरसालः
समुल्लसतीत्यप्रस्तुतप्रशंसायामतिप्रसंगादिति॥मैवं॥अप्रस्तुतप्रशंसायांवस्तुप्रतिवस्तुभावस्यभिन्नशब्दोपा
त्तैकप्रतिपाद्यरूपस्यासंभवात्॥एवंचवस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकवाक्यार्थयोरार्थमौपम्यंप्रतिवस्तू
पमा॥आननंमृगशावाक्ष्यावीक्ष्यलोलालकावृतं॥भ्रमद्भ्रमरसंभारंस्मरामिसरसीरुहमित्यत्रस्मरणालंकारेतिप्र र

र० गं० संगवारणायवाक्यार्थगतमिति॥ अत्रौपम्यस्यार्थत्वेपिपदार्थगतत्वमेवनतु[illegible]वाक्या
२३७ र्थगतत्वं॥ स्मरणस्यतदसंपर्कात्॥ पदांतरकृत्यंतूक्तमेव॥ उदाहरणं॥ आपद्गतः खलुमहाशयचक्रवर्तीवि
त्स- | स्तारयत्यकृतपूर्वमुदारभावं॥ कालागुरुर्दहनमध्यगतः समंताल्लोकोत्तरंपरिमलंप्रकटीकरोति॥ अत्रवि
स्तारप्रकटनेवस्तुनएैकरूप्येणाभिमते॥ यथावा॥ विश्वाभिरामगुणगौरवगुंफितानांरोषोपिनिर्मलधियांरम
णीयएव॥ लोकंपृणैःपरिमलैःपरिपूरितस्यकालागुरोःकठिनतापिनितांतरम्या॥ वैधर्म्येणाप्येषासंभवति॥
वंशभवोगुणवानपिसंगविशेषेणपूज्यतेपुरुषः नहितुंबीफलविकलोवीणादंडःप्रयातिमहिमानं॥ यथावा॥
नृपाणां | र्भिर्गुरूणांपरुषाक्षराभिस्तिरस्कृतायांतिनरामहत्त्वं॥ अलब्धशाणोत्कषणान्नजातुमौलौमणयोवसंति॥ अत्रशा

Dr BHAU DAJI MEMORIAL
[illegible]

आन
त्वेनदृष्टांतेननतद्गतः सामान्यावच्छिन्नव्यतिरेकसहचारःक्षिप्यतेतेनचसामान्यावच्छिन्नान्वयसिद्धिद्वाराप्रकृते
च्छिन्न | विशेषावच्छिन्नान्वयनियमः प्रसिध्यतीतिप्रायशः सर्वत्रवैधर्म्येस्थितिः॥ एवमन्वयेनप्रतिवस्तूपमायामपिनिय
मविशेषविषयस्यप्रकृतवाक्यार्थत्वेन्वयदृष्टांतेनसामान्यान्वयनियमसिद्धिद्वारातत्सिद्धिः॥ नियमविशेषरहितकेव
लार्थमात्रस्यप्रकृतत्वेतुअप्रकृतवाक्यार्थनिरूपितमौपम्यमात्रंगम्यंननुनियमः॥ अप्रयोजकत्वात्॥ यथा॥ नेर
भ्रेभासतेचंद्रोभुविभातिभवान्बुधैरित्यादौ॥ ननुकथमस्मिन्नलंकारेसर्वत्रौपम्यंगम्यमित्युच्यतेयावताप्रागु
पचतिन | पदर्शितायांवैधर्म्यप्रतिवस्तूपमायांवाक्यार्थयोरौपम्यस्यबाधात्नहिदीपचतीतिवाक्यार्थयोः पाकक्रियामात्रसा
म्यादौपम्यंगम्यते॥ निषेधप्रतियोगित्वेनोत्तरवाक्यार्थतस्यारोपप्ररोहादितिचेन्न॥ प्रकृतवाक्यार्थाक्षिप्तस्यस्वं B. [illegible]

र०गं० परीत्यस्यैवौपम्याश्रयत्वात्। न च वाक्यार्थयोरौपम्यमिति यदुक्तं तत्कथं संगच्छतामिति वाच्यं॥ वाक्यवेद्यस्यैव प्रकृ
२३९ अपि- तवाक्यार्थत्वेनेष्टत्वात्॥ तथा हि नत्वं किं भुवि काव्यानां जानाति विरलो भुवि। मार्मिकः को मरंदानामंतरेण मधुव्रतं
॥ अत्र विरलो जानातीति विधिमुखोपि प्रकृतवाक्यार्थः पुरुषविशेषं विना न रसं वेत्ति जानं नीत्यर्थमादायैव पर्यवसितो भ
वतीति निषेधरूपवाक्यार्थस्य तादृशेनैव द्वितीयवाक्यार्थेन सह गम्यते सादृश्यं स्फुटमेव॥ यत्र तु वंशभवइत्यादौ प्रा
गुदाहृते प्रकृतवाक्यार्थो विधिरूपः संगविशेषहेतुकत्वस्य पूजनादौ विधेयत्वादवसीयते तत्रापि हेतुताघटकव्य
तिरेकस्य गुणतया प्रतीयमानस्यौपम्यं निर्बाधमिति न दोषः॥ इयं च वाक्यार्थयोः सामान्यविशेषभावानापन्नयो २३८
ते;| र्भवति॥ तत्रैवौपम्यस्य गम्यत्वात्॥ सामान्यविशेषयोस्त्वौपम्याप्रतीतेः समर्थ्यसमर्थकयोरर्थांतरन्यासो वक्ष्य

ते॥ यत्तु कुवलयानंदकृता वैधर्म्यमुदाहृतं॥ विद्वानेव हि जानाति विद्वज्जनपरिश्रमं॥ न हि वंध्या विजानाति गुर्वीं प्र
सववेदनां॥ यदि संति गुणाः पुंसां विकसंत्येव ते स्वयं॥ न हि कस्तूरिकामोदः शपथेन विभाव्यते॥ इति॥ तत्र विद्वानेव
हि जानातीति पद्यं भवतु नाम यथाकथंचिद्वैधर्म्यस्योदाहरणं॥ यदि संतीति तु न युक्तं॥ वैधर्म्योदाहरणं हि प्रस्तु
तधर्मिविशेषोपारूढार्थदार्ढ्याय स्वाक्षिप्तस्वव्यतिरेकसमानजातीयस्वर्म्यंतरारूढस्याप्रकृतार्थस्य कथनं॥ प्रकृध-|
ते च यदि संति तदा स्वयमेव प्रकाशंत इत्यर्थस्य प्रस्तुतस्य व्यतिरेकस्त्वसंतः उपायांतरेणापि न प्रकाशंत इति।
न चात्र द्वितीयार्धेन तत्सजातीयोर्थो निबध्यते॥ निबध्यते च स्वयं प्रकाशंते न परेणेत्यस्य प्रस्तुतस्यैव सजाती
यः शपथेन न विभाव्यते किंतु स्वयमेवेति प्रकृतार्थानुरूप तयैव पर्यवसानात्॥ न हि वैधर्म्ये प्रकृतानुरूप्यं जातु चि

न्नघटतेव्याघातात्तस्मात्साधर्म्येणैवेदमुदाहरणंसंगतंनवैधर्म्येण॥नचोपायांतरनिवृत्त्यघटितप्रस्तुतवा
क्यार्थेनकथंनामतद्घटितउत्तरवाक्यार्थःसाधर्म्यमर्हतीतिवाच्यं॥स्वयमित्यत्राकृतेनएवकारेणैवोपायां
तरनिवृत्तेःप्रस्तुतवाक्यार्थेनिवेशितत्वात्॥अत्यंतायोगव्यवच्छेदस्योत्तरवाक्यार्थाननुगृहीतत्वेनक्रियास
मभिव्याहारायोगात्॥संतःस्वतःप्रकाशंतेगुणानपरतोनृणां॥आमोदोनहिकस्तूर्याःशपथेनानुभाव्यते॥
अत्रस्वतोनुभूयतइत्यत्रपर्यवसितेनोत्तरवाक्यार्थेनपूर्ववाक्यार्थस्ययथासाधर्म्यमेवनवैधर्म्यंतथायदि
संतीतिपद्यपीतिनश्रमात्रश्रवणादेववैधर्म्यंजगदेनतुनिपुणतरंनिरीक्षितमायुष्मता॥यदितु[illegible]संती २३९ अदि
चो-|[illegible] तिपद्यस्यनहिकस्तूरिकेत्याद्युत्तरार्द्धंदूरीकृत्यवा[illegible]वाचस्पतेर्व्योम्निविलसंतिनवहूयइतिक्रियतेतदावैधर्म्यं

प्रकृतविपरीतार्थघटनायुक्तं॥अथखलास्तुकुशलाःस्वीयहितप्रत्यूहकर्मणि॥निपुणाःफणिनःप्राणानपह
र्तुंनिरागसामित्यत्रासंपुलवाक्यार्थेतिप्रसंगःकुशलनिपुणपदाभ्यामेकस्यैवधर्मस्योपादानात्॥नचात्रौपम्यं
नगम्यमितिवक्तुंशक्यंनिपुणकुशलपदाभ्यांप्रतिपादितेनशुद्धसामान्यात्मनाधर्मेणखलफणिनोरौपम्यस्य
प्रत्ययात्॥नापिधर्मिणोरौपम्यविशिष्टवाक्यार्थयोस्तुअनथेतिवाच्यंअवयवद्वारेणतयोरपितस्यतथात्वात्स्व
भावसिद्धत्वेनानुपात्तधर्मेणौपम्यस्यगम्यत्वाच्चेतिचेत्नमेवं॥साधारणधर्मस्यवस्तुप्रतिवस्तुभावोक्त्यातदितरप
दार्थानांबिंबप्रतिबिंबभावोघटनायाआनुरूप्यंचविवक्षितंप्रकृ[illegible]चखलफणिनोःप्राणहितयोश्चसत्यपिबिं ते-|
बप्रतिबिंबभावेहरणप्रत्यूहकरणयोनशिप्रागभावपर्यवसितयोराननुरूप्यान्नबिंबप्रतिबिंबभावइतिनदोषः॥

§ Bhā रज्यते|

र॰गं॰ यद्वा॥अस्त्वत्रप्रतिवस्तूपमा॥परंत्वसंष्ठुलतारूपस्यवाक्यार्थसामान्यदोषस्यसत्वाद्चमत्कारिणी|दृष्टोपमा
२४० दिवत्॥वाक्यार्थोहिगाढतरव्युत्पत्तिनिपुणीकृतांतःकरणैर्नानाविध[illegible]पदार्थरचनापरिवृत्तिसमर्थैरेवक
ता-| विभीरचितःकामपिकमनीयतामाधत्तेनेतरः॥तथाहि॥उपासनामेत्यपितुःस्मरां[illegible]नेदिनेदिनेसावसरे ज-|
षुवंदिनां॥पवत्कृतेषुप्रतिभूपतीनलंविनिद्रोमाजनिश्चएवनीनलं॥अस्मिन्नैषधीयपद्यद्वयोःक्रिययोरु
द्देश्यविधेयभावेनगुणप्रधानभावमकुर्वतावंदिनांषष्ठ्यंततयासत्तम्यंततयावहिःपरामृशताकविनावा
क्यार्थःक्रमेलकवदसंष्ठुलतांप्रापितः॥यदिचसएववाक्यार्थःप्रकारांतरेणानिर्मीयते॥उपासनार्थेपितुरा २४०
गतापिसानिविष्टचित्तावचनेषुवंदिनां॥प्रशंसतांद्वारिमहीपतीनलंविनि[illegible]द्रोमाजनिश्चएवनीनलमितित्त

दालरुनां[illegible]सं[illegible]निवेशइवकीदृशींकमनीयतामावहेदितिसहृदयैराकलनीयं॥एवंनवामृतस्यंदिनि
पादपंकजेनिवेशिनात्माकथमन्यदिच्छति॥स्फुतेऽरविंदेमकरंदनिर्भरेमधुव्रतोनेक्षुरसंहिवीक्षते इति क्ष-|
कुवलयानंदोदाहृतेआलुवंदारस्तोत्रपद्येवी[illegible]क्षणमात्रस्यावर्जनीयस्यप्रतिषेधानर्हत्वादिच्छापूर्वक
वीक्षणप्रतिषेधस्यचसविशेषणेहीतिन्यायेनेच्छाप्रतिषेधपर्यवसायितयाद्यपिधर्मैक्यंसुसंपादमस्तुवा रूपपादं|(?)
धा-| दृष्टांतालंकारस्तथापिपादपंकजेनिवेशितात्मेत्या[illegible]ररसत्वम्याःस्फुतेऽरविंदेइतिसप्तिसप्तमीवस्तुप्रतिव
स्तुबिंवप्रतिबिंबभावयोरन्यतरेणापिप्रकारेणनानुरूपेत्यसंष्ठुलतास्तितेव॥स्फुते[illegible]रविंदेमकरंदनिर्भ
रेइतिचेत्क्रियतेतदातुरमणीयं॥तस्मादेवंजातीयकेष्वलंकारेषुपूर्ववाक्यार्थघटकनामार्थानुरूपेनी

र॰गं॰ माथैस्तद्घटकैर्विभक्त्यनुरूपाभिर्विभक्तिभिस्तदन्वयानुरूपेण चान्वयेन भाव्यमिति सहृदयहृदयं प्रष्टव्यं॥
२४१ वहति विषधरान्पटीरजन्मा शिरसि मषीपटलं दधाति दीपः॥ विधुरपि भजतेतरां कलंकं पिशुनजनं खलु
बिभ्रति क्षितीन्द्राः॥ अत्र वहनाधानभजनभरणानां वस्तुत एकरूपाणां प्रतिवस्तूपमेयं मालारूपा॥ इति प्रतिवस्तू
पमा॥ अथ दृष्टांतालंकारः॥ प्रकृतवाक्यार्थघटकानामुपमानादीनां साधारणधर्मस्य च बिंबप्रतिबिंबभावे दृ
ष्टांतः॥ तदुक्तं॥ दृष्टांतः पुनरेतेषां सर्वेषां प्रतिबिंबनमिति॥ उदाहरणं॥ अमृतरूपः खलु हिताचरणैरमंदमानं
क-। दयत्यखिललोकमनुक्षणमेव॥ आराधितः कथय केन करैरुदारैरिंदुर्विकासयति कैरविणीकुलानि॥ अत्रा २४१
नंदनविकासनयोरपि बिंबप्रतिबिंबभावः॥ अस्य चालंकारस्य प्रतिवस्तूपमया सह भेदकमेतदेव यत्तस्यां धर्मो

म।
न प्रतिबिंबितः किंतु शुद्धसामान्यात्मनैव स्थित इह तु प्रतिबिंबितः॥ विमर्शिनीकारस्तु प्रतिवस्तूपमायां प्रकृता
र्थोपादानं तेन सह प्रकृतार्थस्य सादृश्यप्रतिपत्त्यर्थं दृष्टांते तु तदुपादानमेतादृशोऽर्थोऽन्यत्रापि स्थित इति प्रकृता
र्थप्रतीतेर्विशदीकरणमात्रार्थं न तु सादृश्यप्रतिपत्त्यर्थमतः सादृश्यप्रतीत्यप्रतीतिभ्यामनयोरलंकारयोर्भेद इ
त्याह॥ तन्न॥ प्रकृताप्रकृतवाक्यार्थयोरुपादानस्यालंकारद्वयेऽप्यविशिष्टत्वादेकत्र सादृश्यप्रत्ययोऽन्यत्र नेत्यस्या
ज्ञामात्रत्वात्॥ एवं परीत्यस्यापि स्ववचनव्याघातः एतादृशोऽर्थोऽन्यत्रापि स्थित इति प्रकृतार्थप्रतीतिविशदीकरणस्य त्वद
भिहितस्य सादृश्यापरपर्यायत्वाच्च॥ अत एव प्राचीनैः सत्कविनिर्मितेषु लक्ष्येषु प्रकृतवाक्यार्थघटकप्रकृतिप्रत्यया
र्थानुरूपप्रकृतिप्रत्ययार्थघटित एवाप्रकृतवाक्यार्थो दृश्यते॥ न च भवदुक्तमपि वैलक्षण्यं नानयोः पृथगलंकार

र॰गं॰ तायां प्रयोजकं औपम्याख्यसामान्यलक्षणाक्रांततयाउपमाभेदवदेकालंकारभेदत्वापत्तेरितिवाच्यं॥ नवापिदी
२४७ पकतुल्ययोगितयोरेकभेदत्वापत्तेः॥ इष्टापत्तिरितिचेत्तर्हि सैवात्रापिदृश्यतां प्राचीनविभागस्यभवतैवशिथि
लीकृतत्वात्॥ औपम्यरूपसामान्यलक्षणसत्वाद्बहूनामलंकाराणामुपमाविशेषत्वेनतरभेदत्वापत्त्यासकलालंका बां–
बिं– रिकसिद्धांतभंगप्रसंगाच्च॥ अब्धिर्लंघितएववानरभटैरित्यादिमुरारिपद्येयद्यपिज्ञानाख्यएकोधर्मोनिर्दिष्ट
स्तथापिनतन्निबंधनमौपम्यंविवक्षितंयन्निबंधनंचविवक्षितंतत्राब्धिलंघनादावस्यवदिव्यवागुपासनाप्रति श्वि–
बिंबनमितित्वन्मूलग्रंथविरोधाच्च॥ नचयन्निबंधनंचविवक्षितमित्यत्रार्थालंकारत्वंविशेष्यंशेषपूरणेनयोज्यं २४२
नपुनरौपम्यमितिवाच्यं॥ औपम्यंनविवक्षितमित्यत्रैकवारंनिषेधयापरामृष्टस्यैवपुनस्तयापरामर्शस्यव्युत्पत्तेः॥

नचैवमर्थमोदनःपक्वोयदयंचपक्वः समैत्रइत्यादौद्वितीयपक्वादिशब्दानामध्याहृतशाकादिपरत्वेअसंगतेःस्फु
टत्वात्तत्तस्मादस्मदुक्तैवयथाप्राचीनैर्विहितोलंकारयोरनयोर्विभागःसंगमनीयः॥ यदितुनतेषांदाक्षिण्यंतर्हि
कस्यैवालंकारस्यद्वौभेदौप्रतिवस्तूपमादृष्टांतश्च॥ यत्रानयोःकिंचिद्विलक्षण्यंतत्रभेदतायाएवसाधकंनालं
कारांतरतायाइतिरुक्तवच्च॥ वैधर्म्येणोदाहरणंयथा॥ जनयंतिपरप्रीतिंनराःसत्कुलसंभवाः॥ नहिकारस्करःक्वापितापनिर्वापणक्षमः॥ पर्णहीनो वृक्षः
यथावा॥ तापत्रयखलूनरणांहृदितावदेवयावन्नतेचलतिदेवकृपाकटाक्षः॥ प्राचीललाटप
रिचुंबिनिभानुबिंबेपंकेरुहोदरगतानिकुतस्तमांसि॥ प्रीतिजननतापनिर्वापणाभावयोस्तापत्रयावस्थानतमा ताप–
श्च दूरीकरणयोर्वैधर्म्येणात्रबिंबप्रतिबिंबभावः॥ ॥अथनिदर्शना॥ ॥उपात्तयोरर्थयोरार्थाभेदऔपम्यपर्यवसा

र॰गं॰ यीनिदर्शना। अतिशयोक्त्यादीनां ध्वन्यमानरूपकस्य च वारणाय योपात्तयोरिति। वाच्यरूपकवारणायार्थइ
२४३ ति॥ आर्थत्वं च प्राथमिकान्वयबोधाविषयत्वं॥ यदि च विशिष्टोपमायां विशेषणयोरभेदः प्रतीयते तदा बिंबप्रति
ना– बिंबभावापन्नत्वमपि प्रधानविशेषणं तद्विशेषणानां तु बिंबप्रतिबिंबभावो न निवार्यते॥ इदं च श्रौत्यादिनिदर्शना
या लक्षणं॥ आर्थीसाधारणं लक्षणं तु ललितालंकारप्रकरणे वक्ष्यते॥ उदाहरणं॥ त्वामंतरात्मनि लसंतमनं
तट– तमज्ञास्तीर्थेषु हंत मदनांतक शोधयंतः॥ विस्मृत्य कंठमध्यपरिस्फुरंतं चिंतामणिं क्षितिरजःसु गवेषयंति॥ अत्र
त्वान्यत्र परिशोधनं कंठस्थचिंतामणेर्भूपांशुगवेषणं चाभिन्नमिति तत्सादृश्यमूलार्थाः॥ यथा वा॥ अन्यैः स
मानममरैर्जगदंतरात्मन्यैंद्रशेखरवदंति भवंतमज्ञाः॥ ते किं न हंततुलयंति नभोनिरंतं वातायनोदरगते

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

र्विवरांतरालैः॥ पूर्वत्रैकवाक्यगत इह तु भिन्नवाक्यगतः पूर्वत्र वस्तुमात्रयोरौपम्यमूलो अभेद इह त्वौपम्ययोरौ
पम्यमूलः सङ्गतिविशेषः॥ एषा वाक्यार्थनिदर्शनेत्युच्यते॥ विशिष्टार्थयोः प्रकृतैकधर्मिगतयोरार्थाभेदे वाक्यार्थनि
दर्शनायाङ्गेः॥ अस्यां च घटकपदार्थानां बिंबप्रतिबिंबभावआवश्यकः॥ पदार्थनिदर्शना यथा॥ अगण्यैरिंद्राद्यै
रपि परमपुण्यैः परिचितो जगज्जन्मस्थानप्रलयरचनाशिल्पनिपुणः॥ प्रसर्पत्पीयूषाबुधिलहरिलीलाविलसि
तो दृग्नस्ते मंदं मम कलुषवृंदं दलयतु॥ अत्र दृग्गतांबुधिलहरीलीलयोराश्रयभेदाद्भिन्नयोरपि सादृश्यमूल
स्ताद्रूप्याभिमानः॥ आरोपोत्र दृग्गते लहरिलीलायाः॥ यथा वा॥ पाणौ कृतः पाणिरिलासुतायाः स्वस्वेदकंपा रघु
नंदनेन॥ हिमांबुमंदानिलविह्वलस्य प्रभातपद्मस्य बभार शोभां॥ अत्र हिमांबुजनितविह्वलता हिमकणाकीर्ण

र॰गं॰ तारूपावातजनितविह्वलताच्चविधुतिरूपा॥एताभ्यांचसस्वेदतासोत्कंपितयोः प्रतिबिंबनमितिपूर्वस्मादुदाहरणा
२४४ स्तान् द्वेदः॥प्रागानपदसान्निध्याच्चपुद्मस्यपद्धिकासमुद्रणयोः प्रत्यया[illegible]णावपित्तास्सिद्धिः॥अस्यांचोपमानोपमेयगतन
धर्मयोरार्थाभेदप्रतिपत्तिरतः पदार्थनिदर्शनोच्यते॥बिंबप्रतिबिंबभावस्तूपमानोपमेययोःसविशेषणत्वेभव
त्यन्यथानेतिविवेकः॥ननुवाक्यार्थनिदर्शनायांविशिष्टवाचकशब्दाभ्यांविशेषणयोरप्युपादानात् अस्तुनामो
पात्तयोरर्थयोरार्थोभेदः॥पदार्थनिदर्शनायांतूपमानशोभादेरन्यतरस्यैवोपात्तत्वंनद्वयोरितिचेत्॥शोभाशब्दे
नशोभात्वेनद्वयोरप्युपात्तत्वात्॥नह्युपमानोपमेयतावच्छेदकरूपेणोपात्तत्वंविवक्षितंयेनाव्याप्तिःस्यात्॥यद्वा २४४
प्रागुक्तंलक्षणंवाक्यार्थनिदर्शनायाएवनपदार्थनिदर्शनायाः॥अस्यास्तूपमानोपमेययोरन्यतरधर्मस्यान्यतर

त्रआरोपोलक्षणमस्तु ननुचैवमपिवाक्यार्थनिदर्शनायारूपकध्वनिनापदार्थनिदर्शनायाश्चनिगीर्याध्यवसा
नरूपयातिशयोक्त्यागतार्थतेतिचेन्न॥वाक्यार्थनिदर्शनायांरूपकस्यगुणीभूतत्वेनतद्ध्वनित्वायोगात्॥अन्यथा
तान् गुणीभूतयोपमयारूपकस्यापिगतार्थत्वापत्तेः॥किंचअस्याश्चशरीरंनादृशपदार्थयोःपरस्पराभेदमात्रमुभयत्र
विश्रांतरूपकस्यतूपमेयगतउपमानाभेदोतिशयोक्तेश्चानिगरणानिगरणाभ्यांचतयोःविशेषइत्यन्यत्॥एवं
चस्फुटमेवाख्यारूपकातिशयोक्तिभ्यांवैलक्षण्यं॥अनएवत्वामंतरात्मनीतिपद्येगवेषयंतीत्यत्रगवेषयंनइत्य
त्रप्रशोधयंतइत्यत्रशोधयंतीतिविधाने अर्थयोःपौर्वापर्येचननसौंदर्यहानिःरूपकादौतूच्यमानेव्यंग्यकशोद्दे
श्यविधेयभावस्यापिवाच्यकक्षोद्देश्यविधेयभावानुसारित्वयाउपमानेउपमेयाभेदसिद्धावसामंजस्यापत्तेरि

र॰गं॰ रितिसुधीभिराकलनीयं॥अलंकारसर्वस्वकारस्तुत्वत्पादनखरत्नानांयदलक्तकमार्जनं॥इदंश्रीखंडलेपेनपां
२४९ डुरीकरणंविधोरितिपद्यंवाक्यार्थनिदर्शनायामुदाजहार॥आहचयत्रतुप्रकृतवाक्यार्थेकिंवावार्थांतरमारोप्यते
सामानाधिकरण्येनतत्रसंबंधानुपपत्तिमूलानिदर्शनैवयुक्तेति॥तन्न॥वाक्यार्थरूपकस्यदत्तजलांजलित्वाप
त्तेः॥नचेष्टापत्तिःवाक्यार्थनिदर्शनेवनिर्विषयतांस्वीक्रियतांचवाक्यार्थरूपकमितिपर्यनुयोगस्यापितुल्यत्वा
त्॥अस्मदुक्तोदाहरणेवाक्यार्थनिदर्शनायाःसावकाशत्वाच्च॥युक्तंचैतत्॥पदार्थरूपकेमुखचंद्रइत्यादौकॢ
प्तस्यश्रौतस्याभेदारोपस्यरूपकजीवातुत्वकल्पनायाऔचित्यात्॥इंदुरंगभावद्गत्यास्यमित्यादिपदार्थनिदर्श २४९
नायामभेदारोपस्याभावात्तज्जीवातुत्वायोगाच्च॥रूपकेबिंबभावोनास्तीतितुशपथमात्रं॥युक्त्यभावात्॥यत्तु

तेनैवलक्षणंनिर्मितंसंभवतासंभवतावावस्तुसंबंधेनगम्यमानमौपम्यंनिदर्शनेति॥तदपिन॥रूपकातिशयो
क्त्यादिष्वतिव्यापनात्॥यत्त्वलंकारसर्वस्वकारानुकारिणाकुवलयानंदकृतोक्तं॥वाक्यार्थयोःसदृशयोरैरोपो क्या
निदर्शनायदातुःसौम्यतासेयंपूर्णेंदोरकलंकतेति॥तत्तुतन्मतदूषणेनैवनिवेदितरहस्यमितिनपुनराकु
लीक्रियते॥यदित्वत्पादनखरत्नानियोरंजयतियावकैः॥इदंचंदनलेपेनपांडुरीकुरुतेहिसइतिपद्यंनि
र्मीयतेतदानिदर्शनायुक्ता॥नचास्मदुक्तावाच्यानिदर्शनाद्वयंतुप्रतीयमानेतिवाच्यं॥मुखंचंद्रइवेतिवाच्यो
पमामुखचंद्रइतिप्रतीयमानानत्वलंकारांतरमित्यस्यापिसुवचत्वात्॥एवंचारोपाध्यवसानमार्गबहिर्भूत
आर्थएवाभेदोनिदर्शनाजीवितं॥सचकल्प्यांशभेदप्रतिपादनद्वाराप्रतिपाद्यतेवाक्यार्थनिदर्शनायां॥अतएव

र॰गं॰ मम्मटभट्टैरुदाहृतं॥ क्वसूर्यप्रभवोवंशः क्वचाल्पविषयामतिः॥ तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरमिति
२४६ ॥नन्वत्रनिदर्शनानैवसंगच्छतेविपर्ययेणउपादानेपिविषयस्यानुपात्तत्वात्॥उभयोपादानंहितत्रावश्यकम
तोललितालंकारउचितइतिचेत्ललितालंकारनिराकरणावसरएवैतन्मतमुपपादयिष्यामः॥परंतुत्वत्पा
तन–| दनखरत्नानामित्यत्रदृष्टांतालंकारमाहुः॥दयसत्॥बिंबप्रतिबिंबभावापन्नपदार्थघटितस्यानिरपेक्ष पन्न–|
वाक्यार्थद्वयस्यैवदृष्टांतत्वात् तस्मात्त्वत्पादनखरत्नानामितिवाक्यार्थरूपकमेवननिदर्शनेतिस्थितं॥ए
वमसंभवद्वस्तुसंबंधनिबंधनापदार्थवाक्यार्थनिदर्शनादर्शिता चूडामणिपदेधत्तेयांवरेरविमागतं॥स २४६
य–| तांकार्यातिथेयीतिबोधयन्गृहमेधिनः॥अत्रकारीषोग्निरध्यापयतिभिक्षावासयतीतिवदानुकूल्याचर

णेणिचःप्रयोगात्गिरेश्चसूर्योदयदेशावच्छिन्नशिरस्कतारूपस्यगृहमेधिगतसदातिथ्यकरणविषयकबो
धानुकूलाचरणस्यसंभवान्नयेवान्येनाप्यतिथिसेवाकार्येत्यौपम्यसद्भावात् संभवद्वस्तुसंबंधमूलापिनिदर्शि
नासंभवति॥नचबोधयन्निवबोधयन्नितिप्रतीयमानेयमुत्प्रेक्षा॥व्यालिंपतीतमोंगानिनभोवर्षतिकज्जलमि
त्यादाविवेतिवाच्यं॥वस्तुतःसंभवेनैवतस्याअप्रसक्तेरित्याहुः॥इदंचधातुनोक्तक्रियेनित्यंकारकेकर्तृतेण
नइत्युक्तपद्येनधातूपात्तव्यापाराश्रयत्वंकर्तृत्वमितिमतेसंगच्छते॥यदितुरूढविभागानुपपत्तेर्यत्नार्थका B कृता–|
भ–| त्सस्तविस्तविषयार्थकधातूत्तरकर्तृप्रत्ययस्याश्रयत्वेनिरूढलक्षणयायत्राश्रयःकर्तृपदार्थःसएवचेत्कर्तृप्र
त्ययानांमुख्यार्थाःचेतनस्तुभाक्तइतिमयपथेननिरातेनतदाबोधयन्नित्यत्रप्रतीयमानोत्प्रेक्षासंभवत्येव॥ ध्य–|

र॰गं॰ अमुमेवाशयं मनसिकृत्य मम्मटभट्टैः स्वखंडे त्वन्वयस्योक्तिरित्यादि लक्ष्मणं निदर्शनोत्तरस्य कृत्वोदाहृतं ॥ उ
लघुः|२४७ न्नतं पदमवाप्य यो लीलयैव स पतेदिति ब्रुवन् शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥ इति
पद्ये इति पदोत्तरं बोधयन् बोधयितुर्वेत्यस्याभावादुपेक्षाया असंभवे बोधननिदर्शनायुक्ता ॥ हालाहलं खलु
लु पिपासति कौतुकेन कालानलं परिचुचुंबिषति प्रकामं व्यालाधिपं च यतते परिरब्धुमद्धा यो दुर्जनं वशयितुं
तुं कुरुते मनीषां ॥ यथा वा ॥ व्योमनि बीजाकुरुते चित्रं निर्माति सुंदरं पवने रचयति रेखाः सलिले यस्तु खले च
रति सत्कारं ॥ बीजाकरणं बीजप्रक्षेपपूर्वकं कर्षणं ॥ इदं त्वापरं बोध्य याति गुरुजनैः साकं स्मयमानाननांबुजा ॥ २४७
तिर्यग्ग्रीवं यदद्राक्षीत्तन्निष्पत्राकरोज्जगत् ॥ अत्र भावप्रधानमाख्यातमिति स्वोक्तरीत्या क्रियाविशेष्यकबो

धवादिनां शाब्द एवाभेदारोपः क्रिययोरिति मुखं चंद्र इत्यादाविव रूपकमुचितं प्रथमांतविशेष्यकबोधवादिनां
त्वार्थः स इति निदर्शनेन निर्भेदः ॥ निष्पत्राकरणं च सपुंखशरस्यापरपार्श्वनिर्गमनात्पत्ररहितस्य करणं ॥ ॥ इति
रसगंगाधरे निदर्शनाप्रकरणं ॥ ॥ उपमानादुपमेयस्य गुणविशेषवत्त्वेनोत्कर्षो व्यतिरेकः ॥ प्रतीपादिवारणाय
तृतीयांतं वैधर्म्यपरं तत्र चोपमानतामात्रकृत एवोत्कर्षो न वैधर्म्यकृतः साधर्म्यस्यैव प्रत्ययात् ॥ अधिकगुणव
त्त्वमात्रमुपमानगतापकर्षमात्रं वा न व्यतिरेकस्वरूपं तयोरुपमेयोत्कर्षांशे प्रमंतरेणासुंदरत्वात् ॥ अत एव
न सादृश्याभावमात्रं उपमानादुपमेयस्यापकर्षेपि तत्संभवात्तरयच वास्तवत्वेनासुंदरत्वात् उपमेयोत्कर्ष
विशिष्टत्वेन सादृश्याभावविशेषणं तस्यैवालंकारत्वौचित्यात् ॥ उदाहरणं ॥ अनिशं नयनाभिरामया

र॰गं॰ रमया संमदिनो मुखस्य ते। निशि निःसरदिंदिरं कथं तुलयामः कलयापि पंकजं॥ अयं चोपमेयोत्कर्षकोप
२४९ मानापकर्षकयोर्वैधर्म्ययोर्द्वयोरप्युपादानानुपादानाभ्यामेकतरानुपादानेन च तावच्चतुर्धा। सोप्युपमा
याः श्रौती चार्थीत्वाभ्यां भिन्नात्वेऽष्टविधो भवन् सश्लेषनिःश्लेषत्वाभ्यां चतुर्विंशतिप्रकार इति प्राचः॥ उदाहर
णं। कदुजन्मनि कश्चिदस्ति वेदीयदि वेदी दृशामत्र किंविदध्याः॥ कथमिंदुरिवाननं त्वदीयं सकलंकः सकलंकहीन
नमतंत॥ अत्रोभयोरुपादानमुपनावश्रौती॥ अत्रैव कथमिंदुरिवाननं नु वेदं द्युतिभेदं न दधाति यत्कदापि इति
कृते द्युतिभेदं खलु यो दधाति नित्यमिति वा कृते एकतरानुपादानं सा च कथमिंदुरिवाननं मृगाक्ष्या भवितुं यु २४९
क्तमिदं विदंतु संत इति कृते हेतु सामान्यानुपादानं सा च हेतुद्वयेऽपि यस्येवानुपादानं तत्क्षेपेणावगतिरुभयोरप्य स्या

नुपादाने तथैवानन्त्वेनावगतिः व्यतिरेकस्योत्कर्षापकर्षरूपत्वात्तयोश्च प्रयोजकज्ञानमंतरेणानवबोधात्॥ एवं न
यनानि वहंतु खंजनानामिह नानाविधमंगभंगभाग्यं॥ सदृशं कथमाननं सुशोभं सुदृशो भंगुरसंपदांबुजेन॥ अ
चोपमा॥ त्रोभयोपादानं आर्थी च। वदनं तु कथं समानशोभं सुदृशो भंगुरसंपदांबुजेन शाश्वतसंपदंबुजेनेति च कृते एकत
रानुपादानं सा च न दृशं कथमाननं मृगाक्ष्या भविताल्पतनिशाविनायकेनेति कृते उभयानुपादानं पूर्वार्द्धं तु निद
र्शनं च॥ कतिपयदिवसविलासं नित्यसुखासंगमंगलसवित्री॥ खर्वयति खर्वासंगीर्वाणधुनीतटस्थितिर्नितरां॥
अत्रैवादेः सादृश्यमात्रशक्तस्य सदृशादेश्च तद्विशिष्टशक्तस्य शब्दस्याभावाद्धुत्यर्थमार्गाहेऽपि नीरखर्वीकरणेनाक्षि
प्तैवोपमा॥ अत्रैव निःसंगैरभिलपितेत्याद्यचरणे निर्माणसंपत्तिदुरंतचिंतयाकुलितमिति द्वितीयचरणनिर्माणे पात

र॰गं॰ रमयासंमदिनो मुखस्यते ॥ निशि निःसरदिदिरं कथं तुलयामः कलयापि पंकजं ॥ अयं चोपमेयोत्कर्षकोप
२४८ मानापकर्षकयोर्वैधर्म्ययोर्द्वयोरप्युपादानानुपादानाभ्यामेकतरानुपादानेन च तावच्चतुर्धा ॥ सोप्युपमा
याः श्रौतीत्वार्थीत्वा श्लिष्टत्वैर्द्वादशविधो भवन् सश्लेषनिःश्लेषत्वाभ्यां चतुर्विंशतिप्रकार इति प्राचः ॥ उदाहर
णं कदुजन्मनि कश्चिदलं वेदीयदि चेदीदृशमत्र किं विदध्याः ॥ कथमिंदुरिवाननं त्वदीयं सकलंकः सकलंकहीन
मेतत् ॥ अत्रोभयोरुपादानमुपमा चार्थी ॥ अत्रैव कथमिंदुरिवाननं तु वेदं द्युतिभेदं न दधाति यत्कदापि इति
कृते द्युतिभेदं खलु योदधाति नित्यमिति वा कृते एकतरानुपादानं साच कथमिंदुरिवाननं मृगाक्ष्याः भवितुं यु २४८
क्तमिदं विदं तु संतदुनिकृते देतु सामान्यानुपादानं साच हितु हृये हि यस्येवानुपादानं तत्क्षेपेणावगतिरुभयोरप्य स्या—

नुपादाने तथैवानत्वं नवगतिः व्यतिरेकस्योत्कर्षापकर्षरूपत्वात्तयोश्च प्रयोजकज्ञानमंतरेणानवबोधात् ॥ एवं न
यनानि वहंतु खंजनानामिह नानाविधमंगभंगभाग्यं ॥ सदृशं कथमाननं सुदृशोर्णं सदृशो मंगुरुसंपदांबुजेन ॥ अ
चोपमा—॥ त्रोभयोपादानं आर्थी ॥ वदनं तु कथं समानशोभं सुदृशोमंगुरुसंपदांबुजेन । शश्वत् संपदंबुजेनेति च कृते एकत
रानुपादानं साचास दृशं कथमाननं मृगाक्ष्या भविता लंतनिशाविनायकेनेति कृते उभयानुपादानं पूर्वार्द्धं तु निद
र्शनं च ॥ कतिपय दिवस विलासं नित्यसुखासंगमंगलसवित्री ॥ खर्वयति खर्वासं गीर्वाणधुनीतटस्थितिर्नितरां ॥
अत्रैवादेः सादृश्यमात्रशंकस्य सदृशादेश्च न हि शिष्टशक्रस्य शब्दस्याभावाच्छ्रुत्यर्थमार्गाद्वयेनी खर्वीकरणेनाक्षि
प्तैवोपमा ॥ अत्रैव निःसंगैरभिलपितेत्याद्यचरणे निर्माणसंपत्तिदुरंतचिंतयाकुलितमिति द्वितीयचरणनिर्माणे ३ पात

र॰गं॰ वाएकतरानुपादानं॥सार्वसर्वानर्वाचीनाचिर्वास्यमनोरथाननन्यत्नुपामितिपूर्वार्धेतदनुपादानमिति॥क्रूरसत्व
२४९ कुलोदीपाकरःत्रस्तोप्यधिर्यथा॥ननतथात्वंयतोभूयस्स्थिरधीरसिनिर्मलः॥अत्रोपमाश्रौतीश्लेषःस्पष्टएव॥राजन्
प्रचंडमार्त्तंडमंडलोद्दंडशासन॥कथमक्रूरसत्वस्त्वंपयोधिरिवगीयसे॥इतिकथंवाधिरिवासित्वंयतःसवि
पक्षागयंइतिवाक्तरेकतरानुपादनं॥महेंद्रतुल्यंकवयोभवंतंवदंतुकिंतानिह्नवारयामः॥भवान्सहस्रैः
मा-| समुपास्यमानःकथंसमानस्त्रिदशाधिपेन॥अत्रार्थीत्रिदशास्त्रिदशाःत्रिंशत्तेषामधिपःसंख्ययाव्ययासन्नादूरा द
इ-| धिकसंख्याःसंख्येयेइतिबहुव्रीहौबहुव्रीहौसंख्येयेइतिडचितस्युरुपदन्तोगतार्थत्वात्तस्यचोनप्रयोगःत्रयोद
शवेतिबहुव्रीहिर्वाभवान्सदारक्षितगोत्रपक्षःसमानकक्षःकथमस्ययुक्तइति॥कथंनिरस्ताखिलगोत्रपक्षः
हु-| ह-| अजबहुगणात्|

Dr. BHAU DAJI MEMORIAL

कन| समानकक्षस्तवयुज्यतेसइतिवाक्तेएकतरानुपादानं॥इदंतुबोध्यं॥इहोभयानुपादानेभेदत्रयंदुरुपपादं
वैधर्म्यानुपादानेहिकिमाश्रयःश्लेषस्यात्॥नचयत्रद्विजस्करालयमातरिश्वादिशब्दवैद्यर्षूपमानोपमेयसुसाधोपा ये-| रा-|
त्तएवश्लेषोव्यतिरेकोत्थापकस्तत्रैतदुदाहरणंसूपपादमितिवाच्यं॥तत्रस्वशब्दवेद्यस्यैववैधर्म्यस्यसंभवात्॥
इत्थंचचतुर्विंशतिभेदादुनिप्राचामुक्तिर्विपुलोदाहरणाभिर्ईर्यथाकथंचिदुपपादनीया॥किंचोपमाप्रभेदाःस
र्वएवात्रसंभवंतीत्यलंचतुर्विंशतिभेदगणनया॥नन्वस्यालंकारस्यवैधर्म्यमूलस्योपमाप्रतिकूलत्वमेवोचितंनतूप स्य-|
पमागर्भत्वंतस्याःसाधर्म्यमूलकत्वादस्यचतन्निषेधरूपेणैवप्रवृत्तेः॥नचेष्टापत्तिः॥सिद्धांतेनेनगप्रसंगात्॥स
त्यं॥यद्गुणपुरस्कारेणयस्ययत्सादृश्यनिषेधस्तुरूपपर्यवसायीतस्यतद्गुणपुरस्कारेणतत्सादृश्यस्याप्रतिज्ञानं

र०गं० पिगुणांतरेणसादृश्यप्रत्ययस्यदुर्वारत्वात्॥यदिचनत्सादृश्यनिषेधोविवक्षितःस्याद्गुणविशेषपुरस्कारोनर्थ-
२९० कःस्यान्नर्थनेनायमस्मादधिकइत्युक्तेर्विधयारूपेणकुलेनचसमइतिसर्वजनीनप्रत्ययात्॥एवंचप्रतीय
मानमपिसादृश्यंगुणांतरकृतनिषेधोत्थापितेनोत्कर्षेणाहतप्रभमिववर्णादिकृतमिवनचमत्कारविशेष
माधातुंप्रभवतीतिप्राचामाशयः॥अत्रचालंकारेक्वचिच्छाब्दसादृश्यनिषेधाक्षिप्तावुपमेयोत्कर्षोपमाना
पकर्षौ॥क्वचिच्चशाब्देनोपमेयोत्कर्षेणाक्षिप्तावुपमानापकर्षसादृश्याभावौ॥क्वचित्तादृशेनोपमानाप
कर्षेणाक्षिप्तावुपमेयोत्कर्षतदभावौतथा॥तत्राद्यः॥प्राचीनरीत्यासभेदउदाहृतः॥द्वितीयतृतीयावपि २९०
प्रा[illegible]यशस्तावद्भेदावेव॥तत्रदिङ्मात्रमुदाह्रियते॥निशाकरादालिकलंकपंकिलाद्गुणाधिकंनिर्मलमान

नंते॥अनल्पमाधुर्यकिरोधरा[illegible]दिमागिरोधरागुत्तररसाः कवीनां॥अत्रपूर्वार्द्धेउपमेयोत्कर्षःशाब्दउप
मानापकर्षसादृश्याभावावाक्षिप्तौ॥द्वितीयार्द्धेउपमानापकर्षःशाब्दउपमेयोत्कर्षसादृश्याभावावाक्षिप्तौ
दू-| ॥एवंक्वचिद्द्वयोस्त्रयाणांचशाब्दत्वसंभवदपिनातीवहृद्यमितिनोदाहृतं॥क्वचित्त्रयमप्याक्षिप्तमेव॥
यथा॥अपारेखलुसंसारेविधिनैकोर्जुनःकृतः॥कीर्त्यानिर्मलयाभूयत्वयासर्वेर्जुनाःकृताः॥अशीतलो स्त-|
ग्नश्चंडांशुरनुग्नःशिशिरःशशी॥उग्नःशीतस्त्वमेकोसिराजन्नरोपप्रसादयोः॥यथावा॥सतुवर्षतिवारिवा
हू-| रिदस्त्वमुदाराशयरत्नवर्षणः॥सकुले रजनीमलीमसस्त्वमिहान्तर्बहिरेवनिर्मलः॥अत्रोपमानतद्विशेषणो
पादानसामर्थ्यात्आक्षिप्तएवव्यतिरेकोनतुव्यंग्यइतिकदापिभ्रमितव्यंसत्यनुपपत्तिलेशोव्यंजनायाअत्र

र॰गं॰ रोल्लातं इह च राजविशेषणस्य यथाकथंचित्सुस्थर्थत्वेप्युपमानतद्विशेषणोपादानस्य न पोत्कर्षमंतरेणा
२८१ नुपपत्तेर्जागरूकत्वात् ॥ यत्र तूपमाने विशेषणोपादानमंतरेणैवोपमेयविशेषणैः सुंदरो देवदत्त इत्या त-।
दाविव वस्तुस्थितिप्रकाशनेन केनाथैरव्याकृतविशेषणस्य विलक्षणविशेषणविशिष्टधर्म्यंतरापेक्षया
वर्ण्यस्योत्कर्षः प्रतीयते स व्यंजनविषयः ॥ यथा ॥ नमनागपि राहुरोपशंका न कलंकानुगमो न पांडुभावः
॥ उपचीयत एव कापि शोभा परितो भामिनि ते मुखस्य नित्यं ॥ अयं व्यतिरेकध्वनिरर्थशक्तिमूलः ॥ यत्त्व
लंकारसर्वस्वकारः उपमानादुपमेयस्य न्यूनत्वेपि व्यतिरेकमाह वैलक्षण्यमात्रस्यैव व्यतिरेकत्वात् उ २८१
दाजहार च ॥ क्षीणः क्षीणोपि शशी भूयो भूयोभिवर्द्धते सत्यं ॥ विरम प्रसीद सुंदरि यौवनमनिवर्त्ति यातं

तु ॥ यच्च तद्व्याख्याता विमर्शिनीकारः स पूर्वपक्षसिद्धांतं व्याचख्यौ ॥ तथाहि ॥ नन्वत्रोपमानादुपमेयस्य
न्यूनत्वं व्यतिरेक इति न युक्तं ॥ तस्य हि वास्तवत्वेनाहृद्यत्वात् ॥ यौवनस्य चास्थिरत्वे प्रतिपाद्ये चंद्रापेक्षया
धिके गुणत्वमेव विवक्षितं ॥ यदेतत् चंद्रवद्यातं सत् पुनरायाति नेति यतोत्र चंद्रवदेतत् संघ्यौवनं यदि पु या-
नरागच्छेत् तत्प्रियं प्रति चिरमीर्ष्याद्यनुबंधो युज्येत इदं पुनर्गतं यौवनं यातं सत् पुनर्नागच्छतीतीर्ष्यादित्यागप
रिहारेणानिरंतरत्येव प्रियेण सह जन्मः सफलयितव्यो धिगीर्ष्यां त्यज प्रियं प्रति मन्युं कुरु प्रसादमिति प्रिय
वयस्यापदेशः प्रियं प्रति कोपापशमाय चंद्रापेक्षया यौवनस्यापुनरागमनं न्यूनगुणत्वेन विवक्षितमिति
न्यूनत्वमपि व्यतिरेको रसपरिपोषकतया चास्यापि हृद्यत्वमिति ॥ तदुभयमप्यसत् ॥ अस्मिन्नुदि प्रियदितका

र०गं० रिप्यावचनेचंद्राद्यधिकगुणत्वमेवविवक्षितंनन्यूनगुणत्वं ।। चंद्रोहिपुनःपुनरागमनेनलोकेसुल
२९२ भोनत्वेवनतादृशमाहात्म्यशाली ।। इदंपुनर्यौवनमनेनातिदुर्लभंनत्वेवादत्युत्कृष्टमितिमानादिभिरंत -पुनरागम-|B.
श्लाघ-|B. रायैःश्रवणजन[illegible]नीयैर्विदग्धयाभवत्या[illegible]धागमयितुमर्हतमितितावदुपात्तगुणकृतमुत्कृष्टत्वं मु-|
दान-|B स्फुटमेव ।। सकलसुखनिराकृ[illegible]वाद्यनुपात्तगुणकृतोप्युत्कर्षोत्रवाक्यार्थपरिपोषायसहृदयहृदयसं
[illegible]रणिप्रवृत्तस्यान्यथाकिमित्यस्यकृदर्थयौवनस्यकृतेमयामानादिरस्यतेयातुनामयौवनेमितिप्रतिकूले
नार्थेनप्रकृतार्थस्यापुष्टतापत्तेः ।। किंच ।। यत्रक्वापिशाब्दउपमेयस्यापकर्षस्तत्रापिसततस्यवाक्यार्थपरि २९२
पोषकतयोत्कर्षात्मनापरिणमति ।। यथा ।। द्रोहोनिरागसांलोकेहीनोहालाहलादपि ।। अयंहंतिकुलं

सांग्भंभोक्तारंकेवलंतुरसः ।। अत्रहीनइत्यपकर्षोदारुणताधिक्य[illegible]पोत्कर्षात्मनापरिणमति ।। एवंइदुस्तु [illegible]-|
परमोत्कृष्टोयःक्षीणोवर्द्धतेमुहुः ।। धिगिदंयौवनंतन्विक्षीणंनपुनरेतियत् इत्यादावुपात्तस्यापुनरावर्ति
त्वस्यतद्धर्मस्यमानप्रतिकूलतयाद्वेषेणवधिक्यादिकथनंनतुवास्तवापकर्षणाद्दुर्लभत्वस्यप्रियसमाग रा-|
मोल्लासकत्वस्यचोत्कर्षकस्यस्फुटत्वात् ।। यदपिकुवलयानंदकृतालंकारसर्वस्वोक्तार्थानुवादकेनन्यूनता
या-|B. फलमुदाहृतं ।। रक्तस्त्वंनवपल्लवैरहमपिश्लाघ्यैःप्रियायागुणैस्त्वामायांतिशिलीमुखाःस्मरधनुर्मुक्ताः
सखेमामपि ।। कांतापादतलाहतिस्तवमुदेतद्वन्मम[illegible]मायावयोःसर्वंतुल्यमशोककेवलमहंधात्रासशोकः
कृतः ।। अत्रसशोकत्वेनाशोकापेक्षयापकर्षःपर्यवस्यतीति ।। तदपिचिंत्यं ।। रत्याद्यनुकूलतयाकुत्रश्चिदंग

र॰गं॰ नूभूषणापसारणंयथाशोभाविशेषायभवत्येवंप्रकृतेउपमालंकारदूरीकरणमात्रमेवरसानुगुणतया
२९३ रमणीयंनव्यतिरेकः॥अतएवसमालंकारंप्रांचोनमन्यंते अन्यथानदालंकारांतरतयानस्वीकारापत्तेः
॥यथा॥भुवनत्रितयेपिमानवैः परिपूर्णेविबुधैश्चदानवैः॥नभविष्यतिनास्तिनाभवन्नृपयस्तेभजतेतुला
पदं॥अतएवध्वनिकृतासहृदयधुरंधरेणसकविस्तुरसानुसारेणक्वचिदलंकारसंयोगंक्वचिदलंकार
वियोगंचकुर्यादित्युक्त्वा[illegible]स्वमितिपद्यंसादृश्यदूरीकरणेउदाहृतं॥अतएवमम्मटभट्टैराधिक्यमात्रंव्यति
रेकइत्युक्तंनिरस्तंचन्यूनत्वंव्यतिरेकइति॥तस्मादुपमानादुपमेयस्योत्कर्षएवव्यतिरेकालंकारोनापकर्षइति २९३
स्थितं॥यदितुन्यूनत्वमपिव्यतिरेकइत्याग्रहस्तदेदमुदाहार्यं[illegible]गस्त्वयत्राणधृतव्रतस्यशमातलंकेव[illegible]

BHAU DAJI

लमेवरक्षन्॥कथंसमारोहसिहंतराजन्सहस्रनेत्रस्यतुलांद्विनेत्रः॥अत्रधर्मद्वयेनैवन्यूनोसिधर्मांतरेणातु
समइतिप्रतीतिकृतविच्छित्तिविशेषादलंकारता॥एवंचलक्षणेऽपकर्षोप्येवंजातीयोदेयः॥यदपिकुवलयानं
भ॰ दकृता अनुभयपर्यवसायिनोव्यतिरेकस्योदाहरणमुक्तं॥दृढतरनिबद्धमुष्टेःकोशनिषण्णस्यसहजमलिन प्प
स्यकृपणस्यकृपाणस्यचकेवलमाकारतोभेदइतितन्ननिपुणंनिरीक्षितमायुष्मता॥तथाहि॥किमत्रोपमाना
दुत्कर्षरूपोव्यतिरेकोनुभयपर्यवसायीआहोस्वित्सर्वस्वकाराद्युक्तदिशापकर्षरूपः॥नाद्यः उत्कर्षप्रयोजकध
र्मस्यात्रानुपस्थितेः॥नचश्लेषेणदीर्घाक्षरस्योपस्थितिरस्त्येवेतिवाच्यं॥तस्योपमानवृत्तित्वेनोपमेयानुत्कर्ष
रूपत्वात्॥अर्थांतरेणाकृतिरूपेणसहश्लेषमूलकाभेदाध्यवसायेन[illegible]साधारणीकरणाच्च॥अन्यथा

र॰गं॰ श्लेषमूलकोपमोच्छेदापत्तेः॥ चंद्रबिंबमिव न गरं सकलकलमित्यादावपि कलकल सहितत्वकलासा
२९४ कलयोर्वस्तुनो वैधर्म्यरूपत्वात्॥ न च सकलमित्यत्रोपमायामेव कवेर्निर्भरः प्रकृते तु भेदशब्दोक्त्या वैलक्षण्य कल
सङ्गतिभ्रमिनव्यं॥ यद्यत्रोपमाविघटनरूपो व्यतिरेको निर्भररसहः स्यादाकारशब्दश्लेषो निरर्थकः स्यात् दीर्घाक्ष
रादेवस्येवं ब्रूयात्तत्रव्यतिरेके श्लेषोनुकूलः प्रत्युत प्रतिकूल एव॥ उपमायां पुनरनुकूलः प्रतिकूलस्य दी
र्घाक्षररूपवैधर्म्यस्य साधारणीकरणादाकृतिभेदस्य चोपमानोपमेययोरपि सत्वात्॥ एवं हि कवेराशयो
यत्कृपणाकृपाणयोस्तुल्यत्वे वद हृदन रेत्यादि विशेषणसाम्यात्॥ अक्षरभेदस्याकारभेदत्वादविरुद्ध एवेति २९४
सहृदयैराकलनीयं॥ नहि नायः॥ तस्मान्कि मात्रेणाप्यसंगतेर्हृद्यत्वाच्च तस्मादत्र गम्योपमैव रूपप्रतिष्ठितेस्या र

परिमाणविशेषः स्तांकूट कार्षापणोद्घाटनं॥ प्रकृतमनुसरामः॥ अलंकारांतरोल्लापितोप्ययं संभवति यथा ईश्वरेण समो
ब्रह्मा पिता साक्षान्महेश्वरः॥ पार्वत्या सदृशी लक्ष्मीर्माता मातुः समा भुवि॥ पितास्य काष्ठसदृशः स्वयं पावक
सन्निभः॥ अत्ररूपकानन्वयोपमाउपमेयोत्कर्षोर्षस्योपमानापकर्षस्य च हेतव॥ अस्य चालंकारस्य सादृश्य
गर्भत्वात्सादृश्यस्य च त्रिविधधर्मोल्लापितत्वादत्रापि तत्प्रकारानुगमो बोध्यः॥ अत्रानुगामिनि धर्मे यथा॥ अरु त
णमपि विद्रुमद्रुमं मृदुलतरं चापि किसलयं बाले॥ अधरीकरोति नितरां तव बाधरो मधुरिमातिशयात्॥ अत्रा
रुण्यम्रदिमानावनुगामिनौ॥ बिंबप्रतिबिंबभावापन्ने यथा॥ जलजं ललितविकासं सुंदरहासं तवाननं हस
ति॥ अत्र हासविकासयोर्बिंबप्रतिबिंबभावः लालित्यसौंदर्ययोः शुद्धसामान्यता श्लेषोपात्तं जडजत्वं स्वाश्रयाप

निषेधा

र०गं० कर्षहेतुः॥एवंसादृश्यनिषेधालीढोव्यतिरेकोनिरूपितोभेदालीढोप्येषसंभवति॥यथा॥निष्कलंकनिरा
२९९ तंकचतुःषष्टिकलाधरसदापूर्णमहीपत्वंचंद्रोसीतिमृषावचः॥ ॥इतिरसगंगाधरेव्यतिरेकालंकारः॥अ
थसहोक्तिः॥गुणप्रधानभावावच्छिन्नसहार्थसंबंधःसहोक्तिः॥हृद्यत्वंचालंकारसामान्यलक्षणागतंसकला
लंकारसाधारणमेवेत्यसकृदुक्तं॥नचात्रकार्यकारणपौर्वापर्यविपर्ययात्मिकयाश्लेषभित्तिकाभेदाध्यवसा
नात्मिकयाकेवलाभेदाध्यवसानात्मिकयावातिशयोक्त्यानुप्राणनेभवतीतिवदंति॥अनुकूलभावमथवापरा
ङ्मुखत्वंसहैवनरलोकेअन्योन्यविहितंमंत्रौविधिदिदृक्षावद्धभौवहन्इत्यत्रातिप्रसंगवारणायावच्छिन्नांतं २९९
॥उदाहरणं॥केशैर्वधूनामथसर्वकोशैःप्राणैश्चसाकंप्रतिभूपतीनां॥त्वयारणेनिष्करुणेनराजंश्चापस्यजी

णि

वाचकृषेजवेन॥अत्रचापाकर्षणकार्याणांकेशाकर्षणादीनांपौर्वापर्यविपर्ययेणानुप्राणितःसहभावः॥निष्करु
णत्वेनचपौर्वापर्यविपर्ययः॥यथावा॥भाग्येनसहरिपूणामुत्तिष्ठसिविष्टराक्रुधाविष्टः॥सहसैवपतसितेपृथ्वि
निशारसनमृत्युनासाकं॥पूर्वत्रकर्मणःसहोक्तिरिहकर्तुरितिभेदः॥त्वयिकुपितेरिपुमंडलखंडनपांडित्यसं
पदुद्दंडेगिरिगह्वरेरिवधूनांदिवसैःसहलोचनानिवर्षंति॥अत्रवर्षणवर्षवदाचरणयोःश्लेषेणाभेदाध्यवसि
तिः॥यथावा॥वहुमन्यामहेराजन्नवयंभवतःस्तुतिं॥विपद्भिःसहदीयंतेसंपदोभवतायतः॥पूर्वाकर्तृसहो
क्तिरस्मिंस्तुकर्मसहोक्तिः॥व्याजस्तुतिसंवलिता॥पद्मपत्रैर्नृणांनेत्रैःसहलोकत्रयश्रियां॥उन्मीलितोजयतिसवितुः निमीलन्तो
कराः॥अत्रोन्मीलननिमीलनयोःपद्मपत्राद्याश्रयभेदेनभिन्नयोरपिप्रकटत्वाप्रकटत्वाद्येकोपाध्यवच्छिन्नतया

र॰गं॰ भिन्नीकृतयोरुपादानमित्येकक्रियासंबंधः॥अतएवनश्लेषःतस्यप्रतिपाद्यतावच्छेदकभेदएवस्वीकारा
२९६ त्॥एषूदाहरणेषुसहयोगात्तृतीयाप्रयुक्तोगुणप्रधानभावःप्राधान्येनक्रियान्वयेतुयथायथंतुल्ययोगितादीप
कंवाभवेति॥सहादिशब्दप्रयोगाभावेप्येषासंभवति॥वृद्धोयूनेतिनिर्देशेनतृतीयायाःसाम्राज्यात्॥परं वा मि
दिशब्दरहितात्प्रदेशादिवदस्याप्रधानभावस्तुशाब्दएव॥ननुकथमप्रधानभावःशाब्दइतीत्युच्यते॥योव
प नोदार्थ§क्रियाद्यन्वयितारूपःसस्यात्पदार्थान्तररूपोवा।उभयथाप्यस्यवाचकशब्दाभावाच्छाब्दत्वमेवेतिचेत् हू
न।अस्तितावत्सखंडमखंडंवाप्रधानत्वंयद्वशादयमंगंप्रधानंमुख्यइत्यादयोव्यवहाराआपामर २९६ स्मि
मुद्भसंति।तदभावरूपंचाप्रधानत्वंसहयुक्तेऽप्रधानइतिशास्त्रेणतृतीयायाःशक्तेर्बोधितात्तस्यकथमशाब्द

§ for this B reads आर्थ-

त्वं।नचसहार्थेनयुक्तेवरूकतोऽप्रधानेतृतीयेतितस्यार्थोनतुअप्रधानेऽर्थेवाच्यइतितथाचनोक्तार्थसिद्धिरिति
वाच्यं॥एवंचाप्रधानग्रहणवैयर्थ्यापत्तेः॥पुत्रेणसहागतःपितेत्यादौपित्रादिभ्योऽन्तरंगत्वात्प्रथमोत्पत्तेरेवौ
चित्यात्पुत्रेणसहपितुरागमनमित्यादौकारकविभक्तेःप्राबल्याच्च॥अन्यथाषष्ठीशेषेइत्यत्रापिविशेषणग्र
हणापत्तेः॥तस्माद्यथाहेतौतृतीयेत्यादिशास्त्रंहेतुशक्तिग्राहकमेवंसहयुक्तेऽप्रधानइत्यप्रधानशक्तिग्राह
कंयथैवतत्रप्रकृत्यर्थस्याभेदेनविभक्त्यर्थेऽन्वयस्तथेहापिशक्यावच्छेदकधर्मैक्यावपिकर्मत्वादीनामिवाप्रा
धान्यस्यापिशाब्दत्वमव्याहतमेवपर्यवसानत्वविशेषणशब्दाभावान्नैवमितिस्फुटमेववैलक्षण्यंएतेनाप्रधा
नग्रहणंशक्यमकर्तुमितिवदंतोमनोरमाकाराःपरास्ताः॥उक्तप्रकारेणसार्थक्यसिद्धौमुनिवचनस्यवैयर्थ्य

र०गं० कल्पनायाअन्याय्यत्वात्॥नचपुत्रेणसहागतःपितेत्यादौपुत्राभिन्नाप्रधानसहितइतिबोधस्याप्रामाणिकत्वा
२९७ न्नोक्तार्थसिद्धिरितिवाच्यं॥दंडेनघटइत्यादौदंडजन्यतावान्घटइतिहिसार्वजनीनेबोधेहेतौतृतीयेतिमुनिवच
नावलंबनंदंडाभिन्नहेतुकोघटइतिबोधंवदताभवतैवास्याःसरणेर्दर्शितत्वात्॥भावप्रधानमाख्यातमित्या
मु— द्यनेकेषांनिर्वचनंतत्रतत्रत्वत्कृतबोधवैपरीत्यस्यानुपपत्तेश्चेतिकृतमप्रसक्तविचारेण।प्रकृताप्रकृतत्वेत्रा
येरणोपमेयतोपमानतयोर्निर्णायकेइत्युक्तत्वादिहनताभ्यांतयोर्निर्णयःप्रकृतयोरपिसाहित्यसंभवात्॥किं
तुप्राधान्याप्राधान्याभ्यामिति॥हृद्यत्वंचास्याअतिशयोक्तिकृतमित्युक्तं॥यत्रतुसानास्तितत्रपुत्रेणसहागतः २९७
पितेत्यादौनसहोक्तिरलंकारः॥अत्रविचार्यते॥केशैर्वधूनामित्यादौपौर्वापर्यविपर्ययानुप्राणितासहोक्तिरलं

कारइतिनयुक्तं॥अतिशयोक्तेरेवात्रचमत्कृत्याधायकत्वेनसहोक्तेर्नाममात्रत्वात्॥नवकोपोरिनाशश्चजायते
युगपन्नृपइत्यस्मादतिशयोक्तेरलंकारात्तवकोपोरिनाशेनसहैवनृपजायतेइत्यत्रगुणभावमात्रकृतवैल
क्षण्येपिविच्छित्तेरविशेषात्तस्यैवचालंकारविभाजकत्वात्॥नचसादृश्यानुप्राणितस्यरूपकादेरप्यपृथग्भावा
पत्तिः॥निशाकरसमानोयमयंसाक्षान्निशाकरइत्यादौविच्छित्तिवैलक्षण्यस्यजागरूकत्वात्अन्यथातत्प्रयुक्त
स्यव्यतिरेकस्यानुत्थानापत्तेः॥अपिचसादृश्यप्रयुक्तरूपकादिषुसादृश्यस्यगुणत्वाच्चमत्कृतिविश्रांतिधा
मभ्योरूपकादिभ्योयथानपृथग्व्यपदेश्यत्वंनथात्रसहभावोक्त्याविर्भूतायाःकार्यकारणपौर्वापर्यविपर्ययात्मि
कायाअतिशयोक्तेःसकाशादस्याःसहोक्तेरपृथग्भावएवोचितः॥नन्वेवंसतिसहोक्तेर्निर्विषयत्वंस्यात्सहो

र॰गं॰ त्वंनरस्याप्यभेदाध्यवसानरूपातिशयेनकवलीकारादितिचेन्न॥अभेदाध्यवसानमूलायांसहोक्तावभे
रु-१ । २९९ दाध्यवसानेनसहोक्तेरुपस्क्रियात्तदुत्तिनगुणेनप्रधानस्यतिरस्कारोअपितुप्रधानेनगुणस्येत्युक्तदिशासा
वकाशैवसहोक्तिः॥गुणप्रधानभावश्चनिरागमहेःसूक्ष्मदृशावधानीयः॥किंचपरस्पराभेदाध्यवसानमा
त्रमतिशयएवनातिशयोक्तिः॥नस्यश्लेषादावपिसत्वात्।सातूपमानेनोपमेयस्यनिगरणं॥एवंचवर्षत्यु
न्मीलंतोनिमीलनइत्यादिष्येकेनापरस्यनिगरणाभावान्नातिशयोक्तिगंधोपि।अतिशयमात्रंतुप्रायशःसाधा
रणधर्मांशेबहूनामलंकाराणामुपस्कारकं॥नहिशोभतेचंद्रवन्मुखमित्यादौचंद्रमुखशोभयोर्वस्तुतोभि २९९
न्नयोरभेदाध्यवसानमंतरेणोपमासमुल्लसति॥तस्मात्कार्यकारणपौर्वापर्यविपर्ययमूलःसहोक्तेरेकःप्र

कारइतिसर्वस्वकारादीनामुक्तिराग्रहमूलैव॥अभेदाध्यवसानमूलस्तुप्रकारोभवतुनामसहोक्तेर्विषयः॥
यदितुदीपकेतुल्ययोगितायांचोपमानोपमेययोःप्राधान्येनक्रियादिरूपधर्मान्वयःइहतुगुणप्रधानभावेनेवेतिवि इ-
शेषःस्वल्पोपिविच्छित्तिविशेषानाधायकतयानालंकारांतरतायाःप्रयोजकोपितुतदवांतरभेदतायाइतिविभाव्य
तेनिरस्यतेचप्राचीनमुखदाक्षिण्यंतदानिविशतामियंकृत्तालंकारघटकंकिंचिद्वैलक्षण्यमात्रेणैवालंकारभेदं
वचनभंगीनामानंत्यादलंकारानंत्यप्रसंगादिति॥सत्यं॥गुणप्रधानभावालिंगितस्यसहभावस्यालंकारांतरोद्वि रा-
च्छित्तिविशेषमनुभवतःप्राचीनाएवसहोक्तेःपृथगलंकारतायांप्रमाणमन्यथैवंजातीयोपप्लवेनबहुव्याकुली
स्यात्॥नैवंप्रमाणीकुर्महेवयंसपामुकुलितविलोचनान्प्राचीनविश्यतांचेयमलंकारांतरभवनोदरंवराकीति

र०गं० नुभूतैवकेवलानसह्यत्वं॥एवंक्रियायाःसाधारणधर्मत्वेद्वयमुदाहृता॥गुणस्यतथात्वेयथा॥मांथर्यमापग
२८१ मनंसहशैशवेनरक्तंसहैवमनसाधरबिंबमासीत्॥किंचाभवन्मृगकिशोरदृशोनितंबःसर्वाधिकोगुरुरयं
सहमन्मथेन॥अत्रपद्यपिक्रियापिगुणेनसहसमानधर्मतामनुभवतितथापितस्यानांतरीयकत्वेनासुंदरत्वा
द्गुणस्यैवपर्यवसानेसमग्रभरसहिष्णुत्वांशोगुणत्वारसक्तत्वाभ्यामधिकभारत्वोपदेशकर्तृत्वाभ्यांचभिन्नयोर
प्युपमेयोपमानगतयोर्निरुक्तगुणयोःश्लेषणपिंडीकरणात्सहभावोपपत्तिरेवंश्लेषाभावेपिकेवलाध्यवसानेन
बोध्यं॥यत्रैकमेवोपमेयंविलक्षणसहोक्त्यालंबनंसामालासादृश्यान्मालासहोक्तिः॥वैलक्षण्यंचसहोक्तेःस्व २८१
समानाधिकरणसहोक्त्यंतरापेक्षयाबोध्यं॥केशैर्वधूनामित्यत्रकेशैःसहकोशैःसहप्राणैःसहेत्युपमानभेदे

नसाहित्यस्यानेकत्वेपिकर्षणैक्यात्सहोक्तेरभेदः॥सतिवायथाकथंचिद्भेदेनवैलक्षण्यंधर्मैक्यात्॥धर्मोपमानो
भयकृतवैलक्षण्यस्यचात्रविवक्षणात्॥उन्मीलंतोनिमीलंतइत्यत्रचधर्मवैलक्षण्येप्युन्मीलनधर्मोत्थापितस
होक्तिघटकोपमानानांपद्मपत्रादीनामेवनिमीलनधर्मोत्थापितायामपिसहोक्तौघटकत्वान्मालारूपत्वाभा
वेनसहरिपूणामितितुउदाहरणमेव॥यथावा॥उन्मूलितःसहमदेनबलाद्बलारेरुत्थापितोबलभृतांसहवि
स्मयेन॥लीलातपत्रमणिदंडरुचासहैवपाणौधृतोगिरिधरेणगिरिःपुनातु॥अत्रलीलातपत्रमणिदंडरुचो
गिरिधरेणान्तरकालिकत्वादुत्तरार्धगतापौर्वापर्यविपर्ययानुप्राणितैवसहोक्तिर्निदर्शनानुप्राणिताचपूर्वार्धेग
तु-| न[illegible]प्रकारद्वयंनापिसंभवतः॥इतिसहोक्तिः॥ ॥अथविनोक्तिः॥विनार्थसंबंधोविनोक्तिःहृद्यत्वंचानुवर्ततेतच्च

र०गं० विनाकृतस्य वस्तुनो रमणीयत्वारमणीयत्वाभ्यां भवति॥ यथा॥ संपदा संपरिष्वक्तो विद्यया चानवद्यया॥ नरो न
२६० शोभते लोके हरिभक्तिरसं विना॥ यथा वा॥ वदनं विना सुकवितां सदनं साध्वीं विना वनितां [illegible] राज्यं च विना धनि
तां न नितांतं भाति कमनीयं॥ रमणीयत्वे यथा॥ पंकैर्विना सरो भाति सदः खलजनैर्विना॥ कटुवर्णैर्विना काव्यं मा लज-|
नसं विषयैर्विना॥ पूर्वा तु केवलेयं तु दीपकानुकूला मिश्रिता॥ यथा॥ रागं विना विराजंते मुनयो मणयस्तु न॥ कौ
टिल्येन विना भाति नरो न कबरीभरः॥ अत्र प्रतिवस्तूपमानुकूला॥ त्यागं विना [illegible] राजंते शूराः सन्मणयो यथा॥ न |नन|
दानेन विना भाति नृपालो के हि पाइव॥ अत्र श्लेषमूलोपमानुकूला॥ यथा [illegible] विना रागो यथा मानं विना नृपः॥ २६०
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः॥ पूर्वक्रियाया गुणादिसंबंध आवश्यक इह तूपमा माहात्म्यादवगम्यते स *तानें|

इति न तथा॥ इयं च न केवलं विनाशब्दस्य सत्त्व एव भवत्यपि तु विनाशब्दार्थवाचकमात्रस्य॥ तेन न [illegible] निरविद्यूतरेण मानां-|
[illegible] रहितविकलेत्यादि प्रयोगद्वयमेव॥ निर्गुणः शोभते नैव विपुलाडंबरोऽपि ना॥ आपातरम्यपुष्पश्रीशोभितः
शाल्मलिर्यथा॥ अलंकारभाष्यकारस्तु नित्यसंबंधानाम संबंधवचनं विनोक्तिरित्याह॥ तस्य मतं तु नेतान्युदाह
रणानि इदं तदुदाहरणं॥ मृणालमंदानिलचंदनानामुशीरशैवालकुशेशयानां॥ वियोगदूरीकृतचेतनाया विने
व शैत्यं भवति प्रतीतिः॥ अत्र शैत्यस्याविर्भावेऽपि विनाभावो निबद्धः॥ यथा वा॥ शैत्यं विना न चंद्रश्रीर्न दीपः प्रभ
या विना॥ न सौगंध्यं विना भाति मालती कुसुमोत्करः॥ अलंकारांतरसमालिंगनाविर्भूतमेवास्य हृद्यत्वमस्त्व
तस्ते नालंकारांतरत्वमपि शिथिलमेवेत्यपि वदंति॥ अस्या ध्वनिर्यथा॥ विशालाभ्यामाभ्यां किमिह नयनाभ्यां फ यना-|

र॰गं॰ लमरीनयाभ्यामालीढापरमरमणीयातवतनुः॥ अयं तु प्रकारः श्रवणयुगलस्य त्रिपथगे यदंतर्न यातस्तव
२६१ लहरिलीलाकलकलः॥ अत्र त्वद्दर्शनं विना नयनयोस्त्वल्लहरिकोलाहलश्रवणं विना श्रवणयोश्चारमणीयत्वं फ
लेत्रभ्रंधिकाराभ्यां व्यज्यते न तस्य च भावध्वन्यनुग्राहकत्वेपि ध्वनिव्यपदेश्यत्वमव्याहतं॥ अन्यथानुग्राहकत्वल
क्षणसंकरोच्छेदापत्तेः॥ एवं च निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिंबं॥ उत्पत्तिरिंदोरपि निष्फलैं
वकृता विनिद्रा नलिनी न येनेति कस्यचित्कवेः पद्यं विनोक्तिध्वनिरेव॥ परं तु परस्परं विनोक्तिवशाद्वैलक्षण्य
शालि॥ इति रसगंगाधरे विनोक्तिः॥ ॥अथ समासोक्तिः॥ यत्र प्रस्तुतधर्मिको व्यवहारः साधारणविशेषणमा
त्रोपस्थापिताप्रस्तुतधर्मिकव्यवहाराभेदेन भासते सा समासोक्तिः॥ साधारणविशेषणमात्रश्रुत्युपस्थापितात्र

DR BHAU DAJI MEMORIAL

स्तुतधर्मिकव्यवहाराभिन्नत्वेन भासमानप्रकृतधर्मिकव्यवहारत्वमिति विवेकोक्तिः॥ शब्दशक्तिमूलध्वनिवारणा
य मात्रेति॥ तत्र विशेष्यस्यापि श्लिष्टतया प्रकृतेतरधर्म्युपस्थापनद्वारा तादृशधर्मिकव्यवहारोपस्थापकत्वात्॥ ए
वमपि आवध्नास्यलकांश्चिरस्य सितमात्वालं रसाकांक्षया रेकायाद्यातातनोपि कुरुपंजयालल्लाटक्षतं॥ प्रत्यंगं
वा— परिमर्दनिर्दयमहो चेतः समारोहसमानाविपर्ययं प्रद्रभवतः प्रागल्भ्यमत्यद्भुतं॥ इत्यत्र प्रकृतधर्मिकप्रकृ
ताप्रकृतव्यवहारविषयके श्लेषेतिव्याप्तिवारणाय प्रस्तुताप्रस्तुतत्वधर्मिविशेषणतयोपात्तव्यवहारविशेषणत्व
नतयोरुपादाने तु साधारणविशेषणमात्रश्रुत्युपस्थापिताप्रकृतश्रृंगारवृत्तांताभिन्नत्वेन स्फुरतएवात्र प्रकृतो वी
रवृत्तांत इति स्यादेवातिप्रसंगः न चात्र राज्ञा वर्णनस्य प्रस्तुतत्वात्तद्गतयोर्द्वयोरपि वृत्तांतयोः प्रस्तुतत्वमिति कथ

इति-र॰गं॰ मतिप्रसंगोवाच्यं॥नस्यादतिप्रसंगोयद्वर्णनमात्रंप्रस्तुतंस्यात्संग्रामादौवीरतामात्रवर्णनप्रस्तावेतुस्यादेवा
२६३ तिप्रसंगः॥मलिनेपिरागपूर्णेविकसितवदनामनल्पजल्पेपित्वयिचपलेपिचरसरसाभ्रमरकथंवासरोजिनीं
त्यजसीत्याद्यप्रस्तुतप्रशंसायामप्रकृतव्यवहारःसाक्षादुपात्तत्वात्तद्विशेषणाद्युपस्थापितएवेतिनतत्रातिव्या शे
प्तिः॥यदितुजलक्रीडादौभ्रमरवृत्तांतएवप्रस्तुतस्तदाभवत्येवेयंसमासोक्तिः॥तिमिरनाशवहिबोधयन्करस्पर्शैःप
द्मिनीमुद्रिताननापरिपूर्णोनुरागेणप्रातर्जयतिभास्करइत्यत्रकिरणस्पर्शकरणकमुकुलितपद्मिनीकर्मकविका श
सानुकूलव्यापारवदभिन्नोभास्करोजयतीतिवाक्यार्थःश्लेषेणैवनावगम्यते॥हस्तस्पर्शकरणकनायिकाविशे २६३
पा षकर्मकानुनयानुकूलव्यापारवदभिन्नइत्यादिश्चापरोर्थःउभयत्रानुषक्तयातयैववृत्त्याशक्यंनरेणव्यक्त्यावा २६२

सर्वथैवप्रतीयतेइत्यत्रसहृदयाएवप्रमाणं॥एवंचद्वाविमौवाक्यार्थौसंबंधितरौगोविषाणवदत्यंतासंसृष्टौयदिस्या
तांतदाभगवतोभास्करस्यकामुकत्वंकमलिन्यानायिकात्वंचसकलप्रतीतिसिद्धंविरुद्धंस्यात्॥द्विप्रधानत्वेनवा
क्यभेदश्चापद्येत॥यदिचापरोर्थःप्रकृतकर्तर्यारोप्यतेतदाकमलिनीविकासकर्त्तानायिकानुनयकर्त्ताचसूर्य
इत्येकत्रद्वयमितिविषयताशालीबोधःस्यान्नतुपूर्वोक्तानुपपत्तिपरिहारः॥यदिचश्लेषमूलाभेदाध्यवसानेनक
मलिन्यादीनांनायिकात्वादिप्रत्ययउपपाद्यतेतथाप्येवंश्लिष्टपदोपस्थितोभगवान्नायकत्वानापन्नएवपद्मिनीशा
ब्दबोधेनलिनीशब्दोपादानेसापिनायिकात्वेनकथंनामप्रतीतिपथमियात्॥तस्माद्विशेषणसाम्यमहिम्नाप्र
तीतोप्रकृतवाक्यार्थःस्वानुगुणंनायकादिमर्मार्थमाक्षिपंस्तेनपरिपूर्णविशिष्टशरीरःप्रकृतवाक्यार्थस्यावयव

र॰गं॰ तादात्म्यापन्नतदवयवाभेदेनावतिष्ठते ॥ सच परिणामदृष्व प्रकृतात्मनैव कार्योपयोगित्वात्मनान्वरसाद्युपयो
२६४ गी ॥ अत्रच प्रकृतार्थस्य पृथक्शब्दानुपादानात् रूपकाद्वाक्यार्थसंबंधिनो वैलक्षण्यं पदार्थरूपकानुस्फुट
मेव ॥ आक्षिप्तार्थघटितत्वाच्च वाक्यार्थश्लेषात् ॥ एवं चात्र शक्त्याक्षेपाभ्यां सर्वार्थनिर्वाह इति भामहोद्भटप्रभृ
तीनां चिरंतनानामाशयः ॥ निशामुखं चुंबति चंद्र इत्यादौ निशाचंद्रशब्दयोः श्लिष्टत्वान्मुखचुंबनमात्रस्य
च पुंस्त्र्यादिसाधारण्येन कथं तावन्नियतनायकाक्षेपकत्वं कथं वाक्षिप्तस्यापि नायिकादेर्निशाचंद्रयोरभेदेना
न्वयेन भेदेन चुंबनादौ तथात्वे च तयोर्नायिकनायकतापि रसानुगुण्यापत्तेः ॥ तस्मान्निशामुखं चुंबति चंद्रिकेपाऽत्र २६३
मुखं चुंबति चंद्रभानुरित्यादावप्रतीयमानं नायकत्वं प्रकृतयोः पूर्वप्रथमाभ्यां प्रतिपादितेन प्रकृत्यर्थगतेन स्त्री

त्वेन पुंस्त्वेन च स्वाधिकरण एवाभिव्यज्यते ॥ एवं च निशाशशिनोर्नायिकत्वाद्युपपत्तिः श्लिष्टविशेषणैर्व्यंजनव्यापारेणै B. has (आ-
वाप्रकृतार्थबोधनं ॥ शक्तेः प्रकरणादिना नियंत्रणात् ॥ तथा च व्यंजनमाहात्म्यादेवाप्रकृतवाक्यार्थतादात्म्येन प्रकृत थं-
वाक्यार्थोवतिष्ठते ॥ गुणीभूतव्यंग्यभेदस्यायमिति नु रमणीयः पंथाः ॥ अलंकारसर्वस्वकारस्तु विशेषणसाम्यात् दृष्टि-
प्रतीयमानमप्रस्तुतं प्रस्तुतावच्छेदकत्वेन प्रतीयते ॥ अवच्छेदकत्वाच्च व्यवहारसमारोपो न तु रूपसमारोपः रूपस
मारोपत्वे वृक्षादिनात्वेन प्रकृत रूपस्य रूपित्वाद्रूपकमेव स्यादित्याह तदेतदुक्तिमात्ररमणीयं ॥ अप्रकृतव्यवहारः प्र
कृतकर्तरि नायकादिस्वकर्तृविशेषित आरोप्यते तदविशेषितो वा ॥ ना[illegible] ॥ एवं च सति चंद्रादेर्नायकव्यवहाराश्रय यः
त्वेन नायकसाम्यं सिध्यत्यच्छ्लेषादिभित्तिकाभेदाध्यवसायेन व्यवहाराभेदं प्रतिपिपादयिषतः कवेरनभिप्रेतमेव

र॰गं॰ अभिप्रेतंतुनायकत्वं॥तच्चनायकस्यव्यवहारविशेषणत्वेनसिध्यति॥किंच॥निशामुखंचुंबतिचंद्रइत्यत्रचंद्रेना
२६९ यकव्यवहारारोपएवननायकत्वारोपएवमेवनिशायामपिननायिकात्वारोपःतत्त्वन्यायत्वात्॥एवंचमुखचुं
बनमात्रस्यनायिकानिर्मुक्तस्यासंदरत्वान्नायकसाधारणव्यवहारत्वायोगाच्चकिमारोपेण॥यदिचनिशायांस्त्री
लिंगव्यंग्यंनायिकात्वमितिनिरीक्ष्यतेतदाचंद्रगतपुंल्लिंगव्यंग्यंनायकत्वमपिनिरीक्ष्यतां॥नद्वितीयः॥नायक
संबंधित्वेनाज्ञातस्यमुखचुंबनमात्रस्याहृद्यत्वात्॥तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरमितिनिदर्शनातोवै
लक्षण्यायास्मदुक्तवैधर्म्यस्यैवास्थेयत्वाच्च॥इदमनुपदमेववक्ष्यामः॥यत्तुसर्वस्वकाराद्यनुवर्तिनाकुवलया २६४
नंदकृतासपूर्वपक्षसिद्धांतमुक्तं॥अत्रचविशेषणसाम्यात्सारूप्याद्वायदप्रस्तुतवृत्तांतस्यप्रत्यायनंनतत्प्रकृतविशे

ष्ये-| ष्येतत्समारोपार्थं॥सर्वथैवप्रस्तुतानन्वयिनःकविसंरंभगोचरत्वायोगात्ततश्चसमासोक्तावप्रस्तुतव्यवहारसमा
रोपश्चारुताहेतुःनतुरूपकइवप्रस्तुतेअप्रस्तुतसमारोपोस्ति॥मुखंचंद्रइत्यत्रमुखेचंद्रत्वारोपहेतुमुखशब्दसम
भिव्याहारवदत्रतुचुंबतिचंद्रमाइत्यादिसमासोक्त्युदाहरणेचंद्रादौजारत्वारोपहेतोस्तद्वाचकपदसमभिव्याहा
रस्याभावात्॥नचेहनिरीक्ष्यविघ्नभयैःपयोदामुखंनिशायामभिसारिकायाइत्यत्रनिरीक्षणानुगुणनयनापादा
नंयथापयोदस्यद्रष्टृपुरुषत्वस्यगमकंतथाकिंचिज्जारत्वस्यास्ति॥नवात्वय्यागतेकिमितिवेपतएषसिंधुस्त्वंसेतुमंथ
कृदतःकिमसौबिभेति॥इत्यत्रसेतुमंथकृत्वंविष्णोःकार्ययथाराज्ञोविष्णुत्वस्यनथाकिंचिदस्ति॥तस्माद्विशेष
णसमर्पिताप्रस्तुतव्यवहारसमारोपमात्रमिहचारुताहेतुः॥यद्यपिविशेषणसमर्पितयोरप्यर्थयोरविशिष्टप्राधा

न्य-

र०गं० न्यंतथापि अन्यतराश्रये धर्मिण्यन्यतरारोपस्यावश्यकत्वे श्रुतेप्रकृतव्यवहारधर्मिण्येवाप्रकृतव्यवहारस्यारोपउचि क-

२६६ तः ॥ तस्यच स्वरूपतो ज्ञातस्यारोपे चारुत्वाभावात्कामुकाद्यप्रस्तुतधर्मिसंबंधित्वेनावगम्यमानस्य रसानुगुणत्वा

दारोपः कामुकादेश्च पदादनुपस्थितस्यापि चुंबनादिना व्यंजितस्य व्यवहारविशेषणत्वात्तस्माद्यमेंद्रीमुखं पश्य

रक्तश्चुंबति चंद्रमा इत्यत्र जारसंबंधिनाद्यचुंबनरूपव्यवहाराश्रयश्चंद्र इत्येव बोध इति ॥ तदेतत्सर्वमसंगतं ॥

यत्तावदुच्यते मुखं चंद्र [illegible] इत्यत्र मुखे चंद्रत्वारोप इति तत्र नामार्थयोरभेदेनैवान्वयान्मुख

चंद्रस्यारोपो न चंद्रत्वस्य चंद्रविशेषणस्य ॥ यदप्युच्यते जारादिपदसमभिव्याहारस्य हेतोर्विरहाच्चंद्रा २६९

दौ जारत्वारोप इति ॥ तत्र ॥ श्रौतारोपे तादृशसमभिव्याहारस्य हेतुत्वं न त्वार्थारोपे अन्यथा रूपकध्वनेरु

च्छेदापत्तेः ॥ न च रूपकध्वनावारोप्यमाणासाधारणधर्मोक्तिरारोप्यमाणतादात्म्यव्यंजिका न चेह तथा

किंचिदस्तीति वाच्यं ॥ इहापि परनायिकामुखचुंबनस्य श्लेषमर्यादया व्यंजनमर्यादया वा प्रतीतस्य प्रकृत

धर्मिणि चंद्र आरोप्यमाणस्य जारासाधारणधर्मत्वेन जारत्वव्यंजकतायाः स्फुटत्वात् ॥ एतेन विधुभयनैरि

त्यभृत्वं सन्तु मंथकृदित्यत्र च यथा द्रष्टृत्वविष्णुत्वगमकं न यैह नास्तीति निरस्तं ॥ न च जारत्वस्य चंद्रादावारो

पमंतरेणापि जारव्यवहारारोपः सिध्यन्ननुपपत्तेरभावान्न जारत्वं गमयेदिति वाच्यं ॥ गमकं हि हि विधं आक्षे

प- पकं व्यंजकं च ॥ न ह्याक्षेपकमनुपपद्यमानमवगमयति ॥ व्यंजकं तु नानुपपत्तिमपेक्षते ॥ गतोऽस्त मर्क इत्या

दौ तथैव दर्शनात् अन्यथार्थपत्त्यागतार्थत्वेन व्यंजनावैयर्थ्यप्रसंगात् ॥ किंच त्वयापि हि जारादेरप्रकृतध

र॰गं॰ र्मिणःप्रतीतिरवश्यंवाच्या॥आरोप्यमाणव्यवहारविशेषणार्थं॥अन्यथास्वरूपतोप्रकृतस्यव्यवहारारोपेच
२६९ रुतानापत्तेः॥एवंचावश्यापरुछाप्यस्यजारादेस्तादृशचुंबनकर्त्तरिचंद्रादावेवतादात्म्येनविशेषणत्वमुचि
तं॥नतुव्यवहाराभेदेनचंद्रस्यजारभिन्नतावगमेपरनायिकावदनचुंबनस्याहृद्यत्वात्॥अपिच॥निशा
मुखंचुंबतिचंद्रएषइत्यत्रस्त्रीलिंगपुंल्लिंगाभ्यांमुखचुंबनरूपार्थसंबंधाभ्यांनायिकात्वंनायकत्वंचव्य
ज्यतइतिहिनिर्विवादं॥अन्यथानिशामुखंचुंबतिचंद्रिकैषा॥अहर्मुखंचुंबतिभानुबिंबमित्यत्रापिनाय
कत्वनीत्यापत्तेः॥एवंचसामानाधिकरण्येनैवसंसर्गेणव्यज्यमानंनायकत्वंनिशाशशिनोर्नायकत्वा २६९
रोपएवपर्यवस्यतिअपरित्यक्तस्वरूपयोर्निशाशशिनोर्नायकताख्यधर्मविशिष्टयोःप्रतीतेरितित्वदुप

MEMORIAL DR BHAU DAJI

नान जीव्यग्रंथविरोधश्च॥अविशेषाभावादप्रकृतव्यवहारेणाक्षिप्तेनधर्मिणंवप्रकृताधर्म्यवच्छिद्यतेइतिचंद्रि त-
काविरोधश्च॥किंचचुंबनादिव्यवहारेणाभिव्यक्तस्यव्यवहारमेवनत्वभेदेनचंद्रादिविशेषणत्वंचंद्रा विशेषणत्व- B.
दिपदसमानाधिकरणपदानुपस्थापितत्वादित्युक्तं॥तत्रतुअन्यायैत्वाभिशायामपिननायिकात्वारोपो
अपितुनायकवदभिव्यक्तायानायिकायाअपिव्यवहारसंबंधित्वेनैवावस्थानमितिवक्तव्यं॥तच्चबाधितं॥
नायिकात्वानालीढकेवलरात्रिमुखचुंबनरूपस्यव्यवहारस्यनायकासंबंधित्वात्॥नहिरात्रितादात्म्यंवि
नानायिकायाःपृथक्मुखंविशेषयितुमस्तिसामर्थ्यं॥अपिचनिर्लक्ष्मीकाभवत्प्राचीप्रतीचीयातिभास्क
रे॥त्रियंविपक्षरमणेरक्तेकामुदमंचतीत्यत्रपूर्वार्द्धगतायांसमासोक्तौभास्करादीनांनायकत्वाप्रतीतावु

र॰गं॰ त्तरार्द्रप्रयत्नादिनासमर्थनायाःसर्वथैवानुपपत्तेः॥अन्यत्रअप्रकृतव्यवहारःप्रकृतविशेष्येप्रकृतव्यवहारता
स्थ्ये-| २६७ टस्थ्येनारोप्यतेतदभिन्नतयावा॥नाद्यः॥एवंचप्रकृतविशेष्येप्रकृताप्रकृतव्यवहारयोरेकत्रद्वयमितिविषय
ताशास्त्रीविरोधःस्यात्सचासिद्धइत्युक्तमेव॥नद्वितीयः॥इतोपिप्रकृतव्यवहारएवअप्रकृतव्यवहारस्याभेदेनारो
पोवर्णीयान्नतुभेदसंसर्गेणप्रकृतविशेष्येअभेदांशेव्यवहारांशेचारोपस्वीकारप्रसंगात्॥ममत्वभेदांशमात्र
इतिस्फुटएवविशेषः।तस्मादप्रकृताभिन्नतयाध्यवसितःप्रकृतव्यवहारःस्वविशेष्येतद्विशेष्याभिन्नतयावच्छि
न्नभासनेतत्राप्रकृतार्थउपस्कारकतयागुणइतिप्रकारएवरमणीयः॥सचनवाक्यार्थरूपकेत्वस्यादन्तरवत्ता २६७
नामित्यन्येवविशिष्टस्यविशिष्टेसमासोक्तौतयोःपृथक्शब्दवेद्यत्वाभावात्॥किंतुप्रकृतवाक्यार्थघटकाःपदार्था

स्तादात्म्येनाप्रकृतघटकपदार्थालीढाएववैशिष्ट्यमनुभवंतोमहावाक्यार्थरूपेणपरिणमंतीतिसूक्ष्ममीक्षणी
यं॥अतिशयोक्ताविवाप्रकृतेनप्रकृतस्यनिगरणंतुनवाच्यं॥तस्यशाब्दवाच्यत्वात्॥अथास्याःकेचनभेदानिग
द्यंते॥विशेषणसाम्यं[illegible]श्लेषेणभवतिशुद्धसाधारण्येनवा।तदपिधर्मांतरपुरस्कारेणकार्यपुरस्का
रेणचेतिप्रत्येकंद्विविधं॥तत्रविबोधयन्करस्पर्शैरित्यत्रधर्मांतरपुरस्कारेणश्लेषसमुदाहृतमपिविशेषणसा
म्यंपुनरुदाह्रियते॥उत्संगेनवगंगेपायंपायंपयोतिमधुरतरं॥शमिताखिलश्रमभरःकथयकदाहंचिराय
शयिताहे॥अत्रशिशुजननीवृत्तांताभेदनश्छितःप्रकृतवृत्तांतः॥श्लिष्टकार्यपुरस्कारेणाप्युदाहृतंसंगच्छतास्य
लुकाभिरस्यसीत्यत्र॥शुद्धसाधारण्येनधर्मांतरपुरस्कारेणयथा॥अलंकर्तुंकर्णौभृशमनुभवंत्यानवरुजा

र॰गं॰ ससीत्कारंतिर्यग्वलितवदनायांमृगदृशः॥कराग्रव्यापारानतिरसकृतसारासयतोजन्तुःसर्वश्लाघ्यंजयति अ-|र-|
२६९ब| ललितोनंगस्यभवतः॥अत्रनिकांतयाक्लेशेनकर्णेक्रियमाणस्योत्तंसस्यवृत्तांतःप्रत्यग्रखंडिताधरकामुकवृत्तां
ताभेदनस्थितः॥यथावा॥अंधेनपातभीत्यासंचरताविषमेविषयेषु॥दृढमिहमयागृहीताहिमगिरिशृंगाद्दु- दु-|
पागतागंगा॥अत्रगिरिशृंगप्रभववेणुयष्टिव्यवहाराभेदेन॥कार्यसाधारण्येन॥यथा॥देवत्वांपरितःस्तुवंतु
क वयोलोभेनकिंतावतास्तव्यस्त्वंभवितासियस्यतरुणश्चापप्रतापोधुना॥क्रोडांतःकुरुतेतरांवसुमतीमाश्रगः
समालिंगतिध्यांचुंबत्यमरावतींचसहसागच्छत्यगम्यामपि॥कार्यधर्मोनरयोःसंकरेणसाधारण्यं॥यथा॥उ २६९
श्लितालकबरीभरंविवलिताःपार्श्वद्वयेन्यकृताःपादांभोजयुगरुपापरिहतादूरेणचेलांचलं॥स्खलंतित्वरया

भवत्प्रतिभटक्ष्मापालवामभ्रुवांयांतीनांगहनेषुकंटकचिताःकेकेनभूमीरुहाः॥अत्रकंटकचितत्वेनकब
रीग्रहणादिसंकीर्णं॥समासोक्तौव्यज्यमानस्याप्यप्रकृतव्यवहारस्योपस्कारकत्वमेवनप्राधान्यंतदुपस्कृत
वाच्यस्यैवतुप्राधान्यमित्युक्तंतत्रयदिव्यंग्यस्यैवप्राधान्यंस्यात्तर्हिवाच्यस्यतदादेवत्वांपरितस्तुवंत्वितिप्रागुदा लि-|
हृतपद्येनिंदाव्याजेनस्तुतौपर्यवसानंनस्यात्॥स्तुतिनिंदयोःप्रकृताप्रकृतव्यवहाराश्रयत्वादितिध्येयं॥यत्तु
तन्वीमनोरमाबालापुष्पाक्षीपुष्पहासिनी॥विकासमेतिसुभगाभवदर्शनमात्रतः॥अत्रतन्वीत्वादिविशेष
णसाम्याद्वल्लीलाश्यालताव्यवहारप्रतीतिः॥तत्रवल्लीकगामिविकासाख्यधर्मसमारोपःकारणं॥अन्यथाविशे रुतै-|
षणसाम्यमात्रेणनियतलताव्यवहारस्याप्रतीतेः॥विकासश्चप्रकृतेउपचरितोज्ञेयइत्यलंकारसर्वस्वकारआह॥ त्स-|

र॰गं॰ तत्रविचार्यते ।। नात्रविशेषणसाम्यमात्रेणलताव्यवहारप्रतीतिरपितुलतारूपाप्रकृतासाधारणविकासौ
२६९ रोपमहिम्नेतिभवतैवोक्तं ।। तथाच विशेषणसाम्यात्प्रकृतस्यगम्यत्वमितित्वदुक्तसमासोक्तिलक्षणस्यक
थमत्रप्रवृत्तिः नचलक्षणे विशेषणसाम्यमात्रगम्यत्वंनविवक्षितमपितुविशेषणसाम्यगम्यत्वंप्रकृतेचविका
सस्याप्यधिकस्यगमकत्वंनत्वेतावताविशेषणसाम्यस्यगमकताहानिरितिवाच्यं ।। श्लेषेतिव्याप्त्यापत्तेः ।। नच
विशेषणमात्रसाम्यगम्यत्वंविवक्षितमेवंचनश्लेषेतिव्याप्तिः ।। नापितन्वीमनोहरेत्यत्रलक्षणस्यावर्त्तनमिति अ३
वाच्यं ।। तन्वीमनोहरेत्यत्रसमासोक्तेरेवाभावात् ।। यत्रसाधारण विशेषणमहिम्नाऽप्रकृतस्यस्फूर्तिस्तत्रसमासोक्तिः ।य-
त्र त्वसाधारणमहिम्नातत्रव्यंग्यरूपकमितिविषयव्यवस्थापनात् ।। एवंचप्रकृतेसाधारणविशेषणसत्वेपिन

तन्महिम्नालतायाःस्फूर्तिरपितुविकासमहिम्नेतिव्यंग्यरूपकमुचितं ।। यथा ।। चकोरनयनानंदिकल्हाराल्हा
दकारणं ।। तमसांकदनंभातिवदनंसुंदरंनवेत्यादौसुंदरमितिसाधारणविशेषणसत्वेपिरूपकमेव ।। तथेहा
न्य—| पिक्वचिद्गुणीभूतंक्वचित्प्रधानमित्यदृतत् ।। साधारण्येनविशेषणसाम्यमृगायाःसमासोक्तेस्तंधेनपातभीत्या
यन| संचरतेत्यादिप्रागस्माभिरुदाहृतोविषयइतिननिरवकाशत्वंतत्रत्यसाधारणधर्मारोपमंतरेणासाधारणविशे
षणमहिम्नेवाप्रकृतप्रतीतिः ।। एतेनतदेवंसाधारण्येनसमासोक्तेर्विशेषणसाम्येप्यप्रकृतसंबंधिधर्मकार्य
समारोपमंतरेणतद्व्यवहारप्रतीतिर्नभवतीतिविमर्शिनीकृतायदुक्तंतन्निरस्तं ।। तस्मादेवंसंभवतिविषयविभा
गेतन्वीमनोहरेत्यत्रसमासोक्तिवचनमहृद्यं ।। यदप्यौपम्यगर्भत्वेनापिविशेषणसाम्यंसंभवति ।। यथा ।। दंतप्र—

र॰गं॰ भापुष्पचितापाणिपल्लवशोभिता ।। केशपाशालिवृंदेन रुक्वेषा हरिणेक्षणा ।। अत्र हरिणेक्षणामात्रवृत्तेः रू
तावेपत्वस्य विशेषणस्य महिम्ना दं[illegible]प्रभासदृशानि पुष्पाणि इत्यादियोजनां विहाय दंतप्रभाः पुष्पाणीवेत्याद्युप
२७० मितसमासाश्रयेण कृते योजने प्रकृतार्थसिद्धौ सत्यां वृत्त्यंतरेण त्यक्तायाएव योजनायाः पुनरुज्जीवने पुष्पेप
(वा) लुवालिवृंदे रूपमेये संक्षिप्तायालतायाः प्रत्ययाच्च व्यवहारारोपः ।। एवं रुक्वेपेत्यपहायपरीतेति कृते उपमारू -त्वद्-
पकसाधकबाधकप्रमाणाभावात्तदु[illegible]भय[illegible]संशयरूपसंकराश्रयेण कृते योजने पश्चात्पूर्वोक्तरीत्या
लतानाप्रतीतेः समासोक्तिरेव ।। तं समासभेदेनार्थभेदेपि शब्दैक्यमादाय श्लिष्टमूलायामिव विशेषणसाम्यं बोध्यं २७०
।। आदौ अंते वा रूपकाश्रयेण दंतप्रभाएव पुष्पाणीति योजने कृते तु हरिणेक्षणांशे आक्षिप्तलतानादात्म्यके॰

नैकदेशविवर्त्तिरूपकेणैवाप्रकृतार्थप्रत्ययोपपत्तेर्नार्थः समासोक्तेरत्रेति तेनैवोक्तं ।। तदपि न विचारसहं ।। दंत
प्रभाः पुष्पाणीवेत्युपमागर्भत्वेनाप्यादौ योजने कृते हरिणेक्षणांशे आक्षिप्तलतोपमानिकया एकदेशविवर्त्तिन्या
उपमयैव गतार्थत्वात्समासोक्तेरानर्थक्यादत्राप्रसक्तेः ।। न चोद्भटमते एकदेशविवर्तिनो रूपमासंकरयोरस्वीका
रात्तथोक्तमिति वाच्यं ।। अनुपदमेव स्वयं तत्स्वीकारात् ।। हालाहलसखो मन्युरनुकंपारुधोपमा ।। कीर्त्तिस्तवं
द्रसदृशी भट्टास्तुमकुरोद्भटादित्यादौ गत्यंतराभावात्तेनाप्येकदेशविवर्त्युपमायाएव स्वीकरणीयत्वाच्च ।। आ
वश्यके न तेनोपपत्तौ भेदांतरकल्पनानौचित्यात्तस्मादौपम्यगर्भविशेषणोत्थापितसमासोक्तिप्रकारो न संग
च्छते ।। यत्र श्लिष्टविशेषणेन शुद्धसाधारणविशेषणेन वा सहचरितमौपम्यगर्भविशेषणं तत्र यद्यप्यस्तिसमा

र॰गं॰ सोक्तिस्तथापिनासावौपम्यगर्भविशेषणोत्थापितस्तृतीयःप्रभेदोभवितुमर्हति॥स्वतंत्रविषयत्वाभावात्॥यथा।
२.७१ निर्मलांबररम्यश्रीःकिंचिद्दर्शिततारका॥हंसावलीहारयुताशरद्विजयतेतरां॥अत्रपूर्वार्द्धगतश्लिष्टविशे
षणोत्थापितैवसमासोक्तिरुत्तरार्द्धगतेनौपम्यगर्भविशेषणेनविद्वद्भिरुत्थापितायुक्तिस्तदनुगामिनामृरेर्वैणवा
म– नुमोद्यते॥एवंदत्तानंदासेसानौप्रफुल्लोत्पलमालिनी॥इतिपूर्वार्द्धकृतेश्लिष्टसाधारणविशेषणोत्थापितैव॥ग
वंचपरिफुल्लाब्जनयनाचंद्रिकाचारुहासिनीहंसावलीहारयुताशरद्विजयतेतरामित्यत्रोपमारूपकयोःसा
धकस्यवाधकस्यचाभावात्संकरालंकारस्वीकर्तृनयेनतदुभयसंशयात्मकएकदेशविवर्त्तिसंकरालंकार २७१
एव॥तदस्वीकर्तृनयेचयदोपमितसमासस्फूर्त्तिस्तदैकदेशविवर्त्तिन्युपमाविशेषणसमासस्फूर्तौतथाविधमे

वरूपकमितिप्रथमयोजनेयेवात्रकृतार्थावगतौद्वितीययोजनायाःपरिस्फूर्त्तिरब्जानीवनयनानी फुल्ला–
त्युपमागर्भायांवैयर्थ्यादनुत्थानमेव॥यदातुशरद्वर्षासखीत्वभादितिचतुर्थचरणंनिर्मीयते॥तदातुशरन्मात्र
वृत्तेर्वर्षासखीत्वस्योपादानादब्जचंद्रिकाहंसप्रधानस्योपमितसमासस्यावश्यकत्वात्प्रथमप्रादुर्भूतयानयन
हासहाराक्षिप्तकामिनीरूपोपमानिकयातएवैकदेशविवर्त्तिन्योपमयैवनिर्वाहइतिनिर्वेदितमपिनसहृदय
प्रीतयेपुनर्निवेदितं॥अथोपमृद्दशारदाशशांकेप्रावृड्ययौशांततडित्कटाक्षा॥कासांनसौभाग्यगुणांगनानां
नष्टःपरिभ्रष्टपयोधराणामितिकस्यचित्पद्येप्रावृषएकदेशविवर्त्तिरूपकेणांगनात्वसिद्धिरितिनोत्तरार्द्धगतार्थां
तरन्यासानुपपत्तिः॥प्रथमचरणेतूपमृद्दनसाम्यादस्तुनामसमासोक्तिः॥यत्तुकुवलयानंदसारस्याद्यपरसमासो

र॰गं॰ न्निर्दिश्यते ॥ यथा ॥ पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहां ॥ बहोर्दृ
२७२ ष्टं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ अत्र वनवर्णने प्रस्तुते तत्सारू
प्यात्कुटुंबिषु धनसंतानादिसमृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रा[?]मनगरादेर्वृत्तांतः प्रतीय
त इत्यनेकेन दर्शितं ॥ समासोक्तिजीवातोर्विशेषणसाम्यस्यात्राभावेन समासोक्तिताया एवानुपपत्तेः ॥ ननु
सा– विशेषणसाम्यात्सादृश्याद्वा यत्राप्रस्तुतव्यवहारः प्रस्तुतेन व्यज्यते स समासोक्तिरिति लक्षणं निर्मायतदुक्तिवा
च्यं ॥ समासोक्तौ हि प्रकृतवृत्तांतो ऽप्रकृतवृत्तांताभेदेन स्फुरतीति सर्वसंमतं ॥ त्वयापि च प्रकृतधर्मिण्यप्रकृत २७२
व्यवहार आरोप्यत इत्युक्तं ॥ एवं स्थिते न ह्यत्र स्रोतोवृक्षादिविपर्यासो धनसंतानविपर्यासाद्यभेदेन प्रती

यते ॥ नापि वनादौ धनसंतानविपर्यासवत्त्वं समासोक्त्यंतरात्तस्यापि वैलक्षण्ये यद्यसौ समासोक्तिरिति
शपथः क्रियते तदा अलंकारांतरमपि समासोक्तिकुक्षावेव निक्षिप्यतां ॥ एवं तर्हि पुरा यत्र स्रोतः पुलिनमधु
ना तत्र सरितामित्यत्र कोऽलंकारः ॥ अप्रकृतेन वाच्येन प्रकृतव्यवहाराभिव्यक्तिरूपाया अप्रस्तुतप्रशंसाया
असंभवात्प्रकृतस्यैव वाच्यत्वादिति चेत् ॥ साधु पृष्टमायुष्मता ॥ समाधानमस्य सप्रपंचं प्रस्तुतप्रशंसा म–
प्रकरण एव निवेदयिष्यामः ॥ इति किं चालंकारसर्वस्वकृता सादृश्यगर्भविशेषणोच्छापितासादृश्यमूला स
मासोक्तिरित्युक्तं ॥ न हि अत्र विशेषणसाम्यसत्वादुक्तिसंभवो व्यक्तिन्त्वदुक्तायामिति मूलग्रंथानवबोधकृत
हिरोधो वा स्फुटमेवेति दिक् ॥ सेयं लौकिके व्यवहारे लौकिकस्य व्यवहारस्य शास्त्रीये शास्त्रीयस्यारोपे

आ-

र॰गं॰ णतद्विपर्ययेणचचतुर्थी॥तत्राद्या ॥ ॥भिहितैव॥द्वितीयायथा॥गुणवृद्धी परेयस्मिन्नेवस्तःप्रत्ययात्मके
२७३ द- ॥बुधेषुसदितिख्यातंतंब्रह्मसमुपास्महे॥अत्रवेदांतशास्त्रसिद्धव्यवहारेव्याकरणसिद्धस्यशास्त्रान्त ज-
व्यवहारस्य॥लौकिकेशास्त्रीयस्ययथा॥परार्थव्यासंगादुपजहदथस्वार्थपरतामभेदैकत्वंयोवहतिगु
णीभूतेपुसततंस्वभावाद्यस्यातःस्फुरतिललितोदात्तमहिमासमर्थोयोनित्यंसजयतितरांकोपिपुरुषः
॥अत्रसमर्थसूत्रगतमहाभाष्यार्थस्यतत्रहि ॥ अथयेवृत्तिंवर्त्तयंतिकिंतआहुरित्यादिनाजहत्स्वार्थावृत्ति
रजहत्स्वार्थावृत्तिरितिपक्षद्वयंनिरूपितं॥तत्रैवचउपसर्जनार्थंअभेदैकत्वसंख्यापिध्वनितांप्रकटीकृता २७३
चहारिणा॥यथोपधिरसाःसर्वेमधुन्याहितशक्तयः॥अविभागेनवर्त्तंतेतांसंख्यांतादृशींविदुरिति॥—

सामर्थ्यमप्येकार्थीभाववोधकतारूपंतत्रैवोक्तं॥शास्त्रीयेलौकिकस्ययथा॥कृत्वासूत्रैःस्फुटार्थैःप्रकृतिःप्रत्ययं
परं॥आगमान्भावयन्भातिवैयाकरणपुंगवः॥अत्रराजव्यवहारस्य॥~~एवंशास्त्रे~~नरेपुवकृयानुगुण्येनस्थि इयं नालंकारः-।
ता॥यथा॥स्थितेपिसूर्येपद्मिन्यावर्त्ततेमधुपैःसह॥अस्तंगतेतुस्मृतरौस्त्रीणांकःप्रत्ययोभुवि॥अत्रसमर्थ
त्वेनस्थितार्थंनिरन्यासानुगुण्यमाधत्ते॥उत्तमानामपिस्त्रीणांविश्वासोनैवविद्यते॥राजप्रियाःकैरविण्योरमं
तेमधुपैःसह॥इहसमर्थकत्वेन॥व्यागुंजन्मधुकरपुंजमंजुगीतामाकर्ण्यस्तुतिमुदयत्रपातिरेकात्॥आभूमी
तलनतकंधराणिमन्येरण्येस्मिन्नवनिरुहांकुटुंबकानि॥अत्रद्विपरकृतनिजस्तुत्याकर्णनेकंधरानमनादि न-
विशेषणसाम्याथापितयासमासोक्त्यासंज्ञनेव्यवहारभिन्नतयास्थितएवतरुव्यवहारेशृंगारवासंबंधा

र०गं० भेदाध्यवसितमस्तकमूलनमननिमित्तोत्थापितात्रपारूपहेतूत्प्रेक्षासंभवति।।अन्यथाकिंतवकृतग्रीवानम
२७४ नस्यापित्रपोत्थापकताप्रतीतेरित्युत्प्रेक्षानुगुणासमासोक्तिः।।एवंराज्याभिषेकमाज्ञायशंबरासुरवैरिणः।।
सुधाभिर्जगतीमध्यंलिंपतीवसुधाकरइत्यत्रापिस्वामिसेवकव्यवहारमूलासुधालेपनोत्प्रेक्षा।।अमुष्यंवदि
ष्टा।अचेतनव्यवहारेप्रकृतेचेतनव्यवहारसंबंधिस्वरूपहेतुफलोत्प्रेक्षायांचेतनव्यवहारेप्रकृतेचाचेतनव्य
वहारसंबंधिस्वरूपहेतुफलोत्प्रेक्षायांचसमासोक्तिरेवमूलं।।इतिरसगंगाधरेसमासोक्तिः।।विशेषणानां
साभिप्रायत्वंपरिकरः।।तच्चप्रकृतार्थोपपादकचमत्कारिव्यंग्यकत्वं।।अतएवास्यहेत्वलंकाराद्वैलक्षण्यं।।तत्र २७४
व्यंग्यस्यानावश्यकत्वादुपपादकताचोपस्कारकनिष्पादकसाधारणी॥व्यंग्यस्यगुणत्वाच्चनध्वनित्वंव्यपदि

श्यते।।यथा।।मंत्रैर्मीलितमौषधैर्मुकुलितंत्रस्तंसुराणांगणैःस्रस्तंसांद्रसुधारसैर्विदलितंगारुत्मतैर्ग्रावभिः
।।वीचिक्षालितकालियाहितपदेस्वर्लोककल्लोलिनित्वंतापंतिरयाधुनाममभवव्यालावलीढात्मनः।।अत्रात्म
नोभागीरथीकर्तृकस्यभवव्यालदंशजनिततापदूरीकरणस्याशंसनंहिवाक्यार्थस्तत्रभगवत्याभवतापनाशि
कात्वस्यसुप्रसिद्धत्वात्परिणामेनभवरूपविषयतादात्म्यापत्त्याव्यालजनितसंतापनाशिकात्वंतावत्सूपपा
दमेव।।सुधास्तुजंगमसंभूतविषघ्नंश्येनमदइत्याद्यागमबलाच्चविषयतादात्म्यंविनापिभुजगव्यालजनितसंताप
नाशिकात्वमपरत्वाभावसिद्धमेव।।एवंवाच्यार्थस्यसत्यामपिनिष्पत्तौसादृश्यविशेषाधानायसाकूतंविशेषणं
वीचिक्षालितेत्यादि।।अत्रनाम्नांतस्यरसत्वेपिकालियाहितशब्दोपादानसामर्थ्यात्तयाभगवतश्चरणफणाग

२०गं० पन्नत्यनिःसारीकृतकालियेनलोकोत्तरविषहरणशक्तिरुत्पत्तिसिद्धैवासीत्साचतयोर्वीचिभिःक्षालनाद्गंगा
२७९ यांस्वाश्रयरेणुद्वारासंक्रांतेतिगम्यते।।नचशंक्यःपूर्वमेवक्षालनात्कथंचरणेनावक्रांतकालियस्यविषहरणंश
क्तिरहितेनसंभवतीतिवाच्यं।।क्षालितावशिष्टालेशरूपाशक्तिश्चरणकांतिस्थितासीद्ययासंप्रतिकालियस्य
व्या-| विषमहारीत्यनुकृतानुगतमेवेतिनानुपपत्तिः।।एवंद्वितीयाच्योपस्कारकत्वयात्रगुणीभावोनवाच्यःसिध्यंग
त्वात्।।यथावा।।मदकामुकविमोहमत्सरादिपवस्तुपुरएवनावकं।।धृतशार्ङ्गगदारिनंदकप्रतिकंपनेनिकुथं
नवीक्षसे।।अत्राप्युपेक्षानौचित्यस्यनावकत्वाद्भगवतिपादितेनस्वामिभक्त्याभावनेनैवनिष्पन्नशरीरस्यात्रकर्षकं २७८
स्य-| धृतशार्ङ्गेत्यादिविशेषणममोघशस्त्रास्त्रसंपन्नैःसमक्षमेवरिपुभिःकथ्यमानापदासमुपेक्ष्यमाणस्याकीर्ति क्ष-|

§ for 'पुषपादकं' A. has धायकं |

र्भविशीतवेत्याकूतगर्भं।।ननुनिष्प्रयोजनविशेषणापार्थंपुरार्थदोषस्योक्तत्वात्सप्रयोजनविशेषणंदो
पाभावमात्रंकथंत्वाद्यभाववद्भवितुमर्हतीतिनत्वलंकारइति।।अत्रविमर्शिनीकारादयआहुः।।विशेषणानांबहु
त्वमत्रविवक्षितंनसाभिप्रायविशेषणगतंबहुत्वंकृतएवचात्रवैचित्र्यातिशयः।।एकविशेषणंतुदोषाभावमा
त्रस्यावकाशइतिनदसत्।।विशेषणानेकत्वंहिव्यंग्याधिक्याद्युपस्कृत्वात्वैचित्र्यविशेषा अस्तुना पादकं§-|सा-
मनतुप्रकृतालंकारशरीरमेवतदितिशक्यंवक्तुं।।वीचिक्षालितकालियाहितपदद्वितिप्रागुक्तेएकस्यैववि
शेषणस्यचमत्कारितायाअनपह्नवनीयत्वात्।।अपिलावण्यजलाशयतस्याहोहंतमाननयनायाः।।दूरस्थल
यिकिंवाकथयामोविस्तरेणालं।।अत्रैकैकविशेषणमात्रेणवसकलवाक्यार्थसंजीवनाच्च।।यत्तुकुवलयानंद

°-धायकं-|

र॰गं॰ कार आह ॥ श्लेषयमकादिषु पुष्टार्थदोषाभावेन तत्रैकस्यापि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिवि
२७६ शेषसद्भावात्परिकरत्वोपपत्तिर्यथा क्षितिभृतैव सदैवनकावयवैनवनाभिवनाकिमहि द्रुहेति गोवर्द्धनपर्वत
विषयके नंदादीन्प्रति भगवद्वाक्ये इति ॥ तदप्यसत् ॥ यो हीनमलंकारं दोषाभावात्तःपातिनयालंकारमध्या हे-
द्बहिर्भावयति स किं त्वदुक्तश्लेषयमकादिशब्दचित्रातिरिक्तस्थले साभिप्रायविशेषणेषु विच्छित्तिविशेषम
न्यतेन न वा ॥ आद्ये दोषाभावमात्रेणाविच्छित्तिविशेषस्यालंकारप्रयोजकस्यालंकारमंतरेणानिष्पत्तेः सिद्धं सर्व
र- त्रपरिकरस्यालंकारत्वं ॥ द्वितीये त्वत्रैव यमकादिष्वपि विच्छित्तिविशेषो नास्तीति तेन न स एव तत्त्वात् ॥ तथाहि ॥ अ २७६
नापदि विना मार्गमनिशायामतातुरः ॥ मृत्तिकाशौचहीनस्तु नरो भवति किल्बिषी ॥ अत्र पर्युदस्तेष्वापत्कालादौ

यथा केनचिन्मृत्तिकाशौचादि क्रियमाणं न केनापि प्रतिषिध्यते कर्तुः सामर्थ्यगमकं च भवति तथात्रैकत्वेनापि दोष
निषेधविधौ पर्युदस्तेष्वपि यमकादौ पुष्ट[illegible]तारूपदोषाभावः कविना संपाद्यमानो न दोषाय भविष्यत्यपि तु रसपो
षायैवेति यदि त्वयमके नुभवं विच्छित्तिविशेषं प्रमाणयसे ब्रूहि तदान्यत्रापि तमेव प्रमाणमिति यमकपर्यन्तानुधाव
नं निरर्थकमेव तस्मात्पुष्टार्थतारूपेण दोषाभावेन सह परिकरालंकारस्याविशेषयविभागाद्दुःशक इति त्रास्ते (यं)
र- क्रमः ॥ रुद्रटस्त्वसत्युपस्कारकत्वमलंकारत्वं च मलापकर्षकाभावत्वं च दोषाभावत्वं तदेतद्द्वयं विविक्तवि
षयं यदि द्वयोरेकस्मिन् विषये विशेषे समावेशस्तदा का हानिः स्याद्रूपधेयसंकरेष्वपाध्यसंकरात् ॥ यथा ब्राह्म
णस्य मूर्खत्वं दोषो विद्यात्तु दोषाभावश्च भवति गुणश्च तथैवाप्युपपत्तिः ॥ न च दोषाभावतयात्रास्तस्यापि परिकर

र॰गं॰ स्य किमित्यलंकारेषु गणनागौरवमिति वाच्यं।। उभयात्मकत्वेनेतरवैलक्षण्यज्ञापनार्थं तया गणनोपपत्तेः॥ य
२७७ था गुणीभूतव्यंग्यभेदतया संगृहीतापि समासोक्तिरलंकारगणनायां पुनर्गण्यते।। यथा वा प्रासादवासिषु ग
थे- रिणीष्वप्युभयवासिनीषु वासिगणनायां पुनर्गण्यते तद्वदिहापीति न कश्चिद्दोषः। अन्यथा प्राचां काव्यलिंगमप्यलंका
रो न स्यात्तस्यापि निर्दिष्टनुरूपदीपकभावात्मकत्वात्।। द्विजराजकलाधारि विश्वतापनिवारण। कथं मामबलां क्रू
रैः करैर्दहसि निर्दय।। इत्यादौ विशेषणाधिक्याद्व्यंग्याधिक्यं चमत्काराधिक्यं।। अयं च वाच्यसिद्ध्यंगव्यंग्य
गर्भत्वेनोपस्कारकव्यंग्यगर्भत्वेन द्विधा भवन्व्यंग्यस्य वाच्यायमानत्वतद्विपर्ययाभ्यां चतुर्धा।। आद्यो यथा।। २७७
विहाय संसारमहामरुस्थलीमलीकदेहादिमिलन्मरीचिकां। कृपातरंगाकुलमन्मनो मृगो विगाढुमीशस्त्व

यि गाढमीहते।। अत्र गाहनसिद्ध्यंगं कृपेत्यादेः समुद्ररूपं व्यंग्यं वाच्यायमानं।। द्वितीयं यथा। खर्वीकृतेंद्र
गर्वत्वरया चक्रेण भिन्नक्रमुखकेलीला नकोऽलमूर्तेर्मामुत्तुंकथं न शक्नोषि।। अत्र गोवर्द्धनगजेंद्रयसंदूरा क द्रन क्र
रणमुदारो वाच्यता स्पृष्टश्चैत्र एवोपालंभसिद्ध्यंगं।। तृतीयस्तु धृतशार्ङ्गगदारिनंदके इत्यत्र।। चतुर्थो वीचिक्षालि
तकालियाहितपदे इत्यत्र च बोध्यः।। ।।इति रसगंगाधरे परिकरालंकारः।। ।।अथ श्लेषः।। ।।श्रुत्या ए
कया अनेकार्थप्रतिपादनं श्लेषः तच्च द्विधा अनेकधर्मपुरस्कारेणैकधर्मपुरस्कारेण च।। आद्यो द्विधा अनेक
शब्दप्रतिभानद्वारा एकशब्दप्रतिभानद्वारा चेति त्रिविधः श्लेषः।। तत्राद्यः सभंगः द्वितीयो ह्यभंग इति वदंति
।।तृतीयस्तु शुद्धः।। एवं त्रिविधोप्ययं प्रकृतमात्राप्रकृतमात्रप्रकृताप्रकृतोभयाश्रितत्वेन पुनस्त्रिविधः।। अत्राद्य

र॰ गं॰ भेदेद्वितीयेचविशेष्यस्याश्लिष्टतायांकामचारः तृतीयभेदेतुविशेषणवाचकस्यैवश्लिष्टत्वंनविशेष्यवाचकस्यतथा श्लि

२ ७९ त्वेतुशब्दशक्तिमूलध्वनेरुच्छेद एवस्यात्॥ विशेषणमात्रश्लिष्टतायामपिप्रकृताप्रकृतधर्मिणोरुपादानएवश्ले

षः॥ प्रकृतधर्मिमात्रस्योपादानेतुसमासोक्तेरेवविषयः॥ तदित्थंप्रकृतमात्रविशेष्यकानेकार्थविशेषणयत्रस

एकः एवमप्रकृतेत्यादि द्वितीयः॥ पृथगुपात्तप्रकृताप्रकृतोभयविशेष्यकनानार्थविशेषणःतृतीयएतदन्य

तमत्वंचलक्षणंपर्यवसितं॥ क्रमेणोदाहरणं॥ संभूत्यर्थंसकलजगतोविष्णुनाभिप्रपन्नंयन्नालंसत्रिभुवन

गुरुर्वेदनाथोविरंचिः॥ ध्येयंधन्यालिभिरनिनतरां स्वप्रकाशस्वरूपंपद्माख्यंतत्किमपिललितंवस्तुवस्तुस्त्वयेस्तु

ग- ॥ अत्राशीःप्रकरणेतुष्टिजननसमर्थत्वेनलक्ष्मीभर्तृब्रह्माभिकमलयोरुभयोरपिप्रकृतत्वात्प्रकृतमात्राश्रितोयमेक

BHAU DAJI MEMORIAL

याश्रुत्यापदद्वयप्रतिभानद्वाराभिन्नधर्मपुरस्कारेणानेकार्थप्रतिपादनात्सभंगः॥ विशेष्ययोरश्लिष्टत्वेप्ययंसं श्लि-

भवति॥ यथानैवपायादाद्यंकमलमथवायोगमायास्वरूपंइतितुरीयचरणनिर्माणे॥ अयमेवाभंगात्मको

यथा॥ करकलितवक्रघटनोनित्यंपीतांबरस्तमोरातिः॥ निजसेविजाड्यनाशनचतुरोहरिरस्तुभूतयेभवतां

॥ विशेष्ययोरश्लिष्टत्वेयंयथोदाहरणे विष्णुः सूर्यश्चवः पात्विनितनस्यैवशेषेपेकृते। अत्रचार्जुनगुरुत्वपरमपु

ग-/ रुषत्वगुंजापुंजधरत्वमायामनुजत्वादिनागोपकिरातवेषयोर्भवतोर्हरिहरयोःप्रतिपादनात्लक्षणसमन्वयः २

अर्थश्लेषोयथा॥ अर्जुनस्यगुरुर्मायामनुजःपरमःपुमान्॥ गुंजापुंजधरःपायादपायादिहकोपिवः एवमेते

त्रयोपिप्रकृतविषयाएवभेदाः॥ हरिकरसंगादधिकंरमणीयाप्यतुलरागसंवलिता॥ सुंदरिनववदनागतं

र॰ गं॰ कमलाभाविगलितप्रतिभा॥ अयमप्रकृतमात्रविशेषणः॥ प्रकृतस्याननस्यश्लेषाविषयत्वात्॥ कमलाभेतिविशे
२७१ ष्यांशे अधिकमितिविशेषणांशेव्वसभंगः अन्यत्राभंगः पृथगुदाहरणानिगौरवभयान्नोक्तानि॥ अप्रकृतयोर्विशे
ष्ययोरश्लिष्टत्वेयथा॥ अत्रैवकमलायाः कमलस्यचशोभागलितातवाननस्याग्रेइत्युत्तरार्धनिर्माणे॥ प्रकृता
प्रकृतोभयविषयोयथा॥ अलंहिमानीपरिदीर्णगात्रःसमापितःफाल्गुनसंगमेन॥ अत्यंतकामोक्षितकृष्णव
र्माभीष्मोमहात्माजनिमाघतुल्यः॥ अत्रप्रकृताप्रकृतयोर्भीष्ममाघयोरश्लिष्टत्वाद्विशेषणानांचश्लिष्टत्वाद्वितीय व—|
तीयोभेदः॥ परंतूपमयासंकीर्णःयदिवमाघोमहात्माजनिहंतभीष्मइत्यप्रकृतांशमपिश्लेषगम्यंकृत्वारूपकं २७१
क्रियतेतथापिप्रकृतविशेष्यस्यमाघस्याश्लिष्टत्वादखंडितएवश्लेषः॥ नचात्रसमासोक्तिरितिभ्रमितव्यं॥ अप्रकृ

न—| तधर्मिणोपिशब्दवाच्यत्वात्॥ यत्रतु अप्रकृतव्यवहारएवशब्दशक्तिसंहतापिनतुप्रकृतधर्मीतत्रसमासोक्तिरिष्टः
॥ अत्रविचार्यते॥ अयंचालंकारःप्रायेणालंकारांतरस्यविषयमभिनिविशतेतत्रकिमस्यबाधकत्वंस्यादाहोस्वि
त्संकीर्णत्वमुताहोस्विद्बाध्यत्वमिति॥ अत्राहुरुद्भटाचार्याः॥ येननाप्राप्तेयआरभ्यतेसतस्यबाधकइतिन्यायेनालंका १६६ श्लोकविधिः
रांतरविषयएवायमारभ्यमाणोलंकारांतरंबाधतेनचास्यविविक्तःकश्चिदस्तिविषयोयत्रसावकाशोनान्यंबाधे
त॥ तथाहि अप्रकृतमात्रयोःप्रकृतमात्रयोर्वातावत्तुल्ययोगितैवजागर्तिप्रकृताप्रकृतयोस्तुदीपकंतदनुमोदि
तागमादयश्चनचंदनत्वमेवपातालमाशानांत्वंनिबंधनं॥ त्वंचारमेमरुद्भूमिरेकोलोकत्रयात्मकइत्यादिःकाव्य त्र—|
प्रकाशोक्तोविविक्तविषयइतिवाच्यं॥ रूपकस्यैवात्रस्फुटत्वात्श्लेषोपस्थापितपातालाद्यर्थस्याभेदारोपमंतरेण

र॰ गं॰ कमलाभाविगलितप्रतिभा ॥ अयमप्रकृतमात्रविशेषणस्य ॥ प्रकृतस्याननस्यश्लेषाविषयत्वात् ॥ कमलाभेतिविशे
२७१ ष्यांशे अधिकमितिविशेषणांशेवसभंगः अन्यत्राभंगः पृथगुदाहरणानिगौरवभयान्नोक्तानि ॥ अप्रकृतयोर्विशे
ष्ययोरश्लिष्टत्वेयथा ॥ भ्रश्रैवकमलायाः कमलस्यचशोभागलितानवाननस्याग्रेइत्युत्तरार्धनिर्माणे ॥ प्रकृता
प्रकृतोभयविषयोयथा ॥ अलंहिमानीपरिदीर्णगात्रः समापितः फाल्गुनसंगमेन ॥ अत्यंतकामोक्षितकृष्णव
र्माभीष्मोमहात्माजनिमाघतुल्यः ॥ अत्रप्रकृताप्रकृतयोर्भीष्ममाघयोरश्लिष्टत्वाद्विशेषणानांचश्लिष्टत्वादृतीत्द व-
तीयोभेदः ॥ परंतूपमायासंकीर्णःयदिचमाघोमहात्माजनिहंतभीष्मइत्यप्रकृतांशमपिश्लेषमसंकल्पारूपकं २७१
क्रियतेतथापिप्रकृतविशेष्यस्यमाघस्याश्लिष्टत्वादखंडितएवश्लेषः ॥ नचात्रसमासोक्तिरितिभ्रमितव्यं ॥ अप्रक

त- तधर्मिणोपिशब्दवाच्यत्वात् ॥ यत्रतुअप्रकृतव्यवहारएवशब्दशक्तिसंहतापिनर्त्वप्रकृतधर्मीतत्रसमासोक्तिरिष्टः
॥ अत्रविचार्यते ॥ अयंचालंकारः प्रायेणालंकारांतरस्यविषयमभिनिविशतेतत्रकिमस्यबाधकत्वंस्यादाहोस्वि
त्संकीर्णत्वमुताहोबाध्यत्वमिति ॥ अत्राऽऽहुरुद्भटाचार्याः ॥ येननाप्राप्तेयआरभ्यतेसतस्यबाधकइतिन्यायेनालंका १ हेध्योविधिः
रांतरविषयएवायमारभ्यमाणोलंकारांतरंबाधतेनचास्यविविक्तः कश्चिदस्तिविषयोयत्रसावकाशोनान्यंबाधे
त ॥ तथाहिअप्रकृतमात्रयोः प्रकृतमात्रयोर्वातावत्तुल्ययोगितैवजागर्त्तिप्रकृताप्रकृतयोस्तद्दीपकंतदनुमोदि
ताउपमादयश्चनचदेवत्वमेवपातालमाशानांत्वंनिबंधनं ॥ त्वंचारमेमरुद्भूमिरेकोलोकत्रयात्मकइत्यादिः काव्य त्र-
प्रकाशोक्तोविविक्तविषयइतिवाच्यं ॥ रूपकस्यैवात्रस्फुटत्वात्श्लेषोपस्थापितपातालाद्यर्थस्याभेदारोपमंतरेण

र॰गं॰ लोकत्रयात्मकत्वस्यदुरुपपादत्वात्॥कथंतर्हिनदीनांसंपदंबिभ्रद्राजायंसागरोयथाइत्यादावुपमायाःप्रत्ययः
२८॰ कथंवातत्रैवयथाशब्दस्थानेकिमुशब्ददानेउत्प्रेक्षायाः॥अपरइतिकृतेचरूपकस्येतिचेन्न॥अत्रहिउपमादीनां
प्रतिभानमात्रंनतुवास्तवीस्थितिः॥नहिमधुस्येनश्रुत्कोरजनत्वंप्रतीयमानमपिवस्तुनो[illegible]॥तस्मादुपमादिप्रति ऽस्ति
भोत्पत्तिहेतुःश्लेष[illegible]एवस्वविषयेसर्वत्रालंकारइति॥एतच्चापरेनक्षमंते॥तथाहियत्तावदुच्यतेयेननाप्रात्तद
त्यादितत्रप्रागुदाहृतेपद्यारव्यत्किमपिललितमित्यस्मत्पद्येसर्वदोमाधवःपातुयोगंगांसमदीधरदित्यादिप
र्कायपद्येचश्लेषातिरिक्तःकोऽलंकारःतुल्ययोगितानुसादृश्यप्रत्ययनियतताकथमत्रशक्यतेवक्तुं॥नहिलक्ष्मी २८॰
कमलयोर्हरिहरयोर्वाप्रकृतेसादृश्यंप्रति§पादितं॥नापिचात्रैकश्रुत्यार्थद्वयोपादानंविनान्यत्किंचित्चमत्कार

§ for this B has पिपादयिषितम्।

जनकं[illegible]येनालंकारांतरमभ्युपगच्छेम॥एकश्रुत्यार्थद्वयोपादानंतुश्लेषएव॥एवंचसावकाशत्वात्श्लेषस्यालंका
रांतरापवादकत्वंनयुक्तं॥अतएवोपमादीनांप्रतिभानमात्रमितियदुक्तंतदपिनसंगतंगुणक्रियादेरिवशब्दमात्र
स्यापिसमानधर्मत्वेनोपमायांतावद्बाधकाभावात्एवमेवालंकारांतरस्यापिश्लेषविषयेपारमार्थिक्येवसत्तानप्रा
तिभासिकी॥प्रत्युतश्लेषस्यैवप्रतिभानमात्रमितिवक्तुंयुक्तंपूर्णोपमाविषयस्यसर्वस्यापित्रिविधश्लेषेणाक्रांतत्वाच्चि
रवकाशायानयास्यसावकाशस्यस्वविषयेबाधौचित्यात्॥तथासमरार्चितोप्यमरार्चितइत्यादौश्लेषस्यनैमित्तिक
चंद्रद्वयवत्प्रतिभानमात्रमेवनतुअलंकारत्वं॥तज्जीवातोर्द्वितीयार्थस्याप्रतिष्ठानात्तविरोधस्येवाभासरूपस्या
प्यलंकारत्वंनतुश्लेषस्येतिस्फुटमेव॥तस्मादेवमादौश्लेषप्रतिभयोत्पाद्योविरोधएवालंकारोनतुविरोधप्रतिभया

र॰गं॰ उत्पाद्यः श्लेषः॥ किंच प्रत्येकं तत्तद्रूपपुरस्कारेण कस्याप्यलंकारस्या नास्ति श्लेषविषये नाप्राप्तत्वं अलंकारांतरत्व
२८१ पुरस्कारेणेति चेत्॥ एवं तर्हि बाध्यसामान्यचिंतयास्वविषये प्राप्तस्य सर्वस्यापि बाधापत्तौ श्लिष्टपरंपरितरूपकस्य
श्लिष्टसमासोक्त्यादेरुच्छेद एव स्यात्॥ तस्माच्छ्लेषस्य नापवादकत्वं संकीर्णत्वं तु स्यादिति॥ अन्ये तु अलंकारा हि प्रा
धान्येन चमत्काराधायकाः स्वां स्वामाख्यां लभंते त एव परोपकारकतया वर्त्तमानास्तां त्यजंति॥ यथा॥ रराज
भृंगीमो वदनं मृगाक्ष्या नभो विभागे हरिणांकबिंबमित्यत्र प्रकृताप्रकृतात्मनामेकधर्मसंबंधो दीपकाख्यां भजते रव्यां—
त्यजति च राजते वदनं तव्यानभसीव निशाकर इत्यत्र॥ अत एवोच्यते प्राधान्येन व्यपदेशा भवंतीति॥ एवं चालं २८१
कारांतरोपकारकतया स्थितः श्लेषः कथं कारस्यगरहरुद्रव श्लेषालंकारव्यपदेशं वोढुमिच्छामीति बाध्यप्राय एवे मीष्टामिति B better.

स्य प्याहुः॥ तदित्थं संक्षेपेण श्लेषस्य दिक्प्रदर्शिता॥ यत्र तु प्रकृताप्रकृतोभयविशेष्ययोरपि श्लिष्टपदोपात्तत्वं स
तु ध्वनेर्विषय इत्युक्तं॥ स च यथा॥ अविरलविगलद्दानोदकधारासारसिक्तधरणिनरः॥ धनदाग्रमहितमू
र्त्तिर्जयति तरां सार्वभौमोयं॥ अत्र राजनि प्रस्तुते उद्दिग्गजे प्रस्तुतोपि व्यंजनमर्यादया प्रतीयते तत्राप्रस्तुताभि
दि धानं माप्रसांक्षीत् इति प्रस्तुताप्रस्तुतयोरुपमानोपमेयभावे तात्पर्यं कल्प्यते॥ इमं च शब्दशक्तिमूलानुरणनरूपं
ध्वनिमाहुः॥ उदाहृतश्च ध्वनिकारैः॥ उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः॥ पयोधरभरस्तस्याः कं न चक्रेभि
लाषिणं॥ मम्मटभट्टैश्च॥ भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रह[illegible]॥ यस्यानुपप्लु
तगतेः परवारणस्य दानांबुसेकसुभगः सततं करोभूत्॥ कुवलयानंदकारस्तु॥ यदत्र प्रकृताप्रकृतश्लेषोदाहृ

२०गं० रणेशब्दशक्तिमूलध्वनिमिच्छंतिप्राञ्चः॥ननुप्रकृताभिधानमूलस्यउपमादेरलंकारस्यव्यंग्यत्वाभिप्रायंनत्वप्र र-|
२९२ कृतार्थस्यैवव्यंग्यत्वाभिप्रायं॥अप्रकृतार्थस्यापिशक्त्याप्रतिपाद्यस्याभिधायाअवश्यंभावेनव्यक्त्यनपेक्षत्वात्॥
यद्यपिप्रकृतार्थेप्रकरणवशाज्झटितिबुद्धिस्थितेसस्यैवपश्चान्नृपतिमात्युधनादिवाचिनांराजकरादिपदाना
मन्योन्यसंनिधानबलात्तद्विषयशक्त्यैतरोन्मेषपूर्वकमप्रकृतार्थःस्फुरनावतानस्यव्यंग्यत्वं॥शक्त्याप्रति रे तू न ए-|
पाद्यमानेसर्वथैवव्यक्त्यनपेक्षणात्॥पर्यवसितेप्रकृतार्थाभिधानेस्फुरतिचेत्कामंगूढश्लेषोस्तुअचान्यत्रापि स्ति न
गूढःश्लेषः॥यथा॥अयमतिजरठाःप्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाः २९२
परिणतदिक्करिकास्तटीर्बिभर्ति॥अत्रहिसमासोक्त्युदाहरणेवृद्धवेश्यावृत्तांतःप्रतीयते॥नत्रांगश्लेषइति

सर्वेषामभिमतं॥एवंचाप्रकृतार्थोनव्यंग्यइत्याह॥तत्रविचारयामः॥यत्तावदुच्यतेउपमादेरलंकारस्यैवव्यं
ग्यत्वंप्राचीनानामभिप्रेतंनत्वप्रकृतार्थस्येति॥एवंसत्यनेकार्थस्यशब्दस्यवाचकत्वेनियंत्रिते॥संयोगाद्यैर
वाच्यार्थधीकृद्व्यापृतिरंजनमित्यादि[illegible]तेषांग्रंथःकथमायुष्मतासमर्थितः॥उपमादेर्व्यंग्यत्वस्यवाचकतानि B. omits.
यंत्रणानपेक्षत्वात्॥नह्यनेकार्थस्यापिशब्दस्योपमादिवाचकत्वंप्रसक्तंयेनतन्नियंत्रणायसंयोगाद्यनुसरणम
र्थवत्स्यात्॥द्वितीयार्थवाचकतायामनियंत्रितायामप्युपमादेर्व्यंग्यत्वस्यनिरूढत्वात्॥तस्मात्ग्रंथानाक
लननिबंधनंतदभिप्रायवर्णनमितिस्फुटमेव॥यदप्युच्यते॥अप्रकृतार्थस्यापिशक्त्याप्रतिपाद्यस्येत्यादि॥न
प्रकथमप्रकृतार्थस्यशक्त्याप्रतिपादनंतद्विषयशक्तेर्नियंत्रणस्यतैरेवोक्तत्वात्॥अथनियंत्रणंनामप्रथमंवा

र०गं० धाजननमात्रंननुचरममपि॥एवंचप्रकृतशक्त्याप्रकृतार्थबोधेजातेसत्यैकृतार्थयाद्वितीयशक्त्याप्रकृतेनरा
२८३ र्थबोधेनकिंचिद्बाधकमितिचेन्नप्रथमंह्यप्रकृतार्थबोधस्याजननमेवकस्यहेतोःप्रकरणादिज्ञानेनप्रतिबं
धादितिचेत्प्रकृतार्थबोधोत्तरंसाप्रतिबंधकताकेनापतुनाप्रकरणादिज्ञानस्य॥नचज्ञानस्याशुविनाशित्वा हे
त्तदानींप्रकरणज्ञानमेवनष्टमितिवाच्यं॥ज्ञानांतरस्योत्पत्तौबाधकाभावात्॥सेवज्ञानव्यक्तिःप्रतिबंधिके
र तिनुतत्तद्व्यक्तिसहस्रगतप्रतिबंधकत्वसहस्रकल्पनागौरवमस्तमेव॥तदपेक्षयान्यत्रक्लृप्तव्यंजनाख्यव्यापार
स्यैवकल्पयितुंयुक्तत्वात्॥जैमिनीयमलंधत्तेरसनायांमिहामतिरित्यादौबाधितार्थबोधस्यशक्त्यादुरुपपा २८३
दत्वाच्च॥यदितुयथाकथंचिदुपपत्तिःस्यादेवमपितस्यदेवदत्तादौतत्पुत्रवाक्यादप्रादुर्भावस्तच्छालकाद्यप्रा

भान

श्च

द सकवाक्यात्प्रादुर्भावश्चनस्यात्॥वक्तृबोद्धव्यादिविशिष्टस्यस्यव्यंग्यप्रतीतिमात्रहेतुत्वादितिप्राचामाशयस्तत्र
किमुच्यतेअत्रप्रकृतार्थस्यशक्त्याप्रतिपादनमिति॥यत्राप्युच्यते॥अयमतिजरठाइत्यादिसमासोक्ताविवगूढ
श्लेषास्त्वितितदपिगर्भस्रावेणगलितं॥श्लिष्टविशेषणायांसमासोक्तावपिप्रकृतार्थप्रतीतिस्वीकारादत एवध्व ब्यस्यैवा
निकृताागुणीभूतव्यंग्यभेदस्समासोक्तिरित्युक्तं॥समासोक्त्याश्लेषोबाध्यतइत्युद्भटप्रभृतिभिश्च॥बाधोहिश्ले
षस्यत्रोक्तप्रयुक्तिमात्रंश्लिष्टशब्दप्रयोगस्तुतत्रोभयार्थतामात्रेणोपपादनीयइतिनकिंचिदेतत्॥वयंतुब्रूमः॥
अनेकार्थस्थलेऽप्रकृताभिधानेशक्तेरुक्तिसंभवोप्यस्तियोगरूढिस्थलेतुसापिदूरापास्तः॥यथा॥चांचल्यभा
गिनयनंनवजलजानांश्रियंहरतु॥विपिनेतिच्चंचलानामपिचमृगाणांकथंनुतोहरति॥अत्रनैवाश्चर्यका

स्ति

र०गं० रीचांचल्यगुणरहितानांकमलानांचांचल्यगुणाधिकेननवलोचनेनशोभायास्तिरस्कार उआश्चर्यकारीतुह
२८४ रिणानांनदृणयुक्तानांतिरस्कारइतिवाच्यार्थपर्यवसन्नेपिरूढिनिर्मुक्तकेवलयोगमर्यादयामूर्खपुत्राणांधन
हरणंनेत्रभिश्चौरैःस[illegible]कंनतुगवेषकानामितिजलजनयनमृगशावेभ्यःप्रतीयमानोर्थःकथंविनाव्यंज
नव्यापारमुपपादयितुंशक्यते॥यतोयोगशक्तेरूढ्यादृढनिगडनियंत्रितायानास्तिस्वातंत्र्यं॥अतएवपंकजा
दिपदेभ्यःपंकजनिकर्तृत्वेनकुमुदशैवालादिबोधोलक्षणयैवतादृशशक्तिज्ञानानांपद्मत्वप्रकारकबोधत्व
स्यैवकार्यतावच्छेदकत्वादित्युक्तंनैयायिकैः॥अतएवईशानोभूतभव्यस्यसएवाद्यसउश्वइतिवेदांतवाक्ये २८४
किमैश्वर्यविशिष्टःकश्चिज्जीवःप्रतिपाद्यईश्वरोवेतिसंशयेप्राप्तेशब्दादेवप्रमितइतिसूत्रितमुत्तरमीमांसाका

रैर्व्यासचरणैः॥तस्मात्प्रागुक्तपद्येप्रकृतचोरव्यवहारोनशक्तिवेद्योपितुव्यक्तिवेद्यएवमुख्यार्थबाधाद्यभावा
ल्लक्ष्योपिनशक्योवक्तुंतात्पर्यार्थबाधस्तुतात्पर्यार्थबोधोत्तरबोध्यः॥सएवतुकथंस्यादितिव्यंजनैवशरणीकर
णीयानहिचोरव्यवहारोत्रवक्तुर्विवक्षितइतिज्ञानेश्रोतुःकश्चिदुपायोस्तिऋतेसहृदयतोन्मिषितादस्माद्व्यापा ऋ
रात्॥इदंपुनरिहावधेयं॥रागाक्तोवल्लुकराभिमृष्टश्यामामुखंचुंबतिचारुचंद्रइत्यादौनावसमासोक्तिरिति
वि निर्वादं॥चंद्रपदस्थानेराजेतिकृतेनुशब्दशक्तिमूलोध्वनिरितिच॥तदत्रोभयत्रापिश्लिष्टविशेषणमाहात्म्याद
प्रकृतव्यवहारस्यप्रतीयमानस्यतुल्यत्वात्कथमेकत्रगुणीभावोन्यत्रचप्राधान्यंस्यात्॥प्रकृतस्यप्राधान्यात्उअ
प्रकृतस्यतुतदुपस्कारकत्वेनोभयत्रापिगुणीभावोचित्यात्॥नहिविशेष्यस्यश्लिष्टतामात्रेणव्यंग्यस्यप्राधान्यम

र॰गं॰ श्लिष्टत्वेन चाप्राधान्यं शक्यं संपादयितुं नायकत्वप्रतीतिरपि क्वचिदर्थशक्तिमूलेन व्यंजनेन क्वचिच्छब्दशक्तिमूले
२८९ न तुल्यैव ॥ यैरपि समासोक्तौ प्रकृतधर्मिणि नायकत्वादेः प्रत्ययो नाभ्युपेयते पि तु नायकादिव्यवहारस्यैव ध्व
नेनाभ्युपेयते तेषामपि व्यंग्यस्यैकत्र गुणत्वमन्यत्र प्राधान्यं च कस्य हेतोः स्यात् ॥ प्रकृताप्रकृतयोरौपम्यं गम्य
मुच्यतामभेदो वा सर्वथैव तस्य प्रकृतोपस्कारकत्वाद्गुणीभाव एवोचितो न प्राधान्यं ॥ अन्यथा समासोक्तावपि
व्यंग्यस्य प्राधान्यापत्तेः ॥ तस्मात् श्लिष्टाश्लिष्टविशेष्या समासोक्तिरेवेयं परांगरूपगुणीभूतव्यंग्यभेद इत्यपि प्र म—
क्यते वक्तुं यदि प्राचीनकुर्युरिति ॥ सोयं श्लेषः सभंगोभंगश्चार्थालंकार एवेत्योद्भटाः ॥ उभावप्येतौ शब्दालंकारौ २८९
शब्दस्य परिवृत्त्यसहत्वादन्वयव्यतिरेकाभ्यां तदाश्रितत्वावधारणात् ॥ तृतीयस्त्वर्थालंकारोर्थमात्राश्रितत्वादिति

मम्मटभट्टाः ॥ अन्वयव्यतिरेकाभ्यां हि हेतुत्वावगमो घटं प्रति दंडादेरिवाश्रुतत्वाश्रयत्वावगमः ॥ स तु पुनस्तद्वृ
त्तित्वज्ञानाधीनः ॥ इह हि सभंगश्लेषस्य शब्दद्वयवृत्तित्वं जतुकाष्ठन्यायेनाभंगस्य चार्थद्वयवृत्तित्वं एकवृंतगतफ
लद्वयवच्च स्फुटमेवेत्येकस्य शब्दालंकारत्वमपरस्यार्थालंकारत्वं ॥ यद्यपि द्वितीयस्यापि प्रतिप्रवृत्तिनिमित्तं शब्दभे
द इति नयं शब्दद्वयवृत्तित्वाच्छब्दालंकारत्वमुचितं ॥ तथापि शब्द[illegible]च्छेदकानुपूर्व्यभेदादभेदाध्यवसानाच्छब्दद्वयवृ कता—
त्तित्वज्ञानं दुःशकं ॥ अन्यथा प्रत्यर्थं शब्दनिवेश इति नये पराभिमतेर्थश्लेषोपि शब्दालंकार एव स्यादित्यलंकारस
र्वस्वकारादयः ॥ अयं चोपमेव स्वतंत्रोपि तत्र तत्र सकलालंकारानुग्राहकतया स्थितः सर्वत्र रस्यत्यानवं नवं सौभा व—
ग्यमावहमानो विधेषु लक्ष्येषु सहृदयैर्विभावनीय इति [redacted] रसगंगाधरे श्लेषप्रकरणं ॥ ॥ अस्तुर्प्रतैर्गम्येन वा न

र॰गं॰ व्यस्याप्रस्तुतस्योपस्करणेसमासोक्तिरुक्ता॥इदानींतद्वैपरीत्येनाप्रस्तुतप्रशंसोच्यते अप्रस्तुतेनव्यवहारेणसादृ
२८६ श्यादिवक्ष्यमाणप्रकारान्यतमप्रकारेणप्रस्तुतव्यवहारो प्रशस्यतेसाप्रस्तुतप्रशंसा॥प्रशंसनंचवर्णनमात्रंनतु यंत्र-
स्तुतिः॥धिक्तालस्योन्नततांयस्यच्छायापिनोपकारायेत्यादावव्याप्त्यापत्तेः॥इयंचपंचधा॥अप्रस्तुतेनस्वसदृशंप्र
स्तुतंगम्यतेयस्यामित्येका॥कार्येणकारणमित्यपरा॥कारणेनकार्यमितितृतीया॥सामान्येनविशेषइतिचतुर्थी॥
विशेषेणसामान्यमितिपंचमी॥आद्यायथा॥दिगंतेश्रूयंतेमदमलिनगंडाःकरटिनःकरिण्यःकारुण्यास्पदमस
मशीलाःखलुमृगाः॥इदानींलोकेस्मिन्ननुपमशिखानांपुनरयंनखानांपांडित्यंप्रकटयतुकस्मिन्मृगपतिः॥यथा २८६
वा॥यस्मिन्वेल्लति सर्वतःपरिचलत्कल्लोलकोलाहलैर्मंथाद्रिभ्रमणभ्रमंहृदिहरिद्यूथाधिपाःपेदिरे॥सोयंतुंग

तिमिंगिलांगगिलनव्यापारकौतूहलःक्रोडेक्रोडनुकस्यकेलिरभसंत्यक्तार्णवोराघवः॥यथावा॥पुरासरसिमा
नसेविकचसारसालिस्खलत्परागसुरभीकृतेपयसियस्ययातंवयः॥सपल्वलजलेधुनामिलदनेकभेकाकुले
मरालकुलनायकःकथयरेकथंवर्त्ततां॥श्लिष्टविशेषणाप्येषादृश्यते॥नितरांनीचोस्मीतित्वंखेदंकूपमाकदापिकृ
थाः॥अत्यंतसरसहृदयोयतःपरेषांगुणग्रहीतासि॥समासोक्तिरत्रानुग्राहिकेतितुनवक्तव्यं॥तस्याःप्रकृतालं
का- कारविरुद्धत्वेनानुग्राहिकत्वायोगात्॥यत्तुयेनास्यभ्युदितेनचंद्रगमितःक्लांतिंरवौतत्रतेयुज्यतेप्रतिकर्त्तु
मेवनपुनस्तस्यैवपादग्रह इत्यत्रसमासोक्तिरनुग्राहिकेतिमम्मटभट्टैरुक्तं॥तत्रविचार्यते॥अत्रविशेषणसाम्य
महिम्नाप्रतीयमानःकापुरुषवृत्तांतःकिंप्रस्तुतआहोस्विदप्रस्तुतः॥आद्येसमासोक्तेर्विषयएवनास्तिपरोक्तिभेदकैः

र०गं० श्लिष्टैः समासोक्तिरितिसमासोक्तेर्लक्षणस्यतैरेवाभिधानात्॥ परस्याप्रकृतस्येतिनदर्थात्॥ द्वितीयेऽप्रस्तुतप्र

२८७ शंसायांनास्तिविषयः॥ अप्रस्तुतप्रशंसायासौसैवप्रस्तुताश्रयेतितल्लक्षणात्॥ प्रस्तुत आश्रयः प्रधानंयस्याइति या-|

नदर्थात्॥ तस्मात्श्लिष्टविशेषणोपक्षिप्तद्वितीयार्थमात्रंसमासोक्तिरित्यभिप्रायेणयथाकथंचित्संगमनीयं॥ इ

५ग्र-| यंचसादृश्यमूलाप्रस्तुतप्रशंसोच्यते॥ अस्यांचवाच्यार्थःक्वचित्प्रतीयमानार्थताटस्थ्यनेवर्त्तिइतेयथोक्तोदाहर वा-|

णेषुक्वचित्स्वगतविशेषणान्वययोग्यतामासादयितुंप्रतीयमानाभेदमपेक्षते॥ यथासमुपागतवतिदैवादव

हेलांकुटजमधुकरेमागाः॥ मकरंदतुंदिलानामरविंदानामयंमहामान्यः॥ यथावा॥ तावत्कोकिलविरसान्या २८७

पयदिवसान्वनांतरेनिवसन्॥ यावन्मिलदलिमालःकोपिरसालःसमुल्लसति॥ अत्रवृक्षपक्षिणोःसंबोधना

नुपपत्त्याप्रतीयमानांशतादात्म्यमपेक्षते॥ मलिनेपिरागपूर्णांविकसितवदनामनल्पजल्पेपि॥ त्वयिचप

च-| लेपिप्रसरसांभ्रमरकथंवासरोजिनींत्यजसि॥ अत्रत्यागानौचित्यहेतुत्वेनकमलिन्याःस्तुतिरूपंविशेषणमु णा२

पात्तं॥ तच्चनसंभवति॥ नहिभ्रमरेश्यामत्वादिदोषैःकमलिन्याःशोणत्वादिर्वागुणोयेनस्तुतिःस्यादतोवा

च्यार्थस्यप्रतीयमानतादात्म्येविशेष्यांशेविशेषणांशेचापेक्षते॥ पूर्वत्रांशेनेत्यनुसाकल्येनेतिविशेषः॥ क्वचित्त्व

प्रतीयमानमपिकिंचिदंशेवाच्यतादात्म्यंवाच्यंचकिंचिदंशेप्रतीयमानतादात्म्यमपेक्षते॥ यथासरजस्कांपां

डुवर्णांकंटकप्रकरांकितां॥ केतकींसेवसेहंतकथंरोलंबनिस्त्रपः॥ अत्रयथासरजस्कत्ववाच्यप्रतीयमानयो

रुभयोरपिसेवनानौचित्येनिमित्तंनतथापांडुवर्णत्वकंटकितत्वे॥ यतःपांडुवर्णत्वंकेतक्यानदोषःप्रत्युतगु

र॰गं॰ णत्वेनिपांडुरत्वांशेकेनक्वानायिकातादात्म्यमपेक्ष्यतेनैनायिकायांचकंटकितत्वांशेकेनकीतादात्म्यंपुलकि श्य–|
२९९ तत्वस्यकामिनीत्यागाननुगुणत्वात्प्रस्तुततत्सेवनानुगुणत्वात्॥कार्येणकारणंगम्यंयथा॥किंब्रूमस्तववी
रतांवयममीयस्मिन्धराखंडलक्रीडाकुंडलितभ्रूशोणनयनेदोर्मंडलंपश्यति॥नानाभूषणरत्नजालजटि
लास्तत्कालमेवाभवन्विंध्यक्ष्माधरगंधमादनगुहासंबंधिनोभूरुहाः॥अत्रविंध्यारण्यतरुभूषणेनारिप
रिपलायनंगम्यते॥यदित्तुवक्ष्यमाणरीत्यापर्यायोक्तालंकारस्यायंविषयइत्युच्यते॥तदेदंविविक्तमुदाहर
णं॥नितरांपरुषासरोजमालानमृणालानिविचारपेशलानि॥यदिकोमलतातवांगकानामथकानामकथा २९९
पिपल्लवानां॥अत्रपल्लवादितिरस्कारेणकार्येणतदंगानांसौकुमार्यातिशयःकारणंकार्यकारणभावश्चेह

ज्ञानयोःतेनपारुष्यस्यमृणालगतत्वेनज्ञाप्यमानस्यस्वरूपंतत्तदंगसौकुमार्यजन्यत्वेपिनक्षतिः॥कारणे
नकार्यंगम्यंयथा॥स्रष्टुःसृष्टिकृतापुराकिलपरिश्रांतुंजगन्मंडलंत्वंचंडानपनिर्दग्धुंदहसियतज्ज्वालाजटालैःकरैः॥
संरंभारुणलोचनोरणभुविप्रस्थानुकामोधुनाजानीमोभवतानलंतविदितोदिङ्मीधरावल्लभः॥अत्रराजवर्णनांग
त्वेनरवेर्भयोत्पादनेवर्ण्यत्वेनप्रस्तुतेसाक्षात्तदननुगुणत्वादप्रस्तुतेनप्रस्थानेनसाक्षात्तदनुगुणंरिपुकर्तृकसूर्यमं न–|
डलभेदनंगम्यतेयदिवात्रकारणंयथाकथंचित्प्रस्तुतमेवेत्युच्यते॥तदेवमुदाहरणं॥आनम्यवल्गुवचनैर्विनि
वारितेपिरोषात्प्रयातुमुदितेमयिदूरदेशं॥बालाकरांगुलिनिदेशवशंवदेनक्रीडाबिडालशिशुनाभुरुरोधमार्गः॥ रु–|
अत्रप्रवासान्निवृत्तोस्मीतिप्रस्तुतमप्रस्तुतेनकारणेनगम्यते॥सामान्येनविशेषोयथा॥कृतमपिमहोपकारंपय

२॰गं॰ इवपीत्वानिरातंकः॥प्रत्युतहंतुंयतंतेकाकोदरसोदरःखलोजगति॥अत्रसामान्यार्थेनप्रस्तुतोविशेषोगम्यते॥
२८६ उपमाप्यस्याआनुगुण्येनस्थिताविशेषेणसामान्यंयथा॥पांडित्यंपरिहृत्ययस्यहिकृतेबंदित्वमालंबितंदु[illegible]पमन
सापियोगुरुतरैःक्लेशैःपदंप्रापितः॥रूढस्तत्रसचेन्निगीर्यसकलांपूर्वोपकारावलिंदुष्टःप्रत्यवतिष्ठतेतदधुनाक
स्मैकिमाचक्ष्महे॥अत्रदुष्टेषुकृतउपकारःपरिणामेनस्वरवंजनयतीतिप्रस्तुतोविशेषेणसामान्यंगम्यते॥यथा
वा॥हारंवक्षसिकेनापिदत्तमज्ञेनमर्कटः॥लेढिजिघ्रतिसंक्षिप्यकरोत्युन्नत[illegible]सनं॥अत्रमर्कटवृत्तांतेनाप्रस्तु
तेनप्रस्तुतमनभिज्ञेषुरमणीयवस्तुसमर्पणंनप्राशस्त्यायभवतीतिसामान्यंगम्यते॥एवंपंचप्रकारेयमप्रस्तुत २८१
प्रशंसाप्राचामनुसारेणनिरूपिता॥वस्तुतस्तु॥प्रथमस्याप्रस्तुत[illegible]प्रशंसाप्रकारस्यनानाविधत्वंसंभवति॥यत्रास्

तमप्रस्तुतेनवाच्येनप्रस्तुतंगम्यतेसप्रकारोनिगदितएव॥यत्रचस्थलविशेषेवृत्तांतद्वयमपिप्रस्तुतंसोप्येको
यथाजलक्रीडाप्रकरणेभ्रमरकमलिन्यादिषुपुरःस्थितेषुनायकेवस्वनायिकायामननुरक्तेपार्श्ववर्तिनिनायिका
सख्याःकस्याश्चिदुक्तौमलिनेपिरागपूर्णामित्यादिप्रागुदाहृतेपद्ये॥अथात्रकथमप्रस्तुतप्रशंसावाच्यार्थस्यप्र
स्तुतत्वेनतल्लक्षणानाक्रांतत्वादितिचेन्न॥अप्रस्तुतशब्देनहिमुख्यतात्पर्यविषयीभूतार्थातिरिक्तोर्थोविवक्षितः
॥सचक्वचिदत्यंताप्रस्तुतःक्वचित्प्रस्तुतश्चेतिनकोपिदोषः॥नचध्वनिमात्रस्याप्रस्तुतप्रशंसात्वापत्तिरितिवाच्यं॥
अतएवतत्रसादृश्याद्यन्यतमप्रकारेणेतिविशेषणमुपात्तमितिविभावनीयं॥एतेनद्वयोःप्रस्तुत्वेप्रस्तुतांकुरनामा तः B.
न्योलंकारइतिकुवलयानंदाद्युक्तमुपेक्षणीयं॥किंचिदंलक्षणमात्रेणैवालंकारांतररत्नाकरअनैवाभंगीनांमान्या गः B.

र०गं० दलंकारानंत्यप्रसंगइत्यसकृदावेदितत्वात्॥इदंतुबोध्यं॥अत्यंताप्रस्तुतस्यवाच्यतायांतस्मिन्नपर्यवसितया
२९० अभिधयाप्रतीयमानार्थस्यबलादाकृष्टत्वेनध्वनित्वंनिर्बाधं॥द्वयोःप्रस्तुतत्वेतुनिर्विवादमेव॥एवंसाद्दश्य
मूलेप्रकारेद्वैतं॥कार्यकारणभावसामान्यविशेषभावमूलास्तुचत्वारःप्रकारागुणीभूतव्यंग्यस्यैवभेदाः॥
अभिधादिस्पर्शलेशशून्यस्यकेवलागूरणमात्रस्यध्वनित्वप्रयोजकत्वात्॥अथआपेदिरेंबरपथंपरितःपतंगा
भृंगारसालमुकुलानिसमाश्रयंति॥संकोचमंचतिसरस्त्वयिदीनदीनोमीनोनुहंतकतमांगतिमभ्युपेतु॥अत्र
क्षीणराजादितदेकावलंबपुरुषादिवृत्तांतेप्रस्तुतेअप्रस्तुतप्रशंसैवेतिनिर्विवादं॥यदातुसरोवृत्तांतोराजवृत्तांत २९१
श्चेत्युभयंप्रस्तुतंतदापिप्रागुक्तदिशासैव॥यदातुसरोवृत्तांतएवप्रस्तुतःतदागुणीभूतराजवृत्तांतरूपकंव्यंग्य

DR BHAU DAJI MEMORIAL

स्मिन्पद्येकोलंकारः॥नतावदयं॥अप्रस्तुतस्यैवप्रशंसनात्॥नापिसमासोक्तिः॥तज्जीवातोर्विशेषणसाम्यस्यस
कलालंकारिकसंमतस्यात्राभावात्॥नचविशेषणसाम्यप्रकारइवशुद्धसादृश्यमूलोपितस्याएवप्रकारोवाच्यः॥
एकधर्माश्लिष्टत्वमंतरेणैकालंकारत्वेसर्वेषामेकालंकारत्वापत्तेः॥व्यवस्थापकेस्तइदनायाअनुक्तेश्च॥अतएवा
लंकारसर्वस्वकारादिभिर्विशेषणवाचिशब्दसाम्यंसंरक्ष्यैवसमासांतराश्रयेणसादृश्यमूलत्वंप्रदर्शितंनतुदुष
क्ष्यंतिचेत्॥उच्यतेअप्रस्तुतप्रशंसैवात्रालंकारः॥अप्रस्तुतस्यप्रशंसेतिनतदर्थःकिंत्वप्रस्तुतेनेति॥साचार्थात्
प्रस्तुतस्यैवएवंचवाच्येनव्यक्तेनवाअप्रस्तुतेनवाच्यंव्यक्तंवाप्रस्तुतंयत्रसादृश्याद्यन्यतमप्रकारेणप्रशंस्यतेसा
प्रस्तुतप्रशंसानतुवाच्येनैवव्यंग्यमेवेति॥स्यादेतत्कमलमनंभसिकमलेकुवलयेतानि॥निकषरुतिका

र॰गं॰ यामित्यादाविवात्रापिनिगीर्याध्यवसानेनैवोपपत्तिःशक्याकर्त्तुं॥नह्यपदार्थेनपदार्थस्यवाक्यार्थेनवाक्यार्थ
२९१ स्यवेत्यन्यदेतत्‌॥अन्वयानुपपत्तिरिवप्रस्तावानुपपत्तिरपिलक्षणाबीजं॥एवंचातिशयोक्तावेवोपपत्तौकिंसादृश्य
मूलाप्रस्तुतप्रशंसयेति॥ननुनिगीर्याध्यवसानंहिनतावदत्रसंभवति॥तत्रहिवाच्यतावच्छेदकरूपेणलक्ष्य
स्यप्रतीतिरिहतुवाच्यतादरूपतार्थतिरस्येतिविशेषात्‌॥यत्रतुश्लेषादिनाविशेषणसाम्यंतत्रतन्माहात्म्यादस्तु
नामाभेदाध्यवसायइतिचेत्‌॥इहापिवाच्यव्यवहाराभिन्नतयैवप्रस्तुतव्यवहारप्रत्ययइत्यवैलक्षण्यमेवेति॥
वे-।सत्यं॥यस्मिन्नस्तिलतिदिगंतेभ्रूयंतइत्यादौवाच्यार्थतादस्थ्येनैवव्यंग्यस्यप्रतीतेःसर्वसहृदयसंमतत्वात्‌॥क २९१
चित्तुसंबोधनस्यतद्विशेषणस्यैवानुपपत्त्याअभेदांशोप्यपेक्ष्यतेनतावतासर्वत्राभेदेनप्रतीतिः॥किंचाप्रस्तुत

प्रशंसायांप्रस्तुतंव्यंग्यमितिनिर्विवादंनिगीर्याध्यवसानेतुलक्ष्यंस्यात्‌॥अपिचयत्रवाच्यस्यात्यंताप्रस्तुतत्वं तुल-।
तत्रअभिधायाअपर्यवसानात्स्यादपिकदाचिल्लक्षणायाअवकाशोयदातुद्वयोरप्यर्थयोःप्रागुक्तादिशाप्र
स्तुतत्वंतदातुबाधलेशास्फुरणाल्लक्षणागंधोपिनास्तिकुतःपुनर्निगरणंलक्षणैकदेशःकिंत्वावरणमेवेति
तत्राप्रस्तुतप्रशंसायाःसादृश्यमूलायाआवश्यकत्वादन्यत्रापितज्जातीयस्थलेसैवोचिता।यदितुप्रकारस्या
स्यध्वनिप्रभेदत्वात्ध्वनेश्चालंकार्यस्यालंकारत्वानुपपत्तिरितिसूक्ष्ममीक्षितेनदाप्रस्तुतप्रशंसायाभेदांतरमे क्ष्य-।
वविषयइत्यपिवदंति॥ ॥इतिरसगंगाधरेपंडितराजाभिधानभट्टजगन्नाथविरचितेऽप्रस्तुतप्रशंसाप्रकरणं
॥ ॥विवक्षितस्यार्थस्यभंग्यंतरेणप्रतिपादनंपर्यायोक्तं॥येनरूपेणविवक्षितोर्थस्तदतिरिक्तःप्रकारोभंग्यं

र०गं० नरं आक्षेपोवा॥यथा॥त्वांकंदरीनिवहनिष्ठुरधैर्यगर्वनिर्वासनैकचतुरंसमरेनिरीक्ष्य॥केषामरींक्षितिभृतां
२८९ नवराज्यलक्ष्मीःस्वामिन्ननात्वमपरिस्खलितंबभार॥अत्रसर्वापिशत्रूणांराज्यसंपत्त्वांप्राप्तेतिविवक्षितोर्थोनतत्स्व- स्व-|
२१२ द्रूप्येणाभिहितोअपितुस्खलितपातिव्रत्याबभूवेत्याकारेण॥सूर्याचंद्रमसौयस्यवासोरंजयतःकरैः॥अंगरागं
जन-| स्रग्भूत्यग्निस्तंवंदेपरमेश्वरं॥अत्रापिगगनांबरइतिसूर्यचंद्रकररज्यमानवस्त्रइत्याकारेणभस्मांगरागइत्यग्नि
सृज्यमानांगरागइत्याकारेणचनिरूपितः॥अस्यांचगम्यस्ययेनाकारेणगम्यतातदतिरिक्ताकारेणवाच्यतातेन
य-| पर्यायेणभंग्यंतरेणोक्तमभिहितंव्यंग्यंचेतिप्राचीनैर्निर्मितंलक्षणंव्यंग्यत्ववाच्यत्वयोर्विरोधादसंगतमितिना २१२
शंकनीयं॥एकस्यैवप्रकारभेदेनवाच्यत्वव्यंग्यत्वयोरविरोधात्॥यथायावकमलारंजनदाडिमीजपाकुसु

मादिरूपाणांरक्तत्वादिनावाच्यत्वेपितत्तद्वैजात्यरूपेणप्रत्यक्षत्वमेवनतुवाच्यत्वमेवमिहापीतिमम्मटभट्टाः॥
अलंकारसर्वस्वकारस्तुगम्यस्यापिभंग्यंतरेणाभिधानंपर्यायोक्तं॥गम्यस्यैवसतःकथमभिधानमितिचेत्कार्या
दिद्वारेणेत्याह॥तस्यायमाशयः॥चक्राभिघातप्रसभाज्ञयैवचकारयोराहुवधूजनस्य॥आलिंगनोद्दामवि
लासवंध्यंरतोत्सवंचुंबनमात्रशेषमितिप्राचीनपद्येराहुशिरश्छेदकारीतिव्यंग्यंराहुवधूजनसंबंधित्वेनमा
त्रावशिष्टरतोत्सवनिमित्तत्वेनरूपेणप्रकारांतरेणाभिधीयतइत्यस्यापिविवेचनेक्रियमाणेराहुशिरश्छेदकर्तृत्व
रूपोधर्मःस्वसमानाधिकरणेनतादृशरूपांतरेणसाक्षादुपात्तेनगम्यतइत्येवपर्यवस्यति॥भगवतस्तुपूर्वप्रक्रां
तत्वात्पृथक्छब्देनाभिहितत्वाच्चव्यंग्यत्वं॥एवंयंप्रेक्ष्यचिररूढापिनिवासप्रीतिरुज्झितामदेनैरावणमुखेमोनेन म-|

र॰गं॰ हृदयेहरेरितिप्राचीनपद्येशूकैरावणेोमानमदुक्तौजानाविनिव्यंग्यमपिमानमदमोकमात्रस्यव्यंग्यत्वेपर्य सु-|
२९३ वस्यति॥धर्म्यंशस्याभिधागोचरत्वात्॥एवंचयोव्यंग्यांशःसनकपिरूपांतरपुरस्कारेणाभिधीयतेयश्चा दा-|
भिधीयतेधर्मीसितुनदानीमभिधाश्रयत्वाद्व्यंजनव्यापारानाश्रयएवेतिव्यंग्यस्यप्रकारांतरेणाभिधानमसं
गतमेवंतस्मात्कार्यादिमुखेनोक्तमिवपर्यायोक्तंतेनाक्षिप्तमित्येवार्थः॥प्राचीनैर्धर्मिणोपियद्व्यंग्यत्वमुक्तंत
द्व्यंजनिकबोधविषयस्यसमस्तवाक्यार्थस्यैवव्यंग्यत्वमित्यभिप्रायेणतत्रविवेकेक्रियमाणेकेचिदभि
धामात्रस्यगोचराःपदार्थाःकेचिच्चव्यक्तिमात्रगोचराइति॥अभिनवगुप्तपादाचार्यास्तुपर्यायेणवाच्याद २९३
तिरिक्तप्रकारेणव्यंग्येनउपलक्षितंउक्तमभिहितंपर्यायोक्तमितियोगार्थंलक्षणंचाहुः॥तेषामयमाशयः॥

यदिपर्यायशब्देनप्रकारांतरंधर्मांतरमुच्यतेतदाविवक्षितार्थतावच्छेदकातिरिक्तधर्मपुरस्कारेणाभिहितमितियो
गार्थस्यात्॥तथाचदशवदननिधनकारीदाशरथिःपुंडरीकाक्षइत्यादौरामत्वातिरिक्तधर्मपुरस्कारेणरामस्ये
वाभिधानात्पर्यायोक्तप्रसंगःनचव्यंग्यंयत्रतेनप्रकारेणोक्तंतत्पर्यायोक्तमितिवाच्यं।व्यंग्यस्ययोगार्थानंतर्ग
तत्वात्नचयोगार्थानंतर्गतत्वेपिलक्षणांतर्गतत्वंतस्येतिवाच्यं।एवंतर्हिव्यंग्यस्यलक्षणाप्रवेशावश्यकत्वेपर्याय
शब्देनव्यंग्यस्यैवग्रहणमुचितत्वात्॥व्यंग्येनत्युपलक्षितमुक्तंप्रकारांतरेणैवभवतीतिप्रकारांतरग्रहणंनात्याव
श्यकमिति।अतएवास्माभिराक्षेपोवेतिपक्षांतरमप्युक्तं॥इदंपुनरवशिष्यतेयत्पीत्वातुमितोगतासिनपुनस्तस्या
धमस्यांतिकमितिरसकरप्रसिद्धध्वन्युदाहरणेप्यधमनिकटगमननिषेधरूपेणनभिकटगमनविशिष्टायाअधमत्वे ग-| B.

र॰गं॰ नरूपेण॥वादूतीसंभोगकर्त्तुरभिधानात्पर्यायोक्तप्रसंगः प्राचीनपक्षद्वास्मिन्नपि पक्षेभवतिसत्वव्यंग्यविशेष
२९४ ग्रहणेनतैरपिनिरसनीयः॥मध्यस्थपक्षेतुनेदमपिदूषणं॥तदेवंपक्षत्रयाणांनिष्कर्षेस्थितेयदस्मिन्प्रकरणेकुवल
यानंदकारेणोक्तंतत्सर्वमविचारितरमणीयमेव॥तथाहि॥यत्तावदुच्यतेनमस्तस्मैकृतौयेनमुधाराहुवधूस्तनौ
॥अत्रभगवान्वासुदेवःस्वासाधारणरूपेणगम्यःराहुवधूकुचवैयर्थ्यकारकत्वेनरूपांतरेणाभिहितइतितन्न॥
अत्रहिराहुवधूकुचौयेनमुधाकृतावित्यभिहितेनराहुवधूकुचवैयर्थ्यकारित्वेनराहुशिरश्छेदकारित्वंव्यज्य
तइतितावन्निर्विवादंभगवद्वासुदेवत्वंतुविशेषणमर्यादालभ्यंनकाव्यमार्गीयव्यंग्यकक्षामारोढुंप्रभवति॥अ २९४
न्यथानमोराहुशिरश्छेदकारिणेदुःखहारिणेइत्यत्रापिभगवद्वासुदेवत्वव्यंग्यताप्रयुक्तंपर्यायोक्तमलंकारःस्या

द्विशेषणमर्यादालभ्यस्यचधर्मस्यकिंचिद्व्यंग्यतास्पर्शेसत्यपिनसकाव्यमार्गेगण्यते॥असुंदरत्वात्॥अ
न्विताभिधानेअतिविशेषवपुषइवसामान्यरूपाणांपदार्थानामन्वये॥किंच॥राहुस्त्रीकुचवैफल्यकारिणेह
रयेइत्यत्रभगवत्शब्देनाभिधेयस्यस्वासाधारणरूपेणाप्यगम्यत्वाद्राहुशिरश्छेदकारित्वेनैवव्यंग्यत्वमेष्टव्यं
नस्वासाधारणधर्मरूपेण॥नचात्रपर्यायोक्तंनास्तीतिकस्यापिसंमतं॥यदप्युक्तंसर्वस्वकारस्यलोचनकर्त्तु
श्चसर्वोप्ययंक्लेशःकिमितिनविद्मइतितत्रयदर्थंतेषांक्लेशःतत्तुतन्मतनिष्कर्षावसरएवनिरूपितं॥यदप्यु रा॰
क्तं॥चक्राभिधानप्रसभाज्ञयेतिप्राचीनोदाहरणेयद्राहुशिरश्छेदावगमनंतत्प्रागुक्तरीत्याप्रस्तुतांकुरएव
॥यत्तुप्रस्तुतेनराहोःशिरोमात्रावशेषणेनालिंगनवंध्यत्वाद्यापादनरूपेवाच्येभगवतोरूपांतरेणोपपादि

र०गं० तेभगवद्रूपेणावगमनंनत्पर्यायोक्तस्यविषयइति।।नदपिन।।अदिराहुशिरश्छेदावगमनंत्वक्लिन्नस्यप्रस्तु
२१९ तांकुरस्याविषयःस्यात्तदाकिंपर्यायोक्तेन।।भगवद्रूपेणावगमनंतुविशेषणमर्यादालभ्यत्वेनासुंदरं।।नमोरा
हुशिरश्छेदकारिणेइत्यादाविवनकस्याप्यलंकारस्यविषयइत्युक्तमेवप्रस्तुतांकुरस्यप्राचीनैरस्वीकाराच्चास्वी
कारेवाप्रस्तुतेनस्वसदृशोवाक्यार्थःप्रस्तुतएवयत्रव्यज्यतेसतस्यविषयोस्तुननुकार्येणप्रस्तुतेनकारणावग
मनं।।अत्रहिप्रस्तुतेनकार्येणप्रस्तुतकारणावगमनेअप्रस्तुतप्रशंसैवाप्रस्तुतेनकार्येणप्रस्तुतस्यैवकारण
स्यावगमनंतुपर्यायोक्तस्यविषयइत्यलंकारसर्वस्वकारादिभिःप्राचीनैःकृतोविषयविभागउच्छिन्नएवस्या २१९
त्।।राहुवधप्रगतेनविशिष्टेनरतोत्सवेनराहुशिरश्छेदःकारणरूपोगम्यते।।एवमन्यत्रापिपर्यायोक्तेज्ञेयमि

त्यलदुपजीव्यग्रंथविरोधाच्च।।तस्मादत्रराहुशिरश्छेदकारित्वेनावगमःपर्यायोक्तस्यविषयोनतुभगवद्रूप
णेतिसहृदयैराकलनीयं।।अस्मिंश्चालंकारेव्यंग्यंवाच्यपरंअप्रस्तुतप्रशंसायांतुवाच्यंव्यंग्यपरंतेनायमलंका
रोवाच्यसिद्ध्यंगगुणीभूतव्यंग्यभेदइतिध्वनिकारानुयायिनः।।यत्तुस्वासिद्धयेपराक्षेपःपरार्थेस्वसमर्पणंउ
पादानंलक्षणंचेत्युक्ताप्रेडुवसूत्राद्विधेत्युक्तयुक्त्यालक्षणाद्वयाश्रितत्वादनयोरवांतरोपिविषयभेदोस्तीतिस्वग्रं
थाशयंवर्णयतापिविमर्शिनीकारेणोक्तं।।तन्न।।नह्निचक्राभियानप्रसभाज्ञयेतिपद्येचुंबनमात्रशेपर
तोत्सवांशोबाधोस्तियेनलक्षणास्यात्।।एवमप्रस्तुतप्रशंसायामप्यप्रस्तुतस्यप्रस्तुतेनलक्षणाकिंतुव्यंज
नमेवेतिसर्वसंमतं।।अन्यथापर्यायोक्तेवाच्यस्यप्राधान्यमप्रस्तुतप्रशंसायांनुगम्यस्यैवेतिसिद्धंतस्यभंगः द्वं

र॰गं॰ स्यात्॥ लक्षणायांहिलक्ष्यस्यैवप्राधान्यंस्यान्नवाच्यस्ययत्रवाच्योर्थंनिरंस्वोपस्कारकत्वेनापूरयतितत्रपर्या
२१६ योक्तंयत्रस्वात्मानमेवाप्रस्तुतत्वात्प्रस्तुतमर्थंतिरंप्रतिसमर्पयतितत्राप्रस्तुतप्रशंसेतितन्मूलग्रंथविरोधात्॥
नहिलक्षणाआपूरणंभवति।तस्मात्पर्यायोक्तेवाच्यस्यप्राधान्यमप्रस्तुतप्रशंसायांतुनेतितन्मूलग्रंथस्यता
त्पर्यं॥ इदंतुबोध्यं॥ ध्वनिकारात्प्राचीनैर्भामहोद्भटप्रभृतिभिःस्वग्रंथेषुकुत्रापिध्वनिगुणीभूतव्यंग्यादिश
ब्दानप्रयुक्ताइत्येतावतैवध्वन्यादयोनस्वीक्रियंतइत्याधुनिकानांवाचोयुक्तिरयुक्तैवयतःसमासोक्तिव्याज
स्तुत्यप्रस्तुतप्रशंसाद्यलंकारनिरूपणेनकिंपतेनापिगुणीभूतव्यंग्यभेदास्तैरपिनिरूपिताः॥ अपरश्चसर्वोपि
व्यंग्यप्रपंचःपर्यायोक्तकुक्षौनिक्षिप्तः॥ नह्यनुभवसिद्धोर्थोबालेनाप्यपन्होतुंशक्यते॥ ध्वन्यादिशब्दैःपरंव्य

वहारोनकृतः नत्वेतावताअनंगीकारोभवति॥ प्राधान्यादलंकार्यौहिध्वनिरस्यपर्यायोक्तस्यकुक्षौकथंकार
निविशतामितितुविचारांतरं॥ अयंचालंकारःक्वचित्कारणेनवाच्येनकार्यस्यगम्यत्वेक्वचित्कार्येणकारण
स्यक्वचिदुभयोदासीनेनसंबंधिमात्रेणसंबंधिमात्रस्यचेतिविपुलविषयः॥ तत्रत्वांसुंदरीनिवहेतिपद्येपानि
प्रयसस्खलनेनकारणेनतंप्रतिप्राप्तिःकार्यंगम्यतेसमासोक्तिरत्रोच्छापिका॥ एतेनकार्यात्कारणप्रतीतिवत्
कारणात्कार्यप्रतीतौवैचित्र्याभावादितिटीकाकारोक्तमपास्तं॥ अपकुर्वद्भिरनिशंधृतराष्ट्रस्यात्मजैः॥ उप्यंते
मृत्युबीजानिपांडुपुत्रेषुनिश्चितं॥ अत्रबीजवापेनकारणेनकुलक्षयःकार्यरूपोगम्यते॥ कार्येणकारणस्यग
म्यत्वेयथा॥ त्वद्विपक्षमहीपालाः॥ स्वबलाधरपल्लवं॥ पीडयंतितरांतीव्रदारुणैर्दशनक्षतैः॥ अत्रवैरिणांस्व

 खवधूसंभोगेनकार्येणमरणंकारणंगम्यते॥तदुभयोदासीनेनयथा॥सूर्याचंद्रमसौयस्यतिपूर्वेदाम्द्नप
 येसूर्यचंद्रकररज्यमानवस्त्रत्वेनकार्येणपिकारणेनकेवलंसहचरितेनगगनांबरत्वंगम्यते॥एवं॥यश्चिरण
त्राणीकृतकमलासनपन्नगेंद्रलोकयुगः॥सर्वांगावरणपटीकृतकर्नकांडःसवामनोजयतिइत्यत्रत्रिविक्रमस्य
त।B येनकेदावगमाद्रूपकासंभवेनपर्यायोक्तंभवितुमर्हति॥गम्यंचात्रव्याप्तत्वचरणकत्वमेतव्याप्तांगकत्वंच॥न
देवसंक्षेपतस्त्रिविधः॥वाग्भंगीनांतुपर्यालोचनएकस्मिन्नेवविषयेनंतप्रकाराःसंपद्यंतेकिमुतविषयभेदे॥
यथाद्रूभवद्भिरागंतव्यमितिविषयेअयंदेशोलंकर्तव्यइतिपवित्रीकर्तव्यइतिसफलजन्माकर्तव्यइतिप्रकाश २१७
नीयइतिदेशस्यास्यभाग्यान्युज्जीवनीयानीतितमांसितिरस्करणीयानीतिअस्मन्नयनयोःसंतापोहरणीयइ

तिमनोरथःपूरणीयइत्यादि॥कार्यादीनांत्वारोपेणनिष्पत्तिरन्वेष्टव्या॥एवंचपर्यायोक्तस्यकार्यरूपाप्रस्तुतप्र
शंसयाविषयापहारमात्रंक्यकार्यकारणयोर्द्वयोरपिप्रस्तुतत्वेपर्यायोक्तंकार्यस्याप्रस्तुतत्वेकारणस्यचप्रस्तु
तत्वेकार्यरूपाप्रस्तुतप्रशंसेतिविषयविवेकःसर्वस्वकृतावृतस्तत्रन्यूनविषययाकार्यरूपाप्रस्तुतप्रशंसयाबहु
विषयस्यास्यविषयापहारोनसंगच्छतएवपरंत्वनेनतस्यविषयापहारमात्रंक्यविषयविभागःकर्तुमुचितः॥
इतिरसगंगाधरेपर्यायोक्तप्रकरणं॥ ॥अथव्याजस्तुतिः॥ ॥आमुखप्रतीताभ्यांनिंदास्तुतिभ्यांस्तुतिनिंद
योःक्रमेणपर्यवसानंव्याजस्तुतिः॥तृतीयातत्पुरुषकर्मधारयाभ्यांयोगार्थद्वयेनद्वयोरपिशब्दार्थत्वं॥आमुखेत्या
दिविशेषणेनतयोःपर्यवसानाभावंवदन्बाधितत्वमभिप्रैति॥अतएवनास्यध्वनित्वंध्वनौहिनिर्बाधितेनवाच्येना

र०गं० गूरणमहिम्नार्थांतरमवगम्यतेनचैवंप्रकृतेआद्या यथा॥उर्वीशासतिमृत्युपद्रवलवःकस्यापिनस्यादितिश्रीदं
२१९ व्याहरतोवचस्तवकथंदेवप्रतीमोवयं॥प्रत्यक्षंभवतोविपक्षनिवहेद्यामुत्पतद्भिःक्रुधायक्षभ्रमत्कुलकोटिमू
लपुरुषोनिर्भिद्यतेभास्करः॥अत्रराजवर्णनप्रस्तावेनिंदाबाधितास्तुतौपर्यवस्यति॥द्वितीयायथा॥किमहंव
दामिखलदिव्यमतौगुणपक्षपातमभितोभवतः॥गुणशालिनोनिखिलसाधुजनान्यदहर्निशंनखलुविस्म
रसि॥अत्रदुश्चरितोत्कीर्तनप्रस्तावेस्तुतिस्तथाभूतानिंदायां॥अत्रचैकएवार्थःकेनचिदाकारेणादोस्तुतेर्निंदाया
वाविषयोभूत्वाप्रकरणादिमहिम्नाप्रकारांतरेणनिंदायाःस्तुतेर्वाविषयोभवति॥नत्वयावानंशोबाधितस्तावाने २१९
वान्यथात्वेनपर्यवस्यतिअंशांतरंतुस्वभावेनैवावतिष्ठते॥इयंचालंकारांतरसंकीर्णायथा॥देवत्वांपरितस्तु

वंतुकवयोलोभेनकिंतावतास्तव्यस्त्वंभविनास्तियस्यतरुणश्चापप्रतापोधुनाक्रोडांनःकुरुतेनरांवसुमती
माशाःसमालिंगतिद्यांचुंबत्यमरावतींचसहसागच्छत्यगम्यामपि॥अत्रचापप्रतापस्यसमासोक्त्याविटधौ
रेयव्यवहाराश्रयत्वप्रतीतिस्तन्मूलाचनिंदास्तुतौपर्यवस्यति॥यथावा॥अयेराजन्नाकर्णयकुतुकमाक
र्णनयनस्फुरंतीहस्ताभोरुहितवकृपाणीरणमुखे॥विपक्षाणांवक्षस्यहहतरुणानांनिपततिप्रगल्भाःश्या
मानामनुपरतकामाःप्रकृतयः॥अर्थांतरन्यासपोषिता॥ननुकथमत्रव्याजस्तुतिः॥वाच्याभ्यामेवनिंदा
ति— स्तुतिभ्यांस्तुतिनिंदयोर्गम्यत्वेनस्याअभ्युपगमात्॥नह्यत्रचापप्रतापस्यकेवलस्यकेवलस्त्रमत्वाद्यालिंगनंवा न—
व्यभूतंनिंदास्पदंभवतिसमासोक्त्यात्वाविर्भूतोविटव्यवहारोनिंदास्पदमपिनवाच्योपितुगम्यइतिचेत्॥आ

र॰गं॰ मुखप्रतीतपदेनहिप्रथमप्रतीतावपर्यवसितत्वमात्रमत्रविवक्षितंनतुवाच्यत्वपर्यंतिंगौरवात्॥प्रकृतेच
२११ किंतावतास्तव्यस्त्वमित्यादिनानिंदायाएवोपोद्बलनात्समासोक्तिसाचिव्येनसैवप्रथमंप्ररूढापश्चात्स्तुति
रितिनकोपिदोषः॥एवंचभाग्यनेशात्मलितरोवदकिंपरिकथ्यते॥द्विजैःफलाशयायुक्तैःसेव्यसेयदहं एव दि३
मित्यत्राप्रस्तुतप्रशंसासंकीर्णाप्येषाभवति॥एतेन॥किंवृत्तांतैःपरगृहगतैःकिंतुनाहंसमर्थस्तूष्णींस्थातुं
प्रकृतिमुखरोदाक्षिणात्यस्वभावःदेशेदेशेविपणिषुतथाचत्वरेपानगोष्ठ्यामुन्मत्तेवभ्रमतिभवतोवल्लभा व-।
चौ-। हतकीर्त्तिरित्यत्रप्रानपद्येप्रक्रांतापिस्तुतिपर्यवसायिनीनिंदाहंतकीर्त्तिरितिभणितिभिर्न्मूलितानतुप्ररोहं २११
गमितेतियत्सर्वस्वकृतोक्तंयच्चापितद्व्याख्यायांविमर्शिन्यामनुदाहरणमेवैतत्पद्यंव्याजस्तुतेरितिध्वन्यालोच

नकारोक्तिंकटाक्षेणालक्षीकृत्योक्तं॥तन्निरस्तं॥किंवृत्तांतैरित्यादिनानिंदायाएवप्रथममुन्नयनात्समासो
क्तेरुद्गतेःवाच्यत्वस्यातंत्रत्वात्॥अन्वयक्रमेणादौवल्लभायाएवान्वयेनतस्याश्चकीर्तिभिन्नत्वेनावस्थानेसतिप
श्चात्प्रकरणादिपर्यालोचनवशाद्व्युत्क्रमेणान्वयबोधाच्च॥तस्माद्ध्वन्यालोचनकारैरुक्तमुदाहरणंसंगतमे
वेदं यंचव्याजस्तुतिर्यस्यैववस्तुनःस्तुतिनिंदेप्रथममुपक्रम्येतेतस्यैवचेन्निंदास्तुत्योःपर्यवसानेभवेत्तदाभव
तिवैयधिकरण्येतुनेतिप्राचामलंकारशास्त्रप्रवर्त्तकानांसमयः॥अतएवयत्रशब्देनाभिधीयमानास्तुतिर्निंदा
वाबाधितस्वरूपानिंदायांस्तुतौचस्वसमर्पणेनपर्यवस्यतीतिनैस्तत्रतत्रस्वग्रंथेषुउपनिबद्धं॥एवंचपरोपसर्प
णानंतचिंतानलशिखाशांतः॥अचुंबितांतःकरणासाभुजीवंतियादृशाः॥इत्यादिषुसांसारिकजननिंदापर्य §Bhav—/

र०गं० वसायिन्यामपिपादपस्तुतो व्याजस्तुतित्वं ॥ प्रथमार्तो प्रेयमानस्तुतेरबाधितत्वात् ॥ एवंनिंदयास्तुतेर्गम्यत्वे
३०० पितथा ॥ अन्यस्यस्तुत्यान्यस्यस्तुतावन्यनिंदयावान्यनिंदायांगम्यमानायांनास्याअलंकृतेर्विषयः पूर्वोक्तादे
वहेतोः ॥ यथा ॥ येत्वांध्यायंतिसंततंतएवकृतिनांवराः ॥ मुधागतंमुरारातेपवदन्याधियांजनुः ॥ अत्रपूर्वोत्त
रार्धगताभ्यांध्यातृस्तुतिनिंदाभ्यांध्येयस्तुतिनिंदयोरवगमः ॥ एवंस्थितेकुवलयानंदकर्त्रास्तुतिनिंदाभ्यांवैय
धिकरण्येननिंदास्तुत्योःस्तुतिनिंदयोर्वावगमेप्रकारचतुष्टयंव्याजस्तुतेर्यदधिकमुक्तंतदप्यपास्तं ॥ यदितुप्रा
चीनसंकेतसेतुंनिर्भिद्यस्वरुचिरमणीयासरणिराद्रियतेतदानींनिवेश्यतांसर्वेव्यंग्यप्रकारागुणीभूतव्यंग्यप्र ३००
कारावाअलंकारोदरेषु ॥ निवेश्यतांवाव्याजस्तुतिरपियोगार्थावलीढत्वादप्रस्तुतप्रशंसायांनिरस्यतांचकार्यका

रणादिविषयकत्वेदुराग्रहस्तस्यादितिबहुव्याकुलीस्यात् ॥ एवंतर्हिप्रागुक्तंप्रकारचतुष्टयंकुत्रांतर्भवितुमितिचे
त् ॥ व्यंग्यभेदेष्वितिगृहाणनहिव्यंग्यभेदाःसर्वेप्यपरिमिताअलंकारप्रकारगोष्पदेतैर्भावयितुंशक्यंते ॥ य
थापिकुवलयानंदकृतानिंदायागम्यत्वेउदाहृतं ॥ अर्धंदानववैरिणागिरिजयाप्यर्धंशिवस्याहृतंदेवेत्थंजग
तीतलेस्मरहराभावेसमुन्मीलति ॥ गंगासागरमंबरंशशिकलानागाधिपःक्ष्मातलंसर्वज्ञत्वमधीश्वरत्व
मगमत्वांमांचभिक्षाटनं ॥ अत्रसर्वज्ञःसर्वेश्वरोसीतिराज्ञःस्तुत्याव्याजरूपयामदीयवैदुष्यदारिद्र्यादिजान
न्नपिबहुप्रदानेनरक्षितुंशक्तोपिमह्यंकिमपिनददासीतिनिंदाव्यज्यतइत्युक्तं ॥ तन्न ॥ साधुदूतिपुनःसाधु
कर्तव्यंकिमतःपरं ॥ यन्मदर्थेविलूनासिदंतैरपिनखैरपि ॥ इत्यनुपदमेवत्वदुदाहृतपद्येनास्यातिनमांबेलक्ष

र०गं० प्यात्।।तत्रहिसाधुकिमतःपरंकर्तव्यमितिवर्णकोदीरितासाधुकारिणीत्वरूपास्तुतिःश्रवणमात्रेणैवबाधिताविप
३०१ रीतेर्थेस्वात्मसमर्पणेनपर्यवस्यति।।इहतुसर्वज्ञत्वमधीश्वरत्वंनतथा।।राजवर्णनप्रस्तावेराजगताज्ञत्वपाम
रत्वयोरविवक्षितत्वात्।।अतएवसर्वज्ञोपिसमर्थोपिमानरक्षितवानसीत्युपालंभरूपापिनिंदानात्रविवक्षि
तासर्वज्ञस्यसमर्थस्यतवदरिद्रोहंरक्षितुंयोग्यइतिस्वविज्ञापनायाएवप्रत्युतविवक्षितत्वात्।।अस्तुवात्वदुक्तो
पालंभरूपानिंदात्रगम्यातथ्यपितुभवानेवमपिसाधुरितिपुनःसाध्वितिपद्येसाधुकारिणीत्वमिवनास्मिन्पद्येस
मधीभरलौ चे- र्वज्ञत्वंचविशुद्धगुरप्रतिभमितिशक्यंवक्तुंउपालंभरूपायानिंदायाअनुत्थानापत्तेःप्रतीतिविरोधाच्चेतिसहृद ३०१
येराकलनीयंकिमुक्तंद्रविडपुंगवेनेति।। ।।इतिरसगंगाधरेव्याजस्तुतिप्रकरणं।। ।।अथाक्षेपः।।उपमेयस्य

उपमानसंबंधिसकलप्रयोजननिष्पादनक्षमत्वादुपमानकैमर्थ्यमुपमानाधिक्षेपरूपमाक्षेपइतिकेचिदा
हुः।।तन्मतेनेत्थमुदाहरणंनिर्माणीयं।।अभूदप्रत्यूहःकुसुमशरकोदंडमहिमाविलीनोलोकानांसहनय
नतापोपितिमिरैः।।नवास्मिन्पीयूषंकिरतिपरितस्तन्विवदनेकुतोहेतोःश्वेतोविधुरयमुदेतिप्रतिदिनं।।य
थावा।।वसुधावलयपुरंदरविलसतितिभवतःकरांभोजे।।चिंतामणिकल्पद्रुमकामगवीभिःकृतंजगति।।आ
द्येउपमानप्रयोजननिष्पादनंशाब्दं।।द्वितीयेत्वार्थमितिभेदः।।अपरेतुपूर्वोपिन्यस्तस्यार्थस्यपक्षांतरालंबन
प्रयुक्तोनिषेधआक्षेपइत्याहुः।।तेषांमतेइदमुदाहरणीयं।।स्फुराणामारोमादिहहरिगिनिर्झरानिलहताःप
तेयुःशाखींद्रायदिनदखिलानंदतिजनः।।किमेभिर्वाकार्यंशिवशिवविवेकेनविकलैश्चिरंजीवन्नास्तामधि

र॰गं॰ धिरणिदिल्लीनरपतिः॥अत्रकिमेभिरित्याद्युत्तरार्द्धेनपूर्वार्धोक्तपक्षप्रतिक्षेपमात्रंपक्षांतरालंबनेनक्रियते
३०२ ॥यथावा॥किंनिःशंकंशेषेशेषेवयसित्वमागतोमृत्युः॥अथवासुखंशयीथाजननीजागर्त्तिजान्हवीनिकटे
॥अन्येतुनिषेधोवक्तुमिष्टस्ययोविशेषाभिधित्सया॥वक्ष्यमाणोक्तविषयःसआक्षेपोद्विधामतः॥विशेषंव्यं
व– ग्यरूपमर्थविशेषंवक्तुंविवक्षितस्यप्रकृतार्थस्यनिषेधोनिषेधदृशःकथनादिप्रत्याख्यानरूपःसवक्ष्यमाण स–
विषयउक्तविषयश्चेतिद्विविधइत्याहुः॥तेषांमतेइत्थमुदाहार्यं॥रीतिंगिराममृतवृष्टिकिरांत्वदीयांतांचाकृ
तिंकृतिवरैरभिनंदनीयां॥लोकोत्तरामथकृतिंकरुणारसार्द्रांज्ञातुंनकस्यचिदुदेतिमनःप्रसादः॥अत्रकरि
स– ष्यमाणस्यमनःप्रसादस्यनिषेधोवर्णनीयस्यानिर्वाच्यतांबोधयितुं॥श्वासोनुमानवेद्यःशीतान्यंगानिनि

श्चलादृष्टिः॥तस्याःसुभगकथेयंतिष्ठतुतावत्कथांतरंकथय॥अलंकारसर्वस्वकारादयस्तुप्राकरणिकस्या
र्थस्यनिषेधोप्रतिष्ठितत्वादाभासमात्ररूपःकस्यचिदर्थविशेषस्यविधानंव्यनक्तिसएकः॥अप्राकरणिक अ–
स्यविधिस्तादृशएवसन्निषेधेपर्यवस्यतिसोपरइत्युभयविधोप्ययमाक्षेपः॥तत्रनिषेधाभासरूपआक्षेप
स्तावद्द्विविधः॥उक्तविषयोवक्ष्यमाणविषयश्चेति॥उक्तविषयोपिद्विविधः॥क्वचिद्वस्तुमात्रनिषेधात्क्वचिद्व
क्ष्य– स्तुकथननिषेधात्॥वक्ष्यमाणविषयस्तुकथननिषेधात्मकएवसामान्यधर्मावच्छिन्नप्रतियोगिताकोवा
र्प्य– तरसमर्प्यमाणोपिविशेषरूपेणनिषेधात्मनाक्षिप्तोनिषेध्यमानगतंविशेषांतरमाधत्तेसोपिद्विविधः॥सामा
न्याश्रयकिंचिद्विशेषनिरूपणानिरूपणाभ्यां॥तत्रनिरूपितेषुयत्किंचिद्विशेषेषुप्रयोजनाभावादप्रवर्तमा

र०गं० नोनिषेधोवक्ष्यमाणेष्टविषयएवसंपद्यते॥अनिरूपितेपुरस्कृततरां॥चतुर्विधेऽस्मिन्नाक्षेपेइष्टोर्थस्तस्यच प्य
३०३ निषेधस्तस्याप्यसत्त्वमर्थगतविशेषप्रतिपादनंचेतिचतुष्टयमुपयुज्यते॥तेननात्रनिषेधविधिर्नवावि
हितनिषेधोऽपितुनिषेधेनासत्येनविधेराक्षिप्यमाणत्वाद्योगार्थादाक्षेपः॥सचप्रागुक्तदिशाचतुर्विधः॥ रा
॥विधिनात्वसत्येननिषेधस्याक्षेपेऽपरोयमाक्षेपः॥अप्यनिष्टोर्थस्तस्यविधिस्तस्याप्याभासत्वंअर्थ त्रा
गतविशेषप्रतिपादनंचेतिचतुष्टयमुपयुज्यतेइत्याहुः॥एतेषांमतेचेत्थमुदाहरणंनिर्माणीयं॥नवयंक
वयस्तवस्तवंनृपकुर्वीमहि[illegible]पक्ष्मषाक्षरं॥रणसीम्नितवावलोकनेनरुणाकौदिनकौशिकायते॥मांपा ३०३ न्नि
हीनिविधिर्विधेयविषयोवाच्यःस्वतंत्रेकथंनोपेक्ष्योभवतोऽस्मिदीनइतिगीःश्लाघ्यानसंख्यावतां॥एवं

दोषविचारणाकुलतयादेवत्वयिप्रोन्मुखेवक्तव्यप्रतिभादरिद्रमतयःकिंचिन्नहिब्रूमहे॥रेखलतवखलु
चरितंविदुषामग्रेविविच्यवक्ष्यामि॥अलमथवापापात्मनकृतनयाकथयापितेहतया॥श्वासोनुमानवेद्यः
शीतान्यंगानिनिश्चलादृष्टिः॥तस्याःकिंवापृच्छसिनिर्दयतिष्ठत्वसौहतावार्त्ता॥तत्राद्यपद्येकवेरुक्तोक
त्वनिषेधोबाधितोमिथ्यावादित्वनिषेधात्मनापर्यवस्यन्नुत्तरार्धगतस्यार्थस्यसत्यत्वरूपंविशेषंव्य
नक्ति॥एवंद्वितीयपद्येरक्षणदानयोःकथनस्यखलाभिषेधोबाधितस्तयोर्विवक्षितत्वेपर्यवस्यन्नवश्या
नुष्ठेयतां॥तृतीयेखलसंबंधिवृत्तांतकथनत्वेनसामान्यरूपेणप्रकृतयेश्वन्यादिवृत्तांतकथनस्यवक्ष्य
माणस्यनिषेधःकथ्यमानस्तस्याचिंतितदुःखप्रतां॥चतुर्थेकंचनतत्संबंधिन्यावार्त्तायांअंशेश्वासना

दं

र॰गं॰ नवादिकंकथयित्वाक्रियमाणोनिषेधोवक्ष्यमाणमरणवार्त्ताविषयःसन्नूनंतस्यामुखादनिःसारणीयतां॥
३०४ एषुनिषेधस्याप्रतिष्ठानान्नविहितनिषेधोनापिनिषेधविधिः॥नपोनिधेकौशिकरामचंद्रंनिर्नीपसेन्वेत्न
याकिंविकल्पैः॥निरंतरालोकनपुण्यधन्याभवंतुन्याइहजीवभाजः॥अत्रपुत्रस्नेहाकुलस्यदशरथस्य व-
वाक्येनयेतिविधिर्बाधितोमानयेतिनिषेधेपर्यवसितोअन्यथातुममप्राणवियोगोभविष्यतीत्यर्थव्यंजन
त्तातिविध्याभासरूपोयमाक्षेपः॥एवमुदाहरणेषुस्थितेषुप्राचीनमतानुसारीण्याक्षेपोदाहरणान्येते
षांमतेनुदाहरणान्येव॥इत्थंचप्राथमिकमतसिद्धआक्षेपःप्रतीपप्रभेदोद्वितीयमतसिद्धस्तुविहितनिषे ३०४
ध एवंपुनराक्षेपस्तत्रनिषेधस्यानाभासरूपत्वादितिनदाग्रहः॥इतरेतुनिषेधमात्रमाक्षेपःचमत्का

रित्वंचालंकारसामान्यलक्षणप्राप्तमेवतच्चव्यंग्यार्थेसतिसंभवतीतिसव्यंग्योनिषेधःसर्वोप्याक्षेपालंकारः॥
एवंचोपमेयकृतोपमानकैमर्थक्यपक्षांतरालंबनकृतप्राचीनपक्षकैमर्थक्यविशेषप्रतिपादनप्रयोजकोक्त
वक्ष्यमाणकथनकैमर्थक्यानामनुपदोक्तनिषेधविध्याभासयोश्चसंग्रहइत्याहुः॥अथाक्षेपध्वनिस्तन्मता त-
नुसारेणोदाह्रियते॥त्वामवश्यंसिसृक्षन्यःसृजतिस्मकलाधरं॥किंवाच्यंनस्यवैदुष्यंपुराणस्यमहामुनेः॥
अत्रयेषामुपमानकैमर्थक्यमाक्षेपस्तेषांत्वयिसतिकिंकलाधरेणेत्यंशमादायतेषांचनिषेधमात्रमाक्षे
पस्तेषांवृद्धस्यब्रह्मणोवैदुष्यंनास्तीत्यंशमादायचध्वनिः॥ननुकिंवाच्यंनस्यवैदुष्यमितिवैदुष्योक्तेःसबाधा
याःझटितिवैदुष्याभावेपर्यवसानादुपमानकैमर्थ्यस्यापिझगित्येवप्रतीतेर्वाच्यकल्पत्वात्कथंनामैतन्नित्वं ध्व॰

र०गं० स्यादिति ।। नैषदोषः ।। ब्रह्मणोहित्वांसिसृक्षतः करणपाटवसंपत्त्यर्थमादौपांडुलेखवदिदंनिर्मितवतः किं
३०९ वैदुष्यंवाच्यमितिवैदुष्योक्तेर्निर्बाधत्वादादौसत्यांविश्रांतौपश्चादवश्यंपुराणस्यैतदर्थपर्यालोचनेननवैदुष्या त्ये
भावचंद्रकेमर्थ्ययोः पर्यवसानमितिनध्वनित्वस्वरूपं ।। येषांत्वाभासरूपएवनिषेधआक्षेपस्तेषांनप्रागु व
क्तआक्षेपध्वनिरपित्वयं ।। त्वांगीर्वाणिगुरुंसर्वेवदंतुकवयस्तुते ।। समानकक्ष्यस्तेमात्येषोर्थस्तमतोमम
।। अत्रकवेर्वाक्येबाधितत्वादाभासरूपोनाहंकविरितिनिषेधोगम्यमानोमिथ्यावादित्वाभावरूपेणपर्यव
स्य सन्नुत्तरार्धार्थस्यसत्यतारूपंविशेषंगमयति ।। इत्थंस्वस्वाभिमानभेदादाक्षेपाणांभेदात्त्वध्वनीनांस्थितेनवि ३०९द
वेकेसवक्तुमखिलान्शक्तोहयग्रीवाश्रितान्गुणान् ।। योंबुकुंभैः परिच्छेदंज्ञातुंशक्तोमहोदधेरितिपद्यंध्व

निकारैराक्षेपध्वनित्वेनोदाहृतंस्वाभिमताक्षेपानभिव्यक्तेरनुदाहरणमेवैतदितिनिर्युक्तिकंवदन्नलंकारस
र्वस्वकृत्परास्तः ।। नह्याभासरूपएवनिषेधआक्षेपइत्यस्तिवेदस्याज्ञानापिप्राचामाचार्याणांनचापियुक्तिर्येनध्व
निकारोक्तमुपेक्ष्यत्वदुक्तंश्रद्दधीमहिप्रत्युतवैपरीत्यमेवोचितं ।। ध्वनिकृतामालंकारिकसरणिव्यवस्थापकत्वा
त् ।। नह्यस्मिन्शास्त्रेआक्षेपादिशब्दसंकेतग्राहकंप्रमाणांतरमस्तिऋतेप्राचीनवचनेभ्यः ।। अन्यथासकलवि
पर्यासापत्तेः ।। यत्तुनरेंद्रमौलेनवयंराजसंदेशहारिणः ।। जगत्कुटुंबिनस्तेद्यनशत्रुः कश्चिदिष्यतइतिपद्यंलं म
कारसर्वस्वकारमतेनोदाहृत्येत्थमुक्तंकुवलयानंदकृता ।। अत्रसंदेशहारिणामुक्तोनवयंसंदेशहारिणइति
निषेधोनुपपन्नः संधिकालोचितकैतववचनपरिहारेणयथार्थवादित्वेपर्यवस्यन्सर्वजगत्पालकस्यतव

र॰गं नकश्चिदपिशत्रुभावेनावलोकनीयः किंतु सर्वेपि राजानो भृत्यभावेन संरक्षणीया इति विशेषमाक्षिपतीति
३०६ ॥तन्न॥ त्वदुक्तस्य विशेषस्य निषेधाव्यंग्यत्वात्॥ नहि न वयं राजसंदेशहारिण इत्युक्ते तव न कश्चिदपि शत्रु
भावेनावलोकनीयः किंतु सर्वेपि राजानो भृत्यभावेन संरक्षणीया इति विशेषोवगम्यते। अवगम्यते च त्वद्गत्कु
द्वंबिन इत्याद्युत्तरार्धप्रयुक्ते। यो हि निषेधमात्रसामर्थ्याक्षिप्तो विशेषस्तं निषेध आक्षिपतीति युक्तं वक्तुं॥ ननु यु
परकीयं विशेषं॥ तथाहि राजसंदेशहारिणा प्रयुक्तेन वयं राजसंदेशहारिण इति वाक्ये स्वस्मिन्स्वनिषेध यु
स्य बाधाद्राजसंदेशहारिपदेन लक्षणया राजसंदेशहारिनिष्ठकैतववचनप्रयोक्तृत्वादिधर्मवंतउपस्था ३०६
प्यंते॥ प्रयोजनं च तन्निषेधे सति स्वगतस्य सत्यवक्तृत्वादेः स्वप्रवचनगतस्य सत्यत्वादेर्वा प्रत्ययः॥ अयमेव च

विशेषस्याक्षेपः॥ एवं स्थिते किमुच्यते तव न कश्चिदपि शत्रुभावेनेत्यादि॥ यदि तु पूर्वोक्तादेव बाधाद्राजपदस्य
शत्रुलक्षणया न वयं शत्रुसंदेशहारिण इति प्रातिनार्थेनास्मत्स्वामिनः शत्रव एव न भवंति किंतु भृत्यभावेन
पालनीया इति विशेषोवगम्यत इत्युच्यते॥ तदा तु तादृशकक्षारूढो नास्मत्स्वामिन इति निषेध आक्षेपः स्या
भ तदुत्थापकस्त्वदुक्तो यथाश्रुतनिषेधः॥ यदि तु परंपरया यथाकथंचिद्विशेषोत्थापकोप्याक्षेप इत्युच्यते॥
तथापि संधिकालोचितकैतववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन्नित्यादेस्त्वद्वचनस्यासंगतिरेव॥ न
हि यथार्थवादित्वेन केवलेन त्वदुक्तो विशेष आक्षेप्तुं शक्यते किंतूत्तरार्धेनाक्षिप्तः परिपोषं॥ तस्मात् यत्र त्व
या निषेधस्य पर्यवसानमुक्तं स एव विशेषस्तस्याक्षेपो न तु विशेषांतरं॥ अत एव बालकनाहं दूतीत्यत्र दूती

र॰गं॰ त्वस्यवस्तुनोनिषेधेनवस्तुवादित्वादिर्विशेषोव्यज्यतइत्यलंकारसर्वस्वकृतोक्तंसंगच्छते॥इतिरसगंगाधरे
३०७ आक्षेपप्रकरणं॥अथविरोधमूलालंकाराः॥एकाधिकरणासंबंधित्वेनप्रतिपादितयोरर्थयोर्भासमानैका
धिकरणासंबंधित्वमेकाधिकरणासंबंधित्वभानंवाविरोधः॥यद्वाएकाधिकरणासंबंधित्वेनप्रसिद्धयोरेकाधि
करणसंबंधित्वेनप्रतिपादनंसः॥सचप्ररूढोऽप्ररूढश्च॥प्ररोहश्चबाधबुद्ध्यनभिभूतत्वंतद्वैपरीत्यमप्ररोहः॥तत्र
आद्योदोषस्यविषयोद्वितीयश्चालंकारस्य॥अतएवेमंविरोधाभासमाचक्षते॥आईषद्भासनेइत्याभासःविरो
धश्चासावाभासश्चेति॥आमुखएवप्रतीयमानोझगितिजायमानाविरोधबुद्धितिरस्कृतइतियावत्॥तत्रापि ३०७
कार्यकारणादिबुद्ध्यनालीढोविरोधाभासोविरोधालंकारः॥तदालीढस्तुविभावनादिर्वक्ष्यमाणः॥अस्यच

जातिगुणक्रियाद्रव्याणांपदार्थानांमध्येजातेर्जातिगुणक्रियाद्रव्यैर्गुणस्यगुणक्रियाद्रव्यैःक्रियायाःक्रिया
द्रव्याभ्यांद्रव्यस्यद्रव्येनेत्यपुनरुक्तादशभेदाः॥क्रियाचात्रनवैयाकरणानामिवशुद्धभावनानापिनैयायिका
नामिवस्पंदरूपाकिंतुतत्तद्धातुवाच्याविशिष्टव्यापाररूपा॥उदाहरणं॥कुसुमानिशरामृणालजालान्यपिका
लायसकर्कशान्यभूवन्॥स्फुटदृशोदहनायतेस्मराकाभवनाकाशमथाभवत्पयोधिः॥अत्रपुरःस्फुरन्नपिजा
त्यादीनांविरोधोविरहिणीदुःखजनकत्वविमर्शनाभिवर्तते॥त्वयिदृष्टेत्वय्यदृष्टेभवंतिजगतीतले॥महां
तोप्यणवोराजन्नणवश्चमहत्तराः॥खलानामुक्तयोहंतकोमलाःशीतलाअपि॥हृदयानीहसाधूनांछिंदंत्य
स्यथदहंतिच॥विचारितेमहिमनित्वदीयेनिसर्गनिर्मले॥परमात्मनगरस्याधत्तेपरमाणुतां॥हर्षयंतिक्षणा

क्षणादेव B

B. omits

र०गं० देवद्रदहंतिचा पुनः पुनः।।पुनः स्मरपराधीना निर्दयाहतयोषितः।।कांतारे विलपंतीनां त्वद्रातिमृगीदृशां।।

३०८ दैविनानि समाकर्ण्य हरिद्भिरपि चुक्षुभे इत्यादिस्वयंमूह्यं।अत्र जात्यादिरिति धर्ममात्रं विवक्षितं।।उपलक्षण

परत्वात्।।तेनयः किलबालकोपि पुराणपुरुषो विशुद्धमूर्तिरपि नीलाबुदनिभो जगद्धितकृदपि जगदहितकृद्

गोद्धारकोपि नागोद्धारक इत्यादौ सखंडोपाधेरभावस्य च परिग्रहः।।वस्तुतो जात्यादिभेदानामहृद्यत्वात् शुद्ध

ल त्वश्लेषमूलत्वाभ्यां हि विधिर्ज्ञेयः।।ननु हितकृदप्यहितकृत् अगोद्धारकोपि नागोद्धारक इत्यादौ विरोधस्य प्रति

प्रायशः भासमात्रं श्लेष एव त्वलंकारस्तस्य च स्वविषये [illegible] सर्वालंकारापवादकत्वादिति चेत्।।कदिः शृणोमि।

इदं नु बोध्यं।।यत्रापि शब्दादिर्विरोधस्य द्योतकस्तत्र विरोधः शाब्दोन्यत्र त्वार्थ इति नाव्यास्त्राव्यासिद्धांतस्तत्र शाब्द

DR BHAU DAJI

क त्वं शब्दकरणं प्रतीतिगोचरत्वं विरोधस्य नयदत्रयोप्यत्र य इत्यादौ नियतेषु विशेषणविशेष्यसंसर्गेषु विरोधस्य

कुत्राप्यसमावेशात्।।न च तदधिकरणावृत्तित्वमिव तत्प्रतियोगिकत्वमपि विरोधस्तथा च प्रकृतेन [illegible]र्थेनास अ

दार्थयोः प्रतियोगित्वस्य संसर्गत्वात्संसर्ग एव विरोधस्य समावेश इति वाच्यं।।सुप्तोपि प्रबुद्ध इत्यादौ तथाप्यसमा

वेशात्।।नहि सुप्तः सुप्तत्वविरुद्धप्रबुद्धत्ववदभिन्न इति शाब्दधीरनुभवसिद्धा येन लक्षणादि कुस्सृष्टेयतेमहि।।

अत्राहुः।।सुप्तोपि प्रबुद्धः त्रयोप्यत्र य इत्यादिषु विरोधोदाहरणेषु शब्दद्वयेन शयितत्वजागरितत्वादिधर्मद्वय

स्यादावुपस्थितौ संबंधिज्ञानादपि शाब्दसान्निध्यात्तद्गतो विरोधोपि स्मर्यते।।अनंतरं च प्रतिबंधकज्ञानसामग्र्या

बलवत्त्वात् विरुद्धा विमौ धर्मावितिमानसे वै यं जनिके वा विरोधबोधे जाते तेन प्रतिरोधात्स्वपितजागरितयोरभे

र०गं० दबुद्धेरनुत्पादनात्‌द्वितीयशङ्क्याप्रादुर्भावितद्वितीयार्थमादायान्वयबोधोनतुविरुद्धार्थभङ्गःविरुद्धधीश्चशिथिल
३०९ मूलानिवर्त्तमानापिकविसंरंभगोचरतयाचमत्कारकारणमितिप्राचांनिष्कर्षः॥नव्यास्तुअर्थद्वयप्रादुर्भावंविना
विरोधाभासएवनसंभवति॥तत्रैकोविरोधस्योद्धासकोद्वितीयश्चान्वयबोधविषयइतिसत्यंपरंतुअन्वय
बोधविषयेद्वितीयार्थेविरोधोद्भासकोप्यर्थोभेदेपिश्लेषभित्तिकाभेदाध्यवसायइत्युक्तदिशाअभिन्नतयाभा
सतेएवंचाविरुद्धद्वितीयार्थमादायान्वयबोधेसत्यपिस्वास्पदीभूतस्यविरुद्धार्थस्यनिःशेषतयानिष्पत्तेरभावा
दर्धमृतःश्वसन्निवविरोधोपिमानसंबोधांतरमारोहति॥अतएवचमत्कारीत्युच्यते॥नहिनिःशेषतयानिवृत्त ३०९
श्चमत्कारंजनयितुमीष्टेनचांतरेणचमत्कारजनकतामलंकारोभवति॥तस्माद्विरोधस्यानातीवशिथिलमूलत्वं

नापिचात्यंतिकीनिवृत्तिरित्याहुः॥नन्वपिशब्दादीनांप्रयोगेशाब्दोविरोधोभासतइतितथाप्यसंगतंनिपातानां
शाब्दिकनयेशक्तेरस्वीकारादितिचेत्‌ननिरूढलक्षणायाइवनिरूढद्योतनायाअपिशक्तिसदृशत्वात्‌॥अथ म-।३
जात्योर्द्रव्ययोश्चविरोधालंकारोनभवितुमीष्टेकुसुमानिशराश्चंद्रोवाडवोदुःखितेहृदिइत्यादावारोपमूलस्य
रूपकस्यैवोद्भासात्‌॥यदिचसत्यप्यारोपेविरोधाभासउच्यतेउच्यतांतर्हिमुखंचंद्रइत्यत्रापिसएव॥नचरू
नि विषय(वा)पकविषयस्यसर्वस्यापिविरोधेनाक्रांतत्वापत्त्यास्वविषयेरूपकंविरोधस्यगुणादोसावकाशस्यापवादइतिवाच्यं
॥कुसुमानिशरामृणालवलयादिदवदहनोराशिश्चंद्रोवाडवःशंकरचूडापगाकालिंदीत्यादौत्वदभीष्टविरोध
स्यासिद्धिप्रसंगादितिचेत्‌सत्यं॥इहहिअलंकारवर्गेयोयत्रसहृदयचमत्कृतिपथमवतरतिसएवतत्रालंकार

र॰गं॰ इतिनिर्विवादं॥एवंचरूपकेमुखंचंद्रइत्यादौयद्यप्यस्तिविरोधस्तथापिनसतत्रप्रतिपिपादयिषितोपितुचंद्र
३१० निष्ठाल्हादकत्वादिसकलगुणानांमुखेप्रतिपत्त्यर्थंचंद्राभेदएवेतिसएवचमत्कारीनविरोधः॥प्रत्युतसन्नपि
विरोधोविवक्षितार्थाननुगुणत्वान्नोल्लसितइतिनालंकारः विद्यमानतायाअकिंचित्करत्वात्॥कुसुमानिशरा
इत्यादौतुविरहिएयादीनामवस्थायाअत्यद्भुतत्वस्यविवक्षितत्वात्तदानुगुण्यायान्तर्गर्भितोप्यर्थोविरोधःसमु
ल्लसतीतिसएवालंकारः॥नचैवमपिरूपकस्थलेविरोधोविवक्षितत्वान्मानामभूदलंकारोविरोधस्थलेतु
कुसुमानिशराइत्यादौविरोधोत्थापनार्थमभेदस्यावश्यंविवक्षणीयत्वाद्रूपकापत्तिरितिवाच्यं॥विरोधविव ३११
क्षानालिंगितत्वस्यरूपकलक्षणेनिवेश्यत्वात्यद्वाअभेदस्यात्रविरोधोत्थापनार्थमुपात्तस्याचमत्कारित्वाद्रूपका

लंकारत्वमयुक्तंतत्तदलंकारलक्षणेषुअलंकारसामान्यलक्षणेवाचमत्कारित्वस्योक्तत्वात्॥यदितुविरहि
एयाद्यवस्थायाअत्यद्भुतत्वादिनविवक्षितमप्यर्थश्चनगर्भीकृतःकिंतुपीडाजनकत्वश्यामत्वाद्यतिशयमात्रंवि
वक्ष्यतेतदात्ररूपकमेव॥यदिवानगरविशेषस्थितेरद्भुतत्वविवक्षयायत्रहिनारीणांमुखंचंद्रइत्युच्यतेतत्रा
विरोधाभासएवेतिध्येयं॥ननुसुप्तोपिप्रबुद्धइत्यादौयथैकेनार्थेनविरोधस्योत्थानमपरेणचनिवृत्तिरेवंगंगा
यांघोषोमंचाःक्रोशंतिकुंताःप्रविशंतीत्यादावपिवाच्येनतस्योत्थानंलक्ष्येणचनिवृत्तिरितिविरोधाभासप्रसंगः।
नचदृष्टांतेविरोधोत्थापकनिवर्तकयोरर्थयोःशक्त्यैवोपस्थितिदार्ष्टांतिकेतुपृथग्वृत्त्येतिवैलक्षण्यमितिवाच्यं
॥सत्यपिवैलक्षण्येत्वदुक्तविरोधाभासलक्षणातिप्रसंगस्यानिवारणात्नहिलक्षणेविरोधोत्थापकनिवर्तक

र॰गं॰ योरेकव्यक्तिवेद्यत्वमेकजातीयव्यक्तिवेद्यत्वंवाविवक्षितं॥नथासतिकुसुमानिशराइत्यादौप्राचीनरीत्याव्या
३११ त्तिप्रसंगादितिचेन्न॥विरोधस्यात्रप्रतिभासेपिकविसंरंभागोचरत्वेनाचमत्कारित्वात्॥अयंचविरोधालंका सं
रःकुवलयानंदकृताउत्प्रेक्षाशिरस्कोप्युदाहृतः॥यथा॥प्रतीपभूपैरिवकिंततोभियाविरुद्धधर्मैरपिभेत्तृता
ज्झिता॥अमित्रजिन्मित्रजिदोजसासयद्विचारदृक्चारदृगप्यवर्त्ततेति॥विरोधप्रतीत्यनंतरंयत्रार्थांतरप्र
तीत्याविरोधस्यसमाधानंतत्रविरोधाभासइष्यते॥यथा॥रिपुराजिरसभावभंजनोप्यरिपुराजिरसभावभंजन र—र
इत्यादौइहतुउत्प्रेक्षयाविरोधसमाधानात्मिकयामुखच्छिन्नयाविरोधस्योत्थानमेवभग्नमितिकथमनुत्ति ३११
ष्ठन्नेवविरोधश्चमत्कारमूलमलंकारभावंवहेत्॥इतिविरोधप्रकरणं॥अथविभावना॥कारणव्यतिरेक

सामानाधिकरण्येनप्रतिपाद्यमानाकार्योत्पत्तिर्विभावना॥तदुक्तंक्रियायाःप्रतिषेधेपिफलव्यक्तिर्विभाव
नेति॥क्रियाशब्देनात्रकारणंविवक्षितं॥अत्रकारणव्यतिरेकसामानाधिकरण्येनकार्योत्पत्तौनिबध्यमानाया
माघातंतोविरोधःप्रतिभासमानोपितदितरकारणकल्पनयानिवर्त्तते॥यथा॥विनैवशस्त्रंहृदयानियू
नांविवेकभाजामपिदारयंत्यः॥अनर्घमायामयवल्गुलीलाजयंतिनीलाब्जदलायताक्ष्यः॥अत्रहिदारणे त्म-
शस्त्रंकारणंतदभावेपिदारणमुपनिबध्यमानमापाततोविरुद्धमपिकामिनीविलासरूपहेतुकतयापर्यवस्य
ति॥नन्वत्रयस्यकार्यस्योत्पत्तिर्निबध्यतेनहितदीयकारणत्वेनावगतस्यव्यतिरेकःप्रतीयतेयदीयकारणव्य
तिरेकश्चप्रतीयतेनहितस्यकार्यस्योत्पत्तिर्निबध्यतेदारणंचेहपीडाविशेषोविवक्षितोनतुद्विधाभावःशस्त्रं

र॰गं॰ चनकामपीडायाः कारणमपि तु द्वैधीकरणस्येति चेन्न ॥ न मुख्यं हि दारणं [illegible] द्विधाभावनं गौणं त्वकामादिज
३१२ नितपीडाविशेषः तयोः गौणमुख्ययोर्दारणयोः सादृश्यमूलेनाभेदाध्यवसानरूपेणातिशयेन सति भेदस्थ
गने द्विधाभावनकारणमपि शस्त्रं कामपीडाकारणं संपद्यते ॥ तदभावे चात्र कार्याभिन्नतयाध्यवसितस्य
पीडाविशेषस्योपनिबंधनान्न दोषः ॥ एवं चास्मिन्ननलंकारे सर्वत्रापि कार्यांशे अभेदाध्यवसानरूपातिशयो
क्तिरनुप्राणकतया स्थिता ॥ तथा च पायसादिपिंडवदेकीकृतस्य वस्तुनः सदृशवस्तुद्वयस्यैकावयवसंबंधिका
रणव्यतिरेकसामानाधिकरण्येनापरावयवमादाय पर्यवसानं भवति ॥ तत्र च कार्यांशः कारणाभावरूप ३१२
विरोधिनो बाध्यतयैव स्थितो न बाधकतया कार्यांशस्य कल्पितत्वात् कारणाभावस्य च स्वभावसिद्धत्वात् ॥

अत एव कार्यांशो रूपांतरेण पर्यवस्यति ॥ अत एव च समबलविरोधिद्वयघटिताद्विरोधालंकारादस्य वैलक्ष
ण्यं ॥ तथा चोक्तं ॥ कारणस्य निषेधेन बाध्यमानः फलोदयः ॥ विभावनायामाभाति विरोधोन्योन्यबाधनमि
त्याहुः ॥ अथातिशयोक्तिर्न सर्वस्यां विभावनायामनुप्राणिका किं तु क्वचित् ॥ निरुपादानसंभारमभित्तावेव
तन्वते ॥ जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने इत्यत्र विभावनायामतिशयोक्तेरध्यवसानमूलाया अननु
प्राणकत्वादिति ॥ ननु कारणाभावे कार्योत्पत्तिरसंभवतीति कविना अभिप्रायविशेषेण निबध्यमाना हि विभाव
ना न चात्रोपादानांतराभावे जगत उत्पत्तिः परमेश्वरादसंभवतीति येन विभावना स्यात् नासदासीत् सदेव सौ
म्येदमग्र आसीदात्मा वा इदमेक एवाग्र आसीत् असद्वा इदमग्र आसीत् ततो वै सदजायतेत्यादिश्रुतिभ्यः ॥

र॰गं॰ अहमेवासमेवाग्रेनान्यद्यत्सदसत्परम्[illegible]त्यादिस्मृतिभ्यश्चसृष्टिकालेभगवदतिरिक्तवस्तुज्ञानप्रतिषेधावग
३१३ मात्।।तस्मादत्रविभावनायाएवसंभावनानास्तिकुतःपुनरतिशयोक्त्यनुप्राणितत्वव्यभिचारइतिचेत्।।न।।अत्र
हिभगवतःसकाशात्केवलस्यजगतउत्पत्तिर्नकैश्चिदभिप्रेतायेनतस्याउपादानांतरव्यतिरेकेपिभगवतःसका
शात्संभवादसंभवमूलाविभावनानस्यात्किंतुजगद्रूपस्यचित्रस्यचित्रस्यचकेवलस्योपादानानामपीहरि
तालादीनामाधारस्यभित्त्यादेश्चाभावेकेवलाकाशेजागर्त्यैवोत्पत्तेरसंभवःसचतस्यजगद्रूपतानुसंधानात्त
त्कारणादीनश्चयव्यतिरेकमादायनिवर्ततइतिनिरुपादानसंभारमित्यत्रनिरुपाधिहेवविभावनेतिभवत्यतिश ३१३
योक्त्यनुप्राणितत्वव्यभिचारः।।एतेनविभावनायांसर्वत्रातिशयोक्तिरनुप्राणिकेतिसर्वस्वकारोक्तिरपास्ता।।

तथाविभावनायाएवाभावात्कुत्रव्यभिचारइतिवदन्विमर्शिनीकारोपिप्रत्युक्तइति।।उच्यतेमास्तुभूत्सर्वत्रवि
भावनायामतिशयोक्तिरनुप्राणिका।आहार्याभेदबुद्धिमात्रमेवानुप्राणकंतच्चक्वचिदतिशयोक्त्याक्वचिद्रूप
केणेतिनदोषः।।यत्तुकारणंविनाकार्योत्पत्तिरेकाविभावनाकारणानामसमग्रत्वेद्वितीयासत्यपिप्रतिबंधके
कार्योत्पत्तिस्तृतीयाअकारणात्कार्योत्पत्तिश्चतुर्थीविरुद्धात्कार्यजन्म[illegible]कमेणोदाहरणं।अथलाक्षारसा पंचमी। कार्या-
सिक्तंरक्तंतन्व्याःपदांबुजं।।अस्त्रैरतीक्ष्णकठिनैर्जगज्जयतिमन्मथः।।सातपत्रंदहत्याशुप्रतापतपनस्तव।।शं तु कारण जन्म षष्ठी।
खाद्वीणानिदोनोयमुदेतिमहदद्भुतं।।शीतांशोःकिरणाहंतदहंतिसदृशोदृशो।।[illegible]नयाधिरभवत्करक यशः।
अनरोस्तवेति।।षट्प्रकाराविभावनामुदाजहारकुवलयानंदकृत्।।तत्रेदंवक्तव्यं।।कार्योत्पत्तिस्तृतीया

र॰गं॰ स्यात्सत्यपिप्रतिबंधके॥ अकारणात्कार्यजन्मचतुर्थीस्याद्विभावनेत्यादिभिर्विभावनाप्रकारानालक्षयताविनापिकारणंकार्योत्पत्तिरित्येकोविभावनाप्रकारइत्युक्तंभवति॥ अन्यथाचतुर्थीत्वाद्यसंगतेः॥ एवंचयथासादृश्यमुपमाभेदेतद्रूपकमभेदोयउपमानोपमेययोरित्यादिभिर्लक्षितस्योपमारूपकादिसामान्यस्यपूर्णादयःसावयवादयश्चभेदाउक्तास्तथेहकिंतद्विभावनासामान्यलक्षणंयल्लक्षितस्यविभावनासामान्यस्यामीभवंतोकाःप्रकाराउपपद्येरन्॥ कारणंविनाकार्योत्पत्तेस्तुप्रकारांतःपातित्वात्॥ अथातिशयोक्त्यादिष्विवतादृशसकलप्रकारान्यतमत्वंसामान्यलक्षणमुन्नेयमितिचेन्न॥ एवमपिप्रथमप्रकारात्द्वितीयप्रकारस्यवैलक्षण्यंदुरुपपादमेव॥ कारणाभावेपिकार्योत्पत्तिरित्यत्रकारणतावच्छेदकसंबंधेनकारणतावच्छेदकावच्छिन्नप्रति ३१४ | ३१

DR BHAU DAJI
MEMORIAL

योगिताकाभावस्यविवक्षितत्वात्॥ प्रकारांतरस्वीकारापेक्षयातादृशविवक्षायाएवलघुत्वात्॥ एवंप्रतिबंधकमपिकारणाभावएव॥ प्रतिबंधकाभावस्यकारणत्वादितितृतीयोपिभेदोनविलक्षणः चतुर्थेपिभेदेकारणाभावएवार्थः॥ शंखाद्वीणानिनादोयमुदेतीत्युक्तेवीणांविनैवेतिप्रत्ययादेवैलक्षण्यंतस्मादाद्येनप्रकारेणप्रकारांतराणामालीढत्वात्षट्प्रकाराइत्यनुपपन्नमेव॥ यदितुयथाकथंचित्कुवलयानंदोक्तिःसमर्थनीयेत्याग्रहस्तदेत्थंसमर्थ्यतां॥ तथाहि॥ विनापिकारणं कार्यजन्मेतिविभावनासामान्यलक्षणंइयंचतावद्द्वेधाशाब्दीआर्थी च॥ किंच॥ शाब्दीत्रिविधाप्रतिबंधकातिरिक्तकारणव्यक्तिप्रतियोगिकाभावोक्तिपूर्विकासत्यामपिकारणव्यक्तौयुदवच्छिन्नत्वंवैकल्यप्रयुक्तःकार्याभावस्तद्वैकल्योक्तिपूर्विकासाचकारणतावच्छेदकधर्मःक्वचित्कारणतावच्छेद

(margin: या | त | यु)

र॰गं॰ करसंबंधश्चप्रतिबंधकोक्तिपूर्विकाचेति।।आर्थ्यपित्रिधा।।प्रकृतकार्यसमानजातीयकार्यांतरस्यकारणात्प्रकृ
३१९ तकार्यविरुद्धकार्यस्यकारणात्स्वकार्याद्वाप्रकृतकारणपूर्वकस्योत्पत्तिरिति।।एतदर्थकमेवत्वथकारणादित्यादि कार्यस्यो-
।।इयंचविभावनाद्विविधाउक्तनिमित्तानुक्तनिमित्ताच।तत्रानुक्तनिमित्ता।विनैवशस्त्रमित्यत्रदर्शिता।विलासो
नांमन्मथपीडाजनकानामनुपात्तत्वात्।।उक्तनिमित्तायथा।।यदवधिविलासभवनंयौवनमुदियायचंद्रव
दनायाः।।दहनंविनैवतदवधियूनांहृदयानिदह्यंते।।अत्रहिउपात्तेयौवनेदाहहेतुत्वंपर्यवस्यति।।यत्तुअसं
भृतंमंडनमंगयष्टेरनासवाख्यंकरणंमदस्यकामस्यपुष्पव्यतिरिक्तमस्त्रंबाल्यात्परंसाथवयःप्रपेदे।।अत्र ३१९
द्वितीयचरणेआसवाभावेपिमदस्यप्रतिपादनाद्यौवनस्यचोक्तत्वादुक्तनिमित्ताविभावना।।नतुप्रथमतृती

यचरणयोःसंभरणपुष्पयोर्मंडनमस्त्रत्वप्रत्यहेतुत्वादित्यलंकारसर्वस्वकारादिभिरुक्तं।।तत्रविचार्यते।। च-/३.
विरोधमूलाहिविभावनाद्यलंकाराःविरोधस्यैवविद्युत्प्रभावदापाततःप्रतिभासमानस्यचमत्कारबीज
त्वात्।।अत्रह्यासवभिन्नत्वविशिष्टमदकारणत्वंयौवनस्योक्तं।।एवंचयौवनस्यमदकारणतायाःशब्देनैवो
पात्तत्वाद्यागेव्रीहियवयोरिवमदेयौवनासवयोःपरस्परनिरपेक्षकारणत्वावगतेर्विरोधस्यलेशतोप्यप्रति
भानाद्विभावनैवनास्तिकुतःपुनरुक्तनिमित्ताविभावना।।नत्वासवस्यप्रसिद्धमदकारणत्वात्तेनविनामदो
त्पत्तिवर्णनेविरोधप्रतिभाभवत्येवेतिवाच्यं।।भवेत्सायदियौवनस्यमदकारणत्वंकविनासाक्षान्नप्रतिपा
द्येत।।प्रतिपादितेतुतस्मिन्प्रसिद्धकारणातिरिक्ततयाकविनाप्रतिपादितमिदमपिप्रसिद्धकारणमिवकारणां

र॰गं॰ तरंभविष्यतीतिवैकल्पिककारणताप्रतिभानाभात्रविरोधप्रतिभानंभवितुमर्हति।।तस्मादत्रप्रथमतृतीयच
३१६ रणयोर्न्यूनाभेदरूपकं।।द्वितीयचरणेतुप्र[illegible]नोत्प्रेक्षेतिविवेकः।।अस्मिन्निर्मितेतूदाहरणेदहनस्यैवप्रसिद्ध तीयसमा-
का३ दाहकारणत्वाद्यौवनस्यदाहकारणतायाअश्रुतत्वाद्दहनमंतरेणदाहोत्पत्तिवर्णनेविभावनोपपत्तिः।।अथखल[illegible] ध-
कथीवरपिशुनानिष्कारणवैरिणोजगतीत्यत्रविभावनापत्तिःनन्वस्तुकिन्नश्छिन्नमितिचेन्नआलंकारिकैरत्रन
स्याअनंगीकारात्कारणतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेनकारणाभावोविशेषणीयःप्रकृतेचकारण
गि-त्वावच्छिन्नप्रतियोगिताकःप्रसिद्धकारणत्वावच्छिन्नप्रतियोगिताकोऽभावोनतादृशरूपावच्छिन्नप्रतियोगिताकइति ३१६वा
चेत्।।खलाविनैवापराधंभवंतिखलुवैरिणइत्यत्रतथाप्यतिव्याप्तनात्अपराधाभावस्यतथात्वात्।।नचका

यैशेअतिशयोक्त्यालीढत्वेनाभेदनिश्चयालीढत्वेनवाविशेषणीयइतिवाच्यं।।खलाविनैवापराधंदहंतिखल
लुसज्जनानित्यादौतथापिदोषानुद्धारादितिचेन्नैवं।।कार्यांशेयद्विषयितावच्छेदकंतदवच्छिन्नकार्यतानिरूपि
तायाःकारणतायाअवच्छेदकमिहग्नाह्यंदाहत्वंचेहविषयितावच्छेदकंतदवच्छिन्नाभिन्नत्वेनपीडायाअध्यव
सानात्नहिदाहत्वावच्छिन्नकार्यतानिरूपितकारणतायाअवच्छेदकमपराधत्वंअपितुदाहत्वावच्छिन्नाभिन्न
B त्वेनाध्यवसितायापिडात्तन्निष्ठकार्यतानिरूपितकारणतायाइतितदवच्छिन्नप्रतियोगिताकाभावसामाना
धिकरण्येनकार्योत्पत्तिवर्णनेपिनात्रविभावनाप्रसंगः।।यदितुखलाविनैवदहनंदहंतिजगतीतिलमि
तिक्रियतेतदाभवत्येवविभावना।।एवंकमलमनंभसिकमलेचकुवलये[illegible]तानिकनकलतिलकायांसाच

र॰गं॰ स्फकुमारस्फभंगेत्युत्पातपरंपराकेयमितिपरकीयपद्येतिशयोक्त्युदाहरणेप्ययंस्त्येवविभावना॥परैर्नुकमलम
३१७ नंभसीत्यंशेशाखीकमलेचेत्यादौत्वार्थानिसंक्षेपः॥ ॥इतिरसगंगाधरेविभावनाप्रकरणं॥ ॥अथवि
शेषोक्तिः॥प्रसिद्धकारणकलापसामानाधिकरण्येनवर्ण्यमानाकार्यानुत्पत्तिर्विशेषोक्तिः॥नत्रसत्यपि
कारणसमवधानेकार्यस्यानुत्पत्तौविरोधःप्रतिभासमानःप्रसिद्धेतरकारणवैकल्यधियानिवर्त्तते॥यथा
॥उपनिषदःपरिपीतागीतापिचहंतमतिपथंनीता॥तदपिनहाविधुवदनामानससदनाद्बहिर्याति॥यथावा
प्रतिपलमखिलांल्लोकान्मृत्युमुखंप्रविशतोनिरीक्ष्यापि॥हाहंतकिंचित्तमिदंविरमतिनाद्यापिविषयेभ्यः ३१७
॥अत्रोपनिषदर्थविमर्शेसकललोकानित्यत्वज्ञानेप्रसिद्धेविरतिहेतौसत्यपिविरत्यनुत्पत्तिवर्णनाद्रागाधिक्य

य-। रूपंप्रतिबंधकंप्रतीयते॥इयमनुक्तनिमित्ताविरत्यनुत्पत्तिनिमित्तस्यप्रतिबंधकस्यानुपात्तत्वात्॥अत्रैवरागां
धंचित्तमिदमितिनिर्माणेउक्तनिमित्ता किंचिदचिंत्यनिमित्तांतृतीयामामनंतिउदाहरंतिच॥सएकस्त्रीणिज
यतिजगंतिकुसुमायुधः॥हरतापितनुंयस्यशंभुनानबलंहृतमिति॥अनुक्तनिमित्तायांनिमित्तंनिमित्तनाव
च्छेदकरूपेणचिंत्यमानंप्रतीयतेइहतुनतथा॥किंतुभविष्यतिकिंचिन्निमित्तमित्याकारेणेत्यनुक्तनिमित्ताता
चिंत्यनिमित्तायाभेदइतिह्येषामाशयः॥अन्येतुनानुक्तनिमित्तायांचिंत्यत्वंनिमित्तविशेषणंभेदांतरकल्पना
गौरवप्रसंगात्किंतुचिंत्यमचिंत्यंचेतिद्विप्रकारकमपिनिमित्तंयत्रनोक्तंसानुक्तनिमित्तानेनाचिंत्यनिमित्ता
तोनपृथक्भावमर्हतीत्याहुः॥अत्रचकारणसमवधानंकार्यानुत्पत्तेर्बाध्यमितिबहवः॥वस्तुतस्तुकार्यानुत्प

र०गं० त्निरेवास्मिन्ननलंकारैर्बाध्या ॥ कर्पूर इव दग्धोपि शक्तिमान्यो जने जने ॥ नमोस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥ स
३१८ एकस्त्रीणि जयति जगन्ति कुसुमायुधः ॥ हरतापि तनुं यस्य शंभुना न बलं हृतमिति प्राचीनप्रसिद्धोदाहरणेपु कारण
समवधानस्य कामशरीरनाशरूपस्य प्रमाणसिद्धत्वेन बाध्यत्वायोगात् ॥ यतः कामस्य शरीरनाशेपि शक्तिबलयो
न- र्नाशः कुतोज्ञात इत्येव सर्वजनीनः प्रत्ययो न तु शक्तिबलयोः सतोः कथं शरीरनाश इति ॥ दृश्यते नु दिते यस्मिन्ननु
दितेनैव दृश्यते ॥ जगदेतन्नमस्तस्मै कस्मैचिद्बोधभास्वते इत्यत्रोदयाभावे जगद्दर्शनिस्योदयरस्त्वे दर्शनाभावस्य
वर्णनेपि न विभावनाविशेषोक्ती ॥ नह्यप्रसाहजिकसूर्योदयो वर्ण्यते येन तयोः प्रसंगः स्यात् ॥ तथात्वे तूक्तिसंभ ३१८
द- वएव न स्यात् किंतु ब्रह्मात्मैक्यबोधसूर्योदयस्य तस्य जगद्दर्शनमेव कार्यं न तु न दर्शनं ॥ तथात्वे सूर्योदयस्यैवास्याप्यु

---

§ तदभावे संनिकर्षेऽपि तृष्णोपनिबद्धा । तथा संनिकर्षस्तृप्ति कारणं

क्तिसंभवो न स्यात् ॥ अत एव व्यतिरेकोल्लासस्ताद्रूप्यरूपकालीर्दसंगच्छते ॥ कारणाभावकार्याभावयोर्यत्र प्रतियो
गितावच्छेदकविशिष्टवैशिष्ट्येन श्रुत्या प्रतिपादनं तत्र विभावनाविशेषोक्त्योः शाब्दत्वं अन्यत्रार्थत्वं यथा भगवद्व
दनांभोजं पश्यंत्या अप्यहर्निशं तृष्णाधिकमुदेति स्मगोपसीमंतिनीदृशोः ॥ लोके ह्यसंनिकर्षस्तृष्णाकारणं तं ष्णा-
स्मिन्नसत्यपि तृष्णाभावो बाधितः परं तु कारणाभावकार्याभावयोर्न प्रागुक्तप्रकारेण प्रतिपादनमित्यार्थत्वैमे
वं तदुभयसंशयसंकरस्य ॥ अमुमेव चार्थं मनसि कृत्य मम्मटभट्टैर्यः कौमारहरैइति पद्यमुदाहृत्योक्तमत्र स्फुटो र-
न कश्चिदलंकार इति ॥ वामनस्तु एकगुणहानिकल्पनायां साम्यदार्ढ्यं विशेषोक्तिरित्याह ॥ द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यमिति ॥ अत्र द्यूते राज्यं तादात्म्येनारोप्यते तेन तत्र सिंहासनरहितं हि द्यूतं सिंहासन

र॰गं॰
३१९

सहितराज्यतादात्म्यंकथंवहेदित्यारोपोन्मूलकयुक्तिनिरासायारोप्यमाणोराज्येपिसिंहानराहित्यंकस्य
तेतेनदृढारोपंरूपकमेवेदंनविशेषोक्तिः॥एवंचअचतुर्वदनोब्रह्माद्विबाहुरपरोहरिः॥अभाललोचनः
शंभुर्भगवान्बादरायणइतिपौराणपद्येपिरूपकमेव॥तथागुणाधिक्यकल्पनायामपितदेवयथाधर्मो
वपुष्मान्भुविकार्तवीर्यइत्यादौ॥एतेनैकगुणहान्युपचयादिकल्पनायांसाम्यदार्ढ्यविशेषणमितिविशे
षालंकारंलक्षयंतोपिप्रत्युक्ताः॥ ॥इतिरसगंगाधरेविशेषोक्तिप्रकरणं॥ ॥अथासंगतिः॥विरुद्धत्वेनापा
ततोभासमानंहेतुकार्ययोर्वैयधिकरण्यमसंगतिः॥स्पृशतित्वयियदिचापंस्वापंप्रापन्नकेपिनरपालाः॥
शोणेतुनयनकोणेकोनेपालेंद्रनवसुखंस्वपितु॥अत्रचापस्पर्शनयनशोणिम्नोर्हेत्वोःस्वापनाशरूपकार्य

DR. BHAU DAJI MEMORIAL
३१९

वैयधिकरण्येप्यतिप्रसंगवारणायविरुद्धेत्यादि॥इहचविभिन्नदेशस्थयोरेवतयोःकार्यप्रयोजकतयाविरोधान
वकाशात्॥ननुशोणिमाभिव्यक्तस्यरोषस्यकालिकसंबंधेनहेतुत्वादस्तुनामकार्यभिन्नदेशत्वंचापस्पर्शस्य प-॥
तुलीलयाकृतस्यस्वरूपसतोहेतुत्वाभावात्तज्ज्ञानस्वापनाशेहेतुत्वेनाभ्युपगंतव्यमेवंचतस्यकथंवैयधिकर
ण्यमितिचेत्॥न॥प्रयोजकस्यापिहेतुपदेनाग्रहणाददोषः॥प्रयोजकत्वंचचापस्पर्शस्यभ्रमात्मकरोषानुमि
तिलिंगत्वात्॥उदाहरणंअंगैःसुकुमारतरैःसाकुसुमानांश्रियंहरतिप्रहरतिहिकुसुमबाणोजगतीतलवर्त्तिनो
यूनः॥यथावा॥दृशौमृगीदृशोत्यंतंश्रुत्यंतपरि[illegible]लिनी॥मुच्यंतेबंधनात्केशाविचित्रावेधसोगतिः॥अत्राद्योदा शा-।
हरणेशुद्धाद्वितीयेतुश्लेषोपबृंहितेतिविशेषः॥प्रहरतीत्यत्राभेदाध्यवसायलक्षणेनातिशयेनापराधनिमित्त

स्यं|

र०गं० ताडनरूपतयावस्थितेकामपीडनेविषयेशमालंब्यतंप्रतिसमानाधिकरणतयाप्रसिद्धस्यहेतोरपराधरूप
३२० स्यवैयधिकरण्यज्ञानात्पुरःस्फुरन्विरोधोविषयांशाविमर्शोत्तरंतंप्रतिकुसुमशराभिव्यक्तशोभाविशे
षस्यभावनोपनीतस्यतद्भावनायावाहेतुत्वस्यप्रतिसंधानान्निवर्त्तत इत्यभेदाध्यवसानमनुप्राणकंविरोधा
क:| भासश्चोत्कर्षकं।एवमन्यत्रापिबोध्यं॥अस्यांचविभावनायामिवकार्यांशेतिशयोक्त्यनुप्राणनमावश्यकमन्य
थाविरोधोदुष्परिहरएवस्यादित्यलंकारसर्वस्वकारादीनांमतं॥तच्चदृशिमृगीदृशइत्यस्मन्निर्मितोदाहरणेव्यभि
चारादसंगतं॥नहिमुच्यंतेबंधनात्केशाइत्यत्रकेशबंधनमुक्त्यंशेतिशयोक्तिरस्तिकिंतुश्लेषभित्तिकाभेदाध्यव ३२०
सानमात्रं॥तस्माद्येनकेनापिप्रकारेणकार्यांशेऽभेदाध्यवसानमावश्यकमितितुसंगतं॥यद्यपिदृशिमृगीदृश

इत्यादौकारणांशेश्लेषादिनाभेदाध्यवसायःसंभवतितथापिनासौतदंशेनियतः॥खिद्यतिसापथियांतीको
मलचरणानितंबभारेण॥खिद्यंतिहंतपरितस्तद्रूपविलोकिनस्तरुणाः॥इत्यादौभारजनितखेदांशेतदभावा
त्॥नचतत्रापिजलपूर्णघटादिभारजनितखेदेनसहनितंबभारजनितखेदस्याभेदाध्यवसायोस्त्येवे स्न|
तिवाच्यं॥नितंबभारजनितखेदस्यस्वरूपेणापिखेदजनकत्वेनभारांतरजनितखेदाभेदाध्यवसायानपे
क्षणात्॥सावालावयमत्रगल्भमनसःसास्त्रीवयंकातराइतिप्राचीनानांपद्येवालात्वस्त्रीत्वाद्यंशेनक्लेश
स्याप्यसंभवाच्च॥यत्तुविरोधालंकारेह्येकस्मिन्नधिकरणेद्वयोःसंबंधाद्विरोधप्रतिभानमसंगतंत्वधिकर
णद्वयेइतितस्मादस्यवैलक्षण्यमितिविमर्शनीकारआहतदसत्॥इहापितत्तत्कार्यतावच्छेदकधर्मत

र॰गं॰ कारणवैयधिकरण्यरूपयोर्धर्मयोरेकस्मिन्कार्यरूपेधिकरणेसंबंधादेवविरोधप्रतिभानोत्पत्तेः॥तस्मा
३२१ द्विरोधालंकारेतुत्पत्तिविमर्शविनैवविरोधप्रतिभानमिहतदुत्पत्तिविमर्शपूर्वकैवविरोधप्रतिभोत्पत्तिरिति
वैलक्षण्यमिति॥वस्तुतस्तुव्यधिकरणत्वेनप्रसिद्धयोःसमानाधिकरणत्वेनोपनिबंधनेविरोधालंकारः
॥समानाधिकरणत्वेनप्रसिद्धयोर्वैयधिकरण्येनोपनिबंधनेसंगतिः॥प्रागुक्तासंगतिलक्षणेहेतुका
र्ययोरितिचसमानाधिकरणमात्रोपलक्षणं॥तेनैनिरंजनंतस्याःशून्यास्तुवयमद्भुतमित्यत्रनिरंजनत्व नेत्रं-
त्व- शून्यत्वयोरुत्पाद्योत्पादकभावलक्षणसंबंधानंतर्भावेनशुद्धसमानाधिकरणत्वेनप्रसिद्धयोरप्यसंगतिःसंग ३२१
श्रुते- च्छतेयथानुसानस्यात्॥इत्थंचस्फुटएवविरोधालंकारादसंगतेर्भेदः॥यस्तुपुनर्विरोधालंकारादतिरिक्तः

s. Sinbthi nalbe वे॰

शुद्धोविरोधांशोविरोधमूलेषुसर्वेष्वलंकारेष्वनुस्यूतऔपम्यांशइवौपम्यमूलेषुसोलंकाराणांकतिपयानां
निर्वर्तकोनतुस्वयंपृथगलंकारास्पदंअलंकाराणांभणितिविशेषमात्ररूपत्वात्॥एवंचविमर्शनीकारोक्त
मप्यपघनयैवदिशानीयतेनतदानदोषः॥यत्तुअन्यत्रकरणीयस्यततोन्यत्रकृतिश्चया॥अन्यत्कर्तुंप्रवृत्तस्यत
द्विरुद्धकृतिस्तथा॥अपारिजातांवसुधांचिकीर्षन्द्यांतथाकृथाः॥गोत्रोद्धारप्रवृत्तोपिगोत्रोद्भेदंपुराकरोः॥ पु-
Sh.K.N.hav... अत्रश्रीकृष्णंप्रतिशक्रस्योपालंभवाक्येभुविचिकीर्षितयोगतत्रकरणीयमपारिजातत्वंदिविकृतमित्येकासंग
तिःपुरागोत्रायाउद्धारेप्रवृत्तेनवराहरूपिणातद्विरुद्धंगोत्राणांदलनंखुरकुट्टनैःकृतमितिद्वितीया॥यथावा
॥त्वत्खड्गखंडितसपत्नविलासिनीनांभूषाभवंत्यभिनवाभुवनैकवीर॥नेत्रेषुकंकणमथोरुषुपत्रवल्लीचो प-

र॰गं॰ लेंद्रसिंदूतिलकंकरपल्लवेषु॥मोहंजगत्त्रयभुवामपनेतुमेतदादायरूपमखिलेश्वरदेहभाजां॥निःसी
३२२ मकांतिरसनीरधिनामुनैवमोहंप्रवर्द्धयसिमुग्धविलासिनीनां॥अत्राद्योदाहरणेकंकणादीनामन्यत्रकर
ना॰ B. … K.N.
णीयत्वंप्रसिद्धमितिनोपन्यस्तंभवतिविभावनारूपान्यत्रकृतिराक्षिप्यतइतिलक्षणानुगतिरितिकुवलयानं
दकृत्तासंगतेरन्यभेदद्वयंलक्षयित्वोदाहृतं॥तन्न॥तत्रतावदपारिजातांवसुधांचिकीर्षन्द्यांतथाकृथाइ
त्यत्रपारिजातराहित्यचिकीर्षयाकारणभूतयासहपारिजातराहित्यस्यकार्यस्यविरुद्धवैयधिकरण्योपनि
बंधाद्विरुद्धंभिन्नदेशत्वंकार्यहेत्वोरसंगतिरितिप्राथमिकासंगतिर्नोवैलक्षण्यानुपपत्तेः॥आलंबनाख्यवि ३२२
षयतासंबंधेनचिकीर्षायाःसामानाधिकरण्येनकार्यमात्रंप्रतिहेतुत्वस्यप्रसिद्धेः॥नचपारिजातराहित्य

स्याभावरूपस्यनित्यत्वात्कारणाप्रसिद्धिरितिवाच्यं॥आलंकारिकनयेतस्यापिजन्यत्वस्येष्टेलक्षणेकार्यकार
णपदयोरुपलक्षणत्वस्योक्तत्वाच्च॥गोत्रोद्धारप्रवृत्तोपिइत्युदाहरणेनुविरुद्धात्कार्यसंपत्तिर्दृष्टाकाचिद्विभा
वनेतिपंचमविभावनालक्षणाक्रांतत्वाद्विभावनयैवगतार्थत्वादसंगतिभेदांतरकल्पनानुचिता॥गोत्रोद्धा
रविषयकप्रवृत्तेर्गोत्रोद्भेदरूपकार्यविरुद्धत्वान्नसिद्धंतेपिविभावनाविशेषोक्त्योःसंकरएवात्रोचितः॥नेत्रे
षुकंकणमित्यादौकंकणत्वनेत्रालंकारत्वयोर्व्यधिकरणत्वेनप्रसिद्धयोःसामानाधिकरण्यवर्णनाद्विरोधा
भासत्वमुचितं॥एवंमोहनिवर्तकत्वमोहजनकत्वयोरपीति॥ननुतवापिविरोधाभासेनैवोपपत्तेर्विभाव
नादिकल्पनानर्थक्यमितिचेन्नदत्तोत्तरत्वात्॥इतिरसगंगाधरेसंगतिप्रकरणं॥अथविषमालंकारः॥

र॰ गं॰ अननुरूपसंसर्गोविषमं ॥ अनुरूपमितियोग्यतायामव्ययीभावः ॥ अनुरूपंयत्रनविद्यतइतिविग्रहीनेनब
३२३ हुव्रीहिणायोग्यतारहितमुच्यते ॥ योग्यताचयुक्तमितिलौकिकव्यवहारगोचरता ॥ संसर्गश्चताबद्विविधः
॥ गुत्पत्तिलक्षणः संयोगादिलक्षणश्च ॥ तत्रगुत्पत्तिलक्षणस्यसंसर्गस्यायोग्यत्वंकारणगत्स्वगुणविलक्षण
गुणकार्योत्पत्त्याइष्टसाधनतयानिश्चितात्कारणादनिष्टकार्योत्पत्तिभिः संयोगादिलक्षणस्यापिसंसर्गि
णोरन्यतरगुणस्वरूपनिरस्कायान्यितरगुणस्वरूपतया अयोग्यत्वं ॥ एवंचाननुरूपसंसर्गत्वेनसामान्ये
नोक्तौवक्ष्यमाणाश्चसर्वेप्रभेदाः संगृह्यंते ॥ क्रमेणोदाहरणं ॥ अमृतलहरीचंद्रज्योत्स्नारमावदनांबुजान्य ३२३
धरितवतोनिर्मर्यादप्रसादमहांबुधेः ॥ उदभवदयंदेवत्वत्तःकथंपरमोल्बणप्रलयदहनज्वालाजालाकुलो

महसांगणः ॥ अत्रमाधुर्यशैत्याह्लादकत्वप्रसादाद्यनेकगुणयुक्तात्कारणात्तद्विरुद्धगुणयुक्तस्यप्रता
पस्योत्पत्तिरित्यननुरूपःकार्यकारणभावः ॥ अभेदाध्यवसानलक्षणेनातिशयेनसमवायिकारणरूपत
यास्थितेनिमित्तकारणेसमवेतकार्यरूपतयास्थितेनिमित्तिकार्येवाविषयांशमालंब्यस्फुरितोविरोधोवि
षयांशविमर्शोत्तरंनिवर्त्तनइतीहाप्यभेदाध्यवसानस्यानुप्राणकत्वंतदुत्थापितविरोधाभासस्यपरिपोष च-।
कत्वंअयमेवचांशोलोकोत्तरकविप्रतिभानिर्मितत्वादलंकारताबीजं। इष्टसाधनतयाज्ञानात्कारणाद
निष्टकार्योत्पत्तिरित्यत्रैकशेषघटितएकशेषोबोध्यः ॥ मइष्टमनिष्टंअनर्थःतादृशकार्योत्पत्तिश्चनइष्टका
र्योत्पत्तिरनिष्टकार्योत्पत्तिस्साचेत्यनिष्टकार्योत्पत्तीतेच अनिष्टकार्योत्पत्तिश्च अनिष्टकार्योत्पत्तयः ॥ ताभि

र॰गं॰ रित्यनेनेष्टकार्यानुत्पत्त्यनिष्टकार्योत्पत्तीमीलितेएकोभेदः॥प्रत्येकंचभेदद्वयमितित्रयोभेदाःसंगृहीता
३२४ भवंति॥इष्टंचस्वस्यकिंचित्सुखसाधनवस्तुप्राप्तिर्दुःखसाधनवस्तुनिवृत्तिश्चपरस्यदुःखसाधनवस्तुप्रा
पणंसुखसाधननिवृत्तिश्चेतिचतुर्विधंतेनेष्टाप्राप्तिघटितेभेदद्वयेपिचातुर्विध्यं॥अनिष्टंचस्वस्यदुःखसा
धनवस्तुप्राप्तिःपरस्यसुखसाधनवस्तुप्राप्तिःदुःखसाधनवस्तुनाशश्चेतित्रिविधं॥स्वस्येष्टाप्राप्तिस्तुग
नेतिनानिष्टेगएयतेनेनानिष्टप्राप्तिघटितेभेदद्वयेपित्रैविध्यं॥दिङ्मात्रंतूपदर्श्यते॥उदाहरणं॥दूरीकर्तुं
स-| प्रियंबालापघ्नेनातायेंडद्रुषा॥[illegible]बाणेनहननस्तेनतामाश्रुपरिषस्वजे॥अत्राप्रियदूरीकरणरूपेष्टार्थेप्रयुक्ते ३२४
नपघ्नताडनरूपेणकारणेनाप्रियदूरीकरणंतुदूरापास्तं॥प्रत्युततत्कर्तृकपरिष्वंगरूपानिष्टस्योत्पत्तिः॥

DR BHAU DAJI

यथावा॥खंजनदृशा निकुंजंगतवत्यागांगवेषयितुं॥अपहारिताःसमस्तागावोहरिवदनपंकजालोकात्॥
पूर्वोदाहरणेवास्तवमेवानिष्टमिहतुसकलेंद्रियहरणंयद्यपिलोकेनिष्टप्रायमेवतथापितत्पुरस्कारेणेह
चमत्कृतिराहित्यादुदाहरणपुरस्कारेणैवचमत्कारात्श्लेषमूलकाभेदाध्यवसानेनसकलसुरभिहरणरू
पानिष्टात्मनाछिन्नंनदितिविशेषः॥गवेष्यमाणगवीरूपेष्टाप्राप्तेरनुक्तत्वात्केवलानिष्टप्राप्तेरिदमुदाहरणं
पूर्वंतूभयस्येतिविशेषोनवाच्यः॥समस्तगवीहरणेनसामान्येनगवेष्यमाणाया अपिगोरपहारस्यप्रसयात्॥
एवमिष्टाप्राप्त्यनिष्टप्राप्त्युभयकृतासंसर्गस्याननुरूपतासामान्येनोक्ता॥पूर्वोक्तचतुर्भेदायाइष्टाप्राप्तेःपूर्वो
क्तत्रिभेदेनानिष्टेनसंसृष्टाचियमेवद्वादशविधा॥तत्रस्वस्यसुखसाधनवस्त्वप्राप्तिर्दुःसाधनवस्तुप्राप्तिरू

र॰गं॰ पउभयभेदस्तावदुदाहृतः॥ स्वस्यदुःसाधनवस्त्वनिवृत्तिदुःखांनरसाधनावाप्तिरूपंद्वयंयथा॥ रूपारुचिंनि ख-
३२९ रसितुंरसयंत्याहरिमुखेंदुलावण्यं॥ सुदृशः शिवशिवसकलेजाता सकलेवरेजगत्यरुचिः॥ अत्रयद्यपिब्र
ह्मदर्शनोत्तरंजातायामपिजगतिवैराग्यलक्षणायामरुचौभगद्वदनलावण्यदर्शनाद्रूपारुचिर्विलक्षणाया
व-| काचित्सानिवृत्तैवेतितत्कुंशक्यनेनतथापिजगदरुचित्वेनसकलारुचीनामभेदाध्यवसायाद्रूपारुचिनिवृत्ते
रप्रत्ययएव॥ अन्यथासुखहेतोर्वैराग्यलक्षणायाअरुचेर्दुःखांतरसाधनत्वंदुरुपपादंस्यादितिभवत्यन्यो सु-|
दाहरणं॥ परस्यदुःखसाधनानवाप्तिः स्वस्यदुःखांतरसाधनप्राप्तिरित्युभयंयथा॥ पुरोगीर्वाणानांपुलकि ३२९
तकपोलंप्रथयतोभुजप्रौढिंसाक्षात्भगवतिशरंसंमुखयितुं॥ स्मरस्यस्वर्बालानयनस्रममालार्चितमहोव

पुः सद्योभालानलभसितजालास्पदमभूत्॥ परस्यसुखसाधनानिवृत्तिः स्वस्यदुःखसाधनावाप्तिश्चेत्यु
भयंयथा॥ नमिश्चयतिलोचनेसहसितंनसंभाषतेकथास्रुतवकिंचयस्यरालंभुवं॥ विपक्षस्रुदृशः कथा सा विरच्य-
मिनिनिवेदयंत्यापुरः प्रियस्यशिथिलीकृतः स्वविषयोनुरागग्रहः॥ अत्रकयाचित्प्रौढनायिकयासप य त्वरालंभु-
त्न्यांप्रियेणाज्ञातयौवनात्वेनैवविदितायांतदनुरागप्रतिबंधार्थंप्रियस्यपुरस्तदीयदुर्गुणगणावेदयंत्याचि नम्॥
कीर्षितोर्थोनसंपादितः स्वस्मिन्ननुरागक्षतिश्चसंपादितेति॥ यद्यपिसुखसाधननिवृत्तेर्दुःखसाधनरू
पत्वान्नपृथग्गणनोचितातथापिदुःखसाधननिवृत्तोसुखस्येवसुखसाधननिवृत्तोप्रतिनियतकारणजन्य
ख-| त्वेनदुःखस्थानेयत्यास्पृथगुपादानं॥ एवमंशावन्येपुभयभेदाऊह्याः॥ केवलेष्टाप्राप्तिर्यथा॥ प्रभातसमयप्र भांप्र-|

र॰गं॰ ण्यपि निद्राधानारसादमुष्यनयनांबुजंसपदि पाणिनामीलयं॥अनेनखलु पद्मिनीपरिमलालिपाटच्चरैस्स
३२६ मीरशिशुकैश्चिरादनुमिमेदिनेशोदयः॥अत्रप्रियतमकर्तृकप्रभातविषयकज्ञानाभावः कामिन्याः सुखसा
धनतयेष्टः सचतयासाध्यमानोपिनसिद्धस्तोष्टाप्राप्तिरेवयद्यानादग्राज्ञानंतस्याद्दुःखसाधनंतन्निवृत्तिरूपं
चेष्टंसाध्यमानमपिनतथेतिसैव॥एवंचाद्धप्रकारापीष्टाप्राप्तिरेवात्रसंभवति॥प्रकारांतरंचास्याअप्युक्तंकेव
लानिष्टप्राप्तिर्यथा॥मुकुलितनयनंकरिणोगंडंकंडूयतोविषद्रुतटे॥उदभूद्दकांडदहनज्वालाजालाकुलोदे ३२६
हः॥अत्रनेष्टाप्राप्तिः मुकुलितनयनमित्यनेनकंडूयनजन्यसुखस्यप्राप्तेः॥किंत्वनिष्टप्राप्तिरेव॥अस्याअ
पिभेदद्वयंयथायथमूह्यं॥गंधविस्तरभयान्नेहोदाह्रियते॥एतेन्चेष्टसाधनत्वेननिश्चितात्कारणादनि

ष्टकार्योत्पत्तीनांसर्वेपिप्रभेदावक्ष्यमाणविषादनालंकारसंकीर्णाएवेतितत्प्रकरणेनिरूपयिष्यामः॥यत्तु
अनिष्टस्याप्यवाप्तिश्चतदिष्टार्थसमुद्यमादितिविषमभेदलक्षणंनिर्मायअपिशब्दसंगृहीततयाइष्टानवाप्ति
श्चेतिप्रत्येकमपिविषमपदेनान्वयइत्युक्तंकुवलयानंदकृता॥तन्न॥अव्युत्पत्तेः॥अस्मिन्ग्रामेदेवदत्तस्यद्र
व्यस्यापिलाभोस्तीत्यादौद्रव्यशब्दोत्तरापिसमुच्चितस्यविद्यादेर्द्रव्यान्वयिन्येवान्वयात्द्रव्यस्यलाभोविद्याया
श्चलाभइतिधीरितिनिर्विवादं॥प्रकृतेत्वनिष्टस्याप्नोतिनान्वयइष्टानवाप्तेश्चतच्छब्दपरामृष्टेनविषमेणेतिविष
म्यात्प्रत्युतलक्षणवाक्येपिशब्दोनिष्टांधियमुत्पादयतिअनिष्टस्यावाप्तिरिष्टस्यचेतिप्रतीतेः॥चकारसमुच्चित
याइष्टानवाप्त्याअनिष्टावाप्तेरेकवाक्यमिलितायास्तत्पदपरामृष्टेनविषमेणान्वयाद्वाक्याद्व्याप्त्यावारातस्वप्र

र॰गं त्येकमन्वयात्प्रभेदत्रयसंग्रहइतितुस्यादपिनत्वपिशब्दविकल्पनं।।यदपितेनैवोदाहृतं।।भक्ष्याशयाहिमंजू

३२७ षांदृष्ट्वाखुरस्तेनभक्षितइति।।अत्रक्त्वाप्रकृतिक्रियाकर्तृकोत्तरकालवर्त्तिक्रियांतरस्याप्रयुक्तत्वादगम्यमानत्वा कर्तृ-|

त्प्रविष्टइतिपदाकांक्षितत्वान्न्यूनपदत्वं।।यदपिकेवलेष्टानवाप्तौतेनैवोदाजह्रे[illegible]न्नोसिमुंचशैलंविश्रम्यमो सि-|

वयमितिवदत्सुशिथिलभुजःभरभुग्नविततबाहुषुगोपेषुहसन्हरिर्जयतीतितदपिनरमणीयं।।अत्रभरभु

ह्नु-| ग्नविततेत्यादिनाबाहु[illegible]गतास्थिसंधिभंगरूपानिष्टप्राप्तेःसाक्षादुपात्तत्वात्सर्वांगचूर्णीभावगर्वापहाररूपा

याश्चस्फुटंगम्यमानत्वात्कथमिष्टाप्राप्तिमात्रमित्युच्यते।।एतेनशैलपतनरूपानिष्टावाप्तिस्तुभगवत्करांबु ३२७

जस्पर्शमहिम्नानजातेतियदुक्तंतदप्यसारमेव।।अनिष्टानामुक्तत्वात्।।एवमुत्पत्तिलक्षणसंसर्गस्याननुरू

पत्वंनिरूपितं।।संयोगादिलक्षणसंसर्गस्याननुरूपत्वंयथा।।वनांतःखेलंतीशशकशिशुमालोक्यचकिता

भुजप्रांतेभर्त्तुःश्रयतिभयहर्त्तुःसपदियाअहोसेयंसीताशिवशिवपरीताश्रुतिचलत्करोटीकोटीभिर्वसनिरव

हुरक्षोयुवतिभिः।।अत्रसर्वाशिरवामणेर्भगवत्याराघवधर्मपत्न्याःपरमप्रभावयुक्तत्वा[illegible]द्राक्षसीभिरनाश्य

त्वेपिरक्षःकर्तृकनाशस्वरूपयोग्यतावच्छेदकमनुष्यत्वजातियोगेनस्वरूपस्यरक्षोदर्शनेनसौंदर्यसौकुमा

र्यादीनांगुणानांचनाश्यत्वेनविरुद्धत्वात्समानाधिकरणसंयोगरूपःसंसर्गोननुरूपः।।ननुक्वशुक्तयःक्ववामु

क्ताःक्वपंकःक्वचपंकजंक्वमृगाःक्वचकस्तूरीधिग्विधातुर्विदग्धतामित्यादौवस्तुकथनमात्रेविषमालंकारप्र

संगः।।नचेष्टापत्तिःवस्तुवृत्तस्यलोकसिद्धत्वेनालंकारत्वायोगात्यतोबहिरसं[illegible]तःकविप्रतिभामात्रकल्पिता

र॰गं॰ ३२९ अर्थाः काव्ये अलंकारपदास्पदं ॥ न च यथा पद्मं मुखमित्यादौ सादृश्यस्य लोकसिद्धत्वात्कविप्रतिभानुत्थापितत्वे तथा-
पि कथमलंकारत्वमिति वाच्यं ॥ सादृश्यरूपे सादृश्योत्थापके वा अभिन्नधर्मे भेदांशस्य कविप्रतिभामात्रा
धीनत्वात् ॥ नहि पद्ममुखयोः शोभारूपो धर्मो जात्यादिवद्वस्तुत एकोस्ति यो हि जात्यादिरूपो वस्तुत एकस्तदु
त्थापितसादृश्यमलंकारबहिर्भूतमेव यथा पद्ममिवास्या मुखं द्रव्यमित्यादौ ॥ एवं च वनांतःखेलंतीति पद्य
प्रतिपाद्यायाः सीताराक्षसवधूसंसर्गाननुरूपतायाः लौकिकत्वेन कविप्रतिभानपेक्षत्वान्नालंकारत्वं ॥ एतेन
अरण्यानी क्वेयं धृतकनकसूत्रः क्व स मृगः क्व मुक्ताहारोयं क्व च स पतगः क्वेयमबला क्व तत्कन्यारत्नं ललितम ३२९
हिभर्तुः क्व च वयं स्वमाकूतं धाता क्रमपि निभृतं पल्लवयतीत्यलंकारसर्वस्वकृतोदाहृतमपि प्रत्युक्तं ॥ इयमेव

च पद्यांतरेपि कविप्रतिभानुत्थापितार्थके सरणिरिति ॥ सत्यं एवं नहि क्व सा कुसुमसारांगी सीता चंद्रकलोपमा । लोप-
करक्षः खदिरांगारमध्यसंवासवेदनमिति पद्यमुदाहरणं गृहाण ॥ अत्र हि केवलसीतायाः केवलराक्षसीनां च
संसर्गस्याननुरूपतायां सत्यामपि न सा कवेर्विवक्षिता किं तु या कुसुमसारखदिरांगारसंसर्गस्याननुरूपतेति
स्फुटमेवास्यामलौकिकत्वात्कविप्रतिभापेक्षित्वं ॥ इति रसगंगाधरे विषमालंकारः ॥ ॥ अथ समालंकारः ॥ ॥
त- अनुरूपसंसर्गः समं ॥ संसर्गः पूर्ववद्द्विविधः ॥ तत्रोत्पत्तिलक्षणस्य संसर्गस्यानुरूपत्वं कारणात्स्वसमानगुणका
र्योत्पत्त्या यादृशगुणकवस्तुसंसर्गस्तादृशगुणोत्पत्त्या यत्किंचिदिष्टप्राप्त्यर्थं प्रयुक्तात्कारणात्तत्प्राप्त्या च ॥ उत्कटेष्टा
ह- नरप्राप्तौ तु प्रकर्षणं वक्ष्यते ॥ संयोगादिलक्षणस्यापि संसर्गिणोरन्यतरगुणस्वरूपानुग्राह्यान्यतरगुणस्वरूप

र॰गं॰ तयानुरूपत्वं॥एवंचानुरूपसंसर्गत्वेनसामान्यलक्षणेनसर्वेभेदाःसंगृहीताभवंति॥यथा॥कुवलयलक्ष्मीं
३२९ हरतेनवकीर्त्तिस्तत्रकिंचित्रं॥यस्मान्निदानमस्यालोकनमस्यांघ्रिपंकजस्तुभवान्॥यथावा॥मंत्रार्पितहविर्दीप्त क-।
हुताशनतनूद्भुवाःशिखास्पर्शेनपांचाल्याःस्तनेदग्धःसुयोधनः॥पूर्वेकारणकार्यधर्मयोःश्लेषेणैक्यसंपादन
मिहतुमरणदाहयोरभेदाध्यवसानरूपेणातिशयेनेतिविशेषः॥द्वितीयोभेदोयथा॥वडवानलकालकूटल
क्ष्मीमकरव्यालगणैःसहैधितः॥रजनीरमणोभवेन्नृणांनकथंप्राणवियोगकारणं॥लक्ष्मीरप्यत्रमारकत्वेनैवक
वेर्विवक्षिता॥तृतीयोयथा॥नितरांधनमाप्तुमर्थिभिःक्षितिपत्वांसमुपास्ययत्नतः॥निधनंसमलंभि[illegible]तोभिव ३२९
कीरवलुसेवाजनवांछितप्रदा॥अत्रमरणबहुधनयोःश्लेषेणैक्यंबहुधनस्येष्टान्मनोवांछितार्थाप्तिरूपसमालं

सना।नर्थ-।

कारश्चमत्कारः॥नचमरणा~~[illegible]~~प्राप्तिरूपविषमालंकारप्रसंगः॥अत्रव्याजस्तुतौमुखेधनप्राप्तिरूप
स्तुतिस्फूर्तिदशायांसमालंकारस्तावदप्रत्यूहएवमरणप्राप्तिप्रतीतिदशायांतुव्याजस्तुतेरेवपूर्णांगतयाविषमा
लंकारोबाध्यते॥यत्तुकुवलयानंदकृता॥दुर्योगजैरटनमर्थयमानएवत्वामाश्रयन्निहचिरादुषितोस्मिराजन्॥
उच्चाटनंत्वमपिलंभयसेतदेवमामद्यनैवविफलामहतांहिसेवा॥इत्युदाहृत्यअत्रव्याजस्तुतौयद्यपिस्तुत्यानिं
दाभिव्यक्तिविवक्षायांविषमालंकारःतथापिप्राथमिकस्तुतिरूपवाच्यकक्षायांसमालंकारोननिवार्यतइत्युक्तं
तत्रोदाहरणेमामुच्चाटनंलंभयसेइतिद्विकर्मकत्वंकथं॥गत्यादिसूत्रस्यप्राचीनरीत्यानियमविधित्वपक्षेलभेर
ण्यंतकर्तुःकर्मत्वस्यव्यावर्तनात्॥यदातुपरत्वादंतरंगत्वादुपजीव्यतयापिचप्रयोज्यस्यास्तुकर्तृत्वंगत्यादेर्विधि

ज्या

र॰गं॰ तोऽचितेतिनवीनरीत्याअपूर्वविधित्वमुच्यते॥श्रोतंराजंतप्रार्थक्रियायाःप्राधान्यमुत्सृज्यार्थपूर्वक्रियायाएवप्राधा
३३० न्यमनुरुध्यतेनतदात्वप्रसक्तिरेवेति॥उच्चाटनंमयाआलंभयसेइतितुभाव्यमेवमपिलभेयर्थौकथंचिदत्यर्थतां
संपाद्यप्रयोगउपपद्यते॥तथापिप्राथमिककक्षायांसमालंकारोननिवार्यतेइत्यनेनद्वितीयकक्षायांविषमा
लंकारोस्तुनामेत्याग्रहिनमसदेवतादृशवैषम्यस्यनिंदारूपस्यव्याजस्तुतिविषयत्वेनतयापवादस्यैवन्याय्यत्वा
त्॥नचवैपरीत्यं॥परिपूर्णचमत्कारभूमेर्व्याजस्तुतेस्तयाप्यनपन्हवात्॥संयोगादिलक्षणस्यानुरूपताद्वैधास्तु
तिपर्यवसायिनीनिंदापर्यवसायिनीच॥आद्यायथा॥अनाथःस्नेहार्द्रोविगलितगतिःपुण्यगतिदांपतन्विश्वो ३३०
द्धर्त्रीगदविदलितःसिद्धभिषजं॥तृषार्तःपीयूषप्रकरनिधिमत्यंतशिशुकःसवित्रींप्राप्तस्त्वामहमिहविदध्याःसमु र

DR BHAU DAJI
MEMORIAL

ना

चितं॥अर्थत्वादिविशिष्टस्यस्नेहार्द्रत्वादिविशिष्टेनसंसर्गस्यानुरूपताभागीरथीस्तुतिपर्यवसायिनी॥द्वितीयाय
था॥युक्तंसभायांखलुकर्मटानांशाखास्तरूणांमृदुलासनानि॥कभाषितंचीत्कृतिरातिथेयीदंतैर्नखाग्रै
श्चविपाटनानि॥अत्रप्रस्तुतगतत्वेनरचितानिंदातदाक्षिप्तेप्रस्तुतेपर्यवस्यति॥एवंयथाविषमालंकार ष
स्त्रिभेदस्तथातद्विपरीतभेदत्रययुक्तःसमालंकारोपिप्रपंचितः॥यत्तुविरूपकार्यानर्थयोरुत्पत्ति
विरूपसंघटनाचविषममितिविषमालंकारंलक्षितवतातद्विपर्ययःसममितिसमालंकारंलक्षयि
त्वातत्पदेनात्रविषमालंकारसंबंधीरूपसंघटनारूपश्चरमएवभेदोगृह्यतेतद्विपर्ययस्यैवचारुत्वा
त्तन्मत्वाद्यभेदद्वयंतद्विपर्ययस्यकारणादनुरूपकार्योत्पत्तिरूपस्यवांछितार्थप्राप्तिरूपस्यचवस्तु

र॰गं॰ सिद्धतयाचारुताविरहात्॥एवंचानुरूपसंघटनात्मकएवसमालंकारोनतुविषमालंकारइवभेदत्रया
३३१ त्मकइत्यलंकारसर्वस्वकृतोक्तंविवेचितंचविमर्शिनीकृता।कारणादनुरूपकार्योत्पत्तिर्हिलोकेप्रसिद्धा
नहितस्याउपनिबंधश्चारुतामावहतीतितदुभयमसत्॥वस्तुतोऽननुरूपयोरपिकारणयोःश्लेषादि
नाधर्मैक्यसंपादनद्वारानुरूप्यवर्णनेवस्तुतोनिष्टस्यापितेनैवोपायेनेष्टैक्यसंपत्ताविष्टप्राप्तिवर्ण
रु- नेऽपिचारुतायाअनुपदमेवदर्शितत्वात्॥तस्मात्सममपित्रिविधमेव॥ ॥इतिरसगंगाधरेसमालंकार
निरूपणं॥ ॥अथविचित्रालंकारः॥ ॥इष्टसिद्ध्यर्थमिष्टैषिणाक्रियमाणमिष्टविपरीताचरणंविचित्रं॥ ३३१
वि- विपरीतत्वंचप्रातिकूल्यं॥यथा॥बंधोन्मुक्त्यैखलुमखमुखान्कुर्वतेकर्मपाशानंतःशांत्यैमुनिशत

मतानल्पचिंतांभजंति॥तीर्थेमज्जंत्यशुभजलधेःपारमारोढुकामाःसर्वंप्रामादिकमिहभवभ्रांतिभा
जांनराणां॥अत्रप्रथमचरणगतंविचित्रंरूपकानुप्राणितंयज्ञादिकर्मकरणस्ययज्ञादीनांपाशत्वासि
द्धौबंधमुक्तिविपरीतत्वासंगतेःद्वितीयचरणगतंतुशुद्धं॥शांतौचिंतायाःस्वरूपेणैवविपरीतत्वात्॥
यदितुइष्टैषिणोभ्रांतत्वाभिव्यक्तेस्तुल्यत्वात्स्वतःसिद्धेइष्टेतदनुकूलाभासप्रयोगोपीष्टैषिकर्तृकोविचि
त्रमित्युच्यतेलक्षणेऽविपरीतपदस्थानेननुकूलपदंन्यस्यतांतदेदमप्युदाहरणं॥यथा॥विघ्नद्रीवाभु
वनमखिलंभासतेयस्यधाम्नासर्वेषामप्यहमयमितिप्रत्ययालंबनंयः॥तंपृच्छंतिस्वहृदयगतावेदि
नोविष्णुमन्यानन्यायोयंशिवशिवनृणांकेनवावर्णनीयः॥अत्रजीवरूपेणसकललोकप्रत्यक्षसिद्धस्य

र०गं० परमेश्वरस्यप्रतिपत्त्यर्थंपिरान्प्रतिप्रश्नोनुकूलाभासःमुख्यमनुकूलंतुस्वहृदयमेव॥यत्साक्षादपरोक्षा
३३२ दितिवचनात्॥नचकारणाननुरूपंकार्यमितिविषमभेदोयंवाच्यः॥विषमेपुरुषकृतेरनपेक्षणात्कार्यका
रणगुणवैलक्षण्येपनैवतद्भेदनिरूपणाच्च॥ ॥इतिरसगंगाधरेविचित्रालंकारः॥ ॥अथाधिकालंकारः॥
आधाराधेययोरन्यतरस्यातिविस्तृतत्वसिद्धिफलकमितरस्यातिन्यूनत्वकल्पनंमधिकं॥यथा॥लोकानां स्मृ
विपदंधुनोषिननुषेसंपत्तिमत्युत्कटां॥मित्यस्नेतरजास्रितैर्जडधियांभूपालमागामदं॥यत्कीर्त्तिस्तववल्ल
भालघुतरब्रह्मांडसद्मोदरेपिंडीकृत्यमहोन्नतामपितनुंकष्टेनहावर्त्तते॥अत्रब्रह्मांडस्यातिसूक्ष्मत्व ३३२
कल्पनेनकीर्तेरधिकायाःपरममहत्वंफलितंतेनचव्याजस्तुतिःपरिपोष्यते॥गिरामविषयोराजन्नविस्ता

रस्तवचेतसः॥सावकाशातयायत्रशेतेविश्वाश्रयोहरिः॥अत्रसावकाशतयेत्यनेनकल्पितयाधेयन्यूनत
याधारस्यमहत्वंपर्यवस्यति॥यदितुसावकाशतयेतिविशेषणंविश्वाश्रयइत्यत्रापियोज्यते॥तदाश्चर्यंखल्वा
रूपस्याधाराधिकालंकारस्येदमेवोदाहरणं॥ब्रह्मांडमंडलीमांनिनयेपिंडीकृताअपि॥परस्परापरिच्छि
नावसंतित्वयिनेगुणाः॥अत्रोभयविधस्याप्यलंकारस्यसामानाधिकरण्यं॥लक्षणेकल्पनमित्यनेनयत्राधा
राधेययोरन्यतरस्यन्यूनत्वमधिकत्वंचवास्तवंतत्रनातिप्रसंगः॥ एवंच॥क्वाहंतमोमहदहंखचराग्निवार्भूसंवेष्टितां
डघटसप्तवितस्तिकायः॥क्वेदृग्विधाविगणितांडपराणुचर्यावाताध्वरोमविवरस्यचतेमहित्वमितिश्रीभा
गवतदशमस्कंधगतंब्रह्मस्तुतिपद्यमस्यालंकारस्यानुदाहरणमेव॥दिक्कालानवच्छिन्नस्यपरमेश्वरस्यभूम्नःस

र॰गं॰ र्ववेदसिद्धत्वेनकविप्रतिभानुल्लिखितत्वात् ॥ एतेनतयोरत्रक्वचिदाश्रितापविततंपातालमत्रक्वचित्काप्य
३३३ त्रैवधराधराजलधराधारावधिर्वर्त्तते ॥ स्फीतंसर्वमहोनभःकियदिदंयस्येत्थमेभिस्थितेदूरेपूरणमस्तुशू
न्यमितियन्मामापिनासंगतमित्यलंकारसर्वस्वकारेणयदुदाहृतंतदपिप्रत्युक्तं ॥ ॥इतिरसगंगाधरेऽव
धिकालंकारः ॥ ॥अथान्योन्यालंकारः ॥ ॥द्वयोरन्योन्येनान्योन्यस्यविशेषाधानमन्योन्यं ॥ विशेषश्चक्रि
यादिरूपः ॥ यथा ॥ सुदृशोजितरत्नजालयासुरतांतश्रमबिंदुमालया ॥ अलिकेनचहेमकांतिनाविदधे
कापिरुचिःपरस्परं ॥ अत्रगुणरूपविशेषाधानंरुचेर्गुणत्वात् ॥ नचविधानरूपक्रियात्मकविशेषाधानमिह ३३३
शंक्यं ॥ भावनासामान्यरूपस्यविधानस्याचमत्कारित्वेनाविशेषत्वात् ॥ परपूरुषदृष्टिपातवज्राहतिभीताहृदयं

प्रियस्यसीना ॥ अविज्ञात्परकामिनीभुजंगीभयतःस्वरमेवसोपितस्याः ॥ अत्रक्रियारूपविशेषाधानं ॥ यत्तु ॥
यथोर्ध्वाक्षःपिबत्यंबुपथिकोविरलांगुलिः ॥ तथाप्रपापालिकापिधारांवितनुतेतनुं ॥ अत्रप्रपापालिकायाःपथि
केनस्वासक्त्यापानीयदानव्याजेनबहुकालंस्वमुखावलोकनमभिलषंत्याविरलांगुलिकरणतश्चिरंपानीय
दा-| B. & K.N. पानानुवृत्तिसंपादनेनोपकारःकृतः ॥ तथाप्रपापालिकयापिस्वमुखावलोकनमभिलषतःपथिकस्यधारा
पा-| K.N. तनूकरणतश्चिरंपानीयदानानुवृत्तिसंपादनेनोपकारःकृतइतिकुवलयानंदकारआह ॥ तत्रतावदियंपद्यस्व
नैवायुष्मतोग्रंथकर्त्तुर्व्युत्पत्तिशैथिल्यमुद्गिरति ॥ तथाहिस्वमुखावलोकनमभिलषंत्यादृत्यत्रस्वशब्दस्यप्रपापा ब्द-|
लिकाविशेषणघटकत्वेनप्रपालिकाबोधकत्वमेवन्याय्यंनपांथबोधकत्वं ॥ एवंस्वमुखावलोकनमभिलष थ-|

ख-।र.गं. नइत्यत्रापिपांथबोधकमेव॥नत्वदिष्टपापालिकाबोधकत्वं॥एवंस्थितेऽर्थासंगतिःस्पष्टैव॥नचसवनीमंबु प्र-
३३४ द्धिरूपप्रकारावच्छिन्नेशक्तत्वादिष्टबोधोपपत्तिरितिवाच्यं॥नहीदमस्मद्युष्मदादिष्विवनत्तद्विशेषव्युत्पत्तेरपिक
ल्पनीयत्वात्॥सान्वप्रकृतेयद्विशेषणघटकत्वेनस्वनिजादयःशब्दाउपात्तास्तद्बोधकाइत्येवंरूपातेनस्वदार
रतानांविप्राणामहंभक्तोदेवदत्तस्यपुत्रःस्वमातृभक्तइत्यादौमदीयदाररतानामितिदेवदत्तस्यमातृभक्त
इतिचनकस्याप्यभ्रांतस्यस्वरसवाहिनीप्रतीतिः॥अतएवनिजतनुस्वच्छलावण्यवापीसंभृतांभोजशोभांविद
धदभिनवोदंडपादोभवान्याइत्यत्रदंडपादगतैवतनुःप्रतीयते॥भवानीगतातुसापेक्षितेनिव्युत्पन्नशि ३२४
रोमणिभिर्मम्मटभट्टैःकाव्यप्रकाशेभिहितं॥नचेदंश्रुतिकटत्वादिवत्काव्यमात्रविषयंदूषणमितिवाच्यंश

ब्दव्युत्पत्तौकाव्यस्यानंतर्भावात्मदीयदाररतानामितिदेवदत्तमातृभक्तइतिचतात्पर्येणप्रागुक्तवाक्यप्रयोक्तुर
नुपहसनीयतापत्तेश्च॥किंच॥परस्परोपकारोहिस्वव्यधिकरणव्यापारसाध्यएवचमत्कारित्वाल्लक्षणघट
कोनतुस्वसमानाधिकरणतत्साध्योपि।तत्रहितुषारशिशिरीकरणन्यायेनान्यव्यापारस्यानावश्यकतयाचम
त्कारितावरहात्॥इहहिधारातनूकरणांगुलिविरलीकरणयोःकर्तृभ्यांस्वस्वकर्तृकचिरकालदर्शनार्थंप्रयुक्त
योस्तत्रैवोपयोगश्चमत्कारीनान्यकर्तृकचिरकालदर्शनइत्यनुदाहरणमेवैतदस्यालंकारस्येतिसहृदयावि-
चारयंतु॥ ॥इतिरसगंगाधरेअन्योन्यालंकारः॥ ॥अथविशेषालंकारः॥ ॥प्रसिद्धमाश्रयंविनाआधेयंवर्ण्य
मानमेकोविशेषप्रकारः॥यच्चैकमाधेयंपरिमितंयत्किंचिदाधारगतमपियुगपदनेकाधारगततयावर्ण्यतेसो

र०गं परोविशेषप्रकारः॥युगपदितिविशेषणाद्दृश्यमानेपर्यायेणनातिव्याप्तिः॥एवंचग्रंथांतरगतानिलक्षणान्य
३३९ तिप्रसक्तान्येव।यत्रकिंचित्कार्यमारभमाणस्यासंभाविताशक्यवस्त्वंतरनिर्वर्त्तनंसतृतीयोविशेषप्रकारः॥ भ—|
एवंचैतदन्यतमत्वंविशेषालंकारसामान्यलक्षणमितिप्राचः॥तत्रप्रथमप्रकारोद्विविधः॥आधारांतरग
तत्वेनाधेयंवर्ण्यमानंनिराधारत्वेनच॥क्रमेणोदाहरणं॥अयेराजन्नाकर्णयकुतुकमाकर्णनयनत्वदाधा
राकीर्तिर्वसतिकिलमौलौदशदिशांत्वदेकालंबोयंगुणगणकदंबोगुणनिधेमुखेषुप्रौढानांविलसतिक
वीनामविरतं॥अत्रदिङ्मौलिगतत्वेन॥युक्तंतुयातेदिवंसफेंदौनदाश्रितानांयदभूद्विनाशः॥इदंतुचित्रंभुव ३३९मा—|
नावकाशेनिराश्रयाखेलतितस्यकीर्तिः॥द्वितीयःप्रकारोयथा॥नयनेसुदृशांपुरोरिपूणांवचनेवक्त्रयगिरा

महाकवीनां॥मिथिलापतिनंदिनीभुजांतःस्थितएवस्थितिमापरामचंद्रः॥तृतीयःप्रकारोयथा॥कोदंडच्यु
तकांडमंडलसमाकीर्णत्रिलोकीतलंरामंदृष्टवतोरणेदशमुखप्राणापहारोद्यतं॥दुर्दर्शोपिनृणामभूद्गुरुमरुद्दू
गप्रचंडीकृतज्वालाभिर्जगतीतलंकवलयन्कालानलोगोचरः॥अत्ररामदर्शनंकुर्वतांकालानलदर्शनरूपाशा
क्यवस्त्वंतरनिर्वर्त्तनं॥ननुलोभाद्वराटिकानांविक्रेतुंतक्रमनिशमटंत्यालब्धोगोपकिशोर्यामध्येरथ्यंमहेंद्रनी धो—|
लमणिरितिवक्ष्यमाणप्रहर्षणविषमालंकारयोगेतृतीयप्रकारस्यातिव्याप्तिः॥दधिविक्रयमारभमाणायानी
लमणिप्राप्तिवर्णनादितिचेन्न॥अत्रचाशक्यवस्त्वंतरनिर्वर्त्तनेनतदभेदाध्यवसाननिबंधनत्वंविशेषणं।कालानलो
वीक्षितइत्यनुपदमुदाहृतेविशेषालंकारेयथाअशक्यवस्त्वंतररूपकालानलवीक्षणंरामकालानलयोस्तदृशो

र॰गं॰ नयोर्वाअभेदाध्यवसायेनेननिर्वर्त्तितंनतथादधिविक्रेतुमटंत्यादृत्यत्रमहेंद्रनीलमणिदर्शनमित्यदोषः॥नच
३३६ भगवतिनीलमण्यभेदाध्यवसानेननिर्वर्त्तितमेवतदितिवाच्यं॥किंचित्कार्यमारभमाणस्येत्यत्रयत्कार्यविशेषण
तयाप्रविष्टंतेनसहाशक्यवस्त्वंतरस्यादेर्भेस्यविवक्षितत्वात्प्रकृतेचतक्रविक्रयेणसहनीलमणेरभेदस्याध्य
वसानात्॥नचातिशयोक्त्याविशेषालंकारतृतीयप्रकारस्यगतार्थत्वंवाच्यं॥एतदुदाहरणेरामस्यविषयस्यका
लानलेनविषयिणानिगरणाभावात्॥नापिरूपकेण॥विषयविषयिणोःसामानाधिकरण्यविरहेणारोपासि
शा द्धेः॥नचस्मृत्या॥कालानलस्यवीक्षणकर्मत्वश्रवणेनस्मृतिकर्मत्वासिद्धेः॥तस्मादशक्यवस्त्वंतरकरणविशेषा ३३६
लंकारस्यैवप्रभेदइतिप्राचामाशयः॥अत्रविचार्यते॥विशेषालंकारस्यायंप्रभेदइतिकथंविज्ञायतेनहिरूपका

दिवदलंकारस्यास्यकिंचित्सामान्यलक्षणमस्तियेनतदाक्रांतत्वेनाशक्यवस्त्वंतरंकरणत्वस्यतत्प्रकारतामभ्युप
गच्छेम॥नचान्यतमत्वमेवतथाविधमस्तीतिवाच्यं॥अनेनैवप्रकारेणेतरालंकारभेदत्वस्यापिसुवचत्वात्॥अनुग
तलक्षणंविनाप्राचीनोक्तिराज्ञामात्रमेवराज्ञामितितदपेक्षयापृथगलंकारतोक्तिरेवरमणीया॥अपिर्वयेनदृ
ष्टोसिदेवत्वंनेनदृष्टोकृताशनः॥नेनदृष्टावसंरोधइत्यादौवस्त्वंतरस्यकृताशनवसुधादर्शनादेरशक्यासंभावि
तत्वयोरभावात्प्रकृतालंकारासंभवेननिदर्शनास्वीक्रियतेयदितदायेनदृष्टोसिदेवत्वंतेनदृष्टःसुरेश्वरइत्यादौविशे
षालंकारेपिसैवशरणीक्रियतां॥नहिकृताशनइत्यत्रसुरेश्वरइत्यत्रचविछित्तिभेदोस्ति॥एवंचप्राचीनानुसारेण
कोदंडच्युतेत्यादियदस्माभिरुदाहृतंतदपिनविशेषसरणिमारोढुमीष्टे॥एतेनत्वांपश्यतामयालब्धंकल्पवृक्षनि मीन| ध्वां

Dr. BHAU DAJI MEMORIAL

र॰गं॰ रीक्षणंइत्यादिकुवलयानंदोक्तमुदाहरणंगतार्थं॥तस्मादिदमुदाहरणं॥किंनामनेननकृतंसुकृतंपुरारेदा
३३८ सीकृतानखलुकाभवनेषुलक्ष्मीः॥भोगानकेबुभुजिरेविबुधैरलभ्यायेनार्चितोसिकरुणाकरहेलयापि॥अत्र
यावस्त्रिवर्गप्राप्तिरशक्यकरणंनत्वत्रभगवदर्चनेनसुकृतकरणादीनांसादृश्यंविवक्षितं॥येननिदर्शनादिसं
भाव्येतकिंतुकार्यकारणभावः॥एवंचेदानीमशक्यवस्त्वंतरानिर्वर्त्तनेअभेदाध्यवसाननिबंधनत्वंनविशेषणं।
नचदधिविक्रेतुमटंत्याइत्यत्रातिव्याप्तिःद्वयोःसंकरस्यतत्रेष्टत्वादितिवदंति॥ ॥इतिरसगंगाधरेविशेषालंकारः रि३
॥ ॥अथव्याघातः॥ ॥यत्रत्वेकेनकर्त्रायेनकारणेनकार्यंकिंचिन्निष्पादितंनिष्पादयिषितंवातदन्येनकर्त्रा
तेनैवकारणेनतद्विरुद्धकार्यस्यनिष्पादनेननिष्पिपादयिषयावाव्याहन्यतेसव्याघातः॥अत्रव्याघातेपूर्वक

पेक्षयाकर्त्रंतरस्यवैलक्षण्यप्रत्ययाद्व्यतिरेकसिद्धिःफलं॥कर्तृत्वंचेहकार्योद्देशेनप्रवर्त्तमानत्वंप्रयोजनंवास्या
क्ष्या—| विवक्षायाअनुपदमेववक्ष्यमाणत्वात्॥उदाहरणंदीनद्रुमान्वचोभिःखलनिकरैरनुदिनंदलितान्पल्लवयंत्युल्लसिता
नित्यंतैरेवसज्जनधौरेयाः॥इहश्रुतिप्रतिपादितवचनत्वरूपैकधर्मपुरस्कारेणाभिन्नीकृतयोःपरुषमधुरवच
वा—|नयोरेकत्वाध्यवसानात्पुरःस्फुरन्विरोधःप्रातिस्विकरूपेणतत्तत्कार्यहेतुनाविमर्शनाभिवर्त्ततइतिविरोधमूल
त्वं॥इदंतुनोदाहरणंपांडित्येनप्रचंडेनयेनमाद्यंतिदुर्जनाः॥तेनैवसज्जनारूढांयांतिशांतिमनुत्तमां॥अत्रदुर्जन
सज्जनयोर्मदशमकर्तृत्वेपिनतदुद्देशेनप्रवृत्तिरितिलक्षणगतकर्तृविशेषणेनासंग्रहः॥नचास्यव्याघातोदाहर
णत्वेकोदोषइतिवाच्यं॥आश्रयविशेषस्वभावसाचिव्येनैकस्यैवकारणस्यविरुद्धकार्यद्वयजननेबाधकविरहा

र॰गं॰ ष्याहरेनैवाभावादुदाहरणत्वासंगतेः॥नहिलोकसिद्धोर्थःकाव्यालंकारास्पदंभवितुमर्हति॥अपरोव्याघातोय
३३८ था॥विमुंचसियदिप्रियप्रियतमेतिमांमंदिरेत्तदासहनयस्वमांप्रणययंत्रणायंत्रितः॥अथप्रकृतिभीरुरित्य
खिलभीतिभंगक्षमाभजात्तुभुजमंडलादवहितोबहिर्भवेय॥इदंदंडकांप्रविविक्षुंभगवंतंदाशरथिंप्रतिभगव
त्याजानक्यावाक्यं॥उभयविधेप्यस्मिन्व्याघातेपूर्वकर्त्तुरभीष्टव्याहननंतुल्यमितिप्राचांसिद्धांतः।तथाचतेषामुदा
हरणं॥दृशादग्धंमनसिजंजीवयंतिदृशैवयाः॥विरूपाक्षस्यजयिनीस्तास्तुवेवामलोचनाइति॥अत्रविचार्यते॥
व्यतिरेकएवात्रालंकारः॥जयिनीर्विरूपाक्षस्यवामलोचनाइतितस्यैवप्रकाशनात्।नचात्रव्यतिरेकोत्थापकत ३३८
याव्याघातःस्छितइतिवाच्यं॥एवमपितस्यालंकारतायाअसिद्धेः॥नह्यलंकारोत्थापकेनालंकारेणैवभवितव्य

मित्यस्तिनियमः॥आननेनाकलंकेनजयतींदुंकलंकिनमित्यादाविववस्तुमात्रेणापिव्यतिरेकोत्थानोपपत्तेः॥न
त्वस्योक्तप्रकारव्यतिरेकनिर्मुक्तोविषयोस्तियेनस्वातंत्र्यमभ्युपगच्छेम॥तस्मादलंकारांतराविनाभूतालंकारांत
रवदिहाप्यवांतरोस्तिविच्छित्तिविशेषोलंकारभेदकइतिप्राचामुक्तिरेवात्रशरणं॥यत्तुल्य[illegible]नविसृजत्यर्थंनरोदारि धो-|
द्यशंकया॥दातापिविसृजत्यर्थंनयैवतन्तुशंकयेति॥कुवलयानंदउदाहृतं॥एवंश्लेषातिशयोक्त्याद्युपायो
न्नीतितेनकिंचिदंशाभेदाध्यवसानेनामुखएवप्रादुर्भावितोयोविरोधोविच्छित्तिमात्रात्माक्षणप्रभावदननुव
र्त्तमानस्तन्मूलकाविरोधाभासादयोव्याघातांताअलंकारानिरूपिताःतेचनानारूपंवैचित्र्यंभजंतोविरो
धाभासस्यैवप्रभेदानतुनतोतिरिक्ताःकांचनस्यैवकंकणादयइत्येके॥रूपकदीपकादीनामौपम्यगर्भा

र॰गं॰ णाम्नुपमाभेदत्वापत्तेर्बहुव्याकुलीस्यादितिपरस्परछायामात्रानुसारिणोभिन्नविछिन्नयोभिन्नाएवेत्यपरे
३३९ ।। ।।इतिरसगंगाधरेव्यायानप्रकरणं।। ।।अथशृंखलामूलाअलंकाराः।। ।।तत्रपंक्तिरूपेणनिबद्धा
नामर्थनांपूर्वस्यपूर्वस्योत्तरोत्तरस्मिन्[redacted]उत्तरोत्तरस्यवापूर्वपूर्वस्मिन्संसृष्टत्वंशृंखलात
न-। त्वकार्यकारणताविशेषणविशेष्यतादिनानारूपां इयंचस्वतंत्रेविक्ष्यमाणप्रभेदेगतार्थत्वान्नतस्यास्तेनवि अलंकारः।
नाविविक्तोविषयोस्तियथाहिरूपकादिष्वनुप्राणकतयास्थितोप्यभेदांशः समानधर्मांशोवानपृथगलंकार
एवंप्रकृतेपीत्याहुः।।तदपरेनक्षमंते।।सावयवादिभेदेरूपकस्यपूर्णालुप्तादिभिरुपमायागतार्थत्वात्स्व ३३९
तंत्रालंकारतानस्यान्नहिविशेषनिर्मुक्तंसामान्यमस्तियेनविविक्तोविषयःस्यात्।।तस्माच्छृंखलायाएवका

रणमालादयोभेदाइति।।मतयोरनयोस्तत्वमुपरिष्टाद्विवेचयिष्यामः।।सैवशृंखलाआनुगुण्यस्यकार्य
कारणभावरूपत्वेकारणमाला।।तत्रपूर्वपूर्वंकारणंपरंपरंकार्यमित्येकापूर्वपूर्वंकार्यंपरंपरंकारणमित्यप
+ Bales has this word. रा।सैयथाक्रमेणयथा।।लभ्येतपुण्यैर्गृहिणीमनोज्ञातयासुपुत्राःपरितःपवित्राः।स्फीतंयशस्तैःसमुदेति
नित्यंतेनास्यनित्यःखलुनाकलोकः।।स्वर्गापवर्गौखलुदानलक्ष्मीर्दानंप्रसूतेविपुलासमृद्धिः।।समृद्धिम
न्नेतरभागधेयंभाग्यंचशंभोनवपादभक्तिः।।इहचयद्यादौकारणोक्तिरेवप्रक्रम्यतेतदापुनस्तस्यकारणंत स्तू-।
स्यापिकारणमितितत्कस्यचित्कारणंतदपिकस्यचिदितिवाकारणमालायुक्ता।।यदातुकार्योक्तिस्तदात
स्यकार्यंतस्यापिकार्यमितितत्कस्यचित्कार्यंतदपिकस्यचिदितिवायुक्ता।।सर्वथैवयःशब्दःकार्यकारण

र॰गं॰ नोपस्थापकआदौप्रयुक्तःसएवनिर्वाह्यः॥एवंक्रमेणनिबंधनमाकांक्षानुरूपत्वाद्रमणीयमन्यथातुभग्न
३४॰ प्रक्रमंस्यात्॥यथाप्राचीनानांपद्यंजितेंद्रियत्वंविनयस्यकारणंगुणप्रकर्षोविनयादवाप्यतेगुणाधिकेपुंसि
जनोनुरज्यतेजनानुरागप्रभवाहिसंपदः॥अत्रजितेंद्रियत्वंविनयस्यकारणंश्रुत्वाजितेंद्रियत्वस्यापिकिंका
रणमितिविनयःकस्यकारणमितिवाआकांक्षोदेतिकारणस्यैवश्रुतिवशात्पूर्वमुपस्थितेःकारणंतुज्ञातंका
र॰ र्यंपुनर्नस्यकिमितिक्वचिदाकांक्षातुकार्यत्वकारणत्वयोःसंबंधिपदार्थत्वात्कारणश्रुत्यनंतरमेकसंबंधिज्ञा
नाधीनेकार्यत्वोपस्थित्यासंगमनीयानत्वसौसार्वत्रिकी॥एवंचविनयःकस्यकारणमित्याकांक्षायांगुणप्रक ३४॰
र्षोविनयादवाप्यतइतिवाक्यंयद्यपिफलतःपरिपूरकंभवतितथापिनसाक्षादित्यहृदयंगममेव॥तथागुण

प्रकर्षात्किमाप्यतइत्याकांक्षायांगुणाधिकेपुंसीतिच॥अत्रचकथितपदत्वंनदोषः॥प्रत्युतपदांतरेणानस्यार्थ
स्योक्तौरूपांतरेणास्थितस्यनटस्येवप्रत्यभिज्ञाप्रतिरोधकत्वान्नविवक्षितार्थसिद्धेरकुंठितत्वविरहाद्दोषःस्यात्
॥शब्दादुपस्थितेर्थेप्रवृत्तिनिमित्तमिवशब्दोपिविशेषणतयाभासतेनतथाचोक्तं॥नसोस्तिप्रत्ययोलोकेयःशब्दा ऽवाक्यपदीये|
नुगमादृते॥इति॥तत्तच्छब्दविशिष्टश्चार्थःस्वरूपेणाभिन्नोपिविशेषणभेदाद्भिन्नलक्षणःप्रतीयतेकुंडगोल
कादिवत्ननुकुंडगोलकादिपदेषुमृताम्रतभर्तृकत्वादिरूपविशेषणघटितंप्रवृत्तिनिमित्तमित्यस्तुभिन्नाका
रप्रत्ययःनाम्नःशोणोरक्तइत्यादौनुताम्रादिशब्दानांशक्तत्वेनशक्यतानवच्छेदकत्वाच्छक्यतावच्छेदकस्यच
गुणगतजातिविशेषस्याभिन्नत्वादभिन्नाकारःप्रत्ययएवोचितइतिचेत्सत्यं॥उदेतिसविताताम्रस्ताम्रएवा

र॰गं॰ स्तमेतिच॥संपत्तौचविपत्तौचमहतामेकरूपतेत्यत्रवैलक्षण्यशून्यतारूपस्यैकरूप्यस्ययथाप्रत्ययोनतथा
३४१ उदेतिसवितातान्म्रारक्तएवास्तमेतिचेत्यत्रेतिसकलानुभवसिद्धं॥एवंचप्रवृत्तिनिमित्तभिन्नस्यापिशब्दस्य
यदिशक्यविशेषणत्वंवैलक्षण्यान्यथानुपपत्त्यानुभवबलेनचसिद्धंतदातदनुगुणैवव्युत्पत्तिःशब्दानांक
ल्प्यते।साचवृत्तिसंबंधेनार्थविशिष्टशब्दज्ञानत्वेनशब्दविशिष्टार्थोपस्थितित्वेनचसामान्यकारणभावरूपा।
घटत्वादितत्तत्प्रवृत्तिनिमित्तप्रकारकबोधत्वेनतुवृत्तिसंबंधेनघटविशिष्टपदज्ञानत्वादिनाचविशेषतोपरः
कार्यकारणभावः।विशेषसामग्रीसहितायाएवसामान्यसामग्र्याजनकतेतिनकश्चिद्दोषः॥यद्वावृत्तिसंबं ३४१
धेनघटादिविशिष्टपदज्ञानत्वेनघटादिपदघटत्वोभयप्रकारकघटादिविशेष्यकोपस्थितित्वेनचकार्यका

रणभावः।पदार्थोपस्थितिशाब्दबोधयोःसमानाकारत्वाच्छाब्दबोधेपिपदभानं॥अनुभवबलाच्चप्रामाणि
कगौरवंनदोषाय॥एतदभिसंधायैवोक्तं॥नसोस्तीत्यादिहेतिकारणमाला॥अथैकावली॥सैवश्रृंखला
संसर्गस्यविशेष्यविशेषणभावरूपत्वएकावली॥साचपूर्वपूर्वस्योत्तरोत्तरंप्रतिविशेष्यत्वेविशेषणत्वेचे
तिद्विधा॥तत्राद्येउत्तरोत्तरविशेषणस्यस्थापकत्वापोहकत्वाभ्यांद्वैविध्यं॥स्वसंबंधेनविशेष्यतावच्छेदकनि
यामकत्वंस्थापकत्वंस्वव्यतिरेकेणविशेष्यतावच्छेदकव्यतिरेकबुद्धिजनकत्वमपोहकत्वं॥उदाहरणं॥स
पंडितोयःस्वहितार्थदर्शीहितंचतद्यत्रपरानुपक्रिया॥परेचतेयैश्रितसाधुभावाःसोसाधुतायत्रचकास्ति
केशवः॥अत्रस्थापकं॥नार्यःसयोनस्वहितंसमीक्षतेनतद्धितंयन्नपरानुतोषणं॥नतेपरेयैर्नहिसाधुता

मा० र० गं० श्चितानसाधुतासानहियत्र धवः॥ अत्रोपेहकं पूर्वपूर्वस्योत्तरोत्तरं॥ यद्यपिस्थापकेप्यपोहकत्वंगम्यते
३४२ योनहिंस्वैनार्थदर्शिसनोपूिडितइत्यादि॥ तथाअपोहकेपिस्थापकत्वंयोहितंसमीक्षतेसआर्यइत्यादि
तथापिशब्देननोच्यतइत्यदोषः॥ धर्मेणबुद्धिस्तवदेवश्रुद्धाबुध्यानिबद्धोसहसैवरुक्ष्मीः॥ लक्ष्म्याव
तुष्टाभुविसर्वलोकालोकेश्वनीनाभुवनेषुकीर्त्तिः॥ इहपूर्वेणपूर्वेणस्वाव्यवहितमुत्तरोत्तरंविशेष्यते॥
अस्मिंश्चैकावल्याद्वितीयभेदेपूर्वपूर्वेः परपरस्योपकारःक्रियमाणोयद्येकरूपःस्यात्तदायमेवमाला
दीपकशब्देनव्यवह्रियतेप्राचीनैस्तथाचोक्तं॥ मालादीपकमाद्यंचेद्यथोत्तरगुणावहमिति॥ तत्रमालाशब्दे ३४२
नशृंखलोच्यते॥ दीपकशब्देनदीपवद्वेनिव्युत्पत्त्याएकदेशस्थंसर्वोपकारकमुच्यते॥ तेनैकदेशस्थस

Dr BHAU DAJI

र्वोपकारकक्रियादिशालिनीशृंखलेतिपदद्वयार्थः॥ एवंचदीपकालंकारप्रकरणेप्राचीनैरस्यलक्षणादी
पकविशेषोयमितिनभ्रमितव्यं॥ तस्यसादृश्यगर्भितायाःसकलालंकारिकसिद्धत्वात्इहचशृंखलावय
वानांपदार्थानांसादृश्यमेवनास्तीतिकथंकारंदीपकतावाचंक्कंश्रद्दधिमहि॥ तेषांप्रकृताप्रकृतात्मक
त्वविरहाच्चविवेचितंचेदंसोदाहरणंदीपकप्रकरणेस्माभिरित्तिनेहातीवायस्यते॥ एतेनदीपकैका
वलीयोगान्मालादीपकमिष्यतइतियदुक्तंकुवलयानंदकृतातद्भ्रांतिमात्रविलसितमितिसुधीभिरालोच दू०
नीयं॥ इत्येकावली॥ अथसारः॥ सैवसंसर्गस्यउत्कृष्टापकृष्टभावरूपत्वेसारः॥ तत्रापिपूर्वपूर्वापेक्षयो
त्तरोत्तरस्योत्कर्षापकर्षाभ्यांद्वैविध्यंसंसारेचेतनास्तत्रविद्वांसस्तेषुसाधवः॥ साधुष्वपिस्पृहाहीनास्तेषु

र०गं० धन्यानिराशायाः॥इमंचालंकारमेकानेकविषयत्वेनपुनर्द्विविधमामनंति॥एकविषयतायामवस्थादि
३४३ भेदाश्रयणमावश्यकंउत्कर्षापकर्षयोर्भेदनियतत्वात्॥नत्ववस्थादिभेदकंविनाकिंचिदपिवस्तुस्वापेक्ष
यास्वयमधिकंन्यूनंवाभवितुंप्रभवति॥एकविषयउत्तरोत्तरोत्कर्षोयथा॥जंबीरश्रियमभिलंघ्यलीलयैव
व्यानम्रीकृतकमनीयहेमकुंभौ॥नीलांभोरुहनयनेधुनाकुचौतेस्पर्द्धेतेखलुकनकाचलेनसार्द्धं॥अत्रपू
र्वपूर्वावस्थाविशिष्टाभ्यांकुचाभ्यामुत्तरोत्तरावस्थाविशिष्टयोस्तयोरेवोत्कर्षइत्येकविषयत्वं॥यद्यपिपरि
माणभेदेनद्रव्यभेदोपिमतविशेषेशक्यतेवक्तुंतथापिकुचत्वेनाभेदाश्रयणेनतत्राप्येकविषयत्वंसू ३४३
पपादं॥यदिचवक्ष्यमाणएकाश्रयेक्रमेणानेकाधेयस्थितिरूपपर्यायोत्रप्रतीयतेतदासोप्यस्तुनहितेन

पूर्वापेक्षयोत्तरोत्कर्षरूपःसारोन्यथासिद्धःशक्यःकर्तुं॥अनेकविषयःसएवयथा॥गिरयोगुरवस्तेभ्यो
प्युर्वीगुर्वीततोपिजगदंडं॥जगदंडादपिगुरवःप्रलयेप्यचलामहात्मानः॥वेदेप्ययमलंकारोदृश्यते॥मह
तःपरमव्यक्तमव्यक्तात्पुरुषःपरः॥पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः॥पूर्वंतुगुणकृतउत्कर्षइ
हतुस्वरूपमात्रकृतइतिविशेषः॥नचात्रगुणकृतउत्कर्षोवाच्यः॥पुरुषस्यनिर्गुणत्वेनाभ्युपगमात्॥नच
तत्रापिविनाशरहितत्वादिर्गम्यमानोगुणउत्कर्षकइतिवाच्यं॥तस्यतादृशाधिकरणभिन्नत्वेमानाभा
वात्॥अनयैवदिशापकर्षोप्युदाहार्यः॥इदंतुबोध्यं॥एकविषयेस्मिंखलायाअचारुत्वात्तदनुप्राणितः
सारोनचारुतांधत्ते॥तस्याःस्वाभाविकभेदापेक्षित्वेनावस्थादिकृतेभेदेनुल्लासात्॥अतएवास्मिन्विष

नै । र०गं० येवर्धमानकालंकारोंगीकृतः॥तल्लक्षणंचरूपधर्माभ्यामाधिक्येवर्धमानकमितिकृतेतस्मात्का
३४४ रणमालादिर्यथाश्रृंखलैकविषयेोनतथासारःशक्योवक्तुं॥एकविषयेलंकारांतराभ्युपगमप्रसंगात्॥
गुणस्वरूपाभ्यांपूर्वपूर्ववैशिष्ट्येसारइतिनुलक्षणंसारस्ययुक्तं॥सचक्वचिच्छृंखलानुप्राणितःक्वचित्स्व
तंत्रइत्यनेकविषयत्वमेकविषयत्वंचसुरूढं॥एवंश्रृंखलाविषयाणामलंकाराणांविच्छित्तिवैलक्षण्यस्या
नुभवसिद्धत्वात्पृथगलंकारत्वेसिद्धेश्रृंखलायाविरोधाभेदसाधर्म्यादिवदनुप्राणकत्वेनोचितानपृथगलं
कारतातथात्वेभेदादीनामपिपृथगलंकारतापत्तेः॥पूर्णात्वुप्तादौतुनविच्छित्तिवैलक्षण्यमपिनूपमाविच्छि ३४४
त्तिरेवेतिसंप्रदायः॥ननुकोयंविच्छित्तिर्नाम॥उच्यते॥अलंकाराणांपरस्परंविच्छेदस्यवैलक्षण्यस्यहेतु

भूताजन्यतासंसर्गेणकाव्यनिष्ठाकविप्रतिभातज्जन्यत्वप्रयुक्ताचमत्कारितावाविच्छित्तिः॥इतिसारालं
कारः॥अथकाव्यलिंगं॥अनुमितिकरणत्वेनसामान्यविशेषभावाभ्यांवानालिंगितःप्रकृतार्थोपपादकृ
त्वेनविवक्षितोर्थःकाव्यलिंगं॥उपपादकत्वंचतन्निश्चयजनकज्ञानविषयत्वंअनुमानार्थांतरन्यासयोर्वा
रणायानालिंगितांतं॥उपमादिवारणायोपपादकत्वेनेत्यंतंपंचम्यादिशब्दप्रतिपादितहेतुत्वकस्यहेतो
रेववारणायोपपादकत्वेनविवक्षितइतिनतुशब्देनतेनरूपेणबोधितइत्येतदर्थफलकं॥तेनभयानकत्वा
त्परिवर्जनीयोदयाश्रयत्वादसिदेवसेव्यइत्यादौनायमलंकारः॥गम्यमानहेतुत्वकस्यैवहेतोःसुंदरत्वे
नालंकारिकैःकाव्यलिंगताभ्युपगमात्॥तच्चसुबंततिङंतार्थत्वाभ्यांतावद्द्विविधं॥आद्यमपिशब्दांतरा

र॰गं॰ र्थविशेषितशरीरंशुद्धैकसुबंतार्थरूपंचेतिद्वेधा।।अत्राप्याद्यंसाक्षात्परंपरयावावाक्यार्थविशेषितंसुबं
३४९ तार्थमात्रविशेषितंचेतिद्विभेदंतिङंतार्थभूतमपिसाक्षात्परंपरयावाक्यांतरार्थविशेषितंसुबंतार्थमात्र वा-।
विशेषितंचेतिद्विप्रकारंशुद्धभेदस्तुतिङंतार्थस्यनसंभवतिक्रियायाःकारकविशेषितत्वावश्यंभावात्।।
शिष्टमग्रेनिरूपयिष्यते।।उदाहरणं।।विनिंद्यान्युन्मत्तैरपिचपरिहार्याणिपतितैरवाच्यानिव्रात्यैःसपु
लकमपास्यानिपिशुनैः।।हरंतीलोकानामनवरतमेनांसिकियतांकदाप्यश्रांतात्वंजगतिपुनरेकाविज
यसे।।अत्रस्त्वन्येनसाधारणतयाप्रतिपादितस्यभगवत्याभागीरथ्याउत्कर्षस्यापाततोघटमानस्योपपा ३४९
दनायानवरतसकललोकपापहरणसमानाधिकरणःश्रमाभावःसुबंतमात्रार्थविशेषितःसुबंतार्थो

विशेषवपुर्हेतुत्वेनोपात्तः।।त्वयंतेतीर्थानित्वरितमिहयस्योद्धृतिविधौकरंकर्णेकुर्वंत्यपिकिलकपालिप्र
६२ भृतयः।।अमंतंमामेवत्वमथकरुणाक्रांतहृदयेपुनानासर्वेषामघमथनदर्पंदलयसि।।अत्रसकलदेव
तीर्थदर्पदलनस्यसिद्धयेस्वात्मपवित्रीकरणंवल्कानिर्बंहुतंचक्षुद्रत्वात्तादृशंसिद्ध्यसमर्थंविशेषकांतर
माकांक्षतीतितीर्थकर्तृकत्वयाकरणंकपालिप्रभृतिकर्तृककर्णमुद्रणंचेतिवाक्यार्थद्वयंस्वात्मरूपक
र्मद्वाराविशेषकमुपात्तंतद्विशिष्टंचतादृशपवित्रीकरणंभागीरथ्युपारूढंतादृशकार्योपपादनसमर्थमि
तिभवतिहेतुः।।पद्मासनप्रमुखनिर्जरचित्तवृत्तिदुष्प्रापदिव्यमहिमन्भवतोगुणौघान्।।तुष्टूषतोममनि
तांतविशृंखलस्यमंतुंशिशोःशिव[illegible]तुमिहासियोग्यः।।अत्रशिशुत्वंशुद्धैकसुबंतार्थोपराधक्षमाकरणे नमं-।

म-।र०गं० हेतुः॥तथादिव्यमहित्वमचिंत्यमाहात्म्यंस्फुबंतार्थविशेषितसुबंतार्थरूपंब्रह्मादिचित्तदुरापत्वे॥एवंता
प-३४६ दृश[illegible]रमेश्वरगुणकर्मकस्तवोमंतौताहृशस्तवेचविश्रृंखलत्वमितिशुद्धसुबंतार्थोदाहरणे॥विशिष्ट
सुबंतार्थस्याप्युदाहरणं॥तवालंबादंबस्फुरदलघुगर्वेणसहसामयासर्वेऽवज्ञापुरपथमनीयंतविबु
धाः॥इदानीमौदास्यंयदिभजसिभागीरथिनदानि[illegible]राधारोहारोदिमिकथयकेषामिहपुरः॥अत्रनिरा
धारइत्यादिनाभिव्यक्तेवक्तृनिष्ठसकलकर्तृकद्वेषे[illegible]मकर्तृकावज्ञापुर[illegible]थनयनरूपःस्फुबंतार्थवि प-।
शेषितस्तिडंतार्थउपपादकः॥विश्वास्यमधुरवचनैःसाधून्प्येवंचयंतिनम्रनमाः॥नान्यपिदधासिमा ३४६
श्यपि! नःका[illegible]यातस्तवापिचविवेकः॥अत्रापिपृथिवीविवेकनाशोपपादनेतिडंतार्थस्यधारणस्य

स्फुबंतार्थविशेषितस्यनस्यैवजनधारणात्मनोवाअर्थसामर्थ्यात्साधुवंचनरूपपूर्ववाक्यार्थविशेषितं
धारणंहेतुः॥विशेषणत्वंचकर्मणिविशेषणत्वात्परंपरयाबोध्यं॥एतेचभेदाःप्राचीनकल्पितपदा
र्थवाक्यार्थभेदद्वयवच्चातुर्यमात्रेणकल्पितानतुवैचित्र्यविशेषेण॥अथानुमाना[illegible]दस्यकोविशेषः
॥ननुव्याप्यत्वपक्षधर्मत्वाभ्यांज्ञायमानमेवार्थसाधकमनुमानंस्वरूपेणज्ञायमानप्रकृतार्थोपपाद
कंकाव्यलिंगमितिविशेषइतिचेत्न[illegible]नोपपादकंहिसत्यांयुक्तौसानुसतिव्यभिचारपक्षावृत्तित्वयो
रन्यतरस्यापिज्ञानेनसंभवति॥यथाविनिंद्यान्युन्मत्तैरित्युदाहृतपद्येनादृशश्रमाभावउत्कर्षव्यभि
चरितोभागीरथ्यवृत्तिर्वेतिज्ञानेजात्वपिनसर्वोत्कर्षःसेद्धुमीष्टेसेद्धुमीष्टेचसर्वोत्कर्षाव्यभिचरि

र.गं. तोभागीरथीवृत्तिश्चेतिज्ञाने॥एवंहेतोः सर्वत्राप्युपपाद्याव्यभिचारितत्वज्ञान एवोपपाद्योपपत्तिरन्यथात्विदमे
३४७ वमेनैवंवास्यादितिसंदेह एवातस्मादुपपत्तिसमर्थनादिविलक्षणशब्दप्रयोगा आलंकारिकाणामनुमिति
नत्व- सरणिमेवाभिनिविशंते॥नचसमर्थनादिदप्रत्ययोर्नुमितिर्वाच्यं॥सहींद्रियसंनिकर्षाभावान्नप्रात्यक्षिको रिति-
अनुमितिसामग्र्याबल[illegible]वत्वान्नशाब्दोत एवनमानसोपीति॥सत्यंकाव्यलिंगंप्रकृतार्थोपपादकंउपप
त्तिश्चानुमितिरेवव्यभिचारित्वेपिहेतोस्तदानींव्यभिचारस्फूर्तेः॥तथापिनानुमानालंकारस्यात्रविषयः॥श्रो
तुर्यल्लिंगकानुमितिबुबोधयिषयाकविःकाव्यंनि[illegible]तितल्लिंगमनुमानालंकृतेर्विषयः॥काव्यव्यापारगोच ३४ मौ-
रीभूतानुमितिकरणमितिनिष्कर्षः॥काव्यलिंगज्ञानजानुमितिस्तुनकविनाश्रोतु[illegible]बोधयिषिता॥अतएवा नु-

सोनव्यापारगोचरःश्रोतुःकेवलंकारणवशाज्जायतइतिनास्येवात्रजायमानायामप्यनुमितावनुमानालंकृ
तेर्विषयः॥तस्मिन्‌मणिप्रात्यमहांधकारइतिवक्ष्यमाणपद्येतुबुबोधयिषितैवानुमितिरित्यस्त्यनुमानविष पिव्रातहतां-
क- यः॥अपिच[illegible]विनिबद्धप्रमात्रंतरनिष्ठाप्यनुमितिरनुमानालंकृतिंप्रयोजयतिश्रोतृनिष्ठामहावाक्यार्थनिश्च
यानुकूलातुकाव्यलिंगमितिमहाननुविशेषः॥एवंचकाव्यलिंगातिप्रसंगवारणायानुमानलक्षणप्रविष्टानु
गोचर- मितौकाव्यव्यापारत्वंविशेषणंदेयं॥यत्तुसमर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनमितिकुवलयानंदकारोल
म- क्षण[illegible]काषीत्तदपिसामान्यविशेषभावानालिंगितत्वविशेषणरहितंचेदर्थांतरन्यासेस्यादेवातिप्रसक्तं॥य
दपियत्त्वन्नेत्रसमानकांतिसलिलेमग्नंतदिंदीवरंमेघैरंतरितःप्रियेतवमुखछायानुकारीशशीयेपित्वद्गमना नु-

र०गं० नुकारिगतयस्तेराजहंसागतास्त्वत्साद्दश्यविभेदमात्रमपिमेदैवेननक्षम्यते॥मृगयश्चदर्भांकुरनिर्व्यपेक्षास्त
३४८ वागतिज्ञां समबोधयन्मां॥व्यापारयंत्योदिशिदक्षिणस्यामुत्पक्ष्मराजीनिविलोचनानि॥पूर्वत्रपादत्रयार्थो
ऽनेकवाक्यार्थरूपश्चतुर्थपादार्थेहेतुः॥उत्तरत्रतुसंबोधनेव्यापारयंत्यइतिमृगीविशेषणत्वेनानेकःपदा
र्थोहेतुरुक्तइत्यलंकारसर्वस्वकृतोक्तमनुमोदितंचकुवलयानंदकृतातदुभयमसत्॥अनुमानार्थांतर
न्यासविषयेहेत्वलंकारोनेतितावत्सर्वसंमतं॥अन्यथातयोरुच्छेदापत्तेः॥अयंचानुमानस्यैवविषयःच
स्य०| तुर्थचरणेदैवरूपेपक्षेनायिकांगसाद्दश्यदर्शनजन्यदुःखासहिष्णुत्वरूपसाध्यंचरणत्रयवेद्येनतत्तदंग ३४८
साद्दश्याधारविघटकत्वेनहेतुनासिद्धंःस्फुटत्वात्॥दैवंनायिकांगसाद्दश्यदर्शनजन्यमन्निष्ठदुःखासहिष्णु

MEMORIAL

तत्तन्नायिकांगसाद्दश्याधारविघटकत्वान्मदीयशत्रुभूतयज्ञदत्तादिवदितिचप्रयोगः॥मृगयश्चेतिद्वितीयपद्ये
पारो०| यद्यपिसंबोधनेवक्तृनिष्ठेमृगीनेत्रव्यापारोज्ञायमानउत्पादकस्तथापिनासावुत्पादकतानुमितिकरणतया
ऽतिशनइत्यनुमानालंकारएवयुक्तः॥इयांस्तुविशेषोयत्पूर्वपद्येनुमितिर्गम्याइहपुनर्बुध्यतेवाच्या॥मृग्यो
दक्षिणानिलसंपर्कवत्योदक्षिणाभिमुखविलक्षणनेत्रव्यापारवत्त्वादितिचप्रयोगः॥वैलक्षण्यंचोत्पक्ष्मेत्यादि
नोक्तंबोध्यं॥अत्रवदंति॥काव्यलिंगंनालंकारःवैचित्र्यात्मनोविच्छित्तिविशेषस्याभावात्सहिजन्यतासंसर्गेण
कविप्रतिभाविशेषस्तैर्निर्मितत्वप्रयुक्तश्चमत्कृतिविशेषोवेत्युक्तं॥नचानयोरन्यतरस्याप्यत्रसंभवोहेतुहे
तुमद्भावस्यवस्तुसिद्धत्वेनकविप्रतिभानिर्व[illegible]त्वायोगात्॥अतएवचमत्कृतिरपिदुर्लभाश्लेषादिसंमिश्रणे स्र|

र॰गं॰ नविच्छित्तिविशेषोऽत्राप्यस्तीतितुनवाच्यंतस्यश्लेषाद्यंशेऽप्रयोज्यत्वेनकाव्यलिंगस्यालंकारतायास्तथाप्यसिद्धेः
३४१द् ।।यत्रतूपस्कारकवैचित्र्याद्विलक्षणंतदुपस्कार्यवैचित्र्यंतत्रास्तुनामोपस्कारकादुपस्कार्यस्यपृथगलंकारत्वं
यथातिशयोक्तेर्हेतुफलोत्प्रेक्षयोः।।यत्रतूपस्कारकवैचित्र्यएवविश्रांतिस्तत्रोपस्कार्यमनलंकारएवयथात्र
रूते।।एवंतर्हिबहूनामलंकारत्वेनप्राचीनैरुरीकृतानामनलंकारतापत्तिरितिचेदस्तुकिंनश्छिन्नंतस्मान्नि
र्हेतुरूपदोषाभावःकाव्यलिंगमित्यपिवदंति।।इतिरसगंगाधरेकाव्यलिंगं।।अथार्थांतरन्यासः।।सामान्येन
विशेषस्यविशेषेणसामान्यस्यवायत्समर्थनंतदर्थांतरन्यासः।।समर्थनंचेदमेवमनेवंवास्यादितिसंशयस्य ३४१
प्रतिबंधकइदमित्थमेवेतिदृढप्रत्ययोनिश्चयइतियावत्।।तत्रप्रकृतयोःसामान्यविशेषयोःसमर्थ्यत्वंअप्रकृत

योर्विशेषसामान्ययोःसमर्थकत्वंप्रायशोदृश्यते।।तच्चतावत्साधर्म्यवैधर्म्याभ्यांद्विविधं।।उदाहरणं।।क
रिकुंभतुलामुरोजयोःक्रियमाणांकविभिर्विशृंखलैः।।कथमालिश्रृणोषिसादरंविपरीतार्थविदोहियोषितः।।
अत्रसंबोध्यकर्तृकस्यतदीयकुचवृत्तिकरिकुंभतुलासादरश्रवणस्यानौचित्यंप्रतिपाद्यते।।तच्चतस्यानिष्ट
साधनत्वेसंगच्छतेअनिष्टसाधनत्वमपितादृशश्रवणमिष्टसाधनमितिबुध्याश्रवणंकुर्वाणायाःकांतायाभ्रांता
त्वंविनादुरुपपादमितिस्त्रीत्वेनभ्रांतात्वंप्रतिपाद्यतेतच्चसंबोध्यस्त्रीविशेषभ्रांतत्वरूपस्यविशेषस्यसामान्यं
समर्थकंच।।उपकारमेवकुरुतेविपद्गतःसद्गुणोनितरां।।मूर्छांगतोमृतोवारोगानपहरतिपारदःसक
लान्।।अत्रविपद्गतसद्गुणकर्तृकोपकारस्यसामान्यस्यप्रकृतस्यमूर्छितमृतपारदकर्तृकरोगापहरणं

र॰गं॰ विशेषः॥उदाहरणतयासमर्थकंच॥पार्श्ववृत्तांतेतुपूर्वार्धोत्तरार्धयोर्व्यत्यासेकृतेसामान्यस्यविशेषसमर्थकता द–|
३५१ पर्यवसंभवति॥तथा॥अहमेकोरणेरामोयातुधानाअनेकशः॥असहायामहात्मानोयांतिकांचनवीरतां॥अत्रवि न–|
शेषस्यसामान्यंसमर्थकं वैपरीत्येतुसामान्यस्यविशेषःअसहायाइत्याद्युत्तरार्धमपास्यनूनंसहा
यसंपत्तिमपेक्षंतेबलोर्जिताइतिकृतेविशेषोवैधर्म्येसामान्यस्यअर्थवैपरीत्येदुर्बलवृत्तांतेप्रकृतेतुवैपरी । ण|त्यम्–|
अस्मिन्नलंकारेसमर्थ्यसमर्थकभावआर्थःशाब्दश्चालंकारतापयोजकःनतुकाव्यलिंगेहेतुर्हेतुमद्भावइवार्थ
एवहियतःयतइत्यादेःप्रतिपादकस्याभावेआर्थःसतुकथितः मूर्छंगतोमृतोवेत्यत्रतत्सत्वेशाब्दः॥सोपिवि ३९०
परीतग्रहणाद्दीत्यत्र॥यथावा॥भवत्याहिव्रात्याधमपतितपाषंडपरिषत्परित्राणस्नेहःश्लथयितुमशक्यः

खलुयथाममायेयंप्रेमादुरितानिबर्हेबजगतिस्वभावोयंसर्वैरपिखलुतोदुःपरिहरः॥अत्रभगवत्याभा घं–|य–|
गीरथ्याःस्तोतुश्चवृत्तांतयोर्विशेषयोःसमर्थकस्यचतुर्थचरणप्रतिपाद्यस्यसामान्यस्यसमर्थकतायतइत्यनेनो
च्यते॥ननुसामान्यार्थोविशेषार्थसमर्थकइत्यस्यसामान्यव्याप्तिज्ञानंविशेषानुमितिप्रयोजकमित्येवार्थःपर्यव
स्यति॥अन्यथास्वभावादेर्दुष्परिहरत्वादिव्यभिचारज्ञानदशायांतादृशार्थस्यसमर्थकत्वापत्तेः॥प्रतीतिविश
दीकरणंसमर्थकेनक्रियतेनत्वनुमानमितिप्राचीनप्रवादस्त्वविचारितरमणीयइतिनायंभेदोनुमानादतिशेते
अतिशेतेचविशेषार्थेनसामान्यार्थसमर्थनरूपोधिकरणविशेषारूढसहचारज्ञानाद्धिव्याप्तिज्ञानदार्ढ्यमिति तन्–|
चेत्कटिः श्रृणोति॥नचैवमपिविशेषेणसामान्यसमर्थनंनार्थांतरन्यासभेदोभवितुमर्हतिप्रागुदाहरणालंका त्कोन|

र॰गं॰ रेणैवगतार्थत्वादितिवाच्यं॥इवादिप्रयोगाभावस्यैवात्रनतोवैलक्षण्यात्‌॥एवमपिवाचकाभावादार्थोयमुदा
३९१ हरणालंकारोस्तुनत्वर्थांतरन्यासभेदइतिचेत्‌॥इदमस्तिवैलक्षण्यंसामान्यार्थसमर्थकविशेषवाक्यार्थस्यद्वयी थ—।
गतिःअनुवाद्यांशमात्रेविशेषत्वंविधेयांशस्तुसामान्यगतएवेत्येका॥अनुवाद्यविधेयोभयांशेपिविशेषत्वमित्य वि—।
परा॥तत्राद्यउदाहरणालंकारस्यविषयः॥द्वितीयात्वर्थांतरन्यासभेदस्यएवंचमूर्छांगतोमृतोवानिदर्शनंपार
दोत्ररसइत्युदाहरणालंकारगतेविशेषेउपकारमेवकुरुतइतिप्राचीनसामान्यार्थगतेवयथोक्तरूपेणक्रियावि
धेयारोगानपहरतिपारदःसकलानित्यर्थांतरन्यासगतेतुपृथगुपात्तविशेषरूपेणेति॥लक्षणेत्वस्यविशेषेणे ३९१
त्यत्रोभयांशविशेषोमम्यस्तेनोदाहरणालंकृतौनातिप्रसंगः॥यदिचायमस्मोविशेषोनास्योदाहरणालंकारा

त्पृथगलंकारतांसाधयितुंप्रभवत्यपितुनहिविशेषेणामित्युच्यतेनतदोदाहरणालंकारोर्थांतरन्यासस्यदृष्टांतस्य
प्रतिवस्तूपमारूपकस्यातिशयोक्तेश्चविशेषः॥उपमेवचार्थस्मरणभ्रांतिमत्संदेहाइत्यपिसुवचंस्यात्‌तत्रापि स—।
विशेषस्याल्पत्वात्‌॥किंचउदाहरणालंकारोनप्राचांमनःसंतोषमावहति॥उपमयैवतैस्तस्यनिरासात्‌अतस्ते
षांविशेषेणसामान्यस्यसमर्थनमर्थांतरन्यासंविनानान्यत्रप्रवेशमीष्टइति॥अत्रहिप्रतिज्ञाहेत्ववयवश्लोकौ ष्ट।योरिव
क्रमप्राप्तंसमर्थ्यसमर्थकवाक्ययोःपौर्वापर्यमितिनमंतव्यं॥नत्वत्रसमर्थकंसमर्थ्यानुपपत्त्युत्थापितायामा
कांक्षायांसत्यामेवाभिधीयतइत्यस्तिनियमः॥अनुपपत्तेरभावेपिप्रतीतिवैशद्यार्थंकविभिस्तस्याभिधानात्‌॥
एवंचवैपरीत्येपिनदोषः॥यथादीनानामथपरिहायशुष्कसस्यान्योदार्यंवहतिपयोधरोहिमाद्रौ॥औन्नत्यं

र०गं० विपुलमवाप्यदुर्मदानांज्ञातोयंक्षितिपभवादृशांविवेकः॥अत्रदानेनासंभावितस्यविदुषोराज्ञानंप्रतिकोपव
३९२ चनेपूर्वार्धगतोविशेषउत्तरार्धगतेसामान्येप्रस्तुतेसमर्थकः॥एवमप्रकृतेःप्रकृतस्यसमर्थनमुदाहृतं॥प्र
कृतेनप्रकृतसमर्थनंयथा॥कस्त्वयेन्मार्मिकस्तावद्रमणीयेषुवस्तुषु॥हित्वांतिकसरोजिन्याःपश्यया न्वि
तिनषट्पदः॥जलक्रीडायांदूरंगच्छतिवदंतीकामिनीप्रतिनायकस्योक्तिरियमस्यांवृत्तांतद्वयमपिप्रकृतं
॥कविस्वकृतेनाप्रकृतस्यापिसमर्थनंसंभवतिपरंतुनदप्रकृतंप्रांतेप्रकृतपर्यवसन्नंभवत्याधानतस्तुतस्या व-
प्रकृतत्वं॥सर्वथैवाप्रकृतस्यसमर्थनाप्रसक्तेः॥यथा॥प्रभुरपियाचितुकामोभजतेवामोरुलाघवंसहसा ३९२
॥यद्दत्त्वयाधरार्थीसपदिविमुख्यानिराशतांनीतः॥अत्रकामुकयोःप्रकृतेनवृत्तांतेनविशेषेणदातृयाचकव वृ-

---

त्तांतोऽप्रस्तुतःसामान्यात्मासमर्थ्यते॥यत्तुकारणेनकार्यस्यकार्येणवाकारणस्यसमर्थनमित्यपिभेदद्वयमर्थांतरन्या रण-
सस्यालंकारसर्वस्वकारोन्यरूपयत्॥तन्न॥तस्यकाव्यलिंगविषयत्वात्॥अन्यथाविपुःप्रादुर्भावात्इतिसकला
लंकारिकसिद्धकाव्यलिंगोदाहरणमसंगतंस्यात्॥अपराधेवाक्यार्थद्वयस्यकारणत्वेनार्थांतरन्यासोदाहर
णनापत्तेः॥यदपिविमर्शिनीकारस्याह॥विशेषेणापिसामान्यसमर्थनेयत्रसामान्यवाक्यार्थस्योपपादनापेक्षत्वं स-
तत्रार्थांतरन्यासः॥यत्रपुनःसिद्धस्यैवप्रतीतिविशदीकरणार्थंतदेकदेशभूतोविशेषउपादीयतेतत्रोदाहरणालंका
रोयथानिमज्जतींदोःकिरणेष्विवांकइत्यत्रेति॥तदपिन॥निजदोषावृतमनसामतिसुंदरमेवभातिविपरीतंपश्य
तिपित्तोपहतःशशिशुभ्रंशंखमपिपीतमितिप्राचीनसंमतोदाहरणेसामान्यवाक्यार्थस्यासंदिग्धत्वेनोपपादना

नपेक्षत्वान्नहिदोषेणाभ्रमोभवतीत्यर्थेपामरस्याप्यस्तिसंशयोयेनोपपादानापेक्षास्यात्॥ अस्यैवतर्कस्थलइवा
हार्योत्रापिसंशयइतिचेत्त्वदुक्तोदाहरणालंकारेपितस्यसाम्राज्यात्॥ तस्मादस्मदुक्तैवव्यवस्थाउपसर्त्तव्या॥
कुवलयानंदकारस्तुयस्मिन्विशेषसामान्यविशेषाःसविकस्वरः॥ अनंतरत्नप्रभवस्येत्यादिक॰॰रुंतुदमंत
रेणारणितंगाहस्वकार्कस्वयंमाकंमेदंकरंदशालिनमिहत्वांमन्महेकोकिलं॥ धन्यानिस्थलसौष्ठवेनकतिचित्
वस्तूनिकस्तूरिकानेपालक्षितिपालभालतिलकेपंकेनशंकेतकः॥ पूर्वमुपमारीत्याइहत्वर्थांतरन्यासरीत्याविक
स्वरालंकारइत्या॰तदपितुच्छं॥ उपकारमेवकुरुतइत्युदाहरणालंकारोक्तास्मदुदाहरणेप्राथमिकविशेष॰स्या ३९३ ह
भावात्त्वदुक्तोविकस्वरालंकारोनसंभवतीतिकश्चिदलंकारस्त्वयापिवाच्यएवंचार्थांतरन्यासस्यतस्यचार्थांतरन्या

सप्रभेदयोश्चसंसृष्ट्येवोदाहरणानांत्वदुक्तानांगतार्थत्वेन॰॰॰नालंकारस्वीकारानौचित्यात्॥ अन्यथोपमादिप्र | नवी-
भेदानामनुग्राह्यानुग्राहकतयासंनिवेशेलंकारांतरकल्पनापत्तेः॥ वीक्ष्य॰मंघनश्यामंनन्दतुःशिखिनोवने॥ रा-
इत्यत्राप्युपमापरिपोषितायांभ्रांतावलंकारांतरत्वप्रसंगाच्च॥ ॥इतिरसगंगाधरेअर्थांतरन्यासालंकारः॥ ॥
अथानुमानालंकारः॥ अनुमितिकरणमनुमानं॥ अनुमितिश्चानुमितित्ववती॥ अनुमितित्वंचानुमिनोमीतिमान
ससाक्षात्कारसाक्षिकोजातिविशेषःव्याप्तिप्रकारकपक्षधर्मतानिश्चयजन्यज्ञानंवानुमितिस्तस्याश्चकरणंव्याप्ति
प्रकारकलिंगनिश्चयइत्येकेव्याप्यत्वेननिश्चीयमानंलिंगमित्यपरेइदंचसाधारणमनुमानं॥ अस्यचकविप्रतिभो
ल्लिखितत्वेनचमत्कारित्वेलंकारता॥ यथा॥ तस्मिन्मणिव्रातहृतांधकारेपुरेनिशालोपविधानदक्षे॥ सद्योवियु

र॰गं॰ कादिवसावसानंकोकाःसशोकाःकथयंतिनित्यं।।अत्रकथनंस्फुटबोधःसचानुमित्यात्मकःकोकवियोगरूप
३९४ स्यलिंगस्यव्याप्यत्वेननिश्चयात्कारणादुत्पद्यते।।नन्वत्रचांधकारविशेषाभावस्यनत्सामान्याभावत्वेनाध्यवसाये
सतिनिशालोपविधानदक्षतासिद्धौदिवसावसानसिद्धभावप्रयुक्तादिवसावसानानुमितिरित्यस्तिकविप्रतिभो सा
क्ष्यन् ह्लिखितत्वं।।व[illegible]माणमुन्मीलितमेतदितिनमंतव्यंतस्याप्यनुमानतायाएवस्थापयिष्यमाणत्वात्।।य
थावा।।अम्लायन्मदरानिकैरवकुलान्यग्लासिषुःसत्वरंदैन्यध्वांतकदंबकानिपरितोनेशुस्तमांनामसाः।।
सन्मार्गाःप्रसरंतिसाधुनलिनान्युल्लासमातन्वतेतन्मन्येभवतःप्रतापतपनोदेवप्रभातोन्मुखः।।पूर्ववल्लिं ३९४
गलिंगिनोःशुद्धत्वमिहतुरूपकानुप्राणितत्वमितिविशेषःकविप्रतिभोल्लि[illegible]खितत्वंपुनःस्फुटमेवइहयत्र

लिंगलिंगिनोःसत्वंतत्रमन्येशंकेध्रुवमिजानेइत्यादिपदानामनुमितिबोधकत्वं।।यत्रतुसादृश्यादिनिमि
त्तसद्भावस्तत्रोत्प्रेक्षाबोधकत्वमितिविवेकः।।तेनमन्मथामात्यमायांतमहंमन्येमहामहं।।चक्षुश्चमत्करोतिंध
त्तेयदहोकिलकोकिलइत्यादावनुमैवनोत्प्रेक्षा।।अत्रेदंबोध्यं।।मन्येइत्यादिवाचकपदोपादानेवाच्यम
नुमानंयथानंतरोक्ते।।वक्तिकथयतीत्यादिलक्षकपदोपादाने[illegible]लक्ष्यंयथा[illegible]कोकाःसशोकाइत्यादौतद
न्यतरानुपादानेसाध्याक्षिप्तायामनुमितौप्रतीयमानं।।यथा।।अम्लायन्नितिपद्ये[illegible]तद्भावीतवदेव[illegible]सां
प्रतमहोमार्त्तंडबिंबोदयइतितुचतुर्थचरणनिर्माणेसाध्यस्याप्यनुपादानेलिंगमात्रोपादाने।।यत्राप्यप्रमा पाणर्थे B.
णंसाध्यंतत्रध्वन्यमानं।।यथा।।गुंजंतिमंजुपरितोगत्वाधावंतिसंमुखं।।आवर्त्तनोनिवर्त्तनेसरसीषुम

र॰ गं॰ धुन्वता॥ अत्र शरदागमस्य साध्यस्यानुमानं ध्वन्यते॥ एवमेषां व्यवस्थानं प्रागुक्ते करणमनुमानमिति
३९९ नये संगच्छते॥ करणस्य ज्ञायमानलिंगत्वपक्षे वाच्यतायाः केवलाया पत्तेः॥ लिंगज्ञानत्वपक्षे वाच्य आ
त्वलक्ष्यत्वयोरनापत्तेरतो नुमितिरेवानुमानं॥ तस्याश्च वाच्यत्वलक्ष्यत्वप्रतीयमानत्वध्वन्यमानत्वानां
साम्राज्यं स्फुटश्च करणाद्व भावे पीति॥ इत्यनुमानप्रकरणं॥ अथ यथासंख्यं॥ उपदेशक्रमेणार्थानां संबं
धो यथासंख्यं॥ पदार्थानतिवृत्तिरूपे यथार्थे व्ययीभावः॥ संख्याया अनतिवृत्तिश्च प्रथमस्य प्रथमेनैव द्वितीय
स्य द्वितीयेनैवेत्यादिक्रमेण संबंधो भवतीति योगार्थ एव लक्षणं॥ यथा॥ यौवनोद्गमनितांतशंकिताः शीलशौर्य ३९९
बलकांतिलोभिताः॥ संकुचंति विकसंति राघवे जानकीनयननीरजश्रियः॥ अत्र यौवनोद्गमनितांतशंकिताः संकु त

चंति शीलशौर्यबलकांतिलोभितास्विकसंतीति प्रथमद्वितीयक्रिययोः क्रमेण प्रथमद्वितीयविशेषणावच्छिन्नेनक
र्त्रान्वयः स च शाब्दः समासाभावेन शब्दानामप्यन्वयानुभावसंधिश्चात्र प्रधानं॥ यथा वा॥ द्रुमपंकजविद्वांसः
मु सर्वसंतोषपोषकाः धेव हंत न हन्यं ते कुठारहिमदुर्जनैः॥ इह दीपकमप्राणकं॥ यथा वा॥ वृंदापित्तृगहनच नु ३
रौ कुसुमायुधजननहननशक्तिधरौ॥ अरिशूललांछितकरौ भीतिं मे हरिहरौ हरतां॥ इहोभयत्रार्थः॥ पूर्वसमा
सेन समासान्वयोऽवयवानामन्वयस्य पार्ष्णिकत्वात्॥ इत्यादिरपरिमितोस्य विषयः॥ अथ क्रमेणान्वयबोधे किं तृ
नियामकं॥ अत्र केचित्॥ योग्यताज्ञानमेव नियामकं॥ तथाहि॥ वृंदापि गहनचरावित्यत्र हरेः श्मशानचा तृ
रित्वस्य हरेर्वृंदावनचारित्वस्य च बाधितत्वादन्वयबोधाभावे हरौ वृंदावनचारित्वस्य हरे श्मशानचारित्वस्य

र॰गं॰ चयोग्यत्वादवयवबोधोजायमानः क्रमिकान्वयबोधः पर्यवस्यति ॥ एवमन्यत्रापीत्याहुः ॥ अन्येतुयोग्यता
३९६ ज्ञानस्यनियामकत्वेक्रमभंगस्यदोषत्वानस्यात् ॥ कीर्तिप्रतापौभातस्तेसूर्याचंद्रमसाविवेत्यादौकीर्त्तौचंद्र
सादृश्यस्यप्रतापेसूर्यसादृश्यस्यचव्युत्क्रमोक्तस्यापियोग्यतावशादेवप्रतीत्युपपत्तेः ॥ नहिक्रमिकमेवयोग्यं अपक्रमयोग्य
येनतत्वमुख्यार्थहानिः स्यात् ॥ भवतिचानुभवसिद्धासानस्मादन्वयिसमसंख्यपदार्थज्ञानस्ययथासंख्या मु-
न्वयबोध[illegible]त्वंकार्यतावच्छेदकंवाच्यं ॥ एवंचकीर्तिप्रतापावित्यत्रचयथाश्रुतानांयथासंख्यान्वय[illegible]बोधोबाध
निश्चयपराहतइतिमुख्यार्थहतिसद्भावात्क्रमभंगस्यदोषत्वसाम्राज्यं ॥ नन्वयिसमसंख्यपदार्थानांयदिय ३९६ न-
थासंख्यान्वयबोधोव्युत्पत्तिसिद्धस्तदायथासंख्यमनुदेशः समानामितिसूत्रंव्यर्थंस्यात् ॥ नचोदाहरणेषुलो
२.८ विधि

॰४१
मादिपामादिपिच्छादिभ्यः शनेलचः ॥ इत्यादिषुलौकिकसामग्रीबलादेवयथासंख्यान्वयबोधोपपत्तेः ॥ योग्य
तामात्रबलात्तथोपपादकमनेनतुशास्त्रमात्रचक्षु[illegible]प्रकृतिविशेषप्रत्ययविशेषसंबंधरूपायायोग्यतायाअज्ञा कैः
नात्तेषांयथासंख्यान्वयबोधार्थंयथासंख्यमितिसूत्रमिति[illegible]चेन्न ॥ ममापिप्रागुक्तव्युत्पत्तिरहितानांतादृशबो
धार्थंसूत्रसार्थक्यादित्याहुः ॥ इदंतुबोध्यंयथासंख्यान्वयबोधोयथातथास्तुनामनात्रामहीमोयथासंख्यमलं
कारपदवीमेवतावत्कथंकारमारोढुंप्रभवतीतितुविचारणीयं ॥ नह्यस्मिन्लोकसिद्धेकविप्रतिभानिर्मितत्वस्या
लंकारताजीवातोर्लेशतोप्युपल[illegible]रस्तियेनालंकारव्यपदेशोमनागपिस्थानेस्यादतोपक्रमत्वरूपदोषाभावएवं छि=
वयथासंख्यं ॥ एवंचोद्भटमतानुयायिनामुक्तयः कूटकार्षापणवत्तूरमणीयाएव ॥ एतेनयथासंख्यमेवक्रमाअ-

र०गं० लंकारसंज्ञयाव्यवहारनोवामनस्यापिगिरोव्याख्यानादितितुनव्याः॥ ॥इतिरसगंगाधरेयथासंख्यप्र
३९७ करणं॥ ॥अथपर्यायप्रकरणं॥क्रमेणानेकाधिकरणमेकमाधेयमेकःपर्यायः॥क्रमेणानेकाधेय
मेकमधिकरणमपरः॥एतदन्यान्यत्वंचसामान्यलक्षणंनतुयोगार्थमात्रं॥अतिप्रसक्तेः॥परावनु
पात्ययेइणइतिपाणिनिस्मृत्याऽननुपात्ययमात्रस्ययन्नुपाधित्वेनोक्तेः॥नाप्यन्यत्॥अन्यतरत्वाघटि
तस्यनिर्वक्तुमशक्यत्वात्॥अत्राद्यलक्षणेप्रागुक्तविशेषालंकारद्वितीयभेदेतिप्रसंगवारणायक्रमे
णेति॥तत्रचाधेयस्ययुगपदनेकाधारसंबंधान्नातिप्रसंगः॥द्वितीयलक्षणेवक्ष्यमाणसमुच्चयालं ३९७
कारातिव्याप्तिवारणायतदितिविवेकः॥उदाहरणं॥आयातांकमलासनस्यभवनात्द्रष्टुंत्रिलोकीतलं

ऽ—श्लेषमंतरेणासिद्ध्या—|

गीर्वाणेषुदिनानिकानिचिदथोनीत्वापुनःकौतुकात्॥भ्रांत्वा[?]वलयेमहाकविकुलोपास्यानवास्यां भून
बुजेराजन्संप्रतिसत्यधाम[?]गिरांदेवीसुखंवर्त्तते॥अत्रप्रथमेचरणगतमधिकरणमार्थेविश्लेषावधि तिने
पंचम्यांविश्लेषस्योप[?]औपश्लेषिकाधिका[?]रणस्याक्षेपगम्यत्वात्॥कमलासनस्यभवनेस्थित्वाआ
यातेतिल्यब्लोपेपंचम्यामपिल्यबंतार्थक्रियाधिकरणेपंचम्यालाक्षणिकत्वादवाच्यनेवलं[?]पेकर्मण्य बूलो—|
धिकरणेचेतिवार्त्तिकस्यनिरूढलक्षणासमर्पकतेतिराद्धांतात्[?]इनरत्वूरण[?]त्रयगतंनुशाद्॥यथा
वा॥मकरालयस्यकुक्षौस्थित्वासदनेमृताशिनांचचिरं॥संप्रतिनिर्दोषेत्वराजन्वदनांबुजेसुधावसति॥
पूर्वमवरोहइत्वारोहः॥पूर्व[?]पूर्वत्यागेरुचिबीजोपादानंचेतिविशेषः॥अपरःपर्यायोयथा|विदूरादाश्व

र॰गं॰ यस्तिमिनमथकिंचित्परिचयाद्दृढंचक्रांचल्यंतदनुपरितःस्फारितरुचिगुरूणांसंघातेसपदिमयियातेसम
३९८ जनिञ्चयापूर्णंतारंनयनयुगमिंदीवरदृशः॥अत्रकविदनपावस्तेच्छलविशेषेगुरून्शुश्रूषमाणायाश्चि
रप्रोषितमसंभावितागमनंप्रियमकस्मादालोकितवत्याःकस्याश्चिन्नयनयुगरूपएकस्मिन्नधिकरणे
विशेषणीभूतानांस्तिमितत्वादीनामाधेयानांयुगपदसंभवात्कारणक्रमवशात्क्रमिकत्वं॥यथावा॥
प्रथमंश्चितकंजकोरकाभावथशोभामनुभूयकंदुकानां॥धृत्वाअनाभयितुंकुचौयतेतेदयितेनेकरिशाव
कुंभलीलां॥अत्रापिकुचत्वेनैकीकृतेकुचरूपेधिकरणेपरिमाणविशेषाणां॥यदिचकुचयोःपूर्वपू ३९८
र्वस्वरूपापेक्षयाउत्तरोत्तरस्वरूपस्योत्कर्षःप्रतीयतेतदाएकविषयःसारोप्यस्तुविषयभेदान्नबाध्य

बाधकाभावः॥यत्तुबिंबोष्ठएवरागस्तेनत्विपूर्वमदृश्यतअधुनामृगशावाक्षिहृदयेप्येषदृश्यतेइतिकु
वलयानंदकृताविकासपर्यायोनिजगदे॥तन्निंत्यं॥एकसंबंधनाशोत्तरमन्यसंबंधेसत्येवपर्यायपद
स्यलोकेप्रयोगात्॥श्रोणीबंधस्त्यजतितनुतांसेवतेमध्यभागइतिकाव्यप्रकाशोदाहृतेप्रागणवस्य
हृदयेइत्यादिसर्वस्वकारोदाहृतेचनथैवदृष्टत्वात्।अस्मिन्नलंकारलक्षणेपिक्रमपदेनतादृशविवक्षाया
औचित्यात्॥तस्मादत्रैकविषयःसारालंकारउचितोयंरत्नाकरायोर्देवर्द्धमानकालंकारमतिनि॥स म-
चायुष्मतानोदंकितएव॥इदंतुबोध्यं॥प्रथमंचुंबितचरणाजंघाजानूरुनाभिहृदयानि॥आश्लिष्यभाव
नामेखेलतुविष्णोर्मुखाब्जशोभायां॥अत्रनतावत्पर्यायः॥उत्तरोत्तरसंबंधस्यपूर्वपूर्वत्यागपूर्वकत्वा

र॰गं॰ विवक्षणात्॥ यतोऽत्र सुखविषयकभावनायाः सर्वांगविषयकत्वं वक्तुरभिप्रेतं न तु सुखमात्रविषय
३९१ कत्वं अत एव खेलत्वित्युक्तं न तु मज्जतीति॥ तथा पूर्वं नयनयोर्लग्नातन्नामग्नाम नस्यभूत् अथ सेवत्रि
यस्यासीत् सर्ववेदनगोचर इत्यत्रापि॥ नापि सारः उत्तरोत्तरस्योत्कर्षापकर्षयोरभावात्॥ तस्मादेव
मादौ शुद्धक्रमालंकारोऽतिरिक्त इत्यप्याहुः॥ इहान्यदप्यवधेयं॥ यत्राधाराधेयतत्संबंधक्रमेषु क्वचिद
पि कविकल्पनापेक्षा तत्रैवायमलंकारो यत्र तु सर्वांशे लोकसिद्धत्वं तत्र न कश्चिदलंकारः॥ अत एव श्रो
णिबंधस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यामिति काव्यप्रकाश ३९१
कृता प्रागर्णवस्य हृदये वृषलक्ष्मणोथ कंठेधुनावसति वाचि पुनः खलानामिति सर्वस्वकृता च निदर्शितं॥

अत्रोभयत्राप्याधारभेदाद्भिन्न आधेयः कविना एकताध्यवसानेनैकीकृतः॥ अस्मदुक्तोदाहरणेषु तु क्रमो
पिकल्पितः न हि ब्रह्मलोकस्थयादेवतया पयोधिस्थया सुधया च वा‍ि [illegible] धुर्यस्य चाभेदो लोकसिद्धः ता वा-
दृशः क्रमो वा॥ एवं स्थिते अधुना पुलिनं तत्र यत्र स्रोतः पुराभवदिति कुवलयानंदगतमुदाहरणं यत्र पूर्वं ध्र
क्य- दस्तत्राधुना पट इति वा वृद्धो लौकिकोक्तिमात्रमित्यनुदाहार्यमेव॥ ॥इति रसगंगाधरे पर्यायः॥ ॥अथ परि
वृत्तिः॥ ॥परकीय यत्किंचिद्वस्त्वादानविशिष्टं परस्मै स्वकीयं यत्किंचिद्वस्तु समर्पणं परिवृत्तिः क्रय इति या
द- वत्॥ सा च ताबद्द्विविधा समपरिवृत्तिर्विषमपरिवृत्तिश्चेति समपरिवृत्तिरपि द्विविधा उत्तमैरुत्तमानां न्यू
नैर्न्यूनानां चेति विषमपरिवृत्तिरपि तथा उत्तमैर्न्यूनानां न्यूनैरुत्तमानां चेति क्रमेणोदाहरणं॥ अंगानि दत्त्वा

र०गं० ह्रेमांगिप्राणौनूत्कीर्णासिचेत्कृणां।।युक्तमेतन्मनुपुनर्लोचनांबुरुहद्वयं।।अत्रपूर्वार्द्धएवसमपरिवृत्तिरुत्त
३६० राईनुविषमेव।।अस्थिमालामयींदत्वामुंडमालामयींननु।।गृह्णतांत्वत्पुरस्थानांकोलाभःपुरशासन।।गरि
माणमर्पयित्वालघिमानंकुचयुगान्कुरंगदृशांस्वीकुर्वतेनमस्तेयूनांधैर्यायनिर्विवेकाय।।किमल्पकथया
मियोषितामधरंबिंबफलंसमर्पयिः।।स्वरसानिहरंतिहंतहाविदुषांपुण्यफलानिसत्वरं।।एषुदानादान
व्यवहारःकविकल्पितएवनतुवास्तवः।।यत्रतुवास्तवस्तत्रनालंकारः।।यथाक्रीणंतिप्रविकचलोचनाःस
मंतान्मुक्ताभिर्बदरफलानियत्रबालाः।।इदंचापरंबोध्यं।।अत्रपरस्मैस्वकीयंयत्किंचिद्वस्तुसमर्पणमित्ये
तावत्पर्यंतंलक्षणेविवक्षितंनतुस्वकीययत्किंचिद्वस्तुत्यागमात्रंकिशोरभावंपरिहायरामावभारकामानु

DR. BHAU DAJI MEMORIAL

ध्यन कला गुणांग्रणालिमित्यत्रातिव्याप्त्यापत्तेः।।नन्वेदंल[illegible]मेवेतिवाच्यंपूर्वावस्थात्यागपूर्वकमुत्तरावस्थाग्रहणस्यवा
स्तवत्वेनानलंकारत्वात्।।एवंस्थितेविनिमयोत्रकिंचित्यक्त्वा[illegible]कस्यचिदादानमित्यलंकारसर्वस्वकृतायल्लक्ष
णंपरिवृत्तेःकृतं[illegible]यच्चकिमित्सपास्याभरणानियोव[illegible]नेधृतंत्वयावार्धकशोभिवल्कलमित्युदाहृतंतदुभय
मप्यसदेव।।इतिपरिवृत्तिः।।–।।अथपरिसंख्या ।। सामान्यतःप्राप्तस्यार्थस्यकस्माच्चिद्व्यावृत्तिःपरिसं
ख्या।।नियमोप्यस्मिन्दर्शनेनिरुक्तलक्षणाक्रांतत्वात्परिसंख्यैव।।पाक्षिकप्राप्तियुगपत्प्राप्तिरूपस्यावांतरवि
शेषस्याविवक्षणात्।।अतएववैयाकरणानांमतेपरिसंख्यापिनियमशब्देनोच्यते।।तथाहिकृत्तद्धितसमा
साश्चेत्यत्रसमासग्रहणंनियमार्थमितितेषांसिद्धांतः।।तत्रहिसमासेपाक्षि[illegible]क्याःप्रातिपदिकसंज्ञाप्राप्तेरभा

र०गं० वात्कथंनामपराभिमतोनियमउपपद्यतां॥युगपद्विसमाससमासेनरपदेसंघातयोरर्थवत्सूत्रंप्राप्तमितिपरि
३६१ संख्याभवितुमर्हति॥पूर्वतंत्रेतुनियमपरिसंख्ययोर्भेदेनपरिभाषणंयदाहुः॥विधिरत्यंतमप्राप्तेनियमःपा
क्षिकेसति॥तत्रचान्यत्रचप्राप्तेपरिसंख्येतिगीयते॥विधिःस्वर्गकामोयजेयतेत्यादिः॥यागादेःप्रकारांतरेणा स्व-
प्राप्तेः॥नियमःव्रीहीन्‌अवहंतिसमेदेशेयजेनेत्यादिः॥पुरोडाशनिर्माणफलोपधायकतावच्छेदककोटिप्रवि
ष्टायावितुषतायाःसंपादकत्वेनावहननस्यप्राप्तेर्नखविदलनसमवधानकालाव्यक्तित्वेनयागाधिकरणतया
समदेशप्राप्तेर्विषमदेशसमवधानकालाव्यक्तित्वेनचपाक्षिकत्वात्॥परिसंख्याइमामगृभ्णन्रशनामृतस्येत्य ३६२
दा- श्वाभिधानीमादत्तेपंचपंचनखाभक्ष्याइत्यादिः॥रशनाग्रहणलिंगेनाश्वाभिधानीगर्दभाभिधान्योरादानस्य दा- दा-

अभिदानी = Rope; halter

द- युगपत्प्राप्तत्वादित्यलमप्रकृतचिंतया॥इयंचतावद्द्विविधाशुद्धाप्रश्नपूर्विकाचद्विविधाप्यार्थीशाब्दीचेतिच
तुर्विधा॥यथा॥सेवायांयदिसाभिलाषमसिरेलक्ष्मीपतिःसेव्यतांचिंतायामसिसस्पृहोयदिचिरंचक्रायुध
श्चिंत्यतां॥आलापंयदिकांक्षसेमधुरिपोर्गाथातदालप्यतांस्वापंवांछसिचेन्निरर्गलसुखेचेतःसखिसुप्यतां॥
अत्रयदिघटितवाक्यैर्निवेदितस्यरागप्राप्तस्यसेवादेःकर्मतायाःपरमेश्वरेविषयांतरेचप्राप्तत्वेनलोडर्थघटितवा
क्यार्थवैयर्थ्यप्रसंगाद्विषयांतरंनसेव्यतांइत्यादिरूपाविषयांतरतःक्रियाकर्मत्वव्यावृत्तिस्तात्पर्यविषयतया
कल्प्यमानत्वादार्थीशुद्धाच॥किंतीर्थंहरिपादपद्मभजनंकिंरत्नमच्छामतिःकिंशास्त्रंश्रवणेनयस्यगलतिद्वैतांध
कारोत्करः॥किंमित्रंसततोपकाररसिकंतत्त्वावबोधःसखेकःशत्रुर्वदखेददानकुशलोदुर्वासनासंचयः॥अत्र

र॰गं॰ हरिपादभजनादिकमेवतीर्थादिकंनान्यदित्यर्थस्तास्पर्यमर्यादयाप्रतीयतइत्यार्थीप्रश्नपूर्विकाच॥तीर्थंगंगात्त
३६२ दितरदपांनिर्मलंसंघमात्रंदेवोनतस्याःप्रभवनिलयोनाकिनोन्येवराकाः॥सायत्रास्तिसहिजनपदोमृत्तिकामात्र
मन्यत्तांयोनित्यंनमतिसबुधोबोधशून्यस्ततोन्यः॥अत्रमात्रादिपदेस्तीर्थत्वादिव्यावृत्तिःप्रतीयतइतिशाब्दीशुद्धा॥
किंमित्रमंतेसुकृतंनलोकाःकिंध्येयमीशस्यपदंनतोकाः॥किंकाम्यमव्याजसुखंनभोगाःकिंजल्पनीयंहरिनामना
न्यत्॥अत्रशाब्दीप्रश्नपूर्विकाचेतिप्राचांमतं॥अन्येतुव्यावृत्तेरार्थत्वएवपरिसंख्यालंकारोन्यथातुशुद्धापरिसंख्ये
वयथा॥हेतुत्वस्यार्थत्वेएवहेत्वलंकारोक्तःअन्यथाहेतुमात्रं॥अतोभेदद्वयमेवास्यादित्याहुः॥अपरेतुव्यावृत्तेरा ३६२
र्थत्वेपिनालंकारत्वंपंचपंचनखाभक्ष्याःसमेयजेतरात्सस्येत्यादावपितदापत्तेः॥किंतुकविप्रतिभानिर्मितया

तादृशव्यावृत्तिस्तस्याः॥यथायस्मिन्शासतिवसुमतींवसुमतीपाकशासनेमहानसेषुसंतापःशरधिहृदये
षुसशल्यतामंजीरेषुमौखर्यंभेरीषुताडनंकामिनीनांकुंतलेषुकौटिल्यंगतिषुमांद्यमित्यादौ॥अत्रहिप्रथमां
तार्थःकविप्रतिभयाएकीकृतइतितद्द्वारातत्प्रतियोगिकव्यावृत्तिर्निर्मिता॥एवंचसेवायांयदिसाभिलाषमसी
त्यत्रनान्यःसेव्यइत्यर्थप्रतीतेःपरिसंख्यास्तुनतुपरिसंख्यालंकारः॥व्यावृत्तेर्वास्तवत्वेनकविप्रतिभानपेक्षणात्
॥किंतीर्थंहरिपादपद्मभजनमित्यत्रतुप्रश्नपूर्वकंदृढारोपरूपकंअन्यथानविषंविषमित्याहुर्ब्रह्मस्वंविषमुच्य
तइत्यत्रापिपरिसंख्यापत्तेः॥किंशास्त्रमित्यंशेतुपरिसंख्यामात्रं॥तीर्थंगंगात्तदितरदपांनिर्मलंसंघमात्रमित्य
त्रापिपरिसंख्येवशुद्धाप्रागुक्ताद्धेतोरनार्थत्वात्तस्मात्महानसेषुसंतापइत्यादिकमेवास्याउदाहरणमित्या

र॰गं॰ हृः॥ ॥इतिरसगंगाधरेपरिसंख्या॥ ॥अथार्थापत्तिः॥ ॥केनचिदर्थेनतुल्यन्यायत्वादर्थांतरस्यापत्तिरर्थाप
३६३ त्तिःन्यायश्चकारणं।साचप्रकृतेनप्रकृतस्याप्रकृतेनप्रकृतस्यप्रकृतेनाप्रकृतस्याप्रकृतेनप्रकृतस्येतितावच्च
तुर्भेदाप्रत्येकमर्थांतरस्यसाम्यन्यूनाधिक्यैर्द्वादशविधाततोभावाभावत्वाभ्यांचतुर्विंशतिभेदा॥दिङ्मात्रेणोदा त्वा३
हरणं॥लीलालुंठितशारदापुरधियामस्मादृशानांपुरोविद्यासद्मविनिर्गलत्कणमुषोवल्गंतिचेद्बालिशाः॥अ
द्यश्वःफणिनांशकुंतशिशवोदंतावलानांशशाःसिंहानांचसुखेनमूर्द्धनिपदंधास्यंतिशालावृकाः॥अत्रप्रकृ
तेनाप्रकृतस्यापाद्यमानस्यसाम्यंमालारूपताच॥यदितेचरणांबुजंहृदावहतोमेनहतोविपद्गणः॥अथचंड ३६३
करेणमंडितेदिनमध्येपिजितंतमोगणैः॥अत्रनहतइतिविद्यमानतारूपात्प्रकृतार्थाज्जितमित्यापाद्यमानस्या

प्रकृतार्थस्यसर्वोत्कर्षेणवर्णनरूपस्याधिक्यंनचात्रविपद्गणस्यावस्थानमात्रेणतमोगणेनाप्यवस्थानमा
पादयितुमुचितंनतुजयोऽनानुरूप्यादितिशंक्यं॥भगवच्चरणसंनिधानेयद्येकस्यविपद्गणस्यस्थास्यंतदासमु
इ| चितएवबहूनांतमोगणानांसूर्यसंनिधानेजयोऽपिनदोषः॥संदेवस्नेहार्द्रस्फुरतटिनिनिःकिंचनजनेयदित्वं
नाथत्सेसुरभिरिवकस्तेमयिकृपा॥तदाचिंतारत्नत्रिदशपतिभूमीरुहमुखाददीरंजधिभ्यःकिमितिकण
भिक्षामपिजडाः॥अत्राभावेनाभावापादानं॥स्नेहार्द्रजाह्नवीरूपप्रकृतार्थापेक्षयाचिंतारत्नादीनांजडत्वेनन्यू
न| नत्वंच॥एतेषापाद्यमानमप्रकृतं॥मामनुरक्तांहित्वायदिराजन्पुरुषसिंहयातोसि॥मुक्तावनमिदमेष्यतिवन
लक्ष्मीमत्रकिंचित्रं॥इयंराज्ञानलेनमुक्तायाअरण्येपद्मयंत्याध्यानोपनीतंतमेवप्रत्युक्तिः॥अत्रापाद्यमानोव

र०गं० नवृत्तांतोपिसन्निहितत्वात्प्रकृतएवेतिद्वयमपिप्रकृतंपुरुषसिंहापेक्षयावनस्यनपुंसकत्वात्न्यूनत्वंअतएव
३६४ किंचित्रमित्युक्तं॥उदुंबरफलानीवब्रह्मांडान्यत्तियःसदासर्वगर्वापहःकालस्तस्यकेमहाकावयं॥अत्राप्रकृ
ना– तेनब्रह्मांडादनेनसमस्तभूतानामनित्यत्वंकैमुतिकन्यायेनप्रकृतंप्रतिपाद्यते॥नभवानिहमेलक्ष्यःक्षत्रवर्णवि
लोपिनःकेवाविटपिनोरामकुलाचलभिदःपवेः॥राघवंप्रतिजामदग्न्यस्येयमुक्तिः॥अत्रप्रतिवस्तूपमामहावा
क्यार्थस्तस्याश्चदलद्वयमुपमेयवाक्यार्थउपमानवाक्यार्थश्च[illegible]तत्रउपमेयवाक्यार्थगतायामर्थापत्तावाधाद्यमा
नस्तन्निमित्तभूतश्चेत्युभावप्यर्थौप्रकृतौ॥उपमानवाक्यार्थगतायांत्वप्रकृताविप्यनयाद्दिङ्मान्युदाहृत्य॥अत्रविचा ३६४
वि– र्यते॥नेयंवाक्यार्थसंमतायामर्थापत्तौनिविशते॥आपादकस्यार्थस्यापतितमर्थंविनानुपपत्तेरत्राभावात्नाप्यनुमा पप–

नं॥आपततोर्थस्यापादकासमानाधिकरणत्वेनव्याप्यत्वपक्षधर्मत्वयोर्दूरापास्तत्वात्॥नचयेनकारणेनैकार्थ
सिद्धिस्तेनैवलिंगेनापरार्थानुमानमितिवाच्यं॥अर्थांतरासिद्धेरनुमित्यात्मकताविरहात्॥यतोयमर्थोपिभावि
तुमर्हतीतिबुद्धेराकारोननुभवत्येवेति॥नापियद्यर्थातिशयोक्तौतस्याविपर्यासार्थएवद्वयोर्विश्रांतेः॥नचेहतथा
आपादकस्यसिद्धत्वादापततश्चसंभाव्यमानत्वाद्यथाश्रुतएवविश्रांतेः॥तस्माद्येनन्यायेनैकोर्थःसिद्धस्तेनैवन्याये
नापरोप्यर्थःसेद्धुमर्हतीत्येवंरूपेयमर्थापत्तिः॥अस्यांवार्थंनिरंलोकेअविद्यमानमपिकवि[illegible]नास्वप्रतिभ
याकल्पयित्वायदापाद्यतेतदालंकारत्वं॥यथाफणिनांशकुंतशिशवइत्यादौ॥अन्यथातुकैमुतिकन्यायतामात्रं॥
यथाउदुंबरफलानीवेति॥प्राचीनरीत्यातुप्रागिदमुदाहृतमस्माभिः॥अतएवतत्रकैमुतिकन्यायेनेत्युक्तं॥एवंच॥

र॰गं॰ कमपरमवशंनविप्रकुर्युर्विभुमपितंयदमीस्पृशंतिभावाः॥अवश्यंलक्ष्मणोरपिभवंतिसर्वामरगुरोर्विधोव[illegible]
३६९ म[illegible]स्छिनवनिवयंकेपुनरमीइत्यादिसर्वस्वकृतायदुदाहृतंनतन्नातीवहृदयंगमं॥यत्तुकैमुत्येनार्थसंसि
द्धिःकाव्यार्थापत्तिरिष्यतइतिकुवलयानंदकृतास्यालक्षणंनिर्मितं॥तदसत्॥कैमुतिकन्यायस्यन्यूनार्थवि
षयत्वेनाधिकार्थापत्तावव्याप्तेः॥यथा[illegible]तवाग्नेयदिदारिद्र्यंस्छितंभूपद्विजन्मनां॥शनैःसवितु[illegible]रप्यग्रेतमःस्छा
स्यत्यसंशयं॥अत्रशनैःशब्दमहिम्नाराजाग्रेदारिद्र्यस्छित्यपेक्षयास्सूर्याग्रेतमोवस्छानंदुःशकमेवेत्यवग-
तमपिन्यायसाम्यादापाद्यतेनतुकैमुतिकन्यायेनेति॥इतिरसगंगाधरेऽर्थापत्तिः॥अथविकल्पः॥विरु ३६९
द्धयोःपाक्षिकीप्राप्तिर्विकल्पः॥एकस्मिन्धर्मिणिस्वस्वप्रापकप्रमाणप्राप्तयोरतएवतुल्यबलयोर्विरुद्धयो

§3 has क्वेव।

विरुद्धत्वादेवयुगप[illegible]त्प्राप्तेरसंभवात्पाक्षिकीचप्राप्तिःपर्यवस[illegible]॥अयंचसमुच्चयस्यप्रतिपक्षभूतोव्य
स्य निरेकइवोपमायाः॥अत्रचविक[illegible]मानयोरौपम्यमलंकारताबीजंतदाद्ययैवचमत्कारस्योल्लासात्॥अ
ना३ न्यथातुविकल्पमात्रं॥यथाजीवनंमरणंवास्तुनैवधर्मंत्यजाम्यहमित्यादौ॥अत्रजीवनमरणयोर्नौपम्यस्य
प्रतीतिः॥उदाहरणं॥प्राणानर्पयसीतांवाप्रस्त्रंतर्पयवाद्विजान्॥यमंभजस्वरामंवायथेच्छसितथाचर॥
अत्रार्पणतर्पणभजनेषुम[illegible]रूक्षणप्रमाणेनयथाक्रमंकर्मतयाप्राणप्रभृयमानांजीवन[illegible]क्षणप्रमाणेनव णल-
सीताद्विजरामाणांप्राप्तानांयोगपद्यासंभवात्पर्यायेणप्राप्तिः॥कर्मणोरौपम्यंगम्यते।तथाजीवनंमरणंवेत्या
दौसत्तारूपधर्मैक्याज्जीवनमरणयोःकर्त्रोरपितद्भवतुंयुज्यतइतिचेत्युज्यतेनतुगम्यते॥अथतत्कुतोहेतोःक
§ 3 adds correctly :- कर्मणोः क्रियाफलेनैवसमानधर्मेणौपम्यम्। नन्वत्र यथाऽपितथापिदि... धर्मैक्यात्——

र॰ग॰ वित्तात्पर्यविरहादिनिग्रहाण॥नत्वत्रमरणंजीवनंचसमानमितिकवेरभिप्रेतं॥किंतुविषंभुंक्ष्वमाचास्यगृ
स्था॰३|६८ हेभुंक्ष्वइतिवत्नधर्माद्धूतोमरणमपिज्यायोनत्तुधर्मत्यागइतिनिषिद्धगतद्वेषाधिक्यंतदर्थंचमरणस्योपान
त्वादविवक्षितताधिकरणकतयाऔपम्यस्यानिष्पत्तिरेव॥क्वचिद्धुतंसमानधर्ममादायाप्यौपम्यस्यगम्यत्वेप
मलंकारः॥यथाभगवद्गीतासु॥हतोवाप्राप्स्यसिस्वर्गंजीत्वावाभोक्ष्यसेमहीं॥अत्रमहीभोगस्वर्गप्राप्त्योरु
त्तमत्वेनौपम्यंविवक्षितं॥तथांचधात्वर्थयोरयंविकल्प[redacted]इत्येके॥आख्यानार्थयोरि[redacted]परे॥सर्वथैवनमही
स्वर्गयोरितिनिश्छिन्नतयोःकारकत्वेनैकक्रियान्वयंविनाविकल्पासंगतेः॥नचधात्वर्थयोरेकैस्यकर्तृरूपसाधार ५८
णधर्मस्योक्तत्वात्कथंरुतनेनिवाच्यं॥कर्तृरूपसाधारणधर्ममादायौपम्यस्यात्रसुंदरस्यानिष्पत्तेः॥अन्यथा॥

MEMORIAL ... BHAU DAJI

हतोवानरकेगंताजित्वावाभोक्ष्यसेमहीमित्यत्राप्यौपम्यप्रत्ययापत्तेः॥यत्तुभक्तिप्रह्वविलोकनप्रणयिनीनी
लोत्पलस्पर्द्धिनीध्यानालंबनतांसमाधिनिरतैर्नीतोहितप्राप्तये॥लावण्यस्यमहानिधीरसिकतांलक्ष्मीदृ
शोस्तन्वंतीयुष्माकंकुरुतांभवार्त्तिशमनंनेत्रेतनुर्वाहरेः॥अत्रविकल्पःउत्तमत्वाच्चतुल्यप्रमाणश्लिष्टत्वमित्यलं
कारसर्वस्वकृतोक्तंतच्चिंत्यं॥भवार्त्तिशमनेतनुनेत्रद्वंद्वयोर्द्वयोरपियुगपत्कर्तृत्वेविरोधाभावाद्विकल्पा
नुत्थानात्विरोधेविकल्पइतिहितेनैवोक्तं॥नचतनुमध्येनेत्रयोःप्रविष्टत्वात्पृथगभिधानानौचित्येपिपृथ
गभिधानंतद्धेतुः[redacted]ननुनेत्रद्वंद्वयोर्विरोधमभिप्रेतंगमयतीतिनिवाच्यं॥वास्तवस्यैवविरोधस्यविकल्पोत्था
पकत्वेनवैवक्षिकस्याप्रयोजकत्वान्नविकल्पस्यात्रासुंदरत्वाच्चवस्तुतस्तुसकलकलंपुरमेतज्ज्ञातंसंप्रतिसुधां

र॰ गं॰ श्रुविंबमिवेत्यादाविवात्रापिश्लेषमूलाउपमैवालंकारः॥ तनुर्वेतितनुरिवेत्यर्थः॥ वास्याद्दिकल्पोपमयोरिति
३६७ वाशब्दस्येवार्थकत्वाभिधानात्॥ नचलिंगवचनभेदउपमायांदोषइतिवाच्यं॥ साधारणधर्मस्योपमानसा
मानाधिकरण्येउपमेयसामानाधिकरण्येचयत्रवैरूप्यंतत्रैवलिंगवचनभेदस्यदोषतायाअभ्युपगतेः॥ य
था॥ हंसीवधवलश्चंद्रः सरांसीवामलंनभः॥ अत्रहंसीवधवलाचंद्रोधवलः सरांस्यमलानिनभोप्यमल
मितिसाधारणधर्मस्योपमानेउपमेयेचद्वैविध्येनैवप्रतीतेरुपमायाः सम्यगनिष्पत्तेः॥ नन्वेवंसतिसरांसीव
नभइत्यादौलुप्तोपमायांकथंवचनभेददोषइतिचेत् तत्रापिप्रतीयमानसाधारणधर्मस्यवैरूप्यादेवेत्यभ्युप ३६७
गमात्॥ नचप्रतीयमानस्यधर्मस्यस्वशब्दानालिंगितनयासुतरांलिंगानालिंगनेननास्तिवैरूप्यमितिशंक्यं॥

शब्दलिंगस्यैवार्थस्यप्रतीतेरिष्टेः॥ यदाहुः॥ नसोस्तिप्रत्ययोलोकेयः शब्दानुगमादृतइति॥ यद्वाश्रुतार्थापत्त्या
वाभ्युपगम्यमानायांशब्दएवकल्प्यतेअर्थस्तुतेनाभिधीयतेइत्यस्तिवैरूप्यं॥ एवंस्थितेराजतेभासतेइत्यादिनि
र्दिष्टं तत्रप्रतिपाद्येसाधारणधर्मेयथालिंगवचनभेदोनदोषः॥ तथात्रापीति॥ अत्रएवयस्मिन्नतिसरसेजनोज
नपदाश्चेतितुल्ययोगितायांसंगच्छते॥ अन्यथाउपमागर्भत्वात्तस्याउपमायादुष्टत्वेदुष्टतापत्तेः॥ श्लिष्टेधर्मेलिं
गसंख्याभेदादिनैवदूषणमितिप्रतिप्रसवाच्चेतिदिक्॥ ॥इतिविकल्पः॥ ॥अथसमुच्चयः॥ ॥युगपत्पदा
र्थानामन्वयः समुच्चयः॥ युगपदितिक्रमव्यावृत्त्यर्थं नत्वेकक्षणेप्रतिपत्त्यर्थंतेनकिंचित्कालभेदेपिनसमुच्चयभं
८ गः॥ सतावद्द्विविधः धर्मिभेदधर्मैक्याभ्यां॥ धर्मैक्येपिद्वैविध्यं॥ कारणत्वातिरिक्तसंबंधेनैकधर्मान्वयेकारण

र०गं० नयाएकधर्म्यन्वयेचेति॥एवंत्रिविधेस्मिन्नाद्ययोर्भेदयोर्गुणानांक्रियाणांच तृतीयेरमणीयानामरमणीया
३६९ नांरमणीयारमणीयानांसमन्वयः॥नचास्मिन्वक्ष्यमाणसमाध्यलंकारत्वमाशंक्यं॥समाधौहिएकेनका गुणक्रियाणां
र्येनिष्पाद्यमानेप्यन्येनाकस्मिकमापतताकारणेनसौकर्यादिरूपोतिशयोयत्रसंपाद्यतेसविषयः॥अस्मिंस्तु
समुच्चयप्रभेदेयत्रैकंकार्यंसंपादयितुंयुगपदेकैनैःखलेकपोतन्यायवाहमहमिकयासंपतंतिकार्यस्यचनको
प्यतिशयःसः॥क्रमेणोदाहरणं॥प्रादुर्भवतिपयोदेकज्जलमलिनंबभूवनभः॥रक्तंचपथिकहृदयंकपोल
पालीमृगीदृशःपांडुः॥उदितंमंडलमिंदोरुदितंसद्योवियोगिवर्गेण॥मुदितंचसकलयुवजनचूडामणिशा ३६९
सनेनमदनेन॥अत्राद्येगुणानांद्वितीयेक्रियाणांचयोगपद्येनभिन्नधर्म्यन्वयः॥आताम्रासिंधुकन्याधवच

रणनखोल्लासिकांतिच्छटाभिर्ज्योत्स्नाजालैर्जटानांत्रिपुरविजयिनोजातजांबूनदश्रीः॥स्वाभाव्याद्रुच्छमुक्ताफल
रचितलसद्गुच्छसच्छायकायापायादायासजालादमरसरिदसौभ्रांतजातश्रमान्नः॥देवत्वांपरितस्तुवंतुकवयो न्नः
लोभेनकिंतावतास्तव्यस्त्वंभविनासियस्यनरुणश्चापप्रतापोधुना॥क्रोडीनःकुरुतेतरांवसुमतीमाशाःस
यां मालिंगतिचुंबत्यमरावतींचसहसागच्छत्यगम्यामपि॥अत्राद्येगुणानांद्वितीयेक्रियाणामेकधर्म्यन्वयः॥यद्य
पिहरिचरणनखसंसर्गसमयेनास्तिहरजटासंसर्गइतिरक्तपीतवर्णयोर्योगपद्यस्यासंभवस्तथापिसाहजि प
कश्वैत्येनसहतयोःप्रत्येकंतस्यसंभवोस्त्येवेतिनिर्दोषः॥समुत्पत्तिःपद्मारमणपदपद्मामलनखान्निवा
सःकंदर्पप्रतिभटजटाजूटभवनेऽथायंव्यासंगःपतितजननिस्तारणविधौनकस्मादुत्कर्षस्तवजननिजा

र॰गं॰ जागर्तु जिगमिषु॥ अत्रत्रिधेकेनाप्युत्कर्षजननसंभवेत्रयोप्युत्कर्षजननार्थंस्पर्धयैवापतंतोरमणीयाः॥ पा
३६९ टीरद्रुभुजंगपुंगवमुखोद्भूतावपुस्तापिनोवातावांनिदहंतिलोचनममीनाम्रारसालद्रुमाः॥ श्रोत्रेहंतकि
रंतिकूजितमिमेहालाहलंकोकिलाबालाबालमृणालकोमलतनुःप्राणान्कथंरक्षतु॥ अत्रापित्रयोपिजी
वनाशार्थमापतंतोरमणीयाः॥ जीवितंमृत्युनालीढंसंपदःश्वासविभ्रमाःरामाःक्षणप्रभाशोभाःशल्यान्ये
तानिदेहिनां॥ अत्रजीवितादयःस्वाभाव्याद्रमणीयाइतिनिःसारयितुमशक्याविशेषणमाहात्म्याच्चारमणी
याइतिदुःखजननकाश्चातएवशल्यतुल्याः॥ रमणीयारमणीयशब्देकर्मधारयआश्रीयतेद्वंद्वः॥ समुच्चर ३६९न-
भिन्नत्वदोषापत्तेः॥ एवमरमणीयरमणीयानांविषमालंकारेणचसंकीर्णत्वान्नेनेप्रभेदोयुक्ताःसमुच्च

अपेक्षकार्यजननार्थमापततांसमुच्चयः संभवति। शरीरंज्ञानजननं [illegible] रोगो विस्मृतिप्रदः। विपद्वैराग्यजननी त्रयं सुखकरं सताम्। शरीरादयोपि स्वाभा-
व्यादरमणीया अपि भेदकमाहात्म्यादरमणीयाः। तत्र रमणीयानां समुच्चये अरमणीयानां च समालंकारेण रमणीयारमणीयानां——।

यस्यसंकरस्यप्रयोजकत्वविरहादन्यथासर्वेषामलंकाराणामनंतभेदत्वापत्तेरितिवाच्यं॥ समुत्पत्तिःपश्चार
मणेत्यत्रपाटीरद्रुभुजंगेत्यत्रचसमालंकारस्याविवक्षितत्वात्नहिहरिच्चरणनखसंभूतिहरजटाजूटनि
वासपतितनिस्ताराएव्यासंगानांपरस्परंयोगोयोग्यइतिकवेरभिप्रेतं॥ किंतुभगवत्याभागीरथ्याउत्कर्ष
जनयितुंत्रयोपिजागरूकाइतितथापिमलयानिलरसालद्रुमकोकिलकूजितानां॥ किंतुत्रयोपिबालायाः
प्राणनाशार्थंबद्धपरिकराइतिअतएवहंतेतिखेदउपपद्यते॥ समालंकारस्याभिप्रेतत्वेतुत्रयाणांयोगस्य
युक्तत्वात्खेदोनुपपन्नएवस्यात्॥ अथबालायामारकत्रितययोगोननुरूपइतिविषमाभिप्रायेणखेदोपपत्ति
रितिचेत्॥ एवमपित्रयाणांयोगांशेसमालंकारस्यात्यंतमप्रतीतेर्विषमस्यचबाह्यबालांशमादायप्रतिष्ठा

र॰गं॰ नात्समुच्चयस्यासंकीर्णनैव॥एवंजीवितंमृत्युनालीढमित्यादौजीवितादेरमणीयस्यमृत्युलीढत्वादिनाऽरम
३७० णीयत्वेपिनमृत्युलीढत्वादिकमयुक्तमितिकवेरिहविवक्षितंरमणीयानामचिरस्थायित्वस्योत्सर्गतासिद्ध
स्तस्यचस्वाभिलषितताननुगुणत्वाच्छलत्वप्रयोजकत्वमतःतृतीयप्रभेदस्यापिनविषमसंकीर्णत्वेनान्यथासि
द्धिः॥एतेनसद्योगासद्योगसदसद्यो[redacted]गैर्नसमुच्चयःप्रभेदयान्समविषमसंकरेणैवान्यथासिद्ध
रितिरत्नाकरोक्तमपास्तं॥ ॥इतिरसगंगाधरेसमुच्चयः॥ ॥अथसमाधिः॥ ॥एककारणजन्यस्यकार्य
स्याकस्मिककारणांतरसमवधानाहितसौकर्यंसमाधिः॥तच्चकार्यस्यानायासेनसिध्यासांगसिध्याच्च॥ ३७०
पूर्वापेक्षयाविशेषस्तूक्तएव॥उदाहरणं॥आयान्तेवनिशामनोमृगदृगमुग्धिद्रमातन्वतीमानोमेकथमेष

वि॰ संप्रतिधीरानंकंहृदिस्थास्यति॥ऊहापोहमिमंसरोजनयनायावद्विधत्तेतरांतावत्काममनृपानपत्रसुषमंबिं
बंबभासेविधोः॥अत्ररात्रिसंभिधानादपिसिध्यतोमानविनाशस्यचंद्रोदयादनायासेनसिद्धिः॥यथावा॥
स्मरदीपदीप्तदृष्टेर्घनांधकारेपिपतिगृहंयांत्याः॥झगितिप्रादुरभूवन्सख्यादिवचंचलाःपरितः॥इहकिंस्मि
केनिश्चयूहयानस्यकारणांतरसमवधानेहेतोरुत्प्रेक्षणादुत्प्रेक्षालीढः॥पूर्वस्तुशुद्धः॥नवप्रसंगंदयितस्य
लोभादंगीकरोतिस्मयदाननतांगीश्लथंनदालिंगनमप्यकस्मात्घनोनिनादैर्घनतांनिनाय॥अत्रयनध्व
निभिरालिंगनस्यसागतासिद्धिःपूर्वपद्यद्वयेत्वनायासेनकार्यसिद्धिः॥कथयकथमिवाशाजायतांजीवि
तेमेमलयभुजगवांतावातिवाताःकृतांताः॥अयमपिबततगुंजत्यालिमाकंदमौलौमनसिजमहिमानं .

र०गं० मन्यमानोमिलिंदः ॥ अत्रजीवितनाशंप्रतिवानवानचंचरीकगुंजितयोरहमहमिकयाहेतुत्वादेक
३७१ स्याकस्मिकत्वाभावान्नप्रकृतालंकारस्यविषयः ॥ किंतुकर्तृरूपभिन्नधर्मिकेणवानगुंजनक्रिययोः
समुच्चयेनजीवितनाशरूपैककार्यात्मकैकधर्मिकस्तयोरेवकारणयोः समुच्चयः संकीर्णः ॥ ॥ इति
रसगंगाधरेसमाधिप्रकरणं ॥ ॥ अथप्रत्यनीकं ॥ ॥ प्रतिपक्षसंबंधिनस्तिरस्कृतिः प्रत्यनीकंअनीके
नसदृशंप्रत्यनीकंसादृश्यस्ययथार्थत्वेनैवसंग्रहेपुनःसादृश्यग्रहणात्गुणीभूतेपिसादृश्येव्ययीभा अन्वयं ऽ...
वः ॥ लोकेप्रतिपक्षस्यतिरस्कारायानीकंप्रयुज्यतेतदशक्तौप्रतिपक्षसंबंधिनःकस्यचित्तिरस्कारःक्रियते ३७१
ऽतया- | B. सचानीकसदृशतयाप्रयुज्यमानत्वात्प्रत्यनीकमुच्यते ॥ अत्रचप्रतिपक्षगतंबलवत्वमात्मगतंदुर्बलत्वं

चगम्यते ॥ संबंधीचतदुपजीव्योपजीवकमित्रादिभेदादनेकविधः ॥ रेरेमनोममनोभवशासनस्यपा
दांबुजद्वयमनारतमानमंतं ॥ किंमांनिपातयसिसंसृतिगर्त्तमध्येनैनावतानवगमिष्यतिपुत्रशोकः ॥
जितमौक्तिकसंपदांरदानांसहवासेनपरांमुदंदधानांविरसादधरीकरोतिनासामधुनासाहसशालि द-
मौक्तिकंते पूर्वत्रोपजीव्यस्येहतूपजीवकस्यतिरस्कारस्यार्थत्वशाब्दत्वाभ्यांचवैलक्षण्यं ॥ एवमन्यदप्यू नक्षैर- | B.
ह्यं ॥ अत्रविचार्यते ॥ हेतूत्प्रेक्षयैवगतार्थत्वान्नेदमलंकारांतरंभवितुमर्हति ॥ तत्रद्वितीयोदाहरणेता
दृशत्वशब्दःशाब्दउत्प्रेक्षांशोमात्रमार्थंप्रथमोदाहरणेतुद्वयमप्यार्थं ॥ पुत्रमारकसेवकत्वेनकारणेन
वैरस्यतस्यस्वात्मकर्मकगर्त्तनिपातनकार्येणहेतुतायाश्चस्फुटंप्रतीतेः ॥ अस्मिन्नलंकारेहेतुत्वंनिश्ची

र०गं० यमानंहेतूत्प्रेक्षायांतुसंभाव्यमानमित्यस्तिविशेषइतिचेत्॥प्रतीयमानहेतूत्प्रेक्षाया अनुत्प्रेक्षात्वापत्तेः॥वाच्य
३७२ कस्येवादेरभावाद्धेतुत्वस्यनिश्चीयमानतायास्तत्रापिवक्तुंशक्यत्वात्॥यस्यकिंचिदपकर्तुमक्षमः कायानि
ग्रहगृहीतविग्रहः॥कांतवक्त्रसदृशाकृतिंकृतीराहुरिंदुमधुनापिबाधते॥इत्यलंकारसर्वस्वकृतोदाहृते
प्राचीनपद्येपिभगवद्द्वेषानुबंधादिवभगवद्वक्त्रसदृशमिंदुंराहुर्बाधत इतिप्रतीतेरुत्प्रेक्षैवगम्यमानामम
पकीर्तिमहरद्भुवियस्तदनुप्रविष्टहृदयेयमिति॥त्वयिमत्सरादिवनिरस्तदयःसुतरांक्षिणोतिखलुतां
मदनइति कुवलयानंदकारेणोदाहृतेपद्येहेत्वंशउत्प्रेक्षांशश्चेत्युभयमपिशब्दमितिकथंकारस्यालंकारस्यो
दाहरणतांनीतमिदमायुष्मतेतिनविद्मः॥प्रतिपक्षगतबलवत्वस्वात्मगतदुर्बलत्वयोःप्रतीतिर्हेतूत्प्रेक्षांत

रादन्नवैलक्षण्यंनैनावताहेतूत्प्रेक्षायाबहिर्भवितुमिदमीष्टेतदविनाभावित्वात्॥किंतुतदवांतरविशेषीभ
वितुं॥नहिपृथिव्यवांतरभेदात्घटात्पटोविलक्षणइतिपृथिव्याबहिर्भवतिइत्यपिवदंति॥इतिप्रत्यनीकं॥
अथप्रतीपं॥प्रसिद्धौपम्यवैपरीत्येनवर्ण्यमानमौपम्यमेकंप्रतीपं तद्वैपरीत्यंचतदुपमानोपमेययोरुपमे
योपमानत्वकल्पनयातुप्रकारांतरेणोपमानोपमेययोरन्यतरस्यकिंचिद्गुणप्रयुक्तमद्वितीयत्वोत्कर्षपरिहर्तुं
द्वितीयप्रदर्शनेनोल्लास्यमानंसादृश्यमपरंद्वितीयोपमानस्यकैमर्थ्यंचतुर्थंसादृश्यविघटनंपंचमंतत्राद्येप्रभेदे
प्रसिद्धौपम्येयदुपमेयंतस्यैवोपमानत्वादाधिक्यस्ययच्चोपमानंतस्योपमेयीत्वान्न्यूनत्वस्यचप्रत्ययःफलं॥
इदमेवचौपम्यस्याविशेषेप्युपमालंकारादस्यवैलक्षण्येबीजं॥औपम्यप्रतिष्ठानंचनिषिध्यमानसादृश्याद्यति

C. BHAU DAJI MEMORIAL

त|न

र०गं० रेकाग्रेवौपम्यस्योपमानोपमेयसाधारण्येपियदेकस्याधिक्यमपरस्यन्यूनत्वंचगम्यते॥नत्कस्यहेतोरिति
३७३ चेत्श्रृणु॥उपमानेहिसाधारणधर्मसंबंधोन्यूनोपमेयेविधीयतइतितावन्निर्विवादंविध्यनुवादौचसाध्यत्व
सिद्धत्वाभ्यांतेचक्रमेणन्यूनत्वाधिक्योउपमानोपमेययोःप्रयोजयतः॥लोकेपिनिश्चितविद्ययथापूज्यतेनतथा
नानिश्चितविद्यइतिस्फुटमेव॥नेचसाध्यत्वेवक्तृविवक्षाधीनेइतिनात्रदोषः॥द्वितीयतृतीययोर्भेदयोस्तुफ
लंस्फुटमेव॥चतुर्थस्यतुनिषिध्यमानवस्तुगतसकलगुणवत्त्वप्रतिपत्तिः॥पंचमस्यप्रथमवदिति॥उदाहरणं
॥किंजल्पसिमुग्धतयाहंतममांगंसुवर्णवर्णमिति॥नयदिपतनिकृताशेतदाहताशेनवांगवर्णस्यात्॥अत्र ३७३
अपूर्वार्धगतोपमागम्यंसुवर्णवर्णाधिक्यंतिरस्कृत्यद्वितीयार्धेप्रतीपंबालांगवर्णस्याधिक्यंगमयतिकृताशपा

तंविनाप्रतीपमपिदुर्लभमुपमातुस्वप्नेपिनसंभवतीतिमुग्धत्वहताशत्वाभ्यांगम्यते॥महात्म्यस्यपरोवधिर्निज
गृहंगंभीरतायाःपितारत्नानामहमेकएवभुवनेकोवापरोमादृशः॥इत्येवंपरिचिंत्यमास्मसहसागर्वाधिका
धै।३ रंगमोदुग्धाब्धेभवतासमोविजयतेदिक्चक्रवरावल्लभः॥विभाव्यभूयोनिजगौरिमाणंमानप्रमानंहृदये
विदध्याः॥गृहेगृहेपश्यनवांगवर्णामुग्धेसुवर्णावल्लयोलुठंति॥उपमानकैमर्थ्यस्यनूदाहरणमाक्षेपप्रक
रणेएवगादितं॥अभूदप्रत्यूहइत्यादि॥पंचमोयथा॥करिकुंभतुलामुरोजयोःक्रियमाणांकविभिर्विशृंखलैः
॥कथमालिश्रृणोपिसादरंविपरीतार्थविदोहियोषितः॥अत्रकथंश्रृणोषीत्यनेनतुल्यत्वंनसंभवतीतिगम्यते॥अ तै-|
र्थांतरन्यासोप्यमुमेवार्थंपुष्णाति॥तदेवंपंचविधंप्रतीपंप्राचामनुरोधान्निरूपितंवस्तुतस्तुआद्यास्त्रयोप्यु

र॰गं॰ पमायामेवांतर्गताभेदाः। चतुर्थः केषांचिदाक्षेपे पंचमस्त्वनुक्तवैधर्म्यव्यतिरेके॥ तथाहि निष्पद्यमानं सुंदरं वा
३७४ सादृश्यमुपमानस्याद्ये प्रतीपे मुखमिव कमलमित्यादौ सादृश्यस्यानिष्पत्तिः सौंदर्यं वास्ति येनोपमातो बहि
र्भावः स्यात् सौंदर्यविशेषस्तु त्वयाप्यभ्युपगमात्। विशेषस्य सामान्यानिवारकत्वात्। न च प्रसिद्धकमलादिप्रति
योगिकमेव सादृश्यमुपमेति राज्ञामाज्ञास्ति॥ न चोपमाविरुद्धवाचिनः प्रतीपशब्दस्य माहात्म्यादेव तादृशं साद
श्यमुपमेति शक्यं वक्तुं उपमाविशेषविरुद्धवाचकत्वेनापि तदुपपत्तेः॥ एवं च आद्यं प्रतीपं प्रसिद्धोपमाविशेष ए
व॥ अत एव द्वितीयावपि भेदावुपमाविशेषावेव॥ उपमानोपमेययोस्तिरस्कारस्तूपमांतराद्वैलक्षण्यं प्रयोजयेन्न ३७४ य-
तूपमासामान्यात्तदनुस्यूतत्वेनैव तत्प्रतीतेः॥ न हि द्राक्षामाधुर्यातिशयेन पार्थिवांतरात् विलक्षणेत्यपार्थिवी भव

ति॥ अपि च यद्युपमानोपमेययोस्तिरस्कारोलंकारांतरताप्रयोजकः स्यात् पुरस्कारोपि न तथा स्यात्॥ यथा॥ एको विश्व
सतां हराम्यपघृणः प्राणानहं प्राणिनामित्येवं परिचिंत्य मास्म मनसि व्याधानुतापं कृथाः॥ भूपानां भवनेषु किंच
विमलक्षेत्रेषु गूढाशयाः साधूनामरयो वसंति कति न त्वत्तुल्यकक्षाः खलाः॥ अत्रौपम्यप्रदर्शनस्य नोपमानति
रस्कारः फलं तस्य गर्वितत्वेनाविवक्षणात्। किंतु तदनुतापनाशः॥ एवं च फलवैलक्षण्यमात्रेणालंकारांतरत्वं
ब्रुवतां अस्याप्यलंकारांतरत्वमभ्युपमेयं स्यात्। प्रतीपप्रभेदत्वं वा। किंच त्वदुक्तप्रतीपप्रभेदानामपि परस्परं वैलक्ष ५४-
ण्येन पृथक्पृथगलंकारत्वं स्यात्। न प्रतीपभेदत्वं प्रतीपस्य सकलप्रभेदसाधारणसामान्यलक्षणाभावात्। अन्यत
मत्वं तु दूषणसहस्रग्रस्तत्वादलक्षणमेवेत्यसकृदुक्तं उपमालक्षणं तु सकलसाधारणं॥ चतुर्थः प्रभेदस्तु येषां

र०गं० मतेनाक्षेपस्तेषामस्तुनामप्रतीपालंकारः॥पंचमस्यतुगतिरुक्तैवप्रभेदस्य॥इतिप्रतीपप्रकरणं॥अथप्रौढो
३७९ क्तिः॥कस्मिंश्चिदर्थेकिंचिद्धर्मकृतातिशयप्रतिपिपादयिषयाप्रसिद्धतद्धर्मवत्तासंसर्गस्योद्भावनंप्रौढोक्तिः॥
॥संसर्गश्चसन्नसन्वासाक्षात्परंपरयावा॥वल्मीकोदरसंभूतकपिकच्छुसहोदराः॥हापीडयित्वानिघ्नंति
सज्जनान्दुष्टदस्यवः॥अत्रकपिकच्छुसहोदरत्वेनमारकत्वंनप्राप्नोति[illegible]पिपुपी[illegible]डाजनकत्वमात्रंकवेस्तुपी
डांजनयित्वामारयंतीत्येवंरूपोतिशयोविवक्षितोऽतोवल्मीकोदरसंभूतत्वंसर्पाधिकरणवृत्तितारूपंक[illegible]
पिकच्छुविशेषणं[illegible]मारकतावच्छेदकत्वेनस्वप्रतिभयाकविनाकल्पितं॥यथावा॥मंथाचलभ्रमणवेगवशं ३७९
वदायेदुग्धांबुधेरुदपतन्नणवःसुधायाः॥तैरेकतामुपगतैर्विविधौषधीभिर्धातासमर्जनवदेवदयादृगंता

न्॥अत्रदृगंतेषुनकेवलंसंजीवकत्वादयोऽमृतमात्रगुणाएवकवेर्बुबोधयिषिताअपितुनिखिलजनवशी
कारत्वादयोऽन्येपि[illegible]तिसुधाकणौषधिसंसर्गोविशेषणतयातिशयार्थमुपात्तः॥उत्पाद्योत्पादकभावश्चात्रनलो
कसिद्धोऽपितुकविमात्रनिबद्धः॥यथावा॥त्वदंगणासमुद्भूतासिक्ताकुंकुमवारिभिः॥त्वदंगतुलनांयातिक
दाचित्कल्पवल्लीलता॥अत्रकेवलस्यालवल्याउपमानताभारसहनसामर्थ्यस्यासिद्ध्येनायिकासामानाधिकरण्य
कुंकुमजलसंयोगयोरुपादानं॥अत्रचधर्मिविशेषसंसर्गादतिशयोधर्म्यंतरगतोयद्यप्यगूरणविषयस्तदे
वायमलंकारोवाच्यवृत्त्यातत्तत्प्रयुक्तत्वेनाभिहितश्चेत्समालंकारस्यैवविषयः॥यथा॥त्वत्तोजन्महिमांशुशे
खरतनुज्योत्स्नानिमग्नासनोदुग्धांभोनिधिमुग्धवीचिवलयैःसाकंपरिक्रीडनं॥संवासःसुरलोकसिंधुपुलिनेवा

र०गं० द:सुधांशो:करै:कस्मान्नोज्ज्वलिमानमंचतितमांदेवत्वदीयंयश:अत्रयशसोधवलनातिशयस्तत्तद्धर्मिसंबंध
३७९ प्रयुक्तत्वेनकथितइतिनदंशेसौरावालंकार:॥अंशुकृतश्चंद्रेचंद्रकृतश्चभगवतिभगवत्कृतोराजनीत्येव
मुत्तरोत्तरमुपचीयमानोराजगीतस्त्वनुक्तत्वात्प्रौढोक्तेरेवविषय:रावंचंशशशृंगधनुर्लसत्करागगनाभो
रुहमालिकाधरा:तनयै:सहभाविजन्मनांतवखेलंतिनरेंद्रवैरिणइत्यादावेकस्यमिथ्यात्वसिध्यर्थंमिथ्याभूत
वस्त्वनरकल्पनंमिथ्याध्यवसित्याख्यमलंकारांतरमितिनवक्तव्यंप्रौढोक्त्यैवगतार्थत्वात्॥केशा:कलिंदजा
तीरतमालस्तोममेचकाइत्यादौप्राचीनकृतप्रौढोक्त्युदाहरणे।यथातमालेषुश्यामत्वातिशयार्थंश्यामत्वाधि ३७९
करणीभूतकालिंदीसंबंधउद्भाव्यनेनतथावैरिष्वपिमिथ्यात्वसिद्धयेमिथ्यात्वाधिकरणशशशृंगादिसंबंध

इत्यस्यापिसुवचत्वात्॥तत्रश्यामत्वातिशयइहतुमिथ्यात्वमात्रंनतुतस्यातिशय:सिध्यतीतिवैलक्षण्यंतुनवा
च्यं॥तमालस्तोमेप्रमाणांतरेणसिद्धेपिश्यामत्वेकालिंदीसंसर्गोद्भावनंपुन:श्यामत्वसाधनेनातिशयमात्रक
मेवस्याद्वैरिषुतुमिथ्यात्वस्यासिद्धत्वाच्छशशृंगादिसंबंधेमिथ्यात्वस्यसिद्धिरित्यर्थसमाजाधीनेयमतिशयसि
द्धिर्वैलक्षण्यंनप्रयोजयति॥यत्तुविश्यांविश्येतस्रजंवहन्नितिकुवलयानंदकृतामिथ्याध्यवसितेरुदाहर
णंनिर्मितंतत्तुनिदर्शनयैवगतार्थं॥निदर्शनागर्भमिथ्याध्यवसितिरितितुनयुक्तं॥मिथ्याध्यवसितेरेवमि
थ्यात्वात्।यदिचमिथ्याध्यवसितिरलंकारांतरंस्यात्सत्याध्यवसितिरपितथास्यात्॥यथा॥हरिश्चंद्रेणसंज
ता:प्रगीताधर्मसूनृता॥खेलंतिनिगमोत्संगेमातर्गंगेगुणास्तव॥अत्रहरिश्चंद्रयुधिष्ठिरनिगमसंबंधाद्भु

र॰गं॰ एणानांसत्यत्वंप्रतीयते॥एवंचमध्येसुधासमुद्रस्यसितामयगृहोदरे॥पूर्णेंदुबिंबरेदेवस्थातुंयोग्यास्तवोक्त
३७७ यः॥अत्रापिसुधासमुद्रादिसंबंधादुक्तिषुमाधुर्यातिशयःप्रतीयमानःकस्यालंकारस्यगोचरःस्याद्‌तोलं
कारांतरंस्यान्ममतुप्रौढोक्त्यैवगतार्थत्वेत्याहुस्तांतावत्॥ ॥इतिरसगंगाधरेप्रौढोक्तिः॥ ॥अथललितं॥ ॥प्र
कृतधर्मिणिप्रकृतव्यवहारानुल्लेखेनेननिरूप्यमाणोऽप्रकृतव्यवहारसंबंधोललितालंकारः॥आददानःपरद्र
व्यंविषंभक्षयसिध्रुवमित्यादिनिदर्शनावारणायतृतीयांतं॥अप्रस्तुतप्रशंसावारणायप्रकृतधर्मिणीति॥
यथाक्वचरामःकामप्रतिमल्लललाटंतपबलस्तवक्वामीवीरारणशिरसिभीरामुखभुजाःदिधक्षोस्त्रैलोक्यंप्र ३७७
लयशिखिनःपद्ममथनप्रगल्भैःप्रालेयैःप्रशममसिकर्तुंव्यवसितः॥अत्रप्रकृतधर्मिणिरावणेपरहृतपुरो कृ-

डाशादिकमश्नतांदेवानामग्रेधीरैःकुंभकर्णादिभिर्वीरैर्भगवतोरामस्यपराभवमिच्छन्नित्येवंकंठरवेण
तादृशेच्छारूपंप्रकृतव्यवहारंविषयमनुक्त्वैवतादृशप्रालेयकरणकतादृशाग्निप्रशमनव्यवसायरूपोऽप्रकृ
तव्यवहारोविषय्युपात्तः॥विषयोपादनेत्तुनिदर्शनैव॥यथावा॥नान्यास्तिकिंभूमितलेसुरूपासीतैववाकिंभ
वतोनुरूपा॥व्याकर्षताचंदनशाखिशाखांप्रबोधितोयंभवताफणींद्रः॥अत्रापिराघवसंबंधिनायिकाहरणप्र
युक्तंतदीयक्रोधोद्बोधमनुक्त्वैवचंदनसंबंधिशाखाकर्षणप्रयुक्तफणींद्रप्रबोधनमुपन्यस्तं॥नचात्रभेदेऽभे
दइत्यतिशयोक्त्यागतार्थत्वेतिवाच्यं॥तत्रहिपदार्थेनपदार्थस्यैवाभेदाध्यवसानंकनकलतायांविराजतेचंद्रद्वइ
त्यादौदृष्टंनतुव्यवहारेणव्यवहारस्यैवविषयएवायमतिशयोक्तेः॥नाप्ययंसादृश्यमूलयाप्रस्तुतप्रशंसयाभ पि-

र॰गं॰ म्यंशेऽप्रस्तुतत्वविरहात्॥नापिनिदर्शनयाएकधर्मिगतव्यवहारद्वयोपादानएवतस्याइष्टेःअतएवोपात्त
३७९ योरितितल्लक्षणेविशेषणमुक्तं॥प्रकृतेचप्रकृतव्यवहारस्यानुपात्तत्वादलंकारांतरमेव॥एवंचवक्रसूर्यप्रभ
वोवंशःक्वचाल्पविषयामतिः॥तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरमित्यत्रकाव्यप्रकाशकारोयन्निदर्श
नामुदाहार्षीत्तदसंगतमेवललितस्यावश्याभ्युपगम्यत्वान्निदर्शनायाअत्राप्रतेश्चतदित्थंललितस्यालंकारां
तरत्वमुरीकुर्वतामाशयः॥अन्येतुललितंनालंकारांतरंनिदर्शनयैवगतार्थत्वात्नन्वेकधर्मिगतप्रस्तुता
पद-| प्रस्तुतव्यवहारद्वयोपादानजीवितानिदर्शनाकथमप्रस्तुतव्यवहारमात्रोपादानेएवमाधत्ताइतिचेत्॥ ३
श्रूयतामायुष्मताइहतावदलंकाराःप्रायशःश्रौताआर्थाश्चसंभवंतितत्रश्रौतेभ्यआर्थानपृथगलंकार

DR BHAU DAJI

त्वेनगणयंतेकिंतुपृथग्भेदत्वेनतदलंकारसामान्यलक्षणेनक्रोडीकरणात्॥इदंपुनर्वाक्यार्थनिदर्शनास्व र-|
रूपंव्यवहारद्वयवद्धर्म्यभेदप्रतिपादनाक्षिप्तोव्यवहारद्वयाभेदः॥तत्रव्यवहारद्वयवद्धर्म्यभेदस्यप्रति
पादनंश्रौतमेवापेक्षितमितिननियमः॥किंतुप्रतिपादनमात्रंतेनपरद्रव्यंहरन्मर्त्योगिलतिक्ष्वेडसंचय
मित्यत्रव्यवहारद्वयवद्धर्मिणोरभेदस्यश्रुत्याप्रतिपादनइवधिक्परस्वंतथाप्येषगिलतिक्ष्वेडसंचय
मित्यत्रार्थप्रकृतव्यवहारवद्धर्मिश्रौताप्रकृतव्यवहारवद्धर्मिणोरार्थाभेदस्यप्रतिपादनेपिवाक्यार्थनि
दर्शनात्वमक्षतं॥एकत्रश्रौतीत्वमपरत्रार्थीत्वमितितुविशेषोनवार्यते॥पदार्थनिदर्शनास्वरूपंतूपमा
नोपमेयधर्मयोरभेदाध्यवसायमूलउपमेयउपमानधर्मसंबंधइतिपृथगेव॥एवंतदुभयान्यतरत्वंच

र०गं० प्राचीनरीत्यासामान्यलक्षणं॥यदितुललितंपृथगलंकारःस्याल्लुप्तोपमादिरप्युपमादेःपृथक्स्यात्तदु
३७१ क्तयुक्तेस्तुल्यत्वात्॥नन्वतिशयोक्तिरेवसतिरूपकएवविलीयेत॥विषयविषयिणोर्द्वयोरप्युपादानेश्रौतं
रूपकंविषयिमात्रोपादानेत्वार्थमित्यस्यापिसुवचत्वात्॥सत्यं॥यत्रत्वलंकारशरीरमुभयत्राप्यविल
क्षणंतत्रैकालंकारव्यपदेशोयुक्तः॥यथासादृश्यंनिष्पद्यमानमुपमाशरीरंलुप्तोपमादिष्वविलक्षणमे
वेतितत्राप्युपमयैवव्यपदेशोन्याय्योनालंकारांतरेण।लुप्तत्वपूर्णत्वादिस्तुनतच्छरीरनिविष्टइतिस्वयंव्याव
र्त्तमानोपिनोपमात्वव्यावर्त्तकस्तथान्यत्रापीतिदिक्॥एवंचविषयतावच्छेदकरूपेणभातेविषयेविषयि ३७१
तावच्छेदकावच्छिन्नाभेदस्यरूपकशरीरस्यविषयितावच्छेदकरूपेणभासमानविषयात्मकादतिशयोक्ति

स्वरूपाद्विलक्षणत्वेनद्वयोरेकालंकारत्वंनयुक्तं॥निदर्शनाललितयोस्तुस्वरूपवैलक्षण्यंप्रदर्शितमेवे
...विषये त्येकालंकारत्वमेवेत्याहुः॥आहार्यनिश्चयविषयीभूतोविषय्यभेदोरूपकस्वरूपमुच्यते।ननिवेश्यतेच
विषयतावच्छेदकादिगौरवात्॥एवंचातिशयोक्तेर्निगीर्याध्यवसानरूपायारूपकभेदत्वमस्तुनामकानोहानिः
एवमपह्नुतेरपिविषयतावच्छेदकनिह्नवानिह्नवनिगरणानिरूपकस्यैवावांतरविशेषाइतितुनव्याः॥एतन्म
तरीत्यातुललितस्यनिदर्शनातःपृथगलंकारत्वंमनोरथललितमेवेति॥एवंचतितीर्षुर्दुस्तरंमोहादुडुपेना
ये२ स्मिसागरमित्यत्रनिदर्शनासाधुसंगच्छते॥क्वसूर्येत्यादिनास्वमतिसूर्यप्रभववंशयोरत्यंताननुरूपत्वंकथ
नोत्तरमुडुपकरणकसागरतरणेच्छायाअप्रकृतायाःकथनेनतादृशमतिकरणकवर्णनेच्छायाःप्रकृतायाः

र॰गं॰ प्रतिपत्तेः।यत्तु अनार्यिदेशः कतमस्त्वयाद्यवसंतमुक्तस्यदशांवनस्येनिपद्येकतमोदेशस्त्वयापरित्यक्तइति
३८० प्रस्तुतार्थमनुपन्यस्यवसंतमुक्तवनस्यदशामनार्यीतितत्प्रतिप्रतिबिंबभूतार्थमात्रोपन्यासाल्ललितालंकार
म-| इतिकुवलयानंदकारस्त्राह।।तदत्यंतसंगतं।।अत्रकथमन्यस्यदशामन्यानेतुंक्वइतिवसंतमुक्तवनदशा श-|
मिवदशांनिःश्रीकत्वलक्षणामनार्यीतिहिपर्यवसन्नार्थः।।तत्रनिःश्रीकत्वरूपकार्यद्वाराकारणस्यराजक
र्तृकत्यागकर्मत्वस्याभिधानंपर्यायोक्तेर्विषयःदेशयोरेकत्वाध्यवसानंतुपदार्थनिदर्शनायाअतिशयोक्ते
बुं-| र्वेत्यन्यदेतत्।।एवंचपदार्थनिदर्शनोपरिबृंहितस्यपर्यायोक्तस्यैवात्रविषयोनललितस्यकिंचत्वदुक्तंललिता ३८०
ति-| लंकारलक्षणमपिनात्रसंभवतितच्चप्रस्तुतेवर्ण्यवाक्यार्थप्रतिबिंबस्यवर्णनेप्रस्तुतेधर्मिणिवर्णनीयंवाक्यार्थ

मवर्णयित्वाकस्यचिदप्रस्तुतस्यवाक्यार्थस्यवर्णनंललितमित्यादिनास्वंथेनभवताविवेचितं।।इहचप्रस्तुतेधर्मि
णिदेशविशेषेराजकर्तृकत्यागकर्मत्वरूपस्यवर्ण्यस्यार्थस्यावर्णनेप्यप्रस्तुतस्यवसंतकर्तृकत्यागकर्मत्वस्या
प्यवर्णनात्कथंसंगच्छतां।।यदिपुनरकारिदेशःकतमस्त्वयाद्यनिरस्तचंद्रःकठिनाशयेनेतिपद्यंस्यात्तदास्याद
पितवमनोरथःनचतादृशावनदशायाअप्रस्तुतायादेशविशेषेवर्णनमस्त्येवेतिवाच्यं।।दशाशब्देनतद्गतसदृश
दशांतरस्यलक्षत्वेनतस्याप्रस्तुतत्वायोगात्।।अन्यथापदार्थनिदर्शनोच्छेदापत्तेः।।एवंरामोविजयतेयस्यक्षणा
त्सामर्षवीक्षणात्दावाग्निदग्धकांताररीलांलंकापुरीदधावित्यादौललितस्यालंकारांतरतामभ्युपगच्छतामपि
मतेनतस्यविषयःकिंतुनिदर्शनायाःअतएवउदयनिचिततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नियातिचास्तंव

र०गं० वहनिगिरियंरविलंबियंटाद्वयपरिवारितवारणेंद्रलीलामितिप्राचांनिदर्शनोदाहरणमपिसंगच्छते॥नव
३८१ नुरश्मिरज्जुनियंत्रितपार्श्वद्वयसंलग्नसूर्यचंद्रोयंगिरिरित्येवंप्रकृतधर्म्यारूढतयाऽप्रकृतार्थानुपादानाल्ललि
तमेवस्यात्॥प्रकृतव्यवहारस्यलेशतोप्यकीर्तनेकेवलंप्रकरणादिनागम्यत्वेललितमन्यथातुनिदर्शनेतिचे
त्तर्कसूर्यप्रभवइतिअस्मात्कथंनिदर्शनानहिनिर्वासितेतिसर्वंसमंजसमेव॥इतिललितालंकारः॥ ॥अथ मँ—
कि-|B. प्रहर्षणं॥ ॥साक्षात्तदुद्देश्ययत्नमंतरेणाप्यभीष्टार्थस्यलाभःप्रहर्षणं॥इदंचसामान्यलक्षणंत्रिविधप्र
हर्षणसाधारणंतत्राकस्मादभीप्सितार्थलाभइत्येकाविधावांछितार्थसिध्यर्थंयत्नेक्रियमाणेततोप्यधिकत ३८१
रार्थलाभइत्यपराउपायसिध्यर्थाद्यत्नात्साक्षात्फलस्यलाभइतितृतीया॥अस्यामेवाव्याप्तिनिरासार्थंलक्षणे

साक्षादित्युक्तं॥क्रमेणोदा॥निरस्तोरोषवशात्परिजनन्प्रियोमृगाक्ष्याशायितःपराङ्मुखःकिंमूर्छितोसा
विनिकांदिशीकयाकयाचिद्दाचुंब्यचिरायसस्वजे॥अत्रयत्नसामान्य…शून्यस्यापीष्टलाभः॥केलीमंदिर
र-| मागतस्यशनकैरालीष्वपास्येंगितैःसुप्तायाःसरुषःसरोरुहदृशःसंवीजनंकुर्वतः॥जानंत्याप्यनभिज्ञये
लि-| वकपटव्याजमीलिताक्ष्यासखिश्रांतासीत्यभिधायवक्षसितयापाणिर्ममाधीयत॥अत्रभामिन्यारोषनिवार
णाययत्नेक्रियमाणेरोषनिवारणादप्यधिकतरसुखप्रदःकामुकस्यभामिनीकर्तृकःस्वकरकर्मकस्तत्कुचा
धिकरणकआसंगः॥नचात्रतृतीयभेदःशंक्यः॥व्यजनवीजनसमयेकामुकस्यमाननिवारणस्यैवमुख्योद्दे
श्यत्वेनतदुपेयकुचस्पर्शादिफलांतरस्यानुपस्थितेः॥यथावा॥लोभाद्वराटिकानांविक्रेतुंतक्रमानिशमटंत्या

र०गं० लब्धोगोपकिशोर्यामध्येरथ्यंमहेंद्रनीलमणिः॥अत्रप्रहर्षणाद्वितीयभेदःस्फुटएवअननुरूपसंबंधमादा
३८२ यविषमालंकारश्चतत्रमहेंद्रनीलमणिरित्यतिशयोक्त्यालीढयोर्विषयविषयिणोरुभयोरपिप्रहर्षणेऽनुगु
णत्वंवांछिताधिकार्थत्वस्यमणिभगवदुभयसाधारणत्वात्विषमेतुनीलमणिरूपस्याविषयिमात्रस्यय
नोवराटिकार्थिनोयथामहेंद्रनीलमणेःकोटिमूल्यस्यसंसर्गोऽननुरूपोनतथाभगवत्संसर्गोभवितुंप्रभव
ति॥नचाज्ञानिनोभगवत्संसर्गोऽननुरूपएवेतिवाच्यं॥एवंतर्हितक्रविक्रयकर्तृत्वेनैवाज्ञानित्वलाभेवरा
टिकालोभरूपहेतूपन्यासस्यानतिप्रयोजनकत्वापत्तेः॥यादृशवांछितसिध्यर्थंयत्नःक्रियतेतादृशवांछि ३८२
तसिद्धौतुसमालंकारएव॥तद्दर्शनोपायविमर्शनार्थंमयातदालीसदनंगतेन॥तत्रैवसाऽलक्ष्यतपक्ष्मलाक्षी

दाक्षायणीमर्चयितुंप्रयाता॥अत्रतद्दर्शनोपायसिद्ध्यर्थंप्रयुक्तात्तत्सखीसदनगमनयत्नात्साक्षादेवतद्द
र्शनलाभः॥यत्तुचातकस्त्रिचतुरान्पयःकणान्याचतेजलधरंपिपासया॥सोपिपूरयतिविश्व[illegible]मंभसा
हंतहंतमहतामुदारतेतिपद्यंवांछितादधिकार्थस्यसंसिद्धिश्चप्रहर्षणमितिप्रहर्षणद्वितीयप्रभेदलक्षणे
स्योदाहृतंकुवलयानंदकृता॥तदसत्॥वांछितादधिकार्थस्यसंसिद्धिरितिलक्षणेसंसिद्धिपदेननिष्पत्तिमात्रं
नवक्तुंयुक्तं॥सत्यामपिनिष्पत्तौवांछितुस्तल्लाभकृतसंतोषानतिशयेप्रहर्षणशब्दयोगार्थासंगत्यातदलंका
रत्वायोगात्॥किंतुलाभेनकृतःसंतोषातिशयः॥एवंचप्रकृतेचातकस्यत्रिचतुरकणमात्रार्थितयाजलदक
र्तृकजलकरणकविश्वपूरणेनहर्षाधिक्याभावात्प्रहर्षणंकथंकारंपदमाधत्तां॥वांछितादधिकप्रदत्वेनदातु

र.गं. रुत्कर्षेभवंस्तुनवार्यते॥अतएवहंतेत्यादिनार्थांतरन्यासेनसरवपोष्यतेलोभाद्दूरादिकानामित्यस्मदीये
३८३ तूदाहरणेवांछितुर्वांछितार्थादधिकवस्तुलाभेनसंतोषाधिक्यात्तद्युक्तं॥ ॥इतिप्रहर्षणं॥ ॥अथविषा
दनं॥ ॥अभीष्टार्थविरुद्धलाभोविषादनं॥अस्यचाभीष्टार्थलाभार्थंकारणप्रयोगोयत्रनकृतः[illegible]केवल
मिच्छैवकृताजातश्चविरुद्धार्थलाभस्सयत्रचेष्टार्थप्रयुक्तेपिकारणेतस्मान्नविरुद्धार्थलाभोपितुस्वकारण
वशात्सर्वंविविक्तोविषयोयत्रत्विष्टार्थप्रयुक्ताकारणादेवविरुद्धार्थलाभोपितत्रतादृशाकारणविरुद्धार्थयो
रुत्पादकोत्पाद्यभावलक्षणसंसर्गस्याननुरूपत्वाद्विषममिष्यमाणविरुद्धार्थलाभसत्वाच्चविषादनमितिसं ३८३
द् कीर्णतेवा॥एवंचास्यविषमभेदगतार्थतेतिनाशंकनीयंविषमरहितस्याप्येतद्विषयस्यदर्शयिष्यमाणत्वात्॥

म यथा॥स्वस्वव्यापृतिनि[illegible]नमानसतयामत्तोनिवृत्तेजनेचंचूकोटिनिराकृतार्गलश्चितोयास्याम्यहंपंजरात्॥ए ३-
वंकीरवरेमनोरथमयंपीयूषमास्वादयत्यंतःसंप्रविवेशवारणकराकारःफणीन्द्रामणीः॥अत्रहिविषमप्र
भेदस्यनास्तिविषयःदुष्टार्थकारणप्रयोगाभावात्तदुष्टार्थप्रयुक्तकारणेनसहविरुद्धार्थस्योत्पाद्योत्पादक
ग भावलक्षणसंसर्गस्याननुरूपत्वंहितच्छरीरं॥तस्माद्विषादनमेवाप्रस्तुतप्रशंसाघटकतयास्थितं॥चेलांचलेना
ननशीनरश्मिसंघट्टवतीनांहरिदम्बराणां॥गोपांगनानांस्मरजातकंपादकांडसंपातमि[illegible]यायनीवी॥अत्र
ष्टस्याननगोपनस्यविरुद्धार्थंनीवीस्खलनंकारणभूतत्रपासंपातपरिपंथित्वात्नचसात्विककंपरूपात्स्वका
रणादेवोत्पन्नंतत्तुगोपनानुकूलयत्नार्तनापीरसाधनत्वेनप्रयुक्ताकारणादित्यनुत्पत्तिरत्रास्ति॥चेलांचलाव

र॰गं॰ रणेनाननगोपनरूपस्येष्टस्योत्पत्तेः अतो विषादनमेवात्र न विषमं ॥ अत्रेदं बोध्यं ॥ इष्टसाधनत्वेन निश्चिता
३८४ दनिष्टोत्पत्तिरिति यो विषमस्य भेदः प्राक् प्रत्यपादि सोऽनेन विषादनेन ग्रस्तत्वादस्यैव प्रभेदो भवितुमीष्टे न
विषमस्येति कश्चिद्यदि ब्रूयात्स प्रष्टव्यः ॥ न विषमस्येति यदुक्तं तत्कस्य हेतोर्विषादनेनेव विषमेणापि कार्य
कारणसंसर्गाननुरूपतालक्षणेन ग्रस्तत्वात् ॥ न चात्रैकस्यान्यापवादकत्वं युक्तं द्वयोरपि सावकाशत्वात्
भिन्नविषयत्वाच्च विरुद्धलाभांशो विषादनस्य विरुद्धलाभेष्टार्थप्रयुक्तकारणयोः संसर्गाननुरूपतांशश्च विष
मस्य विषय इत्यबोध्यामतस्मात्तत्र किंचिदंशे विषमं किंचिदंशे च विषादनं इत्युभयोरपि समावेशो बोध्यः ॥ इति
विषादनं ॥ अथोल्लासः ॥ अन्यदीयगुणदोषप्रयुक्तमन्यस्य गुणदोषयोराधानमुल्लासः ॥ नच गुणेन गुणस्य

दोषस्य वा दोषेण गुणस्य दोषस्य वेति चतुर्धा ॥ आधानं तु न वृत्तावुद्धिः ॥ क्रमेणोदाहरणं ॥ अलभ्यं सौरभ्यं ह
रति सततं यः सुमनसां क्षणादेव प्राणानपि विरहशस्त्रक्षतहृदां ॥ त्वदीयानां लीलाललितलहरीणां व्यतिकरा
त्पुनीते सोऽपि द्रागगहनपवमानस्त्रिभुवनं ॥ अत्र लहरीणां पावनतातिशयेन पवमानस्य पावनत्वं गुणांतरं
वर्णितं ॥ विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं नयाभ्यामालीढा परमरमणीया तव तनुः ॥ अयं त्वन्यस्का
रो जननिमनुजस्य श्रवणयोर्ययोर्नान्तर्यातस्तवलहरिलीलाकलकलः ॥ अत्र श्रीभागीरथीरमणीयत्वगुणेन त
द्रूपदर्शनविमुखयोर्नयनयोः श्रवणयोश्च नैष्फल्यमधिकाररूपो दोषो ॥ यथा वा ॥ हिंसाप्रधानैः खलु यातुधानैर्या
नीयत पावनतां सदैव रामांघ्रियोगादथ सापि वन्या विंध्यस्य धन्या समुनेः सतीव ॥ अत्र दोषेण दोषः पूर्वार्द्धे द्वि

Dr BHAU DAJI MEMORIAL

र॰गं॰ तीयार्द्धेतुगुणेनगुणइतिविशेषः॥यथावा॥भूषितानिहरेर्भक्तैःदूषितानिपराङ्मुखैः॥स्वकुलंनगरंदे
३८८ शोद्वीपंसर्वाचमेदिनी॥अत्रोत्तरोत्तरव्यापकतयातथेतिविशेषः॥श्वपाकानांव्रातैरमितविचिकित्सा
विचलितैर्विमुक्तानामेकंकिलसदनमेनःपरिषदांमुदामामुद्धर्तुंजननिघटयंत्याःपरिकरंतवश्लाघां
कर्तुंकथमिवसमर्थोनरपशुः॥अत्रवक्तृगतपापरूपदोषप्रयुक्तस्तदुद्धर्त्र्याःश्रीगंगायाःश्लाघ्यत्वंगु
णः॥यथावा॥श्ववृत्तिव्यासंगोनियतमथमिथ्याप्रलपनंकुतर्केष्वभ्यासःसततपरपैशून्यमननं॥अ
पिश्रावंश्रावंममतुपुनरेवंविधिगुणान्हतेत्वत्कोनामक्षणमपिनिरीक्षेतवदनं॥इहापिप्राग्वदेवपरंतु ३८८
व्यंग्यःसइतिविशेषः॥काव्यलिंगगतार्थोयेनालंकारांतरत्वभूमिमारोहतीत्येके॥लौकिकार्थमयत्वा

दनलंकारएवेत्यपरे॥इत्युल्लासः॥अथावज्ञा॥तद्विपर्ययोवज्ञा॥तस्योल्लासस्यविपर्ययोऽभावःअन्यस्यान्य
दीयगुणदोषप्रयुक्तगुणदोषाधानाभावइतिपर्यवसितोर्थः॥यथा॥निष्णातोपिचवेदांतेवैराग्यंनैतिदु
र्जनः॥चिरंजलनिधौमग्नोमैनाकइवमार्दवं॥अत्रपूर्वार्धेप्रपंचानित्यत्वबोधकतारूपवेदांतशास्त्रगु
णप्रयुक्तस्यखलेवैराग्यरूपगुणाधानस्योत्तरार्द्धेद्रवत्वरूपजलधिगुणप्रयुक्तस्यमैनाकेमार्दवरूपगुणा
धानस्यचविपर्ययोवर्णितः॥मध्येगलंविरहैतांगरलंनिकामंनागाधिपाःशिरसिभालतलेकृशानुः॥ध्या
ताभवज्ज्वलनमध्यगतेस्तथापिहापंतदेवहरनेहरतेननुश्रीः॥अत्रतापकतारूपगरलादिदोषप्रयुक्तस्य
भगवन्मूर्तेःक्रूरत्वादिदोषाधानस्याभावः॥नचात्रातद्गुणोवक्ष्यमाणोलंकारइतिवाच्यं॥यतोयमुनाजल

र॰गं॰ लराजहंसौंदर्यधायमुनाजलगतश्यामत्वाग्रहणंनतथाभगवन्मूर्त्तेर्गरलादिगतक्रूरत्वाग्रहणंविवक्षितम
३९६ पितुनादराक्रूरत्वप्रयुक्तस्यक्रूरत्वांतरस्यानाविष्करणमित्यस्तिविशेषः॥निष्णातोपीत्यादौतुतद्गुणस्याप्रस
क्तिरेव॥मद्वाणिमाकुरुविषादमनादरेणमात्सर्यमंदमनसांसहसाखलानां॥काव्यारविंदमकरंदमधु
व्रतानामास्येषुयास्यसिसतांविपुलंविलासं॥अत्रपूर्वार्द्धेअनादररूपखलदोषप्रयुक्तस्यकविवाण्यांविषा
दरूपदोषस्यनिषिध्यमानत्वादप्रतिष्ठानेनाभावः॥शार्द्धेवाणीगतरमणीयतारूपगुणप्रयुक्तस्यखलैरसं
तोषरूपगुणाधानस्याभावःपुनरार्थइत्युभयविधाप्यवज्ञा॥उत्तरार्द्धेतुसहृदयगुणेनसरसतारूपेणवाण्या ३९६
उल्लासरूपगुणाधानमित्युल्लासएव॥विशेषोक्त्यैवगतार्थत्वादवज्ञानालंकारांतरमित्यपिवदंति॥इत्यव

ज्ञा॥अथानुज्ञा॥उत्कटगुणविशेषलालसयादोषत्वेनप्रसिद्धस्यापिवस्तुनःप्रार्थनमनुज्ञा॥यथा॥प्रणि
पत्यविधेभवंतमुद्धाविनिबद्धांजलिरेकमेवयाचे॥जनुरस्तुकुलेकृषीवलानामपिगोविंदपदारविंदभाजां॥अ
त्रहरिभक्तिलालसयाकृषीवलजन्मनःप्रार्थना॥एवंदोषविशेषानुबंधाद्गुणत्वेनप्रसिद्धस्यापिद्वेषस्तिरस्कारः
यथा॥श्रियोमेमासंतुक्षणमपिचमाद्यद्गजघटामदभ्राम्यद्भृंगावलिमधुरसंगीतसुभगाः॥निमग्नानांया
सुद्रविणरसपर्याकुलहृदांसपर्यासौकर्यंहरचरणयोरस्तमयते॥अत्रहरिचरणभजनच्युतिभयाद्राज्य
सुखस्यतिरस्कारः॥अमुंचतिरस्कारमलक्षयित्वानुज्ञांलक्षयतःकुवलयानंदकृतोविस्मरणमेवशरणं॥
अन्यथाभवद्भजनदेहलीतितदुदाहृतपद्येकिमित्यमरसंपदामित्यंशेतिरस्कारस्यास्फुरणापत्तेः॥ननुकथं

र०गां० अनयोरलंकारयोःसंभवोयाचताप्रार्थनमिच्छातिरस्कारश्चद्वेषः तत्रदोषेइष्टसाधनताज्ञानरूपकारणा
३९७ भावादिच्छानयुक्तागुणेचद्विष्टसाधनताज्ञानाभावाद्द्वेषोपितथाविपरीतंतुकारणसत्वादुचितमितिचेत्तन्मे दूस
वंदोषगुणयोर्गुणदोषांशमादायेष्टद्विष्टसाधनताज्ञानयोःसत्वात्त्वदुक्तंकारणंतावदव्याहतंउत्कटद्वि
अजनक-। ष्टाननुबंधीष्टसाधनताज्ञानस्योपायेच्छांप्रति उत्कटेष्टाननुबंधिद्विष्टसाधनताज्ञानस्यचोपायद्वेषंप्रति
कारणत्वस्यवाच्यत्वाद्द्वेपरीत्यमपिनोचितमन्यथासुखदुःखोभयसाधनेषुचांद्रायणकलंजभक्षणादि
षुहरीतकीदधित्रपुसभक्षणादिषुचेच्छाद्वेषयोरनियमएवस्यात्॥अत्रचपुरुषकालप्रवेशआवश्यकः ३९७
॥उत्कटतत्पुरुषीयतात्कालिकद्विष्टाननुबंधितत्पुरुषीयफलसाधनताज्ञानंतत्पुरुषीयोपायेच्छांप्रति

i ... तात्कालिक द्वेष विषय—

कारणंएवमुत्कटतत्पुरुषीयतात्कालिकेष्टाननुबंधितत्पुरुषीयतात्कालिकद्वेषविषयफलसाधनताज्ञा
नंतत्पुरुषीयोपायद्वेषंप्रतितेनपुरुषांतरीयंकालांतरीयंचद्विष्टमिष्टमादायनदोषः॥इदंतुबोध्यं॥फ
लेउत्कटेच्छयाउपायेप्युत्कटेच्छैवजायतेएवंफलेउत्कटद्वेषेणोपायेपिउत्कटद्वेषएव॥एवंचसुखदुःखोभ
यसाधनेषुचांद्रायणादिषुयदिस्वसामग्रीवशात्प्रथमंसुखेउत्कटेच्छातदातत्साधनेषुचांद्रायणादिष्वपिसै
व॥अथस्वसामग्रीवशात्प्रथमंदुःखेउत्कटद्वेषस्तदाचांद्रायणादिषुसएवउत्कटसामग्र्याबलवत्वकल्पना
त्॥उत्कटत्वंचप्रकृतेइच्छाद्वेषगतोविषयिताविशेषःएकसाधनजन्येइष्टानिष्टरूपेफलद्वयेएककालावच्छे
न-। देनैकत्रोत्कटेच्छाअपरत्रोत्कटद्वेषश्चनसंभवतितथासतिचांद्रायणादिष्वेकस्मिन्नेवसमयेइच्छाद्वेष

र॰गं॰ ३८८ योर्द्वेषयोरप्याप्पत्तेः॥एवंचबलवद[illegible]दनिष्टाननुबंधित्वंबलवदिष्टाननुबंधित्वंचोपायेच्छाद्वेषयोःकारणतावच्छे न-
दकेनदेयमेवेत्याहुः॥अन्येतुफलेच्छाफलसाधनताज्ञानयोर्द्वेयोरुपायेच्छांप्रतिफलद्वेषफलसाधनताज्ञा
नयोरुपायद्वेषंप्रतिचकारणत्वंउत्कटसामग्र्याबलवत्वाच्चेष्टानिष्टोभयसाधनेनदोषइत्यपिवदंति॥एवंचे
ष्टानिष्टोभयसाधनेदोषेगुणेचगुणेनदोषेणचमिश्रितेसत्हृदयानामिच्छाद्वेषयोरुचितैवोत्पत्तिर्हरीतकी
कदलभक्षणयोरिवेतिइत्यनुज्ञातिरस्कृती॥अथलेशः॥गुणस्यानिष्टसाधनतयादोषत्वेनदोषस्येष्टसा लेशः
धनतयागुणत्वेनचवर्णनंलेशः॥यथा॥अपिबततगुरुगर्वमास्मकस्तूरियासीरखिलपरिमलानांमौलिना ३८८
सौरभेण॥गिरिगहनगुहायांलीनमत्यंतदीनंस्वजनकममुनैवप्राणहीनंकरोषि॥नैर्गुण्यमेवसाधीयो

धिगस्तुगुणगौरवं॥खिनोन्येविराजंतेखंड्यंतेचंदनद्रुमाः॥पूर्वत्रगुणस्यदोषत्वेनवर्णनमात्रमुत्तरत्रतु
तृणेन दोषस्यगुणत्वेनेमर्थांतरन्यासानुविद्धं॥स्वर्लंतीस्वर्लोकादवनितलशोकापहृतयेजटाजूटग्रंथौयदसि
विनिबद्धापुरभिदा॥अयेनिर्लोभानामपिमनसिलोभंजनयतांगुणानामेवायंतवजननिदोषःपरिणतः॥
अत्रदोषोपराधस्तथाचापराधत्वेनगुणानांदोषत्वमुक्तंभवति॥नचायमलंकारोव्याजस्तुत्योभयरूप
मु- यागतार्थइतिशंक्यं॥[illegible]बप्रतिपादितार्थवैपरीत्येनात्रसर्वत्रपर्यवसानाभावात्॥नह्यपिबततगुरुगर्वमि
त्यत्रकस्तूरिकायाःस्तुतौकवेस्तात्पर्यमपितुजनकप्राणापहारित्वेननिंदायामेव॥अतएवाप्रस्तुतकस्तूरीवृत्तां
ताभिव्यक्तेप्रस्तुतवृत्तांतेपितस्यामेवविश्रांतिः॥एवंनैर्गुण्यमेवसाधीयइत्यत्रशाखोटतरूणांनिंदानविवक्षि

र०गं० नाकिंतुस्फुरवाक्यानांगुणिनःस्वगुणैर्दुःखितस्यवाक्येस्मिन्निर्गुणानांनिंदायाअवक्तव्यत्वात्प्रस्तुतस्तेतरे
३८९ ववाच्यत्वात्।।स्वरुतीस्वलोकादिनिपद्येभागीरथीस्तुतिप्रकरणपठितेयद्यस्तिभागीरथीस्तुतौतात्पर्यंत
दाव्याजस्तुतिरप्यस्तुतस्याःसावकाशत्वेनैतद्बाधकत्वायोगात्।।रवितुरगादिगजेषुस्वर्गाचलजलधिघ
स लेवन्ते नदकोशेषु राजपुंगवकिंदातास्मीतिगर्वमावहसि।।अत्रपर्यंतेप्रतीयमानस्यरवितुरगादिपरि
संख्यातपदार्थातिरिक्तसकलवस्तुदानरूपस्यगुणस्यदोषत्वेनवर्ण्यमानस्यचरवितुरगाद्यदानस्यागुण
त्वाद्गुणदोषयोर्भिन्नविषयत्वेनावस्थानेनलेशस्यश्लेषरहिताव्याजस्तुतिरितिस्फुटमेवसावकाशत्वं।।अत ३८९
एवलेशोपिनव्याजस्तुतेर्बाधकइतिप्रागुक्तजान्हवीस्तुतौद्वयोरपिसमावेशः।। ।।इतिलेशप्रकरणं।। ।।स्वगु

णत्यागपूर्वकंसंनिहितवस्त्वंतरसंबंधिगुणग्रहणंतद्गुणः।।यथा।।नीतोनासांतिकंतन्व्यामालत्याःकुसुमो
त्करः।।बंधूकभावमानिन्येरागेणाधरवर्तिना।।यथावा।।अधरेणसमागमाद्रदानामरुणिम्नापिहितोपिमु
ग्धभावः।।हसितेनसितेनपक्ष्मलाक्ष्याःपुनरुल्लासमवापजातप।।अत्राद्येमालतीकुसुमोत्करस्याधर क्षिः
संगरक्ततयाबंधूकभावोपपत्तेस्तद्गुणः द्वितीयेपिपूर्वार्द्धेस्पष्टएवतद्गुणःपरंतूत्तरार्धगतेनप्रतिप्रसवतुल्ले
नहासेनापोह्यमानत्वाद्भंगुरः।।यदितुहासेनाधरगाद्धारारुणिम्नोबाधस्तदात्राप्यपरस्तद्गुणः।।इमंचके सितीकर-
चित्पूर्वरूपमामनंति।।यद्यप्युल्लासेप्यन्यदीयगुणेनान्यस्यगुणाधानमस्तितथापितत्रान्यदीयगुणप्रयुक्तं
गुणांतरंचूर्णादिक्षारताप्रयुक्तहरिद्रादेःशोणत्वमिवाधीयतेप्रकृतेतुजपाकुसुमलौहित्यंस्फटिकइवान्य

र॰गं॰ दीय[illegible]गुणएवान्यत्रेतिततोस्यभेदः॥ ॥इतितद्गुणः॥ ॥अथातद्गुणः॥तद्विपर्ययोऽतद्गुणः यथा कुचाभ्यामाली
३१० ढसहजकाठिनाभ्यामपिरमेनकाठिन्यंधत्ते तवहृदयमत्यंतमृदुलं॥मृगांगानामंतर्जननिनिवसंतीरकु
चिरंनकस्तूरीदूरीभवतिनिजसौरभ्यविभवात्॥अत्रपूर्वार्द्धेपरगुणाग्रहणंशाब्दंस्वगुणत्यागाभावस्त्वार्थः
॥उत्तरार्धगतेदृष्टांतेतुस्वगुणत्यागाभावःशाब्दःपरगुणाग्रहणंत्वार्थं॥[illegible]चायमव[illegible]ज्ञयानातिरिच्यते॥
ध्य उल्लासविपर्ययोऽवज्ञा तद्गुणविपर्ययश्चातद्गुणइतिनैयोगिभेदादेवभेदस्यसिद्धेः॥अत्रगुणग्राहकोपस्था प्रते
यासंन्निहितस्यगुणवतउत्कृष्टत्व[illegible]मत्वाभ्यांद्वैविध्यमितिसर्वस्वकारः॥तस्यायमाशयः॥अपकृष्टसंब ३१०
स धिगुणाग्रहणस्यसाहजिकत्वेनवैचित्र्यानाधायकत्वादनलंकारत्वेनैवेत्यपकृष्टत्वेनतृतीयविधातुनसंभ

DR BHAU DAJI MEMORIAL

वतीति॥अन्येतुआवांतरचमत्कारविषयस्याभावात्द्वैविध्यमपिनेतिवदंति॥अपरेतुसतिगुणग्रहणहे
तावुत्कृष्टगुणवस्तुसन्निधानेनतद्गुणग्रहणरूपकार्याभावात्मकोयमतद्गुणोविशेषोक्तेरवांतरभेदोनत्वलं
कारांतरं॥कार्यकारणभावोनात्रविवक्षितः॥किंतुसन्निधानेपितद्गुणग्रहणाभावः इत्येतावन्मात्रमतो
विशेषोक्तेरतद्गुणोभिन्नइतिनुनयुक्तं॥सन्निधानेपीत्यपिनाविरोधोविवक्षितइतिगम्यते॥अन्यथाजीवातो
रभावादलंकारत्वेवनस्यात्॥सचकार्यकारणभावावेक्षणेनभवतीतिकथमुच्यतेनविवक्षितइत्यप्याहुः॥
प्या इत्यतद्गुणः॥अथमीलितं॥स्फुटमुपलभ्यमानस्यकस्यचिद्वस्तुनोलिंगैरतिसा[illegible]द्भिन्नत्वेनागृह्यमाण
नांवस्त्वतरलिंगानांस्वकारणाननुमापकत्वंमीलितं॥(संग्रहश्च)भेदाग्रहेणलिंगानोलिंगैःप्रत्यक्षव

DR BHAU DAJI MEMORIAL

र.गं. स्तुनः॥अत्रकाशेप्यनध्यक्षवस्तुनस्तत्रमीलितं॥सामान्यवारणायानध्यक्षेति॥तत्राध्यक्षस्यैववस्त्वंतरस्या
३११ ग्रहणं।तद्गुणेवस्त्वंतरगुणानांभिन्नत्वेनाग्रहणेपिवस्त्वंतरस्यग्रहणमस्त्येवेतिनतत्रप्रसंगः॥उदाहर
णं॥जलकुंभमुंभितरसंसपदिसरस्याःसमानयंत्यास्तटकुंजगूढसुरतंभगवानेकोमनोभवोवेद
॥अत्रसुरतगमकानांस्वेदकंपनिश्वासानांजलकुंभानयनत्वराजनितैस्तैर्भेदस्याग्रहात्स्फुरणस्याप्रका
शः॥यथावा॥सरसिरुहोदरसुरभावधरितबिंबाधरेमृगाक्षितववदनेमणिरदनेतांबूलंकेनलक्ष
येमवयं॥अत्रप्रियेणतांबूलंकुतोनगृहीतासीत्युक्तेएतावंतंसमयंतांबूलानिभुक्त्वेवसमागतास्मीत्युक्त ३११
ता-| वतींप्रतितस्येयमुक्तिः॥पूर्वोदाहरणेप्रत्यक्षवस्तुलिंगान्यागंतुकान्यत्रतुसाहजिकानीतिविशेषः॥ ॥इ

तिमीलितालंकारः॥अथसामान्यं॥ ॥प्रत्यक्षविषयस्यापिवस्तुनोबलवत्सजातीयग्रहणकृतंतद्भि
न्नत्वेनाग्रहणंसामान्यं॥मीलितेतुनिगृह्यमानवस्तुनोप्रत्यक्षविषयइतिनतत्रातिव्याप्तिः॥उदाहरणं॥यस्मि
न्हिमानीनिकरावदातेचंद्रांशुकेवल्गमिवप्रयाति॥पुच्छाश्रयाभ्यांविकलाइवाद्रौचरंतिराकास्वचिरंचम
र्यः॥अत्रचंद्रिकांतःपृथक्त्वेनहिमाद्रिचमरीपुच्छयोरदर्शनात्उत्प्रेक्षोत्पत्तिरितितस्यांसामान्यंगुणः॥केचि
त्तुप्रागुक्तलक्षणेभिन्नत्वेनाग्रहणमित्यपहायभिन्नजातीयत्वेनाग्रहणमितिवक्तव्यंतेनव्यक्तिभेदग्रहेपि
सामान्यमेवालंकारः॥यथा॥स्तबकभरैर्ललिताभिश्चलिताभिर्मारुतैर्नृपलताभिः॥वृतमुपवनमेवा
सीदरिमहिलानांमहावनंभवतः॥अत्रमहावनमितिमहावनकार्यस्यनिलयनसंपादनात्तत्त्वेनारोपस्य

रं॰गं॰ क्षेणत्वदीपैर्भटैर्लताभिःसहतत्तद्व्यक्तितयाभिन्नत्वेनग्रहेपिभिन्नजातीयत्वेनाग्रहणाभिष्पद्यते॥पूर्व
३१२ मतेत्वत्रालंकारांतरमभ्युपेयंस्यादित्याहुः॥ननुभेदाग्रहएवमीलितसामान्यतद्गुणसाधारणएकोलंका
रोस्तुकिमलंकारत्रये[illegible]एणमीलितेतावत्प्रकृताप्रकृतधर्मिगुणानांभेदाग्रहउपपादितएवसामान्येकेषांचिद्गु
णागुणिभेदाग्रहःकेषांचित्क्वचित्जातिमात्रभेदाग्रहश्चतद्गुणेपिरक्तगुणेरंजकगुणभेदाग्रहः॥नचावां
तरभेदसत्वान्नैकालंकारत्वमुपपद्यतइतिवाच्यं॥लुप्तोपमादितःपूर्णोपमादेःपृथगलंकारतापत्तेःतस्मा
द्भेदाग्रहस्यत्रयोमीलितादयोवांतरभेदाइतियुक्तंनतुपृथगलंकाराइतिचेत्उच्यते॥एवंतर्हिभेदोप्येको ३१२
लंकारस्तदवांतरभेदारूपकपरिणामाद्यतिशयोक्तिप्रमुखाइत्यपिशक्यतेवक्तुं॥विच्छित्तिभेदस्तुप्रकृतेपि

नुस्मप्रायः॥मीलितरीत्याभेदाग्रहेप्राप्तेकेनचिद्धेतुनाभेदज्ञानेसतिमीलितप्रतिद्वंद्व्युन्मीलितंसामान्यरीत्या
जगतिभेदाग्रहेप्राप्तेकेनचिद्धेतुनासतिवैजात्यग्रहेसामान्यप्रतिद्वंद्विविशेषकंचेत्यलंकारद्वयंयथाहिमाद्रिं
त्वद्यशोमग्नंसुराःशीतेनजानते॥लक्षितान्युदितेचंद्रेपद्मानिचसुखानिचेतिकुवलयानंदकृदाह॥तन्न॥अ मु—
नुमानालंकारेणैवगतार्थत्वादनयोरलंकारांतरत्वायोगात्नचात्रप्रत्यक्षसामग्र्याबलवत्त्वेनानुमितेरनुदया व—
भानुमानालंकृतिःशक्यनिरूपणेतिवाच्यं॥व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यैवानुमानालंकारलक्षणवा
ग्र— क्यगतेनानुमितिपदेन[illegible]हणादतएवतत्रास्माभिःपक्षांतरमुक्तं॥प्रकृतेत्वविशेषदर्शनैर्हेतुकस्यप्रत्यक्षस्ये
वतथात्वात्नहिप्रमाणविभाजकानांमिवालंकारिकाणामपिसरणिर्येनप्रत्यक्षत्वानालिंगितामनुमितिंप नैयायिकाना—

र०गं० रिभाषेमहि॥नन्वेवंविधेविषयेनानुमितिपदप्रयोगोभ्यर्हितानामितिवाच्यं॥तथाप्युन्मीलितादिवत्परि
३९३ भाषायाअनिवारणात्॥अस्तुवाअनुमितित्वंयुक्त्यैवानुमितिस्तथापिप्रकृतेप्रतिबंधकवशात्तस्याअनुदये आति
पितत्करणस्याप्रत्यूहत्वेनानुमानत्वमव्याहतं॥नहिसत्यप्यग्नौमणिमंत्रादिभिःप्रतिबद्धोदाहोनभवतीति
दाहकारणमग्निर्नेतिवक्तुंशक्यं॥फलायोगव्यवच्छेदस्तुनकरणतायाःप्रयोजकोपितुव्यापारएवेति॥एतेन
ट्यं विशेषदर्शनेनस्यकोटि[illegible]तरभानप्रतिबंधकत्वेनचक्षुःसंयोगादिरूपस्वसामग्रीवशादेवोत्पन्नेतादृशप्रत्यक्षेहे
तुता[illegible]यांमानाभावात्परिभाषिताप्यत्रनानुमितिरनस्तत्करणमनुमानंकथंनामस्यादितिपरास्तं॥यदप्यु ३९३
क्तंतद्गुणरीत्यापिभेदा[illegible]ध्यवसायप्राप्तावुन्मीलितंदृश्यते॥यथा॥नृत्य[illegible]गा[illegible]हासप्रसररसलवैरस्तावकी दृभ

नैर्यद्भोगिभिर्धावल्यंनीयमानेत्रिजगतिपरितःश्रीनृसिंहक्षितींद्र॥नेदृग्यद्येषनाभीकमलपरिमलप्रोद्दिमा
सा न सादयिष्यद्देवानांनाभविष्यत्कथमपिकमलाकामुकस्यप्रबोधः॥इतितदपिनतद्गुणेहिगुणयोर्भेदानध्यव
सायोननुवस्तुनोरितिनिर्विवादं॥अत्रनाभीकमलपरिमलेनभगवत्त्वेनभगवद्ज्ञानेजातेपिनदीयगुणेनी दृ
लिमनियशोगुणधावल्यभेदानध्यवसायरूपस्यतद्गुणस्यनिर्बाधत्वात्कथंकारंतत्प्र[illegible]न्मीलनस्योच्य ति
ते॥यद्येकस्मिन्वस्तुनिसन्निहितवस्त्वंतरगुण[illegible]दाध्यवसायस्तद्गुणजीवितमित्युच्यते॥तथाप्यत्रतद्गु न
णोनिर्बाधोभगवत्त्वेतभिन्नत्वेनज्ञानस्योपायैश्शून्यत्वेनायोगात्तंनचनीलत्वव्याप्यभगवत्त्वज्ञानमेवो
पायः॥प्राङ्नीलोपिकारणविशेषमहिम्नासंप्रतिश्वेतोजातइतिबुद्धेःप्रत्यक्षानुगृहीतायास्तथाप्यनपायात्॥

र०गं० अतएवतदुपजीव्येनालंकारसर्वस्वकृतोन्मीलनविशेषकयोश्चर्चैवनकृता॥अतःप्राचीनैःकृतविभागे
३९४ ष्वलंकारेष्विदंप्रथमोत्प्रेक्षितस्ययावदलंकारस्यशक्योंतर्भावःकर्त्तुंनतावत्पृथगलंकारत्ववाचोयुक्ताविग
लितश्रृंखलत्वमात्मनोनाटयितुंसांप्रतंमर्यादावशंवदैरार्यैरिति॥यत्तुवेत्रत्वचानुल्यरुचांवधूनांकर्णाग्र वेत्र-।
तोगंडतलागतानिभृंगाःसहेलंयदिनापतिष्यन्कोवेदयिष्यन्नवचंपकानीत्यत्रसामान्यमुदाहृत्यकाव्यप्र -वं
काशेनिमित्तांतरजनितापिनानात्वप्रतीतिःप्रथमप्रतिपन्नमभेदंनव्युदसितुमुत्सहतेप्रतीतस्यत्यागायोगा
दित्युक्तं॥अत्रोत्तरप्रतिपत्त्यातिरस्कृतत्वात्पूर्वप्रतीतेर्नचमत्कारित्वंकिंतूत्तरप्रतीतेरेवेतितयैवव्यपदेशोन्या ३९४
य्यः॥अन्यथाव्यतिरेकेप्युपमापत्तेः॥विरोधाभासस्तुपूर्वोत्तरप्रतीतिद्वयात्मकइतिभवतिचमत्कारी॥ ॥

इतिसामान्यं॥ ॥अथोत्तरालंकारः॥ ॥प्रश्नप्रतिबंधकज्ञानविषयीभूतोर्थउत्तरं॥प्रश्नश्चजिज्ञासाभावे
नङ्गेविधानात्॥साचज्ञानविषयेच्छासाचोत्तरवाक्याद्विषयीभूतेज्ञानेजातेनिवर्त्तते॥ननुजिज्ञासाज्ञा
नेष्टसाधनताज्ञानसाध्याजातेहिज्ञानेष्टसाधनताज्ञानेतद्रूपस्यैवविषयीभूतज्ञानस्यसिद्धत्वात्कथमुत्पत्तु
मर्हतीति॥मैवं॥किमेकंदैवतंलोकेइत्यादिप्रश्नवाक्यादेकदैवतत्वव्याप्यधर्मप्रकारकज्ञानमिष्टसाध
नमितिज्ञानजन्याप्रयोक्तृगतातादृशंज्ञानंमेजायतामितीच्छानुमीयते॥साचप्रष्टुःकुतश्चिद्दैवतत्वप्रकार
कोपस्थितावेकसंबंधिज्ञानाधीनायांदैवतत्वव्याप्यधर्मत्वेनरूपेणतादृशधर्मोपस्थितौचसत्यांतस्यांगृहीते व-।
नंदैवतत्वव्याप्यधर्मप्रकारकज्ञानत्वेनसामान्येनभाविन्युत्तरवाक्यजन्यज्ञानेइष्टसाधनताज्ञानादुत्पद्यते॥

र॰गं॰ तस्याश्चतादृशप्रकारकज्ञानत्वेनसामान्यरूपेणविष्णुर्दैवतमित्यादीनिज्ञानान्येवदैवतत्वव्याप्यधर्मोंशे
३१८ निरवच्छिन्नप्रकारतांभाजिविषयइतितैरेवोत्तरवाक्यादुत्पन्नैः[illegible]प्रतिबध्यते॥जनकीभूतज्ञानंविषयए
वतस्यानभवतीतितनतत्सिद्धिःप्रतिबंधकेतितनदोषः॥तच्चोत्तरंद्विविधंउन्नीतप्रश्नं॥निबद्धप्रश्नंच॥क्रे[illegible]
मेणोदाहरणं॥त्वमिवपथिकःप्रियोमेविटपिस्तोमेषुगमयतिकृशतां॥किमितोन्यत्कुशलंमेसंप्रतियत्सां
थजीवामि॥अत्रकस्यचित्सार्थस्यपुरंध्र्याःकंचित्पथिकंप्रत्युत्तरेणतत्कर्तृकःकुशलप्रश्नोनुमीयतेकुश
लमपृष्टायाःकुशलोक्तेरयोगात्॥किमितिकृशासिकृशोदरि॥किंतवपरकीयवृत्तांतैः॥कथयतथापिमु ३१८
मुदेममकथयिष्यतियाहिपांथतवजाया॥अत्राद्यप्रश्नस्यहेतुश्चेद्दृदरिस[illegible]नदाप्रतिकरिष्यामीतिव्यंग्यं॥

उत्तरस्यतुनमयापतिव्रतयाहेतुर्वक्तुंपरपुरुषंप्रतियोग्योनचत्वयाप्रतिकर्तुंशक्यइति॥द्वितीयप्रश्नस्यत्वंले
पातिव्रत्येनावि[illegible]दग्धजनहठमात्रविलसितेनस्वपरसंतोषएवसंसारसारइति॥द्वितीयोत्तरस्यतुयाममदशा
सैवतवजायायाअपिदशास्तिसैवप्रतिक्रियतांनहिस्वकीयंसदनंदह्यमानमुपेक्ष्यकश्चित्परसदनाग्निंप्रति
दि-। करोति॥अथयदिपरोपकारःस्वकीयांक्षतिमपिसो[illegible]करणीयइत्यस्तिमनीषांतदानवैवंविधोपकारप्रव द्वा-।
त्तस्यजायायाःकेनचिदन्येनभवादृशेनोपकारःकरणीयइतित्वयैवतस्याममेवपरपुरुषपराङ्मुख्याविरहो
दूरीकर्त्तव्यः॥उभौतप्रश्नेसकृदुत्तरस्यचारुत्वंनिबद्धप्रश्नेतुप्रश्नोत्तरयोरसकृदुपन्यासेनादितिप्राचः॥अयं
चोत्तरालंकारोद्विविधोपिप्रश्नोत्तरयोरन्यतरस्योभयोश्चसाभिप्रायत्वेननिरभिप्रायत्वेनचचतुर्विधइत्यस्था॥

र॰गं॰ प्रियोहृदयवर्त्तीमेनमांमुंचनिजानुचित्।।उत्तरेनावकाशोऽस्तिदूरंनस्तेमनोरथः।।अत्रकेनचित्पांथेन
३१६ कांचित्साध्वींप्रतिकुत्रत्तवप्रियोऽस्तीतिकृतःप्रश्नउत्तरितः।।प्रियंनैकंचैवतदृंत्वनेनंतदनेकत्वेचयथाछंद्यं त्ये-| धे-|
नाथयोर्विलासोमोन्मथोभविष्यतीत्यभिप्रायगर्भितः।।अन्यथादूरंतस्तेमनोरथइत्यस्यासंगत्यापत्ते
रुत्तरंतुस्फुटत्वात्तदगर्भितं।।एकवर्णस्यकृतेतन्विदेशंदेशमटाम्यहं।।तस्यदुष्प्रापताहेतोश्चिंताक्रांतम
नोमम।।अत्रकस्यहेतोश्चिंताक्रांतंतेमनइतिकस्याश्चित्स्फुटार्थेग्रामीणायाःप्रश्नेकस्यचिन्नागरिकस्या
द-| त्तरंरूपंयद्दृष्टंदासितदाममचिंतागमिष्यतीत्यभिप्रायगर्भं।।रोगस्यतेचिकित्सांनिदानमालोच्यसुंदरिक ३१६
रिष्ये।।माहंतकातराभूरसत्क्रियायांनितांतनिपुणोऽस्मि।।अत्रनापृष्टःकस्यचिद्ब्रूयादित्यादिनीत्यावैद्यकर्तृ

कप्रतिज्ञोन्नीतःप्रश्नोवैद्यरोगस्यमेचिकित्सांकरिष्यसीत्याकारोविदग्धनायिकारूपायावस्त्रयावैशिष्ट्या
त्संभोगरूपेणाभिप्रायेणगर्भितः।।उत्तरमपितेनैवाभिप्रायेणगर्भितंप्रश्नोत्तरयोर्द्वयोरपिनिरभिप्रायत्वेत्व
मिवपथिकइतिकथितमेवोदाहरणं।।एतेऽप्युन्नीतप्रश्नभेदाअप्युदाहार्याःकिमितिकृशासीतिपद्यमपिच एतानिबद्धप्र-
तुर्णांनिबद्धप्रश्नभेदानामुदाहरणभावमर्हतिवक्तुर्वैदग्ध्यावैदग्ध्यव्यवच्छेदेति।।अत्राहुः।।अलंकारेत्व श्नभेदा-।
स्मिन्प्रश्नोत्तरगतमसकृदुपनिबद्धत्वंजीवातुःतथैवचमत्कारोदयात्तेनसकृत्प्रश्नस्यसकृदुत्तरंनालंका
रस्यभूमिःनचोन्नीतप्रश्नोत्तरेऽव्याप्तिः।।उन्नीतस्यप्रश्नस्यैकत्वादनुपनिबंधात्तदुत्तरस्याप्येकत्वादितिवा
च्यंप्रश्नगतमुन्नीतत्वमत्रोत्तरेणाक्षिप्तत्वंनविवक्षितंकिंतुप्रश्नोत्तरपरंपरायांप्राचीनोत्तरश्रवणजन्यत्वमा

र॰गं॰ त्रं॥यथा॥श्यामंयज्ञोपवीतंतवकिमितिमषीसंगमात्कुत्रजातःसोयंशीतांशुकन्यापयसिकथमभूत्त
३९७ ज्जलंकज्जलाक्तं॥व्याकुर्वन्नरदीनक्षितिरमणरिपुस्त्रीणांभृत्पक्ष्मलाक्षीलक्षाक्षीणाश्रुधारासमुदि श्रा-|
तसरितांसर्वतःसंगमेन॥अत्रकुत्रजातइत्यादिःप्रश्नोमषीसंगमादित्याद्युत्तरश्रवणादुन्नीतइत्युन्नीत
उच्यते॥आद्यप्रश्नस्त्वनुन्नीतोप्युत्तरोत्थापनार्थंनिबद्धइति॥एवंचास्मिन्मतेप्रागदर्शितान्युन्नीतप्रश्नोदाह
रणान्यनुदाहरणान्येव॥अलंकारस्यास्यद्वैविध्यमपिनप्रश्नस्योन्नीतत्वनिबद्धत्वाभ्यांकिंतून्नीतत्वाभ्यां नु॰ नीत(ला+
ज्ञेयं॥वस्तुतस्तुप्रश्नोत्तरयोराकूतगर्भत्वेनावतेवचमत्काराभासकृदुपादानापेक्षाकृतविरहेत्वसदुपा ३९७ कृ-|
क्ष-| दानकृतश्चमत्कारोपेक्षितेनिबद्धप्रश्नेआक्षिप्तप्रश्नेतुप्रश्नाक्षेपकृतंचमत्कारंयदिमन्यंतेसहृदयास्तदास

कृदुपादानेप्यलंकारत्वमस्तुप्रकारांतरेणाप्यस्यभेदाःसंभवंति॥पद्यांतरवर्त्तित्वेनपद्यबहिर्वर्त्तित्वेनत्तावद्
द्वैविध्यंतत्राद्यस्याभिन्नवाक्यादीर्णत्वभिन्नवाक्यादीर्णत्वाभ्यांपुनर्द्वैविध्यंपद्यांतर्वर्त्तिपद्यबहिर्वर्त्तिनोर्द्वयो
रप्युत्तरयोःसकृच्छ्रुतिपर्याप्तत्वेनशब्दावृत्तिपर्याप्तत्वेनानेकेषांप्रश्नानामेकपदनिवेदितोत्तरत्वेनप्रका
रांतरैश्चबहुप्रभेदत्वं॥दिङ्मात्रेणोदाहरणं॥किंकुर्वतेदरिद्राःकासारवतीधरामतोज्ञनरकःपावनस्त्रि
लोक्यां॥ ॥इतिश्रीरसगंगाधरेपंडितराजाभिधानभट्टजगन्नाथविरचितोरसगंगाधरःसमाप्तः॥ ॥
इदंपुस्तकंशके१७८१सिद्धार्थिनामसंवत्सरेकार्त्तिकेमासेशुक्लपक्षेसप्तम्यांतिथौभौमवासरेस
माप्तिमगमत्॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥ छ ॥ छ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

र. गं.
३१८

Dr. BHAU DAJI
MEMORIAL